MSS No. 307 Subject Philosophy

Name of MSS Muktavali Prakash

Author Dinakara Bhatta

Period ________ Folios 224

Script Sanskrit Source Prithi Pal Singh

Missing Folios 144A-145

त. प्र. ॐ श्रीगणेशायनमः श्रीसरस्वत्यैनमः श्रीगुरवेनमः संध्यायाः प्रणतिं दलेगिरिजयासेर्ष्यं र
१ समालोकितेरोषंमालिनि माकृथास्त्वदपरानान्यास्तिवद्यामम किंतु त्वामहमानमानिमनसि
ध्यात्वानवैवा कृतीरित्यहर्षितशैलराजतनयाहसः शिवः पातु नः १ सिद्धांतगह्वरमैक
भावनापरिशीलिता श्रीकेशवनिर्मितासेयंकृतिर्मननुतांमुदं २ सत्येकस्मिन्नपि बाधकेसाधकस्य
ह्रस्वस्याप्यकिंचित्करत्वेन प्रतिबंधकाभावस्यावश्यमपेक्षितत्वात्तयाप्रकृतग्रंथसमाप्तिप्रतिबंधकदु
कृपद रितैर्विघ्नविघातायकृतंभगवन्नत्यात्मकंमंगलंशिष्यशिक्षार्थमादौनिबध्नाति प्रणम्येति मंगलस्य
समाप्तिंप्रति विघ्नध्वंसद्वाराहेतुत्वमितिसिद्धांतस्थितिः तत्रानन्यथासिद्धनियतपूर्ववृत्तित्वरूपकार
णत्वघटकानन्यथासिद्धत्वांशग्रहे व्यापकत्वरूपांशग्रहे स्वस्वव्यापारेतरयावत्कारणसत्वेयत्सत्वे ।वा ८
वश्यंयत्सत्वंयदभावेऽवश्यंयदभाव इतिनियमघटितयोर्नियतान्वयव्यतिरेकयोः कारणत्वेमानाभा रे५
वेपिअन्वयव्यतिरेकाभ्यांविशिष्टएतद्रूपकारणत्व ग्रहे इतिरिक्तकारणताग्रहेवातयोर्हेतुतयानस्व
हकृतप्रत्यक्षप्रमाणगम्यत्वस्ययद्यपिनात्रसंभवः मंगलसत्वेपिसमाप्त्यसत्वान्मंगलाभावेपिसमा
प्तेश्चेत्यन्वयव्यतिरेकव्यभिचारात् तथापिसमाप्तिफलकत्वेलाघवमितिज्ञात्वासहकृतंशिष्टाचार लाघवर
हेतुकंसफलत्वानुमानमेवात्रमानेजन्मांतरीयमंगलसंदेहेनव्यतिरेकव्यभिचारसंशयेपिग्राह्य हरे
विषयत्वरे

1A

संशयस्यानुमित्यप्रतिबंधकतया समाप्तिकारणत्वेऽनुमिते समाप्तिरूपकार्येण जन्मांतरीयमंगा
लानुमानान्न व्यतिरेकव्यभिचारः मंगले सति समाप्त्यभाववत्स्थले तु मंगलानाश्यविघ्नसत्त्वाद् नं ततो
ऽप्यन्नविघ्नसत्त्वादेतेनान्वयव्यभिचारोऽपि अत एव तत्र छंदकया मध्येपि मंगलमाचरंति एवं चास्तु विर
नाशिनः कालांतरभाविफलजनकत्वव्यापारं विनानुपपन्नमिति विघ्नध्वंसद्वारा समाप्तिं प्रति मंगलं हे
तुरिति संप्रदायः नव्यास्तु मंगलं विनापि नास्तिकादिग्रंथसमाप्तेर्न तत्र तद्धेतुः न च चरमवर्णरूपाया ध्वर
मवर्णध्वंसरूपाया वा समाप्तेरकारणनिष्ठतया आत्मनिष्ठस्य मंगलस्य तज्जन्यविघ्नध्वंसस्य वा व्यधिक
रणतया कारणत्वासंभवेन स्वप्रतियोगिचरमवर्णोत्कृत्स्नकृतिमत्त्वसंबंधे चरमवर्णध्वंसरूप
समाप्तिप्रत्याश्रयतयाऽऽत्मनिष्ठप्रत्यासत्त्या हेतुत्वस्य वक्तव्यत्वे तथा जन्मांतरीयमंगलानुमाना
न्न व्यभिचार इति वाच्यं जन्मांतरीयसमाप्तिप्रवृद्धिरूपशिष्टेसदाचरणानुमितिसमाप्तेरेव तत्फलत्वेन का कल्वं ४
रीत्वे तु जन्मांतरीयसमाप्तेरपि पुत्रेहि स्वर्गेत्वपुत्रमात्रफलकत्वश्रवणदामुष्मिकसाधारणफ
लकत्वं तस्मादात्मनिष्ठप्रत्यासत्त्याकारणत्वे तु जन्मांतरसमाप्तिप्रवृद्धिरूपापि मंगलकरणापत्तेः स्वप्रतियोगि
चरमवर्णोच्छेदकतासंबंधेन चरमवर्णध्वंसरूपसमाप्तिं प्रति स्वोत्पत्त्यवच्छेदकजातीयतासंबंधेन शरी

त॰प्र॰
२

2

कर्तृकत्वस्याव्यभि
चारस्य दुर्वचत्वात्
अन्यविघ्नस्य च त
स्य विघ्नवज्जातीय
शरीर ८४

रनिष्टप्रत्यासत्त्या कारणतायाः अवश्यं वाच्यतया नास्तिकशरीरेऽवच्छेदकतया मंगलस्य तज्जन्यविघ्नध्वं-
सस्य चाभावेन व्यतिरेकव्यभिचारान्न कारणत्वसंभवः ननु विघ्नस्य लीयस्समाप्तित्वमेव तज्जन्यतावच्छे-
दकं तत्र च न व्यभिचारः विघ्नस्य लीयत्वं च विघ्नवज्जातीयशरीरकर्तृकत्वं मंगलजन्यविघ्नध्वंसविशि-
ष्टत्वं वा विशिष्टत्वं च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वस्वाव्यवहितोत्तरत्व[illegible]न्त्रिकत्वोभयसंबं-
धेन जन्मान्तरीयमंगलजन्यविघ्नध्वंसस्य च स्वावच्छेदकावच्छिन्नप्रतियोगिकत्वसंबंधेन नास्ति [illegible]स-
मासावभावेन तस्याः कार्यतावच्छेदकानाक्रान्तत्वादिति चेन्न प्रथमस्य समाप्त्यव्यवहितपूर्वं विघ्नासत्त्वे-
न तस्य विशेषणत्वासंभवात् उपलक्षणत्वेन प्रथमज्ञानुष्ठितसमाप्तेरपि उपलक्ष्यमानविघ्नवज्जातीयशरी-
रनिष्टकृतिजन्यत्वरूपस्य तत्कर्तृकत्वस्य दुर्वचत्वात् द्वितीये तु समाप्त्यव्यवहितपूर्वक्षणे तन्मध्ये र-
क्तित्वेन निवेशे वाव्यवहितोत्तरत्वस्य वक्तव्यतया तु अनुगमात् कारणस्य कार्यतावच्छेदकाननुग-
मात् अन्यथा काशीमरणस्यापि स्वविशिष्टमुक्तिं प्रति हेतुत्वस्य सुवचतया काशीमरणान्मुक्तिरिति श्रु-
तेर्हेत[illegible]त्वपरतयैवोपपत्तौ प्रयोजकपरत्वोपवर्णनस्यासंगत्यापत्तेः नच तमेव विदित्वेति श्रुत्या
तत्त्वज्ञानस्यैव मुक्तिसामान्यहेतुत्वप्रतिपादनेन तस्य साक्षात्कारणत्वासंभवात् श्रुतेः प्रयोजकत्वप-
रत्व[illegible]मेवेति वाच्यं तथापि तत्त्वज्ञानद्वारा हेतुत्वस्यादुष्टत्वात् विघ्नध्वंसद्वारा समाप्तौ मंगलस्येव
नवस्य जन्यतत्त्वज्ञानविशिष्टमुक्तिं प्रति काशीमरणस्य हेतुत्वेऽप्यप्रतीत्यन्यथासिद्ध्या न तन्मुक्तिहेतुरि हरे
२

त्ति वाच्यं स्वजन्यविघ्नध्वंसविशिष्टसमाप्तिं प्रति मंगलस्य हेतुत्वेपि तस्यादृष्टांतरत्वात् कस्मादन्यथासिद्धत्वया मंग
लं न समाप्तिहेतुः एतेन काशीमरणविशिष्टमुक्तौ काशीमरणस्य हेतुत्वे स्वापत्तिः तत्त्वज्ञानमद्वारीकृत्य तज्जनकत्वे हेतु
ति निरूपणायैव पंचम्याः प्रयोजकत्वपरत्वमिति निरस्तं तथापि तद्धेतुत्वसमाप्तिहेतुताबोधकमन्यत्र सत्यभा
वे नोक्तं दृष्टिमंगलेऽन्यथासिद्धेर्दुर्वारत्वादिति नचेति विघ्नसमाप्यतामिति कामनया तदाचरणात्समाप्तौ
स्तत्फलत्वमिति वाच्यं नागृहीतविशेषणान्यायेन विघ्नध्वंसकामनाया आवश्यकत्वात्तस्यैव तत्फलकत्वा
त् नहि यदुद्दिश्य यत्क्रियते तत्तद्धेतुः चैत्यवंदनादेरपि स्वर्गफलकत्वापत्तेः तज्जनकीभूतज्ञानस्य भ्रम
तया नतत्वेति चेत् अत्रापि समाप्तिजनकत्वज्ञानस्य भ्रमत्वमादाय विवादसंभवात् पाकप्रवृत्तिकालेत्तृप्ति
कामनावत्तृप्तौ भयत्रेष्टसाधनताज्ञाने समाप्तिकामनायाज्ञ उपपत्तेरिति न किंचिदेतत् अत
एव नास्तिकसमाप्तिं प्रति योगिव्यावृत्तचरमवर्णे वैजात्यं स्वीकृत्य विजातीयचरमवर्णध्वंसरूपसमाप्तिं प्र
ति मंगलं हेतुरिति निरस्तं पुरुषविशेषजन्यतावच्छेदकजातिव्याप्यानन्तजातिकल्पने प्रमाणाभावात्
अन्यत्र क्लृप्तेनैवान्यथासिद्धिसत्वाच्च तस्माद्विघ्नध्वंस एव मंगलस्य फलं समाप्तिस्त्वन्यत्र क्लृप्तसामान्यसाम
ग्रीत एवोपपद्यत इति प्राहुरिति निष्कृष्टं पल्लवितेन अयमत्रोत्कृष्टः परमस्मात्प्रकृष्ट इति ज्ञानविशेष एवच
मस्कारपदवाच्यस्तत्कुतो लभ्यत इत्यत आह परमात्मानमिति परमत्वं च नित्यज्ञानादिमत्त्वेन सर्वोत्कृष्ट।
त्वं तथा च समानसंवित्संवेद्यतया सर्वस्मिन्नतदपेक्षया प्रकृष्टत्वे ज्ञाते सर्वोन्नतः पाति निखिलस्मिन्नप्यपकृष्टत्व

त०प्र० ज्ञानान्नमस्कारनिर्वाह इतिभावः ननु त्वप्रममहत्परिमाणवत्त्वं परमत्वं नाहत्त्वपरिमाणविशिष्टात्मत्वस्यत्वा
२ वेच्छयाऽव हत्त्वे विसत्वेन नमस्कार्यतावच्छेदकत्वाभावात् केचित्तु यद्यपि नित्यस्य स्वरूपयोग्यत्वे फलाव
श्यंभाव इति नियमेन सुखसमवायिकारणतावच्छेदकतया सिद्धस्यात्मत्वस्य स्वीकारे सुखोत्पत्त्यापत्तेः
3 तादृशनियमाभावेपि चात्यंतजनकत्वार्हत्त्वरूपेणैव कारणताया व्याप्यत्वादीश्वरे आत्मत्वजाति
मत्त्वे प्रमाणाभावस्तथाप्यात्मपदशक्यतावच्छेदकतयाऽऽत्मत्वजातिस्तत्साधारणी सिध्यति कार्यताव
च्छेदकतया कारणतावच्छेदकतया च जातिसिद्धिवत् सतिबाधके शक्यतावच्छेदकतयापि जातिसिद्धे
र्दृष्टत्वात् असतिबाधक इति विशेषणाद्घटाभाववत्पदशक्यतावच्छेदकतयाऽभावत्वजातिसिद्धिः
जन्यभावत्वावच्छिन्नकारणतानिरूपितकार्यतावच्छेदकतया ध्वंसत्वादेरपि जातित्वापत्त्यात् तद्विशेष
णस्य भवतोप्यावश्यकत्वादित्याहुस्तच्चिंत्यं तथासति विभुपदशक्यतावच्छेदकतया विभुत्वमपि जातिः
सिद्ध्येत् न चेष्टापत्तिः एवंविधानेन जातिकल्पने प्रमाणाभावात् कारणतावच्छेदकतया कार्यतावच्छे
दकतया जातिसिद्धिरित्येवाङ्गीकरणीया एवं च सुखसमवायिकारणतावच्छेदकात्मत्वजातेरीश्वरसाधा
रण्ये मानाभावः वस्तुतस्तु न हि शक्यतावच्छेदकतया जातिसिद्धिरिति ब्रूमः येनोक्तानुपपत्तिरुद्भाव्ये
त् अपि तु सुखसमवायिकारणतावच्छेदकत्वेन जीवात्मनि सिद्धस्यात्मत्वस्यैश्वरे ज्ञानात्मव्यवहारबलेन तत्र
संबंधमात्रमीश्वरे कल्प्यते नित्यस्येत्यादिनियमस्य चाप्रयोजकत्वात् अदृष्टरूपसहकार्यंतराभावादेव राम
२

3A

कार्याभावस्योपपन्नत्वात् अन्यथा जनकत्वावच्छिन्नरूपेणैव कारणताकल्पने च प्रमाणाभावः अन्यत्वप्रयुक्तं प्र
कृते च श्रोतात्मव्यवहारस्यैव प्रमाणत्वेनात्यन्ताजनकसाधारणरूपेणापि कारणत्वकल्पने दा तिविर
हात् न च स्वत्वसमवायिकारणतावच्छेदकं द्रव्यत्वमेवातिप्रसक्तात्मत्वस्यावच्छेदकत्वे बाधकाभावा
दिति वाच्यं कारणतायामतिप्रसक्तस्यैव कारणतावच्छेदकत्वे यागगगनादिविभुकारणत्वसंबंधकल्पने गौर
वात् अन्यथासत्त्वेनापि हेतुतापत्तेः संभवति व्याप्यधर्मे कारणतावच्छेदके व्यापकधर्मेणान्यथासिद्धाव
तिप्रसक्तेरेव बीजत्वात् न स्यात्स्वद्रव्यत्वेपि तुल्यत्वात् आत्मत्वेन व्याप्तिपि श्रोतात्मव्यवहारबलादीश्वरेपि
कारणत्वसंबंधस्य कल्पनीयतया अतिप्रसक्तेरभावादित्यं चात्मपदशक्यतावच्छेदकत्वमपि तस्यैवेति सि
द्धं नवीनास्तु नष्ट एव पूर्वदेशसंयोगे उत्तरदेशसंयोगोत्पत्तिरत उत्तरदेशसंयोगे पूर्वदेशसंयोगः प्रतिबंधक
को वाच्यस्तत्र न तावत् पूर्वदेशत्वमुत्तरदेशाभिन्नत्वं उत्तरदेशाभिन्नजन्तुरूपपूर्वदेशसंयुक्तस्यैवेषोत्तरदे
शासंयोगात् किंत्वात्मत्वेन तथा चात्मसंयोगत्वेन प्रतिबंधकत्वे न्यायात एवं च तत्प्रतिबंधकतावच्छेदक
कोटिप्रविष्टत्वेनात्मत्वजातिसिद्धिः विनिगमनाविरहेण तस्यादीश्वरसाधारण्यमपि नचैवमीश्वर एक
स्मिन्नेव सा जातिरस्तु नत्वनेकेषु जीवात्मस्विति वाच्यं एकव्यक्तित्वेन जस्याजातित्वासंभवात् नादृशार
धर्मस्वीकारेपि च प्रत्येकं जीवमात्रायवि विनिगमनाविरहतादवस्थ्यात् न चात्मनिरूपितत्वविशिष्टसंयो
गत्वेन प्रतिबंधकत्वे आत्मनिरूपितत्वसंयोगत्वयोर्विशेष्यविशेषणभावे विनिगमनाविरहेण विजाती

यसंयोगत्वेनैव तत्प्रतिबंधकत्वं स्यात् तथा च तत्प्रतिबंधकतावच्छेदककोटिप्रविष्टत्वान्नात्मत्वजा-
तिरिति वाच्यं संयोगसंबंधेनात्मनो विनिगमनाविरहेणाप्रतिबंधकत्वस्य दुर्वारत्वात् न चैवं तज्जाते-
रीश्वरवृत्तगगनादिष्वपि सत्वप्रसंग इति वाच्यं गगनादीनामीश्वरानतिरिक्तत्वेन तन्त्राधारत्वेपि क्षति-
विरहात् इति पुनर्निर्व्यलीकः पंथा इति प्राहुः प्रणम्येति क्त्वान्तपदस्य च क्रियान्तरमपेक्ष्यते इत्यनेनान्वयः नम-
स्कारस्येष्टहेतुर्नमः पदेनैव संभवेपि प्रणामस्य कर्त्तव्यत्वाय तथा पूर्वभावे दर्शिते शिष्यास्तथैवं कुर्वन्त्विति र-
शिष्यशिक्षार्थमेव क्त्वान्तेन निर्देशः अत्र च प्रशब्देन भक्तिश्रद्धातिशयो द्योत्यते युक्तिमुक्तिभिरित्यनेन यु-
क्तीनां मुक्तस्य साहचर्यप्रदर्शनेन समष्टित्वं मंजरीपदेन स्वीयवाक्यावलीनां कोमलत्वं च समुचितं मद्धति
साम्यं मन्वप्रतीष्टसाधनताज्ञानस्य हेतुत्वात् प्रयोजनज्ञानं विना कथमेतत्प्रवर्तेतामित्यस्य [illegible] तगाह
इहेत्यादि मननोपायमात्मनस्तत्त्वज्ञानं निखिललोकानिमोक्षमुख्योपायमामनन्तीति योजना त-
था च सकललोकामनाविषयीभूतापवर्गजनकतत्त्वज्ञानप्रयोजकत्वेन [illegible]प्रवृत्त्यनुपपत्तिरिति भावः
मोक्षमुख्योपायत्वे मुमुक्षुप्रवृत्तिप्रयोजकीभूतताभावप्रतियोगित्वं केचित्तु काशीमरणादितो विश्रुवणान-
धिकारि स्त्रीशूद्रादिलोकस्य मुक्तिसंभवे न तत्त्वज्ञानाभावस्य तदभावे प्रयोजकत्वाभावात् लोकप-
द श्रवणाधिकारिपरं तथा व्याख्येयं तथा च श्रवणाधिकारिलोकमुक्त्यभावे तत्त्वज्ञानाभावस्य प्रयोज-
कत्वेन नोक्तदोष इति व्याचक्षते तन्न तदसत्त्वे सर्वेषां अधिकारिब्राह्मणादीनामपि काशीमरणादितो [illegible] मुक्ति शुद्धा०

4A

संभवेन तथा विवक्षिते ऽनुपपत्तेर्जागरूकत्वात् तस्मात्तत्त्वज्ञाने मोक्षसमुच्चयोपायत्वं स्वाव्यवहितोत्त
रक्षणोत्पत्तिकमुक्त्यभावप्रयोजकीभूताभावप्रतियोगित्वमेव वक्तव्यं तच्च चलोकत्वानुपपत्तिः तथा
चलोकपदं यथाश्रुतमेव अत एव काशीमरणजन्यमुक्तेर्मननोपायकतत्त्वज्ञानाजन्यत्वात् वि
मोहेति काशीमरणप्रयोज्यमोक्षस्त्वर्थ इति निपुणतरमूहनीयं स्वसमानाधिकरणदुःखप्राग अवच ५
भावासमानकालीनदुःखध्वंसत्वं मुक्तित्वं दुःखध्वंसस्येदानीमपि सत्वेनास्मदादीनामपि मुक्त्या
पत्तिवारणाय कालीनान्तं मुक्त्यात्मकदुःखध्वंसस्याप्यन्यदीयदुःखप्रागभावसमानकालीनत्वात् वामदेव
शुकात्मनामप्यमुक्तत्वप्रसंगात् स्वसमानाधिकरणत्वं प्रागभावविशेषणं नच दुःखासमानकालीनत्वेनै
वसामंजस्यात्प्रागभावेनिव्यर्थमिति वाच्यं यथासन्निवेशेन वैयर्थ्याभावात् तथाप्यनतिप्रयोजनकत्वे स्व
समानाधिकरणदुःखासमानकालीनदुःखध्वंसत्वमेव मुक्तित्वमित्यास्तां तल्लक्षणं ननु स्वसमानाधिक
रणदुःखासमानकालीनदुःखध्वंसत्वस्य मुक्तित्वरूपत्वे तस्य तत्त्वज्ञानजन्यतावच्छेदकत्वानुपप
त्तिः स्वपदस्य दुःखध्वंससामान्यपरत्वे पुरुषान्तरीयदुःखध्वंससमानाधिकरणदुःखासमानकालीनदुः
खध्वंसस्येदानीमप्रसिद्ध्यापत्तेः स्वपदस्य तत्तद्दुःखध्वंसपरत्वे च सामान्यतो मुक्तित्वस्यैक्याभावेन मुक्ति
त्वावच्छिन्नं प्रति तत्त्वज्ञानत्वेन हेतुतायाः असंभवदुक्तिकतापत्तेरिति चेन्न स्वसामानाधिकरण्य कालिक

त॰प्र॰ विशेषणतो मयसंबंधेन दुःखवान्सत्तद्भिन्नदुःखध्वंसत्वस्यैव मुक्तित्वरूपत्वात् अत्र च स्वत्वस्य परिचायक
५ कतया नोक्तविकल्पावसर इति अत्र च ज्ञानादीनां लौकिकत्ववारणाय विमुक्तसमवेतयोग्यविशेषगुणाना
मात्मावच्छिन्नं प्रति स्वोत्तरोत्पन्नविशेषगुणत्वेन कारणतया नानन एवमुक्तात्मकदुःखध्वंससंभवेन अतः
तत्त्वज्ञानत्वेन हेतुतायां मानाभाव इति यदि विभाव्यते न दा दुरितवद्भिन्नदुरितध्वंसत्वमेव मुक्तित्वमवसेयं
न चाग्रे दुरितानुत्पत्त्या दुरितवद्भिन्नदुरितध्वंसत्वस्यार्थसमाजग्रस्तत्वात्कथं जन्यतावच्छेदकत्वमिति
वाच्यं प्रमाणाभावस्यैवार्थसमाजग्रस्तधर्मस्य कार्यतानवच्छेदकत्वबीजतया प्रकृते मुक्तित्वज्ञानकार्य
कारणभावबोधकवेदस्यैव बीजत्वेनार्थसमाजग्रस्तत्वेपि कार्यतावच्छेदकत्वे बाधकाभावात् न
च सुखदुःखाभावयोरन्यतरस्यैव पुरुषार्थत्वेन मुक्तेरपुरुषार्थत्वप्रसंग इति वाच्यं बलवद्द्वेषविषयाभा
वत्वेन पुरुषार्थत्वस्य दुःखाभाववद्दुःखजनकदुरितध्वंसेपि संभवादिति ननु तथापि काशीमरणान्मु
क्तिरिति वाक्येन काशीमरणस्यापि साक्षान्मुक्तिहेतुत्वप्रतिपादनान्मुक्तित्वावच्छिन्नं प्रति तत्त्वज्ञानत्वे
न हेतुत्वे व्यभिचार एवेति चेन्न तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनायेति श्रुत्या तत्त्वज्ञा
नस्य मुक्तिसामान्य एवं भावे दर्शिते काशीमरणस्य तत्त्वज्ञानद्वारा मुक्तिप्रयोजकत्व
मित्येव तदर्थात् सम्मुक्तिकं चेत्तत्र अन्यथा तयोः परस्परजन्यमुक्तौ व्यभिचारेऽभयत्रा प्यव्यवहितोत्तर ५

पाव्यवहितोत्तरत्वनिवेशोऽवशिष्ट इति काशी गङ्गामरणादिजन्यतत्त्वज्ञानेव्यभिचारवारणाय श्रवणादिजन्यतावच्छेदककोटावव्यवहि
तोत्तरत्व

5A

रत्वनिवेशे गौरवात् नच काशीमरणस्य तत्त्वज्ञानं प्रति हेतुत्वेपि श्रवणादिजन्यतत्त्वज्ञानेव्यभिचारवार
णाय परं काशीमरणजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशस्यावश्यकत्वात् श्रवणादि
जन्यतत्त्वज्ञानेव्यभिचारवारणाय परं काशीमरणजन्यतावच्छेदककोटावव्यवहितोत्तरत्वनिवेशोऽनतिनिवे
शस्यैकस्यैव संभवात् भवन्मते तु काशीमरणजन्यमुक्तौ व्यभिचारभियात त्त्वज्ञानजन्यतावच्छेदककोटावव्य
वहितोत्तरत्वनिवेशः एवं तत्त्वज्ञानजन्यमुक्तौ व्यभिचारवारणाय काशीमरणजन्यतावच्छेदककोटाव
व्यवहितोत्तरत्वनिवेशावश्यकत्वे जातिगौरवादिति ननु तथाप्युभा[illegible]भ्यामेव पक्षाभ्यां यथा खिपपत्ति र्णयति;
तथैव ज्ञानकर्मभ्यां प्राप्यते शाश्वती गतिरित्यनेन कर्मणामपि मुक्तिहेतुत्वप्रतिपादनात् कथं तत्त्वज्ञानस्यै
व मुक्तिहेतुत्वमिति चेन्न तस्य तत्त्वज्ञानप्रतिबंधकाधर्मध्वंसद्वारा तत्त्वज्ञान एवोपक्षयात् ननु मुक्तिं प्रत्येव
साक्षात्[illegible]स्य हेतुता नान्यः पन्था विद्यतेऽयनायेति श्रुतिविरोधात् तमेतं वेदानुवचनेन ब्राह्मणा विविदि
षंति यज्ञेन दानेन तपसानाशकेनेति श्रुतिविरोधाच्च किंच यत्याश्रमविहितकर्मण एव हेतुत्वे गृहस्थ
स्यामुक्तत्वप्रसंगः कर्मणैव हि संसिद्धिमास्थिता जनकादयः आह कृतसत्यवादी च गृहस्थोऽपि विमुच्यत
इति गृहस्थस्यापि मुक्तिश्रवणात् गृहस्थाश्रमविहितकर्मण एव हेतुत्वे च यतेरमुक्तत्वप्रसंगात् नहि मु
क्तौ वैजात्यमस्ति येनोभयोरपि हेतुत्वमुपपादनीयमिति अत एव काशीमरणस्य कर्मणां वा साक्षान्मुक्तिहेतु.

त॰प्र॰ ६ पायत्वनिरासाय मोक्षमुख्योपायमित्यत्र मुख्येत्युक्तं स्वेतरमोक्षासाधारणकारणकमित्यर्थः मुक्तित्वाव
च्छिन्नकार्यतानिरूपितकारणत्वं चात्रासाधारणकारणत्वं तेन प्रागभावादीनां तद्व्यक्तित्वेनेह तुल्येपि न क्षति
रिति दिक् नन्वात्मापरोक्षादिभ्योपि वैराग्यात्कारकतत्त्वज्ञानमिदानीमपि संभवति न तत्कुतो न मुक्तिरित्यत
6 आह मननेोपायमिति मननमुपायो यस्येत्यर्थः तथा च श्रवणमनननिदिध्यासनप्रयोज्यमेव तत्त्वज्ञा
नं मुक्तिहेतुः तच्चेदानीं न संभवतीति भावः यद्यपि श्रवणोपायमित्येव वक्तुमुचितं तथापि मकारानु
प्रासवशान्मननोपायमित्युक्तं युक्तिभिरनुचिंतनं मननं साधकबाधकप्रमाणैर्वन्यासस्य मुक्तिः श्रो
तव्यः श्रुतिवाक्येभ्यो मन्तव्यश्चोपपत्तिभिरिति स्मरणात् श्रुतस्यार्थस्य नैरंतर्येण दीर्घकालमनुसं
धानं निदिध्यासनमिति बोध्यं तदिति तत्त्वज्ञानमित्यर्थः नीलपटो सुंदरः स च मानीत्यादौ सर्वेषां
मुक्तनीलाद्युपस्थापकत्वं किंच मुख्यविशेष्यस्येवत्वतः अत्रापि पूर्वोपस्थितत्वज्ञानस्येवोपस्था
नात् ननु तन्मननमित्यर्थः मननस्य मुख्यविशेष्यतया पूर्वमनुपस्थितत्वेन तद्बोधासंभवादि
त्यत उक्तं संधेयं प्रमाणाधीनमिति प्रमाणज्ञानप्रयोज्यमित्यर्थः श्रवणादिप्रयोज्यमात्मनीतरभि
न्नत्वज्ञानमेव हि तत्त्वज्ञानं तच्चेतरपदार्थतत्त्वज्ञानं विना न च तत्प्रमाणज्ञानं विना प्रमेयप
व्यवस्थितेः प्रमाणज्ञानाधीनत्वादिति प्रमाणनिरूपणमावश्यकमिति भावः यद्वा तत्त्वज्ञान ६

6A

स्य मननद्वारा प्रमाणाधीनत्वसूचनाय मननोपायमित्युक्तं वस्तुतस्तूद्देश्यव्यवहितोपस्थितत्वविशेषणा
स्यापि तच्छब्देन परामर्शादर्शनात् अव्यवहितोपस्थितमुख्यविशेष्यमात्रोपस्थापकत्व[illegible]मित्यस्य निय
मस्यौत्सर्गिकत्वात् तात्पर्यस्य नियामकत्वाच्च नोक्तातिप्रसंगः एवं च तच्च मनने चेत्यर्थः साधकबाधकप्र
माणोपन्यासरूपयुक्तिभिरनुचिंतनरूपमननस्य प्रमाणज्ञानं विनाऽसंभवादिति भावः प्रमाणं निरू
पयत इति लक्षणस्वरूपप्रामाण्यादिप्रकारकवर्त्तमाननिरूपणविषयं प्रमाणमित्यर्थः तत्रेति प्रमा
णे निरूपणीये इत्यर्थः प्रमायाः करणमिति अत्र प्रमाणपदवाच्यत्वं लक्ष्यतावच्छेदकं प्रमाकरणत्वं च ल
क्षणं नातः प्रमाणत्वस्य प्रमाकरणत्वरूपत्वेन लक्षणलक्ष्यतावच्छेदकयोरभेदापत्तिः यथा चैतयोरभे
दे नेष्टापत्तिस्तथा विवेचनीयमुपरिष्टात् ननु प्रमाकरणमिति विहाय प्रमायाः करणमित्युक्तौ किं बीजमिति
ति चेन्न लक्षणवाक्यघटकयावत्पदबोध्यस्यैव लक्षणत्वेन प्रमानिरूपितकरणत्वस्य लक्षणत्वलाभाय त
थोक्तेः अन्यथा तत्पुरुषे एकपदलक्षणया प्रमासंबंधभिन्नकरणमित्यलाभे इतरभेदानुमाने हेतोर्वैय
र्थ्यस्य दुर्वारत्वात् गुरुत्वाच्च लक्षणवाक्यतात्पर्यविषयीभूतार्थस्यैव लक्षणत्वोपगमेन प्रमानिरूपितकर
णत्व एव तात्पर्येण तस्यैव हेतुत्वोपपादने तु प्रयासगौरवमिति वस्तुतस्तु प्रमाकरणमित्यभेदान्वयभ्रम
निराकरणाय प्रमायाः करणमित्युक्तिः असाधारणधर्मो हि लक्षणं यथा सास्नाऽऽङ्गवती गोरिति सास्ना
वत्त्वमात्रं सरटे ऽश्रृंगवत्त्वमात्रं महिष्यादावतिव्याप्तमिति सास्नाऽश्रृंगवत्त्वं विशिष्टधर्मो लक्षणं तदितरव्य

त॰प्र॰ त्तिव्यसतिसकललक्ष्यवृत्तित्वमसाधारणत्वं शृंगवत्त्वगगनरूपवत्त्वादेर्गोलक्षणत्ववारणाय सत्यन्तं तद्वृत्ति
७ त्वमात्रकस्यानायथायथ्यं सन्निवेशः तदिदमुक्तं [illegible] तेन लक्षणान्येव पदानि व्याख्यातानि यैः पदैरितिव्या
प्त्यव्याप्त्यसंभवदोषास्त्रिराक्रियंते अलक्ष्ये लक्षणगमनमतिव्याप्तिः यथा शृंगवत्त्वं गोरिति लक्ष्यैक
देशे लक्षणस्यावर्त्तनमव्याप्तिः यथा कृष्णा गोरिति लक्ष्यमात्राप्यवर्त्तनमसंभवः यथैकशफत्वं गोरि
ति इत्थं चात्र दिक् क्रियाकरणकुठारादावतिव्याप्तिवारणाय प्रमापदोपादानं दोषदुष्टचक्षुरिंद्रिये भ्रमा
त्मकज्ञानकरणत्वादतिव्याप्तेः प्रपदं प्रमा प्रमाणमित्युक्तौ च चक्षुरिंद्रियेऽव्याप्तिरतः प्रमाकरणमिति र
विशिष्टमुपात्तं ननु दोषदुष्टचक्षुरिंद्रियेणापि कदाचित्प्रमाजननात्तत्र प्रमाणव्यवहारोऽस्त्येव न
चदुष्टतादशायां तादृग्व्यवहारापत्तिरिति वाच्यं नहीदं कालघटितं लक्षणं येन तस्मिन्कालेऽव्याप्तिः स्यात्
किंतु तदिंद्रियेऽव्यापादनीयं तच्च तु दोषदुष्टत्वदशायामस्त्याप्तेरिति चेन्न यत्र घ्राणादिना [illegible] ख
ज्वचक्षुर [illegible] त्वे भ्रममेवोत्पादयतं तलोणापि तत्र प्रमायाजनकेनापि प्रमाणव्यवहारस्याक्षोकाराद्दूर
तिव्याप्त्यापत्त्या प्रपदस्यावश्यकत्वात् दोषवशेनान्यहीयेदं त्वस्यैव भानेन संभवेन सर्वांशे भ्रमस्यापि सं
भवात् यद्यपि च सर्वज्ञानं धर्मिण्यभ्रान्तं प्रकारे तु विपर्यय इति नियमात् सर्वांशे न भ्रमसंभवः तथापि
तत्त्वदर्शिनां सदायैव प्रमाणव्यवहारात् पीतः शंख इति भ्रमजनके पीतत्वांशे प्रमाणत्ववारणाय तन्नस्य र
ता१ मोलाभायप्रपदस्यावश्यकत्वात् अनुभवस्यापि संस्कारद्वारा स्मृतिरूपज्ञानकरणत्वादतिव्याप्तेश्च ७

7A

प्रपद्यमिति ननु विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुत्वात्प्रमात्वज्ञानं विना कथं प्रमाकरणत्वज्ञान
मित्यत आह प्रमा चेति यद्वा ननु प्रमात्वं यथार्थज्ञानत्वं तच्च स्मृतेरपि प्रमात्वेन तत्करणेऽनुभवे प्र प२
दोषादानेऽप्यतिव्याप्तेस्तादवस्थ्यमित्यत आह प्रमा चेति तथा चानुभवत्वघटितप्रमात्वस्य स्मृतावसत्त्वेन
तत्करणेऽनुभवे नातिव्याप्तिरिति भावः अत्र चानुभवत्वस्यैव प्रमात्वरूपत्वे भ्रमेऽतिव्याप्तिः यथार्थत्वस्यै
व तद्रूपत्वे च स्मृतावतिव्याप्तिरित्युभयोपादानं ननु प्रमात्वस्यानुभवत्वघटितत्वे प्रमाणाभावः न चैवं
स्मृतिरूपप्रमाकरणतयाऽनुभवस्य प्रमाणत्वापत्तिः इष्टत्वात् अनुमित्युपमितिशाब्दभिन्नप्रमाक
रणत्वेन च प्रत्यक्षप्रमाणस्य विभजनात् न विभागव्याघातोऽपीत्यत आह यदाहुरिति मानमित्यादि य
थार्थानुभवो मानमनपेक्षतयेष्यते इतियावत् भावस्तु शमानमिति प्रमितिर्यावत् अनपेक्षतयेत्यत्र
प्रामाण्यानधीनप्रामाण्यकतयाऽस्मृतेः प्रमात्वं ह्यनुभवप्रमात्वाधीनमिति स्मृतेरप्रमात्वमित्यर्थः य
द्वा साधारणेन सहकारी साधनमनोवहिर्गोचरां प्रमां जनयति तस्यैव प्रमाणान्तरत्वमिति नियमेनानुभवसह
कारेण मनसः स्मृतिरूपप्रमाजनकत्वादनुभवस्य प्रमाणान्तरत्वापत्तिरतः स्मृतिसाधारणमेवानुभवत्वघ
टितं प्रमात्वमवश्यं वाच्यं एवं प्रत्यक्षानिवेशानुमितिसन्निवेशप्रत्यक्षोपमितिशाब्दभिन्नप्रमाकरणत्वेना
नुभवस्यानुमानेऽन्तर्भावापत्तिः विनिगमनाविरहादिति भावः तद्वतीति तद्विशेष्यकत्वसतीत्यर्थः न
चैवं वह्निं गुञ्जापुञ्ज इति भ्रमो गुञ्जापुञ्जवह्नीति विपरीतभ्रममेव ... वह्नित्ववद्विशेष्यकत्वस्य गुञ्जांशे वह्नित्व

त॰प्र॰ प्रकारकत्वस्य सत्त्वात्तत्रापि प्रमात्वापत्तिरिति वाच्यं तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वस्य विवक्षितत्वात्
८ त् तद्वन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताशालित्वमिति तन्निष्कर्षः तथा च तत्संबंधावच्छिन्न
8 तद्वन्निष्ठविशेष्यतानिरूपिततत्संबंधावच्छिन्नतन्निष्ठप्रकारताशालिज्ञानत्वं तत्संबंधावच्छिन्नतत्प्र
कारकप्रमात्वमिति फलितं तत्संबंधावच्छिन्नतद्वत्त्वनिवेशात्तेन संबंधेन तद्विरहेऽपि कालिकादिसंबं
धेन तद्वत्त्वस्य सत्त्वेऽपि न भ्रमेऽतिव्याप्तिः एवं रजत एव संयोगादिसंबंधेन रजतत्वप्रकारकज्ञानस्यापि
प्रमात्वापत्तिरिति तत्प्रकारतायां तत्संबंधावच्छिन्नत्वनिवेशः लक्ष्येऽलक्षणं गमयति भवति हि
ति तद्वति रजतत्ववति तदवगाहि रजतत्वावगाहि अलक्ष्ये लक्षणसत्त्वप्रसक्तिव्याजेन तद्वतीत्यस्य
न ८ व्यावृत्तिमाह शुक्तावित्यादिना न तद्वतीति रजतत्ववतीत्यर्थः किन्तु रजतत्वाभाववति रजतत्वावगा
हित्वाद्भ्रम एवेति भावः एतेन तदभाववति तत्प्रकारकं ज्ञानं भ्रम इति भ्रमलक्षणं सूचितं ननु वृक्षः
कपिसंयोगीति ज्ञानस्यापि मूलावच्छेदेन कपिसंयोगाभाववति संयोगप्रकारकत्वाद्भ्रमत्वापत्तिरि
ति चेन्न प्रतियोगिव्यधिकरणतदभाववत्त्वस्य विवक्षितत्वात् वृक्षे कपिसंयोगाभावस्य न प्रतियोगि
व्यधिकरणत्वमिति नानुपपत्तिरिति न चैवं मूले वृक्षः कपिसंयोगीति ज्ञानस्य भ्रमत्वानुपपत्तिरिति वाच्यं
तत्रावच्छेदकत्वांश एव भ्रमत्वाङ्गीकारात् न तु संयोगांशेऽपीति ननु तद्वति तत्प्रकारकं ज्ञानत्वस्यैव प्रमा
त्वरूपत्वे संशयेऽतिव्याप्तिरतो निश्चयत्वघटितमेव तल्लक्षणमित्याशयेनाशंकते नन्वेवमिति एवं नि ८

8A

श्चयत्वघटितस्यैव प्रमात्वरूपत्वे रजतत्वाद्याहइति एकधर्मिकविरुद्धनानाकोटिकं ज्ञानं संशय इति रजतत्व-
संशये रजतत्वरजतत्वाभावौ कोटी तत्र रजतत्वाभाववति रजतत्वाभावप्रकारकत्वाभावात् रजतत्वाभा-
वांशे ऽप्रमात्वे पि रजतत्ववति रजतत्वावगाहित्वात् तदंशे प्रमात्वमिष्यत एवेति भावः निश्चयत्वाघटित-
मेव प्रमात्वमित्यत्र प्राचीनसम्मतिमाह तदुक्तमिति स्मृतिव्यावर्त्तनायानुभवत्वघटितपरमंगीकुर्वतिना
नु संशयव्यावर्त्तनाय निश्चयत्वमपीति भावः शंकते शाखेति वृक्षश्चिन्नत्वित्येव पाठः कपिसंयोगरहि-
ते वृक्षे कपिसंयोगत्वाभावान्न प्रमात्वसंभव इत्यतः कपिसंयोगवति वृक्ष इति तत्रापि मूलावच्छेदेन कपि-
संयोगसत्वे प्रमात्वे इष्टापत्तिरतः शाखावच्छेदेनेति सावधारणं शाखावच्छेदेनैव न तु मूलावच्छेदेनापी-
त्यर्थः वृक्षः कपिसंयोगीति प्रत्ययस्य प्रमात्वे विवादात् मूल इति मूलावच्छेदेनेतोगगनादिसंयो-
गसत्वान्मूले वृक्षः संयोगीति प्रत्ययस्य प्रमात्वं सर्वसम्मतमेवेत्यतः कपिसंयोगीति अवच्छेदकप्रत्ययस्त-
कपिसंयोगावच्छेदकत्वप्रत्ययस्तु न तथा न प्रमा तस्य मूलस्य तदनवच्छेदकत्वात् कपिसंयोगान-
वच्छेदकत्वात् कपिसंयोगवति वृक्षे कपिसंयोगप्रकारकत्वात् कपिसंयोगांशे प्रमात्वमेव अवच्छेदक-
त्वे च त्ववच्छेदकत्वप्रकारत्वाभावाच्च तदंशे ऽप्रमात्वमिति भावः ननु स्मृतिभिन्नज्ञानत्वमनुभवत्वमित्य-
त्र संस्कारजन्यज्ञानत्वमेव स्मृतित्वं वाच्यं तच्च प्रत्यभिज्ञाद्यतिप्रसक्तमनुगतं दुर्वचं संस्कारत्वेन तत्-
ज्जन्यत्वं च स्मृतित्वस्य जातित्वमन्तरा संस्कारत्वेन जनकतायामानाभावेनासंभवि तस्या जातित्वे च सं-

त॰प्र॰ स्कारजन्यत्वघटितत्वाद्गुरुतरं लक्षणं स्यात् यदि च स्मृतित्वं जातिस्तदवच्छिन्नप्रतियोगिताकभेदस्यैव च
९ निवेशेन लाघवमिति विभाव्यते तदानुभवत्वमपि जातिस्तद्विशिष्टत्वमेव लक्षणमास्तां संस्कारत्वमेतावत्सुस्प
ष्टेत्याशयेनाह जातिविशेषो वेति ननु अत्र किं मानमत आह अनुभवामीति अनुगतप्रतीतेरनुगत
धर्मं विनाऽनुपपत्तेरनुगतधर्मोऽभ्युपेयस्तस्य चोपाधिस्वरूपत्वे गौरवाज्जातित्वमेवेत्याशय इति भावः अ
भावेऽप्यनुगतप्रतीत्याऽभावत्वरूपताऽतिसिद्धापत्तेरिति बाधकं विनेति तत्र तु जातिबाधकस्यैव सत्त्वात्
नित्यानेकसमवेतत्वस्यैव जातित्वात् तथा चोक्तं व्यक्तेरभेदस्तुल्यत्वं संकरोऽथानवस्थितिः रूपहानिरसं
बंधो जातिबाधकसंग्रहः व्यक्तेरभेदः आकाशस्य व्यक्त्यैक्यं यथा आकाशत्वादि व्यक्तेस्तुल्यत्वं स्वन्यूनानतिरिक्तव्य
क्तिकत्वं यथा घटत्वकलशत्वादि परस्परात्यन्ताभावसमानाधिकरणयोर्धर्मयो[illegible]रेकत्र समावेशः पो॰ ८
संकरः यथा भूतत्वमूर्तत्वादि अनवस्था यथा जातित्वादि विशेषत्वरूपजातिस्वीकारे रूपहानिः
रूपस्य लक्षणस्य सामान्यभिन्नत्वे सति समवेतत्वे च सति सामान्यरहितत्वरूप[illegible] विशेषलक्षण
स्य हानिः विशेषत्वरूपजातेरेव तद्व्यावर्तकत्वात् स्वत एव व्यावृत्तत्वरूपविशेषस्वरूपहानिरिति
वार्थः असंबंधः असमवेतत्वं यथा कंबुग्रीवादिमत्त्वादीति केचित्तु स्मृतौ व्यभिचारवारणाय विशिष्ट
वैशिष्ट्यावगाह्यनुभवत्वस्यैव विशेषणतावच्छेदकप्रकारकनिर्णयजन्यतावच्छेदकत्वमुपेयम्
तथा च तज्जन्यतावच्छेदककोटिप्रविष्टत्वेनानुभवत्वं जातिरित्याहुः अत्र च स्वर्गो घटमिति शाब्दबो ९

9A

धानेतरं स्वर्गादिकमनुभवामीति प्रत्ययापत्तेः साक्षात्कारत्वरूपमेवानुभवत्वमनुभवामीति प्रत्ययवि
षय इति ननु तादृशप्रत्यक्षविषयतया प्रत्यक्षादिचतुष्टयसाधारणत्वसिद्धिः यद्यपि विशेषणतावच्छे
दकप्रकारकनिर्णयजन्यतावच्छेदकतया तत्सिद्धिरिति तदपि न नित्यव्यावर्तनाय जन्यानुभवत्वमेव
कार्यतावच्छेदकमुपगन्तव्यं तत्र जन्यत्वं ध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं वा कालिकसंबंधेन
घटत्वादिमत्त्वं वेति निर्विकल्पकसाधारणतया जन्यप्रत्यक्षप्रमात्ववृत्तिवैजात्यमेव कार्यतावच्छेदकं वाच्यं त
था च कुतः सकलसाधारणानुभवत्वजातिसिद्धिरित्यात्मसदपि निवेशेन प्रमाकरणत्वघटकं क
रणत्वलक्षणेति व्यापारवदिति कपालेति तत्राप्यसाधारणत्वस्य सत्त्वादिति भावः असाधारणेति अ
साधारणकारणत्वं कार्यतानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं ईश्वरज्ञानस्य तूपादानप्र
त्यक्षविधया कार्यत्वावच्छिन्नं प्रत्येव हेतुत्वान्नातिव्याप्तिरिति भावः ननु कार्यत्वावच्छिन्नकार्यतानिरू
पितकारणताशून्यत्वमसत् तथात्वे कार्यमात्रं प्रति कालस्य हेतुत्वेन कालोपाधिविधया सूर्यादीनाम
पि कार्यमात्रं प्रति हेतुतयाऽसंगत्यापत्तेरिति ध्येयं ननु फलायोगव्यवच्छिन्नं कारणमेव करणमत एवा
त्मा ज्ञानकरणं तस्य नित्यत्वेन फलायोगव्यवच्छेदाभावात् इत्यभिप्रायेणाशंकते नन्वेवमिति एवंवि
धलक्षणकरणे व्यापारस्य सत्त्वादिति जन्यज्ञानत्वावच्छिन्नं प्रत्यसाधारणकारणत्वाद्वेत्यपि द्रष्टव्यम्

तत्र॰ तज्ज्ञान्यत्वे सतीति तज्जन्यत्वस्य फलेऽपि सत्वात्तज्जनक इति तज्जन्यजनकत्वस्य चेश्वरज्ञानादावपि सत्वात्तज्ज
१९ न्यत्वे सतीति स्यादेवेति सहकारिविरहे फलायोगाव्यवच्छेदस्यासंभावितत्वात् सहकारिसमवधाने फलायोग
10 व्यवच्छेदस्य चासामान्यपिसत्वेन त्वन्मते योव्यवहारोऽनुपपन्नः व्यवहर्तृभेदस्यैव व्यवहारभेदे नियामकत्वादि
गतेरितिभावः नन्वेकस्यैव कर्तृत्वकरणत्वस्वीकारे कर्तृकरणमिति नानाविधव्यवहारोऽनुपपन्नः व्यवह
व्य ५ र्तृभेदस्यैव व्यवहारभेदे नियामकत्वादित्यतआह उपाधीनामिति तथा चोपाधेयसंकरेऽप्युपाधेरसंकरादिति
न्यायेन व्यवहर्तृव्याभेदेऽपि व्यवहर्तव्यताव्यवच्छेदकभेदादेव व्यवहारभेदः यथा घटरूपव्यवहर्तृव्याभेदे
पि घटत्वद्रव्यत्वादिरूपव्यवहर्तव्यतावच्छेदकभेदादेव घटो द्रव्यमित्यादिव्यवहारभेदः एवं च पाचकपाठ
कादिव्यवहारोऽपीतिभावः अतएवेति एकस्यैव कर्तृत्वकरणत्वस्वीकारादेवेत्यर्थः अतएव आत्मनः
करणत्वस्वीकारादेव तृतीयाकरणार्थकत्वादितिभावः अंगीचक्रुरित्यस्वरसोद्भावनं तद्बीजं तु सर्व
स्यैवाखंडोपाधेरेवानुगतप्रतीतिविषयत्वे सखंडोपाधेः कुच्छेदएवेति न च कर्त्रादिव्यावृत्तकरणत्वनिर्वच
नानुपपत्त्या तस्याखंडोपाधिरूपत्वमेव न्याय्य इति वाच्यं तस्य तत्साधारण्येऽप्यदोषात् व्यवहारभेदस्य व्यव
हर्तव्यतावच्छेदकभेदादेवान्यत्राप्युपेयत्वादिति नन्वेवमप्यात्मनः प्रमाणत्वापत्तिरिति चेन्न अनु
भवत्वव्याप्यजात्यवच्छिन्नप्रमावृत्तिकार्यतानिरूपितकारणताशालित्वे सति व्यापारवत्त्वस्यैव प्रमाण

10A

स्वरूपत्वेनात्मनि तदसंभवात् इति यत्तु तमोभिन्नवास्तवत्वस्यालोकजन्यतावच्छेदकत्वादालोकेऽ
तिव्याप्तिः जातत्वावच्छिन्नेत्यत्रावच्छेदकतापर्याप्तिनिवेशस्यावश्यकत्वः इदं च जन्यज्ञानत्वावच्छिन्नं प्रतिया
त्मत्वेन हेतुतया ज्ञानत्वजातेरवच्छेदककोटिप्रविष्टत्वेपि कार्यतावच्छेदकताद्यधिकरणत्वाभावान्नात
एव वारणेऽनुभववत्त्वव्याप्येति नोपादेयमिति तन्न तथापि नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वोपगमे
ज्ञानत्वावच्छिन्नं प्रत्येवात्मत्वेन हेतुतया ज्ञानत्ववारणाय तद्दावश्यकत्वात् इति चार्वाकमते प्रत्यक्षस्यै
व प्रमाणत्वात् भट्टानां चानुपलब्धेरपि प्रमाणत्वान्नियमायाह चतुर्विधमिति तत्रेति चतुर्विधप्र
माणमध्ये इत्यर्थः तत्र प्रथमोद्दिष्टं प्रत्यक्षप्रमाणं लक्षयति साक्षात्कारस्वरूपेति अनुमानादावतिव्या
प्तिवारणाय साक्षात्कारेति साक्षात्कारप्रमेत्युक्ते साक्षात्कारस्य प्रमेति भ्रमः स्यात् साक्षात्कारिप्रमेत्यु
क्तावपि तथैव स्यात् अतो रूपेति इदं साक्षात्कारो[illegible]णीति प्रतीतिः इंद्रियेति तथा च न साक्षात्कारत्वरूपजाति
सिद्धिरिति भावः ज्ञानमात्रेस्येति तथा च मनोरूपेंद्रियजन्यत्वस्यानुमित्युपमित्यादावपि सत्त्वेन तत्रापि
साक्षात्करोमीति प्रतीत्यापत्तिरिति भावः नन्विंद्रियत्वावच्छिन्नजनकतानिरूपितजन्यत्वमेव विषयः मन
सस्तु मानसज्ञान एवेंद्रियत्वेन हेतुत्वं अनुमित्यादिकं प्रति मनस्त्वेनेत्यत आह इंद्रियाप्रतीतावपीति
इंद्रियत्वाप्रतीतावपीत्यर्थः तथा चेंद्रियत्वज्ञाने विनाप्युत्पत्तिधर्मज्ञानाभावान्नतादृशधर्मज्ञानस्य वि
षयत्वसंभव इति भावः वस्तुतस्तु साक्षात्कारत्वरूपजात्यभावे इंद्रियत्वेन कार्यकारणभावासंभव इति तथा

त॰प्र॰ इंद्रियत्वेनेंद्रियजन्यत्वस्य साक्षात्कारत्वरूपत्वासंभवान्नेत्यस्य सत्तारणीयं परं तु नन्विंद्रियनिरूपितः
११ विषयतासंबंधावच्छिन्नजन्यताशालिज्ञानत्वमेवास्त्वित्यादिव्याख्येयं तद्विषय इत्यत आह इंद्रियेण
ति इंद्रियाजन्यज्ञानेपीत्यर्थः तथाप्रतीतेः साक्षात्करोमीतिप्रतीतेरित्यर्थः एतेन ज्ञानाकरणकं ज्ञानं
प्रत्यक्षमितिनिरस्तं तदज्ञानेपि तत्प्रतीतेर्जायमानत्वादिति अवश्याभ्युपेयत्वात्तु पत्वादि जातिरे
वनाख्या विषय इत्याह नापीति अननुगतत्वादिति अनुगतप्रतीतेश्चानुगतधर्मं विनानुपपत्तेरिति
तिभावः ननूपनीतभानानंतरं साक्षात्करोमीत्यप्रतीतेर्लौकिकविषयताया एव ज्ञानकत्वेनावश्य
कत्वाल्लौकिकविषयताशालिज्ञानत्वमेव साक्षात्करोमीतिप्रतीतिप्रतीतिविषयः एवं अनुगत
प्रतीत्यैव जातिसिद्धौ वि[illegible] अनुगतप्रतीत्या विभुत्वरूपजातिसिद्धिः स्यात् किंतु कारणताव
च्छेदकतया कार्यतावच्छेदकतया वा तत्सिद्धिः नचावं ततः संभवति नचेंद्रियत्वावच्छिन्नकारणता
निरूपितकार्यतावच्छेदकतया तत्सिद्धिरितिवाच्यं इंद्रियत्वस्यैकस्याभावात् इंद्रियनिष्ठैकैक
त्वघ्रुवेजात्यस्वीकृत्य विजातीयैकत्ववत्वरूपस्य तस्यासंभवेपि कार्यमात्रवृत्तिधर्मस्यैव कार्यतावः
च्छेदकत्वेन साक्षात्कारत्वस्य नित्यवृत्तितया जन्यतावच्छेदकत्वासंभवात् जन्यत्वनिवेशे च जन्यत्व
स्य ध्वंसप्रतियोगित्वप्रागभावप्रतियोगित्वादिविकल्पग्रासेन निर्वक्तुमशक्यतया जन्यसाक्षात्कारः
मात्रवृत्तिवैजात्यस्वीकृत्य तस्यैव जन्यतावच्छेदकत्वमवश्यकतया कुतस्साक्षात्कारे प्रविष्टतया साक्षात्कार ११

11A

त्वरूपजातिसिद्धिः एवं चाक्षुषस्पार्शनादौ विशिष्यचक्षुरादीनां हेतुत्वावश्यकत्वमानात्तादृशां कार्यकार
णभावे मानाभावाच्चेत्यत आह यद्वेत्यादि जन्याया धीस्तज्जन्यमात्रवृत्तिर्या जातिस्तच्छून्यज्ञानत्वं सा
क्षात्कारत्वमित्यर्थः लक्ष्ये लक्षणं गमयति भवतीतीति अनुमितित्वादीत्यादिपदादुपमितित्वशा
ब्दत्वपरिग्रहः तत्र हि जन्यज्ञानव्याप्तिज्ञाने अतिदेशवाक्यार्थज्ञाने पदज्ञानादि तज्जन्यमनुमित्यादि
तन्मात्रवृत्त्यनुमितित्वादि तच्छून्यत्वं साक्षात्कारत्वस्यार्थः अत्र च ज्ञानत्वं साक्षात्कारत्वमित्युक्ताव
नुमित्यादावतिव्याप्तिरतः शून्यान्तं जातिशून्यज्ञानत्वं साक्षात्कारत्वमित्युक्तावसंभवः ज्ञानत्वादिजा
तेरेव तत्र सत्त्वादित्यतो जन्यधीजन्यमात्रवृत्तीति जातिविशेषणं ज्ञानत्वस्य च जन्यधीजन्यभिन्ने ईश्व
रसाक्षात्कारे निर्विकल्पके च वृत्तित्वान्न तन्मात्रवृत्तित्वमिति नासंभवः जन्यधीजन्यवृत्तीत्युक्ताव
पि तथा ज्ञानत्वादेर्जन्यधीजन्यसविकल्पकवृत्तित्वादतो मात्रेति जन्यधीजन्यभिन्नावृत्तित्वस
तिजन्यधीजन्यवृत्तित्वं च तन्मात्रवृत्तित्वं चाक्षुषत्वादिजातेरपि धीजन्यमात्रवृत्तित्वादव्याप्तिरतः
प्रथमजन्यपदोपादानं तस्य च जन्यज्ञानाजन्यनिर्विकल्पकवृत्तित्वादन्न तन्मात्रवृत्तित्वे जन्यज
न्यमात्रवृत्तीत्युक्तावपि निर्विकल्पकस्य जन्यशरीरादिजन्यत्वेन चाक्षुषत्वादेर्जन्यमात्रवृत्तित्वाद
व्याप्तिरतो धीपदोपादानं जन्यधीमात्रवृत्तीत्युक्तावपि चाक्षुषत्वस्य जन्यमात्रवृत्तित्वादतो द्विती
यजन्यपदोपादानं जन्यमात्रवृत्तीत्युक्तावपि न धेत्यतो जन्यधीति धीमात्रवृत्तीत्युक्तौ ज्ञानत्वादिक

त.प्र. मादायासंभव इति समुदितमुपात्तं जन्यधीजन्यमात्रवृत्तिधर्मशून्यत्वमित्युक्तौ सविकल्पकत्वस्यतत्त्वा
१२ त्रवृत्तित्वेनाव्याप्तिरतोऽजातिपदं सविकल्पकत्वेन जातित्वस्यासत्वादिना संकीर्णत्वे सकत्वात् समवायसंब
12 धावच्छिन्नजातिशून्यत्वं चात्र बोध्यं जन्यधाकालादिसंबंधेनानुमितित्वादेरपि प्रत्यक्षादौ संभवेना
संभवापत्तेरतस्तथैमेवच जातिपदं घटादावतिव्याप्तिवारणाय ज्ञानमिति ननु कपालप्रत्यक्षस्य का
र्यमात्रहेतुतयाकपालविषयकं कपालप्रत्यक्षरूपजन्यज्ञानजन्यमात्रवृत्ति घटत्वादिजातिसत्वा
त्तत्रनातिव्याप्तिरितिचेन्न सर्गादौकुलालभयेश्वरेणैव घटोत्पादनात् ईश्वरकपालप्रत्यक्षस्य चाजन्यतया
घटत्वादेर्जन्यधीजन्यमात्रवृत्तित्वाद्घटादावतिव्याप्तिसंभवात्संभवाच्चेतिदिक् निदिध्यासनेत्यादिनाज
न्यधीजन्यमात्रवृत्तित्व सूचितं ननु तत्वसाक्षात्कारत्वस्य श्रवणादिप्रयोज्यात्मविषयकशरीरादिभिन्नत्वप्र
कारकसाक्षात्कारत्वे तत्तु विशिष्टस्यानतिरेकात् साक्षात्कारत्वमेव तच्चेन जन्यधीजन्यमात्रवृत्तीति
कुतोऽव्याप्तिरित्यतआह सोऽतेति तथा च मुक्तित्वावच्छिन्नकार्यतानिरूपितकारणतावच्छेदकतयासि
द्धस्य तत्वज्ञानवृत्तिवैजात्यस्य निदिध्यासनादिजन्यमात्रवृत्तित्वात्तच्छून्यत्वाभावेनाव्याप्तिरितिभावः
मानसेति तथा च मानसत्वं न्यनुमितित्वादिकमेव तच्छून्यज्ञानस्य सत्वान्नाव्याप्तिरितिभावः इदमुपल
क्षणम् आराध्यत्वप्रकारकज्ञानरूपभक्तिवृत्तिभक्तित्व फलावच्छेदभावनिश्चयरूपश्रद्धानिष्ठश्रद्धात्व
रूपजात्योर्जन्यधीजन्यमात्रवृत्तित्वान्मानसादृत्तीतिजातिविशेषणमावश्यकमितिध्येयं ननुमानस

त्वं मनोजन्यत्वेन तथा चानुमितित्वादेरपि मानसत्वव्याप्तित्वाभावादनुमित्यादावतिव्याप्तिः नच तादृशजात्यप्रसिद्धिः
देवदत्तप्रभवत्वावच्छेदकशब्दवृत्तिजातेरेव तादृशत्वादित्यत आह मानसत्वं चेति ननु मानसत्वस्य जातित्वे प्रमा
णाभाव इत्यत आह आस्तां विस्तर इति आत्ममनस्त्वावच्छिन्नं प्रति विजातीयमनःसंयोगत्वेन हेतुतया तज्ज
न्यतावच्छेदकतया मानसत्वजातिसिद्धिरिति भावः वैशिष्ट्यावगाहिज्ञानं निर्विकल्पकं नदेवसा
त्कारः अयं घट इति वैशिष्ट्यविषयक इति शेषः घटत्वाद्यलीकेति तन्मतेऽनुगतधर्मो घटत्वादिनर
तद्व्याप्तिनिरूप एव व्यावृत्तिनिरूपात्मान्योन्याभावः अभावश्च तन्मतेन तुच्छत्वमलीक इति यावत् तथा चाभावरूपघ
टत्वस्यालीकस्य विशिष्टज्ञानेऽभानात् सदसतोस्संबंधाभावात् विशिष्टोप्यलीक एव अतस्तद्विषयकं
च ज्ञानं भ्रम इति सविकल्पकं ज्ञानं भ्रमः निर्विकल्पके घटत्वादेरभानात् पारमार्थिकविषयकत्वेन तत्रै
व साक्षात्कारत्वप्रमात्वजस्यैव प्रत्यक्षत्वादिति भावः बाधकं विनेति विषयविसंवाद एव हि प्रमात्वबाधकः
यथा शुक्तौ रजतत्वस्य प्रकृते च घटत्वस्याविसंवाद एवेति भावः ननु विषयसंवादस्य बाधकत्वेन त्वसोऽपि
पित्वलीकविषयत्वस्येत्यभिप्रेत्याह नचेति अलीकत्वासिद्धेरिति अभावस्यापि घटादिपदार्थवदनुभू
यमानतयाऽलीकत्वमप्रसिद्धमिति कुतोऽन्यव्यावृत्तिरूपघटत्वस्यालीकत्वं एवं अघटव्यावृत्तिरित्यत्र घट
भिन्नं यत्किंचित्तत्प्रतियोगिकस्य भेदस्य पटेपि सत्वात् घटभिन्नं यावत्तत्प्रतियोगिकत्वावच्छिन्नरूपभेदघ
टत्वं वाच्यं तथा च यावत्प्रतियोगिज्ञानाभावाद्घटत्वबुद्धेरुच्छेद एव स्यात् यदि चाभावत्वेन भावज्ञान एव प्र

त॰प्र॰ तियोगित्वानपेक्षा अत्र च स्वरूपतएव घटत्वभानोत्वानुपपत्तिरिति विभाव्यते तथापि घटत्ववानिति बुद्धे
१२ रुच्छेदापत्तिः तत्र घटत्वत्वेन घटत्वस्य भानात्तस्य च भवन्मते यावत्प्रतियोगिज्ञानं विना ऽसंभवादिति किंचा
13 तद्धावृत्तिभिन्नस्यैव घटत्वादेरुपलंभात्तदभाववत्त्वमिति कुतो लौकिकत्वसंभव इति भावः भट्टादिभिरीश्वरज्ञानं
गीकारेण तज्ज्ञानस्य सुतरामसंभवित्वेन साक्षात्कारस्यैकविधत्वमेवोरीक्रियत इत्यतस्तन्मतं निराकर्तु
माह सचेति कार्यमात्रे प्रत्युपादानप्रत्यक्षस्य हेतुतया परमाण्वादिरूपोपादानप्रत्यक्षं विनाद्व्यणुका
दिरूपकार्यस्यानुत्पत्तेरीश्वरस्यावश्यमंगीकर्तव्यतया च तज्ज्ञानसत्त्वेन तस्य द्वैविध्यमेवोचितमिति भावः
द्वैविध्यमेव विवृणोति नित्यइत्यादिना नित्यत्वं प्रागभावाप्रतियोगित्वे सति ध्वंसाप्रतियोगित्वं सत्यंत
निवेशात् ध्वंसे ऽतिव्याप्तिः प्रागभावे ऽतिव्याप्तिवारणाय विशेष्यदलनिवेशः अनित्यत्वं च प्रागभावप्र
तियोगित्वं ध्वंसप्रतियोगित्वं वा अन्यदिति भगवत्तं वेध्यन्यदित्यर्थः अस्मदादिसाक्षात्कार इति याव
त् न च निर्विकल्पकसविकल्पकयोर्मध्ये वैशिष्ट्यानवगाहीति वैशिष्ट्यविषयताशून्यज्ञानत्वमित्य
र्थः निर्विकल्पके विशेषणज्ञानसंपत्त्यर्थं घटत्वविषयकत्वमावश्यकं व्यक्तिभानं विना जातिभानासंभ
वादिति घटविषयकत्वमपि तस्यांगीक्रियते वैशिष्ट्यविषयकत्वे तु न किंचित्साधकमिति वैशिष्ट्यानव
गाहित्वमक्षतं एवं च सविकल्पके च वैशिष्ट्यस्यापि विषयत्वान्न तत्रातिव्याप्तिरिति भावः नृसिंहाका
रज्ञानस्वीकारेण तन्निरूपितवैशिष्ट्यविषयताशून्यज्ञानत्वं तन्निर्विकल्पकमिति ध्येयं ननु वस्तुः संयोग १२

चक्षुःसंयुक्तसमवायरूपकारणबलाद्घटपटत्वयोर्भानवत्सत्ताः संबद्धविशेषणतारूपकारणबलात्तत्संबंध
स्यापि भानेबाधकाभावः प्रतिबध्यप्रतिबंधकभावकल्पनेगौरवात् तथा चेदं लक्षणमसंभवग्रस्तमित्यत
आह निराकारं चेति निष्प्रकारकं निर्विशेष्यकं चेत्यर्थः क्वचिन्नैव पाठः वस्तुतस्तु वैशिष्ट्यानवगाही
त्यस्य संसर्गमर्यादया वैशिष्ट्यानवगाहीत्यर्थः वैशिष्ट्यनिष्ठसांसर्गिकविषयताशून्यत्वे तत्त्वमिति तु नि
ष्कर्षः ननु प्रकारतासामान्यशून्यं विशेष्यताशून्यत्वमपि लक्षणाकर्तुं शक्यते तत्कथं नोक्तमित्यत इष्टाप
त्यात एवाह निराकारं चेति निष्प्रकारकं निर्विशेष्यकं चेत्यर्थः वाकारश्चात्र अवधारणे न विकल्पे दृष्टव्य
इति पुनर्निर्व्यलीकाः पंथाः नन्वयं घट इति ज्ञानो ज्ञानं घटत्वेन जानामीत्यनुव्यवसायः तत्र विशिष्टस
न् नैयायिके घटत्वविशिष्टविषयकज्ञानवानिति तदाकारं तथा च तादृशानुव्यवसायबलात्सविकल्पक
कल्पकस्य प्रत्यक्षसिद्धत्वेऽपि निर्विकल्पकस्यानुव्यवसायागम्यत्वाभावान्न तत्र प्रत्यक्षं प्रमाणं नाप्यनुमानम
प्रयोजकत्वादिति मीमांसकमतं हृदि स्वीकृत्याशंकते तत्रेति निर्विकल्पकं चेत्यर्थः प्रत्यक्षसिद्धं अनुव्य
वसायात्मप्रत्यक्षप्रमितिगम्यं अभ्युपगमादिति नैयायिकैरिति शेषः अनुमेयं अनुमानगम्यं तच्चायं घट
इत्याकारकः जन्यघटत्वज्ञानपूर्वकः जन्यविशिष्टज्ञानत्वात् यद्यद्विशिष्टज्ञानं भवति तत्तज्ज्ञानपूर्वकं
भवतीति सामान्यमुखव्याप्तेः दंडी पुरुष इति प्रत्यक्षे दृष्टान्तः नन्वत्र कार्यकारणभावादिरूपानुकूल
तर्काभावादप्रयोजकत्वमित्यत आह तथाहीत्यादि जन्येति जन्यत्वविशिष्टज्ञानत्वावच्छिन्नं प्रति तत्र

त॰प्र॰ न्यतद्विशेषणज्ञानत्वेनहेतुत्वमितिकार्यकारणभावग्राहकानुकूलतर्कइतिभावः घटत्वज्ञानाद्धेतुविशि
१५ ष्टज्ञानवारणायतत्तद्रूपेतरभावः नित्यज्ञानवर्त्तनायचकार्यतावच्छेदकेजन्यत्वनिवेशः नित्यस्यस्वरू
पयोग्यत्वेफलावश्यंभावइतिनियमात्कारणतावच्छेदकेपिजन्यत्वनिवेशः वस्तुतस्तुसामानाधिक
14 रण्यप्रत्यासत्त्याहेतुत्वबोधनायकारणतावच्छेदकेपिजन्यत्वनिवेशनमितिबोध्यं निर्विवादमिति य
द्यानविवादस्तथापिवक्ष्यते तथाचकार्यकारणभावरूपानुकूलतर्कसत्वान्नाप्रयोजकत्वमनुमान
स्येतिभावः पदेहेतुसंगमयति भवतीचेति धारावाहिकस्थलेद्वितीयादिविशिष्टज्ञानस्यपूर्वपू
र्वविशिष्टज्ञानजन्यत्वसंभवान्ननिर्विकल्पकसिद्धिरित्यतः प्राथमिकमिति तथापि घटत्वविशिष्ट
ज्ञानेपि ननुघटत्वप्रकारकज्ञानमेवांगीक्रियतामित्याशंक्यनिराचष्टे नचेति तदानीं प्राथमि-
घटत्वविशिष्टज्ञानपूर्वं ज्ञानाभावादिति तथाचविशेषणज्ञानंविनानतस्यविशिष्टज्ञानत्वमितिभा
वः ननुइति विशेषणज्ञानाभावेनतस्यविशिष्टज्ञानाभावादित्यर्थः तदिति घटत्वविषयकज्ञान
मित्यर्थः ननुवैशिष्ट्यानवगाहिघटत्वविषयकज्ञानसिद्धावपिननिर्विकल्पकसिद्धिरित्यतआह
तदेवेति अन्यथासिद्धनियतपूर्ववर्त्तिनएवकारणत्वाज्ज्ञानान्तरीयघटत्वविशिष्टज्ञानस्यपू
र्ववर्त्तित्वादेवकारणत्वमस्त्वित्याशंक्यते नचेति अव्यवहितेति नहिपूर्ववृत्तित्वमात्रंकारणत्वघटकम
पित्वव्यवहितपूर्ववर्त्तित्वं तच्चनतत्रेतिभावः कार्यमात्रंप्रतिज्ञानत्वेनहेतुत्वादीश्वरीयज्ञानं

14A

स्यहेतुत्वमस्त्वित्याशंकते नचेति तज्जनकं घटत्वविशिष्टज्ञानजनकं सामानाधिकरण्येनेति एकस्य दं-
डज्ञाने पुरुषान्तरस्य दंडविशिष्टज्ञानवारणाय समवायसंबंधेन तद्विशिष्टबुद्धिं प्रति समवायसंबंधेन तद्वि-
शेषणज्ञानस्य हेतुत्वमिति सामानाधिकरण्यप्रत्यासत्त्या तस्य हेतुत्वेन भगवज्ज्ञानस्य हेतुत्वमिति भावः ।
धिकरणत्वात् अस्मदीयघटत्वविशिष्टज्ञानव्यधिकरणत्वात् तत्रकारणमिति घटत्वविशिष्टानुभवे
कारणमितिभावः तदेव स्मरणात्मकविशिष्टज्ञानमेव पूर्वानुभवस्य समवायसंबंधेन स्मरणपूर्वं
मसत्त्वाद्विशिष्टज्ञानत्वस्य विशेषणज्ञानकार्यतानवच्छेदकत्वेन विशिष्टानुभवत्वमेव कार्यतावच्छेद-
कं वाच्यमित्याह विशिष्टानुभवे हीत्यादिना ननु स्मरणेपि ननु विशिष्टस्मरणेपि तेन विना विशेषण-
ज्ञानेन विना नतुपपत्तेरिति विशिष्टस्मरणोपपत्तेरित्यर्थः कदाचिदपि दंडभानासत्त्वे संस्काराभावे-
नैव दंडविशिष्टस्मरणाभावात् तत्र विशेषणज्ञानेहेतुत्वस्य निरर्थकत्वात् पूर्वानुभवस्य विनष्टत्वात् वि-
शेषणज्ञानस्य स्मरणजनकत्वासंभवाच्चेतिभावः ननु पूर्वानुभवस्य नष्टत्वात् स्मरणजनकत्वासंभवेपि
विशिष्टस्मरणमेव स्मरणपूर्वं कल्पनीयमित्याह अन्यथेति अन्यथा विशिष्टस्मरणंप्रत्यपि विशेषण-
ज्ञानस्य हेतुत्वे पूर्वमनुभवस्यासत्त्वात् तज्जनकमपि स्मरणमेव वाच्यं एवं तत्रापि स्मरणान्तरमित्यनव-
स्थेत्यर्थः नन्वनुभवत्वजातेर्मानाभावेन स्मृत्यन्यज्ञानत्वस्य तद्विशेषगौरवात् विशिष्टज्ञानमात्रे
विशेषणज्ञानस्य हेतुत्वेन विशिष्टस्मरणंप्रत्यपि विशेषणज्ञानं हेतुः नचानवस्था तस्यैव निर्विकल

त॰ प्र॰ कस्मृतेरेवोपगमात् नच ममापि घटत्वविशिष्टानुभवपूर्वं घटत्वविशिष्टस्मरणस्य तत्पूर्वं च घटत्वनि-
१५ र्विकल्पकस्य कल्पनेन दोष इति वाच्यं तत्पूर्वं ज्ञानद्वयकल्पने गौरवात् तदपेक्षया घटत्वनिर्विकल्पकानु-
15 भवस्य स्वीकर्तुमुचितत्वादित्यत आह अस्तु चेति तथा सति मयापि घटत्वविशिष्टानुभवपूर्वं घटत्वनि-
र्विकल्पकस्मरणमेव कल्प्यत इति न ज्ञानद्वयकल्पने गौरवमिति भावः नच निर्विकल्पकात्मकस्मृति-
स्वीकारान्निर्विकल्पकात्मकं ज्ञानमेव सिद्धमेवेति कथं विवाद इति वाच्यं तथा सति निर्विकल्पकानुभ-
वस्यासिद्धत्वादिति ननु निर्विकल्पकं स्मरणमेवानुपपन्नं तद्धि शेष्यकतत्प्रकारकस्मृतिं प्रति तद्धि-
शेष्यकतत्प्रकारकसंस्कारस्यैव हेतुत्वात् जायमानं सप्रकारकमेव स्यात् ननु निष्प्रकारकमिति चेत् न
तद्वि[illegible]यकस्मृतिं प्रति तद्विषयकसंस्कारत्वेन [illegible]सामान्यकार्यकारणभावकल्पनात् द्विशेषणज्ञानं वि-
नाजायमानं ज्ञानं निर्विकल्पकमेव जायत इति दिक् ननु सर्वत्र विशिष्टानुभवपूर्वं विशिष्टस्मरणे स्य निर्वि-
कल्पकस्मरणस्य वा हेतुत्वकल्पने तत्स्मरणप्रभवः कारणं तदनुभवे च स्मरणान्तरमित्यनवस्था किंच पू-
र्वाननुभूतपदार्थस्याद्यानुभवे स्मरणमेव कारणं वाच्यं तच्च न संभवति तज्जनकानुभवाभावात् तज्जन्मांत-
रानुभवादेव स्मरणोपगमे च जन्मान्तरानुभूतानां घटादिपदार्थानामपि स्मृतिप्रसंगादिति चेन्न आद्यानु-
भवजनकस्मरणस्य जन्मान्तरानुभवादेव नापत्त्याऽदृष्टविशेषोद्बोधकसहकृतात्तदुत्पत्तेः नच घटादि-
स्मृतिप्रसंगः नच फलोपपत्तेरभावेनादृष्टस्योद्बोधकस्याकल्पनात् अनवस्थायाः प्रामाणिकत्वेनादु- १५

15A

इत्यादितिन किंचिदेतत् तदसंभवात् स्मरणासंभवात् नन्वदृष्टविशेषस्यैवोद्बोधकत्वं शास्त्रजन्मांतरानु
भूतं चैत्रत्वमपि स्मर्यतामित्यत आह नहीति पूर्वमिति जन्मांतरमित्यर्थः अनुभूतमिति चैत्रत्वादिजा
तेस्तत्र पूर्वशरीरवृत्तित्वेन चैत्रशरीरस्य जन्मांतरेऽभावेन तद्वृत्तिचैत्रत्वादेर्ग्राहकाभावादनुभवासंभवेन तत्
स्मृतिसंभवः तत्स्मरणस्य तदनुभवपूर्वकत्वनियमादिति भावः नन्वप्रयोजकोऽयं नियमो नादरणीय इत्य
त आह नचेति तस्य अनुभवस्य तद्धेतुत्वात् स्मरणहेतुत्वात् तथा च स्मृतित्वावच्छिन्नं प्रति अनुभवस्य हे
तुतया न तादृशनियमस्याप्रयोजकत्वमिति भावः नचेदृशकार्यकारणभावे मानाभाव इति वाच्यं तथा स
ति कदाचिदनुभूतस्य यावदंशे उपेक्षात्मकज्ञानविषयस्यास्मरणापत्तेरुपेक्षान्यज्ञानत्वेन तद्धेतुतायामा
वश्यकत्वात् नच संस्काराभावान्नेयमापत्तिरिति वाच्यं संस्काररूपव्यापारद्वारा तस्यापि हेतुत्वात् व्या
पारेण व्यापारिणोऽन्यथासिद्ध्यभावेन संस्कारेणान्यथासिद्धेरसंभवात् उपजीव्यविरोधाच्च तथाहि ज्ञा क्षुवि
नाशिनः कालांतरभाविफलं प्रति कारणत्वं व्यापारं विनानुपपन्नमित्यनुपपत्तिज्ञानाच्चिरध्वस्तानुभव
स्य कालांतरीयस्मृतिहेतुत्वोपपत्त्यर्थं व्यापारे कल्पनीये संस्कार एव व्यापारः कल्प्यत इत्यनुभवस्य का
रणत्वमुपजीव्यैव संस्कारसिद्धिरिति ननु तर्हि स्मृतित्वादनुभवध्वंसस्य व्यापारत्वमास्तां कृतमलं तेन सं
स्कारकल्पनेन न च कारणीभूताभावप्रतियोगित्वस्यैव प्रतिबंधकपदार्थत्वात् स्मृतिकारणीभूतानुभ
वध्वंसप्रतियोगित्वस्यानुभवे सत्त्वात्तत्प्रतिबंधकत्वापत्त्या न तस्य तद्धेतुत्वमिति वाच्यं प्रतिबंधकसंसर्गाभा

न.प्र. वत्वेनैव कार्यमात्रहेतुतया संसर्गाभाववत्तावच्छिन्नकारणताया एव प्रतिबंधकत्वशरीरघटकत्वात्
१६ स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन संसर्गाभाववत्वावच्छिन्नकारणताया अवच्छेदको यो धर्मस्तद्
त्वस्यैव प्रतिबंधकपदार्थत्वात् तद्धर्मावच्छिन्नकार्यतानिरूपितसंसर्गाभाववत्वावच्छिन्नकारणतानिरू
16 पितत्वावच्छिन्नप्रतियोगिताकत्वसंबंधावच्छिन्नावच्छेदकतासम्बन्धधर्मत्वस्य तद्धर्मावच्छिन्नप्रतिबंध
कत्वपदार्थत्वादिति निष्कर्षः तथा चानुभवध्वंसस्य ध्वंसत्वेन कारणतयाऽभावत्वेनाकारणत्वान्न प्र
तिबंधकत्वापत्तिरिति चेन्न हि सर्वांशोपेक्षात्मकज्ञानादपि स्मरणापत्तेः अस्मन्मते चोपेक्षात्मकज्ञानस्य
न संस्कारहेतुतया तदभावादेवास्मरणात् न च स्मरणमप्येवं तेन रूपेण हेतुत्वमस्तु कृतमेतदर्थं संस्
स्कारेणेति वाच्यं उपेक्षात्वस्यैकस्याभावेन तेन तदाक्रान्तत्वावच्छिन्नप्रतियोगिताकभेदकूटस्यैव निवे
शनीयतया स्मृतिजनकतायां सर्वांशोपेक्षाभेदानामेकत्र निवेशप्रसंगे च तेषां मिथो विशेष्यविशेषणभा
वे विनिगमनाविरहेण कार्यकारणभावानन्त्यप्रसंगात् मन्मते च संस्कारजनकतावच्छेदककोटौ स
र्वांशोपेक्षाभेदानां सांशिकोपेक्षाभेदानां च स्मृतिजनकतावच्छेदककोटौ निवेशेनैकत्र तेषामनिवेश
नाल्लाघवमखंडितमेवेति संस्कारसिद्धिरावश्यकत्वादिति कृतं पल्लवितेन ननु प्रमेयवानित्यनुभ
वे प्रमेयत्वेन चैत्रत्वविशिष्टस्यापि विषयतयानुभूतत्वादृष्टविशेषस्य च प्रमेयत्वांशे उद्बोधकत्वाकर
ल्पनेन केवलचैत्रत्वविशिष्टस्मरणापत्तेः तदंशेऽन्याप्रकारकस्मृतिं प्रति तदंशेऽन्याप्रकारकत्वेन

16A

तुत्वानुभवस्य हेतुत्वं ज्ञातिमात्रनिष्ठत्वं सघटज्ञानिष्करणपन्नेऽस्य ज्ञातित्वांशे उद्बोधकलाभस्य कल्पनेनैव
कारणेन उद्बोधकलाभालाभयोः फलोन्नेयत्वादिति चक्षुष्येव दिक्षाऽदृष्टादृष्टशरयादिमनः प्रदादिशक्तिग्रहो
पीत्यत आह किंचेति नस्मरणमिति उद्बोधकविरहादिति शेषः विशिष्टसामग्र्यभावात् घटत्वज्ञानरूपर
घटत्वप्रकारकज्ञानसामग्र्यभावात् साक्षात्कारसामग्रीतः चक्षुः संयोगचक्षुःसंयुक्तसमवायरूपर
चाक्षुषप्रत्यक्षसामग्रीतः साक्षात्कारोत्पत्तौ चाक्षुषप्रत्यक्षोत्पत्तौ नन्वेतावता साक्षात्कारोत्पत्तावपि
न निर्विकल्पकसिद्धिरित्यत आह तदेवेति घटत्वज्ञानस्यान्यकाले जायमाने प्रत्यक्षमेवेत्यर्थः अस्माकं
नैयायिकानां निर्विकल्पकमिति तथा च घटत्वज्ञानाभावाज्जायमाने घटत्वज्ञाने निष्प्रकारकमेव सि
द्धीभविष्यतीति सिद्धं निर्विकल्पकात्मकज्ञानमिति भावः ननु रक्तो दण्डो न वेति संशयानन्तरं रक्त
त्वविशिष्टदण्डवैशिष्ट्यावगाहिज्ञानानुदयात् विशिष्टवैशिष्ट्यावगाहिबुद्धिं प्रति विशेषणतावच्छेदक
प्रकारकनिर्णयत्वेन हेतुताया आवश्यकत्वात् तत एव दण्डज्ञानस्यान्यकाले दण्डविशिष्टपुरुषज्ञानानुत्प
त्तिनिर्वाहे विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य हेतुतया न च विशिष्टस्य वैशिष्ट्यमिति न्यायेन वैशि
ष्ट्यविषयताशालिबुद्धिं प्रति विशेषणतावच्छेदकप्रकारकनिर्णयस्य हेतुत्वेन दण्डज्ञानस्यान्यका
ले विशेषणांशे विशेषणान्तरत्रापि विशेषणान्तरमिति न्यायेन दण्डविशिष्टज्ञानापत्तिवारणाय न हेतुत्वमावश्य
कमिति वाच्यं तथापि तद्धेतोरिति न्यायेन विशेषणविशेष्येन्द्रियसन्निकर्षादेव विशिष्टप्रत्यक्षोत्पत्तेः

न॰प्र॰ अनुमित्यादौ नु परामर्शादिरेव नियामक इत्याशयेन मीमांसकः शंकते नन्विति हेतुतासिद्धौ विशि-
१७ ष्टज्ञानं प्रति हेतुतासिद्धौ सर्वमेतत् निर्विकल्पकादिसाधनं एवं स्यात् पूर्वोक्तन्यायानुपयुक्तिकं स्यात् त-
त्रैवेति विशेषणज्ञानस्य विशिष्टज्ञाने हेतुत्व एवेत्यर्थः मानमिति विशेषणविशेष्येन्द्रियसन्निकर्षादे-
17 वतदुपपत्तेस्तत्र प्रमाणाभाव इत्यर्थः प्रमाणाभावस्य च प्रमेयाभावव्याप्यत्वादिति भावः अन्वयव्यतिरे-
काभ्यामिति विशेषणज्ञानसत्त्वे विशिष्टज्ञानं विशेषणज्ञानाभावे विशिष्टज्ञानाभाव इत्येवंरूपान्व-
यव्यतिरेकाभ्यामित्यर्थः तदवधारणात् विशेषणज्ञानस्य विशिष्टबुद्धौ हेतुत्वावधारणात् यथान्व-
यव्यतिरेकाभ्यां दंडकारणतावत्तथा प्रकृतेपीति भावः ननु न केवलमन्वयव्यतिरेकावेव कारण-
ताग्राहकावतिप्रसंगात् अपि त्वनन्यथासिद्धान्वयव्यतिरेकावेव प्रकृते च विशेषणविशेष्येन्द्रिय-
सन्निकर्षेण विशेषणज्ञानस्यान्यथासिद्धत्वात् न तथाविधयोस्तयोः संभव इत्यत आह विस्तरस्त्वि-
ति अनुसंधेय इति कदाचिद्घट इति स्वरूपतो घटत्वप्रकारकज्ञानस्य कदाचिद्घटो जातिमानिति जाति-
त्वरूपेण घटत्वप्रकारकज्ञानस्योत्पत्तिरिति नियमनिर्वाहाय स्वरूपतो घटत्वविशिष्टबुद्धिं प्रति स्वरू-
पतो घटत्वज्ञानत्वेन जातित्वेन विशिष्टबुद्धिं प्रति जातित्वेन घटत्वज्ञानस्य हेतुताया आवश्यकत्वाद्वि-
शेषणज्ञानस्य हेतुतासिद्धिः अथ घटत्वज्ञानसत्त्वेपि कदाचिदयं घट इत्याकारकघटत्वप्रकार-
कज्ञानस्य कदाचिद्द्रव्यं घटत्ववदित्याकारकघटत्वविशेष्यकज्ञानोत्पत्तेर्निर्वाहाय मानाभावात्ते १७

17A

ज्ञानोनुपपः अदृष्टविशेषस्यैव नियामकत्वमावश्यकं तथाप्रकृतेप्यदृष्टविशेषेणैव तथाविधकादाचि
त्कज्ञानद्वयोपपत्तेरलं विशेषणज्ञानहेतुतयेति चेन्मैवं मत्येतराभावेनादृष्टस्य नियामकत्वकल्पनेपि प्र
कृतेपि तद्धर्मितरीत्या गतिसंभवेः दृष्टविशेषस्य नियामकत्वकल्पनायाग्न्याय्यत्वात् एकत्रादृष्टस्य
नियामकत्वकल्पनादन्यत्रापि तस्यैव नियामकत्वकल्पने कार्यमात्रे कारणभावमात्रोच्छेदापत्तेरिति
ननु तथापि स्वरूपतो घटत्वविशिष्टबुद्धित्वं नाम घटत्वांशेऽन्याप्रकारकघटत्वप्रकारकबुद्धित्वं न च जाति
त्वादिभासकसामग्रीसत्त्वे जायमानं ज्ञानं घटत्वांशेऽन्यप्रकारकमेवोत्पद्यते नद्दंशे जातिभासकसाम
ग्रीसत्त्वे च घटत्वांशेऽन्याप्रकारकमेव जायते इति तादृशधर्मस्य नीलेतरघटत्वादिवद्धर्मसमाजग्रस्तत्वे
न जन्यतानवच्छेदकत्वात् कथं तादृशज्ञानं प्रति स्वरूपतो घटत्वज्ञानस्य हेतुत्वकल्पयित्वा विशेषणज्ञान
स्य हेतुत्वसिद्धिरिति चेन्न जातित्वभासकसामग्रीसत्त्वेपि जातिमान् घट इति स्वरूपतो घटत्वविशिष्टबुद्ध्यु
दयात् घटत्वांशे निरवच्छिन्नप्रकारताशालिज्ञानत्वमेव स्वरूपतो घटत्वविशिष्टबुद्धित्वं तद्वच्छिन्नं प्र
ति स्वरूपतो घटत्वज्ञानस्य हेतुत्वकल्पनं यैर्विनाऽनुपपत्तिः कारणासंभवात् ननु नित्यव्यावृत्तं नाम जन्यविशि
ष्टज्ञानत्वमेव विशेषणज्ञानकार्यतावच्छेदकं तच्च जन्यत्वध्वंसप्रतियोगित्वं प्रागभावप्रतियोगित्वं वा कालि
कादिसंबंधेन घटत्वादिमत्त्वं वेत्यत्र विनिगमनाविरह इति चेन्न नित्यवृत्तिधर्मस्य कार्यतावच्छेदकत्वे तन्नि
विरहात् अथैवं कारणत्वानुपपत्तिः कारणत्वं हि कार्याव्यवहितपूर्ववर्तित्वावच्छेदेन कार्याधिकरणे दशनि

त॰प्र॰ ष्टाभावप्रतियोगितानवच्छेदकधर्मवत्वं तच्च घटाधिकरणे कपाले यत्किंचिद्घटाव्यवहितपूर्वक्षणाव-
च्छेदेन दंडाभावसत्वात्कारणत्वानुपपत्तिस्तत्कार्याव्यवहितपूर्वक्षणावच्छेदेन तत्कार्याधिकरणवृत्त्यभा-
वप्रतियोगितानवच्छेदकधर्मवत्वं वाच्यं तथा सति घटत्वावच्छिन्नप्रति रासभत्वेनापि कारणत्वप्रसंगः । य-
18 त्किंचिद्घटाव्यवहितपूर्वक्षणावच्छेदेन कपाले तस्य सत्वात् तथा च कार्यतावच्छेदकावच्छिन्नयावद्व्य-
क्ति तत्तद्व्यक्तित्वेन ध्वंसात्तत्तत्कार्याधिकरणवृत्त्यभावे प्रवेशो वाच्य एवं सति नित्यवृत्तिधर्मस्य कार्यतावच्छे-
दकत्वे कार्यतावच्छेदकावच्छिन्नयावन्मध्ये नित्यव्यक्तिरपि प्रविष्टा तया तदव्यवहितपूर्वक्षणाप्रसिद्धे-
रिति चेन्न कार्यकारणभेदेन कारणताया अभिलततया प्रकृते नित्यव्यक्तिव्यतिरिक्तव्यक्तीनामेव तत्तद्व्य-
क्तित्वेनोपादानात् तत्साधारणरूपेण कार्यत्वेपि कारणत्वबाधकाभावात् एवं समवायकालिकविशे-
षणताभयसंबंधेन विशिष्टज्ञानवत्वस्यात्वस्य कार्यतावच्छेदकत्वेन नित्यसाधारण्याभावात् वस्तुत-
स्तु जन्यप्रत्यक्षमात्रवृत्ति वैजात्यं स्वीकृत्य विजातीयविशिष्टज्ञानत्वस्यैव तत्कार्यतावच्छेदकत्वात्
चाक्षुषत्वादिना संकरभयाच्च निर्विकल्पकेपि वैजात्यस्वीकारापत्तेरीकारः । तत एव जन्यधीजन्यमात्र-
वृत्तिता दृशजातिमत्त्व वैजात्यमन्यत्वाभावाज्जन्यसाक्षात्कारे प्रागुक्तसाक्षात्कारलक्षणस्या-
व्याप्तिरिति परास्तं तस्य निर्विकल्पकसाधारण्येन जन्यधीजन्यमात्रवृत्तित्वाभावात् मानसावृत्तित्वा-
भावाच्च तल्लक्षणेनानुमानसाधारणत्वेन जातेर्विशिष्यलौकिकत्वादित्युक्तत्वादिति दिक् निर्विकल्पकं निरूप-

18A

यत्क्रमप्राप्तंसविकल्पकं निरूपयति वैशिष्ट्यावगाहीति संबंधविषयकमित्यर्थः नन्विंद्रियसंबद्धवि
शेषणतारूपकारणबलान्निर्विकल्पकेपि संबंधभानेबाधकाभावात्तस्यापि वैशिष्ट्यावगाहित्वमस्ती
त्यतिव्याप्तिरित्यस्वरसादाह सप्रकारकंचेति किंचिन्निष्ठप्रकारताशालीत्यर्थः निर्विकल्पकेच प्रकारत
याघटत्वादेरभानान्नतत्रातिव्याप्तिरितिभावः वस्तुतस्तु वैशिष्ट्यावगाहीत्यस्य संसर्गमर्यादया वैशिष्ट्या
वगाहीत्यर्थः किंचिन्निष्ठसांसर्गिकविषयताशालित्वमितिपर्यवसितोर्थः ननु किंचिन्निष्ठप्रकार
ताशालित्वमित्यपिवक्तुंशक्यतएवेतिनतु तेनोक्तमित्यतइष्टापत्त्यानतयैवाह सप्रकारकमिति इदमुप
लक्षणं किंचिन्निष्ठविशेष्यताशालित्वमित्यपिबोध्यं ननुसप्रकारकमित्यत्रप्रकारत्वनिवेशात्किंत
त्प्रकारत्वमित्यतस्तन्निरूपयति प्रकारताचेति ज्ञानेति निरूपितत्वंसप्तम्यर्थः घटत्वादेरिति निष्ठत्वं
षष्ठ्यर्थः ज्ञाननिरूपितोघटत्वनिष्ठोविषयताभेदइत्यर्थः विषयताविशेषइति विशेष्यतात्वविषय
ताप्रकारतात्वविषयतासांसर्गिकविषयतारूपत्रिविषयताभेदइत्यर्थः ननुकिंतद्विषयत्वमतआह
विषयताचेति विषयेति घटोज्ञानविषयः पटोज्ञानविषयइत्यनुगतप्रतीतिसाक्षिकइत्यर्थः स्वरूपापर
संबंधविशेषइति ज्ञानविषयस्वरूपसंबंधइत्यर्थः ननुविषयतायाः स्वरूपसंबंधत्वांगीकारेप्राचीनम
तेनतस्याज्ञानस्वरूपत्वंविषयस्वरूपत्वंवा ना[illegible]तावदाद्यः ज्ञानरूपत्वेघटभूतलवृत्तिविषयतयोरैक्ये
नघटवद्भूतलमितिज्ञानोत्तरंघटनिष्ठप्रकारतानिरूपितभूतलनिष्ठविशेष्यताशालिज्ञानवान्नहमि

न॰प्र॰ त्याद्यनुव्यवसायात् भूतलमिति प्रकारतानिरूपितघटनिष्ठविशेष्यताशालिज्ञानवानहमित्यनुव्यव-
१९ सायापत्तेः घटपटाविति समूहालम्बनस्थाने ज्ञानस्य भ्रमत्वापत्तेश्च तज्ज्ञानस्यैकेन तत्स्वरूपेण घटपटादि
19 विषयतायाश्चाभेदेन घटत्वाभाववन्निष्ठविशेष्यतानिरूपितघटत्वनिष्ठप्रकारताशालिज्ञानत्वरूपभ्र-
मत्वस्य तत्र सत्त्वात् न द्वितीयः घटभूतलसंयोगाः घटवद्भूतलमिति समूहालम्बनविशिष्टबुद्ध्योर्विष-
याणामैक्येन विषयकृतवैलक्षण्याभावात् विषयाकृतमेव वैलक्षण्यं वाच्यं तत्र च विषयताया विषयस्वरू-
पत्वे तत्स्वरूपाणां तासामपि वैलक्षण्याभावात् समूहालम्बनविशिष्टबुद्ध्योर्वैलक्षण्यानुपपत्तिरंगीकृ-
कैव न च समूहालम्बनविषयस्य घटप्रतियोगिकत्वरूपसंबंधसंबंधस्यापि विशिष्टबुद्धिविषयत्वान्न वैल-
क्षण्यानुपपत्तिरिति वाच्यं घटभूतलसंयोगप्रतियोगित्वानुयोगित्वानीति संबंधसंबंधविषयस्यापि समूहा-
लम्बनस्य सम्भवात् न च समूहालम्बने संयोगत्वेन संयोगभानान्नानुपपत्तिरिति वाच्यं घटवद्भूतलं संयो-
गश्चेति विशिष्टज्ञानस्य तादृशसमूहालम्बनाद्वैलक्षण्यानुपपत्तेरिति तस्याः स्वरूपसंबंधत्वं दुर्वचमिति ।
वाच्यं त्वत आह पदार्थान्तरमिति तथा चातिरिक्ताया विषयताभेदेन भिन्नतया न पूर्वोक्तानुपपत्तिरिति भावः
केचित्तु स्वरूपसंबंधरूपाया विषयताया अननुगमेनानुगतप्रत्ययानुपपत्तिरित्यत आह पदार्थान्तर-
मितीत्याहुः तदसत् तस्या अतिरिक्तत्वेऽपि तत्तद्विषयभेदेन भिन्नतयाऽनुगतप्रत्ययानुपपत्तितादवस्थ्यात्
न चाननुगतप्रत्ययानुपपत्तिः कथं वारणीयेति वाच्यं विषयतात्वमेकमङ्गीकृत्यैवेति अत एव घटत्वविर- १९

19A

शिष्टबुद्धिं प्रति घटत्वविषयकज्ञानत्वेन हेतुतायां विषयतायाः प्रकारताविशेष्यताभेदेन भिन्नतयैकस्या निवेशे
न्यविषयताशालिज्ञानाद्धि विशिष्टबुद्ध्यनुपपत्त्यापत्तिरपि निरस्ता तत्र विषयतात्वेन प्रकारताविशेष्यतयोरनुगमेना
नुपपत्त्यभावादित्यास्तां विस्तरः घटं जानामीत्यादौ ज्ञानजन्यघटनिष्ठज्ञाततारूपपदार्थान्तरमंगीकार्यं अन्यथा
घटस्य कर्मत्वानुपपत्तेः क्रियाजन्यफलशालित्वस्यैव कर्मत्वरूपत्वात् तत्र च ज्ञानं निमित्तकारणं समवायिकारणं
च घटस्तदेव च तद्विषयत्वमिति निष्कृष्टमिति भट्टमतमावर्णयति भट्टास्त्विति ज्ञानजन्यः निमित्तकारणज
न्य/विधया ज्ञानजन्यः विषयनिष्ठ इति समवायेन विषय[illegible]त्यर्थः सैव च ज्ञाततैव च संबंधस्वरूपेति अति
रिक्तं संबंधस्वरूपेत्यर्थः युक्तं सयुक्तिकं एतज्ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदार्थान्तरांगीकरणं अन्यथेति
ज्ञानजन्यविषयनिष्ठज्ञाततारूपपदार्थान्तराङ्गीकारइत्यर्थः ज्ञानकर्मत्वमिति घटं जानामीत्यादौ घटादेः
क्रियाजन्यफलशालित्वरूपकर्मत्वमित्यर्थः क्रियेति ज्ञानरूपधात्वर्थजन्यफलवत्वाभावादित्यर्थः विन
ष्ट इति घटस्य नष्टत्वेन तत्र ज्ञानजन्यज्ञाततायाअसंभवादिति भावः तदेवोपपादयति नहीति तत्र विनष्टघटे
तस्यैव घटस्यैव असत्वात् नष्टत्वात् ननु यथा मनसा नष्टेपि घटे विषयतासंबंधेन ज्ञानमुत्पाद्यते तथा ज्ञा
नेनापि तत्र तदुत्पादने बाधाभाव इत्यत आह नचेति समवायिकारणस्य कार्यसहभावेन हेतुत्वात् घटनाशे
न तदुत्पत्तिसंभवः अन्यथा समवायिकारणनाशस्य समवेतनाशे हेतुत्वाज्ज्ञाततोत्पत्तिद्वितीयल
क्षणे एव तस्या नाशापत्त्या तत्क्षणिकत्वप्रसंग इति भावः ननु तत्र विषयताया ज्ञाततारूपत्वाभावेपि

त॰प्र॰ स्वरूपसंबंधत्वाद्रूपत्वमास्तामित्याशंकते नत्वेत्यादिना तत्र नष्टघटस्थले प्रतीतेः ज्ञातोघट इति प्रतीतेः
२० अन्यत्रापि विद्यमानघटस्थलेपीत्यर्थः स एवास्त्विति स्वरूपसंबंधविषयोस्त्वित्यर्थः अधिकेनेति १
स्वरूपसंबंधातिरिक्तज्ञाततारूपविषयतास्वीकारेणेत्यर्थः ननु स्वरूपसंबंधस्य स्वरूपसंबंधस्य विषय
२० त्वरूपत्वेतस्यज्ञानजन्यत्वाभावात् घटस्य क्रियाजन्यफलशालित्वरूपमुख्यकर्मत्वाभावेन कर्म
णि द्वितीयेतिसूत्रेण घटं जानातीत्यादौ घटपदोत्तरं द्वितीयाविभक्त्यनुपपत्तिरित्यत आह कर्मविभ
क्तेरपीति द्वितीयाविभक्तेरपीत्यर्थः तद्वदेव नष्टघटस्थलवदेवेत्यर्थः तथाच यथा नष्टघटस्थले
घटपदोत्तरं द्वितीयोपपत्त्यर्थं गौणमुख्यसाधारणकर्मत्वविशिष्टपरत्वं कर्मणि द्वितीयेति सूत्रस्थक
र्मपदस्यावश्यमंगीकार्यमन्यथापि च तेनैव विद्यमानघटस्थलेघटपदोत्तरं द्वितीयोपपत्तिरिति भावः
एवंच क्रियाजन्यफलशालित्वरूपकर्मत्वाभावमुख्यकर्मत्वाभावेपि सविषयकवाचकधातुसमभिव्याहारस्थले
विषयत्वरूपं गौणमेव कर्मत्वमिति नानुपपत्तिरिति हृदयं ननु तन्मतेऽभावो ज्ञात इति प्रतीत्याऽभावेपि ज्ञातता
याऽवश्यमंगीकारात् समवायिकारणं विनाभावकार्यस्यासंभव इति न नियमस्तथाच नष्टघटस्थले
पि नानुपपत्तिरित्यत आह संबंध इति समवायस्यातिरिक्तस्य तेरनंगीकारात् विलक्षणस्वरूपसंबंध
नस्वाश्रयत्वमेव समवायिकारणत्वं एवंच विलक्षणसंबंधेन स्वाश्रयं विना तस्यानुपपत्तिरित्येव नियमः
२०

20A

ऽभावस्थलेच विलक्षणसंबंधेन स्वाश्रयत्वमभावसंयोगी क्रियते विलक्षणसंबंधेन स्वाश्रयघटस्य सत्वात्त्व
न घटस्थलेऽनुपपत्तिः संयोगरूपैवेति भावः स्वमतावष्टंभेनेदं दूषणमित्यपि केचित् वस्तुतस्संयोगेण कर्मत्वे
नाप्युपपत्तेरतिरिक्तस्वातंत्र्यायाऽप्रमाणभावान्नमद्रूपत्वे विशेषणतायाऽत्यवेदं दूषणं सारं प्रकारतावन्नविषयतावि
षयताविशेषः किंतु प्रतियोगित्वमेवेत्यंगीकर्तॄणां केषांचिन्मतमाह अन्ये त्वित्यादिना भासमानेयद्वैशिष्ट्यसं
बंधस्तत्प्रतियोगित्वमित्यर्थः पुरुषदंडित्वज्ञानेपि दंडस्य प्रकारतापत्तिः संयोगप्रतियोगित्वस्य सत्वात् अतो भास
मानेति तज्ज्ञाने च दंडप्रतियोगिकसंयोगस्याभानान्नातिव्याप्तिः प्रतियोगित्वं संबंधविशेषणएव इदमेव संग
मयति स्वयमिति घटत्वस्य वैशिष्ट्यं घटत्वनिरूपितः समवायः संयोगो हीति वस्तुगत्याभासमानोपि सं
योगस्तत्प्रतियोगित्वस्य दंडे सत्वात्प्रकारत्वापत्तिरित्यर्थः मनुतत्प्रतियोगिकत्वेन भासमानेयद्वैशिष्ट्यं तत्प्र
तियोगित्वमर्थः समूहालंबनविशिष्टबुद्ध्योर्भेदानुपपत्त्या विशिष्टज्ञाने प्रतियोगित्वानुयोगित्वसंबंधसम्बंधा
पि भासतेऽस्तु पि यत्ते समूहालंबने च दंडप्रतियोगिकत्वेन संयोगस्याभानान्नातिव्याप्तिरित्यत आह द्विगिति तथा
पि दंडपुरुषदंडप्रतियोगिकसंयोगा इति समूहालंबनेऽतिव्याप्तिः न चात्र दंडप्रतियोगिकत्वस्य संबंधसंबंधवि
धयाभानमिति वाच्यं तथा सति सांसर्गिकविषयतायाम् अतिरिक्तत्वाभ्युपगमे किमपराद्धं अतिरिक्तप्रकारतः

त॰ प्र॰ २१ 21

यासंबंधसंबंधसामान्यविशिष्टज्ञानविषयत्वेनोपरंजकं च विषयत्वं विलक्षणाभावेपि विषयताकृतवैलक्षण्येनैव ज्ञा
नानां वैलक्षण्योपपत्तेरित्याशयः तच्चेति साक्षात्काररूपप्रमाकरणं चेत्यर्थः तृतीयानुव्यवसायरूपप्रमाणोक
रणत्वस्यत्रयमानुव्यवसायेसत्वात् ज्ञानोपादानेपिलादिप्रमाकरणत्वस्यनिर्विकल्पकेपिसत्वात् सविकल्प
कादिरूपप्रमाकरणत्वस्य च त्वगादिसंयोगसत्वात्तस्य बहुविधत्वमितिभ्रमनिराकरणायाह इंद्रियात्मकमिति
चक्षुरादिकमेवप्रत्यक्षं प्रमाणमन्येषां तद्व्यापारत्वमितिभावः वस्तुतस्तु प्रत्यक्षप्रमेतिभ्रमनिराकरणायाह इं
द्रियेति द्रव्यग्राहकत्वं च द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्मवत्वं तेनोपनीतभानसा
दायनरसनेंद्रियादावतिप्रसंगः अनुपधायकचक्षुरादिसंग्रहाय जनकतावच्छेदकधर्मवत्वनिवेशः त
द्ग्राहकं च द्रव्यग्राहकं चेत्यर्थः द्रव्यग्राहकत्वं च द्रव्यविषयकलौकिकसाक्षात्कारजनकतावच्छेदकधर्म
शून्यत्वं तेनानुपधायकचक्षुषि नातिप्रसंगः तत्रापि चक्षुष्ट्वस्य सत्वादिति अन्यत् द्रव्यग्राहकेतरत्
वचेति अंधस्य घटसन्निकर्षे स्पार्शनं ज्ञायते एवोत्पन्नो विप्रकृष्टे न तिदूरवर्तीत्यर्थः नतु मनः आत्मग्राह
कमिति तथा च मनस आत्माभिन्नाग्राहकत्वान्नतेन घटादिग्रहापत्तिरिति भावः सर्वेति मनः सर्वविषय
कज्ञानजनकमिति सिद्धांतभंगप्रसंगादित्यर्थः सर्वविषयकमपि सर्वविषयकज्ञानजनकमपि तथा च

21A

नतावता सिद्धान्तभंग इति भावः परतन्त्रमिति स्वेतरबहिर्विषयकज्ञानजनकसामग्रीसापेक्षमित्यर्थः
तथा चांधस्य विप्रकृष्टघटादीनां मनसा ज्ञानग्रहापत्तिस्तत्सहकारिचक्षुरादेरभावादिति भावः किं तत्सरम
त्तमाह परमिति मीमांसकैर्ज्ञानलक्षणसामान्यलक्षणयोगजधर्माद्यस्वीकारान्मनसश्चक्षुरादीन्द्रिय
मात्रसहकारित्वमेवोपेयत इत्यत एवात्मा मनसा संयुज्यते मन इन्द्रियेणेन्द्रियमर्थेन इन्द्रियाणां वस्तुप्राप्यप्र
काशकारित्वनियमादिति संगच्छत इति तन्मतं निराकर्तुमाह न पुनरिति चक्षुरादिमात्रमिति चक्षुरादि
कमेव परमिति न पुनरित्यन्वयः मात्रपदेन ज्ञानलक्षणादिव्यवच्छेदस्तथा च चक्षुरादिव्यापारं विनापि ज्ञा
नलक्षणादिसहकारेण कदाचिन्मनसा ज्ञानजननात्तेषामपि सहकारित्वमावश्यकमुपदर्शितनियम
स्तु लौकिकप्रत्यक्षस्य लक्षणे इति भावः ननु ज्ञानलक्षणसहकारेण मनसा ज्ञानजनने मानाभाव इत्यत आह
स्मृतेति संसर्गेति परस्परसम्बन्धग्रहादित्यर्थः ननु परस्परसंसर्गग्रहे का क्षतिरित्यत आह कथमन्यथेति
अन्यथा ज्ञानलक्षणसहकारेण मनसा स्मृतपदार्थानां संसर्गाग्रह इत्यर्थः कविकाव्यादीति कविना
स्मृतविषयीभूतपदार्थपरस्परसंसर्गग्रहे काव्यं विरच्यते नान्यथा वाक्यप्रयोगे वाक्यार्थज्ञानस्य हेतुत्वा
त् तथा च तदस्वीकारे संसर्गग्रहाभावेन काव्यरचनोच्छेदप्रसंग इति तत्स्वीकार आवश्यक इति भावः

इदमुपलक्षणं लौकिकसन्निकर्षं विनापि घटो नास्तीत्यादावभावांशे घटस्य भानात् एवं सौरभांशे लौकिकस
न्निकर्षं विनापि सुरभिचंदनमिति चाक्षुषोदयाच्च तत्स्वीकारस्यावश्यकत्वमिति ध्येयम् लौकिकान्यविषयताशा
लिप्रत्यक्षत्वावच्छिन्नं प्रति किंचिद्विषयतावच्छिन्नत्निष्ठविषयताशालिज्ञानत्वेन हेतुत्वेनेति कार्यकारणभा
वो बोध्यः कार्यतावच्छेदके लौकिकान्यत्वनिवेशात् प्राथमिकविशिष्टबुद्धौ लौकिकसन्निकर्षजन्यनिर्वि
कल्पके च न व्यभिचारः कारणतावच्छेदके किंचिद्विषयतावच्छिन्नत्वनिवेशाच्च न निर्विकल्पकोत्तरमुपनीत
भानापत्तिः निर्विकल्पकस्याप्युपनायकत्वांगीकारे तु तद्विषयताशालिज्ञानत्वेन हेतुतेति बोध्यं सामा
न्यलक्षणाजन्यज्ञाने व्यभिचारवारणाय व्यवहितोत्तरत्वसंबंधेन कारणं वैशिष्ट्यं निवेश्यमेव तद्धर्मप्रका
रकज्ञानाजन्यत्वनिवेशो न दत्तः घटत्वद्रव्यत्वादिरूपनानाधर्मप्रकारकज्ञाननिरूपितजन्यतानामनुग
मकरूपाभावादिति इत्थं च कार्यतावच्छेदके लौकिकान्यत्वनिवेशोपि न क्षतिरिति ध्येयं योगजधर्मसामा
न्यलक्षणप्रत्यासत्तिस्वीकारे तु भवमेव प्रमाणयति योगिनामित्यादिना योगिनां योगजधर्मसहकारेण
मनसा चक्षुरादिव्यापारं विनापि सर्वविषयकालौकिकसाक्षात्कारो भवत्यतस्तस्य सहकारित्वमावश्यकमिति
भावः ~~[illegible]~~ प्रमेयत्वादिनेति सर्वत्र प्रमेये चक्षुरादिव्यापारं विनापि प्रमेयत्वेन प्रमे

22A

मेयसामान्यविषयकलौकिकसाक्षात्कारोदयान्न स्यादपि सहकारित्वमावश्यकमिति भावः स्वतंत्रमिति वहिर्विष
यकज्ञानजनकसामग्र्यमपेक्षितमिति भावः अवाह्येति अवाह्यविषयकज्ञानजनक इत्यर्थः अवाह्यानीति यो
ग्यानीति शेषः तद्योग्येति आत्मयोग्यगुणा इत्यर्थः तदभावे योग्यगुणाभावे तद्धर्मीति आत्मत्वसमवेतयो
ग्यगुणवृत्तिजातिश्चेत्यर्थः सत्त्वात्मत्वज्ञानत्वादिः तदेकत्वेति आत्मैकत्वपरममहत्परिमाणे चेत्यर्थः द्रव्य
साक्षात्कारसामग्रीसत्वेन तद्गतसंख्यापरिमाणादिग्राहकसामग्र्या अपि सत्वाद्द्रव्यसाक्षात्कारस्य संख्यापरिमाण
विषयकत्वनियमेनात्ममानसे तयोरपि भानसंभव इति भावः नयोग्य इति न लौकिकमानससाक्षात्कारवि
षयीभूत इत्यर्थः अत्र मनःसंयुक्तसमवायकारणवलाद्गुणादीनामिव तयोरपि मानसे वाधकाभावः न च न
यासत्तिसंस्कारादीनामपि मानसापत्तिः सामग्रीसत्वादिति वाच्यं तत्रानायत्या संस्कारस्य प्रातिस्विकरूपेण प्र
तिबंधकत्वे विजातीयगुणत्वेन वा प्रतिबंधकत्वकल्पना तद्वत्संख्यापरिमाणयोरपि प्रातिस्विकरूपेण प्रतिबं
धकत्वे प्रतिबंधकतावच्छेदकवैजात्यस्वीकारे वा गौरवान्न स्यात्तेन किंचिद्वाधकं न च ज्ञानादिगुणेष्वेव सं
संस्कारव्यावृत्तं वैजात्यं स्वीकृत्य विजातीयगुणविषयकमानसं प्रति विजातीयगुणत्वेन हेतुत्वान्नादृशवैजा
त्यस्य तत्संख्यापरिमाणयोः स्वीकारे गौरवात्तयोरप्ययोग्यत्वमिति वाच्यं मनःसंयुक्तसमवायेन विजातीय

गुणं विनाप्यात्मत्वमानसजननात् विजातीयगुणत्वस्य विशेषसामग्रीत्वासंभवेन सामान्यसामग्रीवा
लात् संस्कारप्रत्यक्षापत्तिवारणाय विजातीयगुणभेदस्यैव विशेषसामग्रीत्वान्नादृशवैजात्यस्य तत्संख्या
परिमाणयोः कल्पने गौरवात् आत्मत्वमानसे आत्मत्वेनापि देहत्वकल्पयित्वा सामान्यसामग्र्याः फलेऽस
त्त्वेऽपि विजातीयगुणात्मत्वयोरन्यतरसहकारित्वकल्पनेन संस्कारप्रत्यक्षतापत्तिवारणेऽतिगौरवात् तद
पेक्षया विजातीयगुणभेदत्वेन कारणताया एवौचित्यादिति तयोः प्रत्यक्षस्वीकार एवौचित इत्यस्वरसः श्लोका
क्तेऽतद्रूपेनेन सूचित इत्यपि स्मितिं आत्मन आत्मसमवेतगुणानां च मनःसंयोग्यत्वेऽत्यर्थः परात्मा वपुरुषां
तरीयात्मा तद्गुणाश्च परात्मसमवेतगुणाश्चेत्यर्थः चकारेण गुणसमवेतजात्यादीनां तदभावानां च संग्र
हः समाधत्ते नेति परात्मनो योग्यत्वात् पुरुषांतरीयमनःसंयोगाभावात् आत्ममानसत्वावच्छिन्नं प्रतिवि
जातीयमनः संयोगत्वेन कारणतया आत्मसमवेतमानसं प्रति विजातीयमनः संयुक्तसमवायत्वेन आत्म
समवेतसमवेतमानसत्वावच्छिन्नं प्रति विजातीयमनः संयुक्तसमवेतसमवायत्वेनेत्यादिकार्य्यकारण
भावकल्पनात् पुरुषांतरीयात्मान्यदीयमनसोः संयोगे चवैजात्यानभ्युपगमेन न तत्प्रत्यक्षापत्तिरि
तिभावः गुरुत्वेरनिति परमाण्वादिचक्षुः संयोगसत्त्वादितिभावः तेषां परमाण्वादीनां चक्षुरयो

23A

ग्यत्वादिति चक्षुर्ज्जन्यलौकिकसाक्षात्कारयोग्यत्वादित्यर्थः वक्ष्यमाणलौकिकचाक्षुषसामग्र्यसत्त्वादिति भावः महदित्यादि द्रव्यवृत्तिलौकिकविषयतासंबंधेन चाक्षुषंप्रति समवायेन महत्त्वेन एवमुद्भूतरूपत्वेन चे हेतुतेत्यर्थः तदेवं परमाणौ महत्त्वाभावादात्मनि रूपाभावात्पिशाचादेश्चोद्भूतरूपवत्त्वाभावान्नतत्प्रत्यक्षमित्याखंडलार्थः परमाणुश्चेति तद्रूपस्य पिशाचादिरूपस्य अनुद्भूतत्वात् उद्भूतभिन्नत्वात् यद्यपि पिशाचाश्चादिशरीरस्य वायवीयत्वेन नत्र रूपाभावान्नोद्भूतस्यानुद्भूतत्वादित्यसंगतं तथापि पिशाचादिपदेन तन्निमित्तकारणपार्थिवोपष्टंभकभागो बोध्यः ननु लाघवाद्विजातीयचक्षुःसंयोगत्वेनैव द्रव्यचाक्षुषंप्रतिहेतुत्वं परमाण्वादिचक्षुःसंयोगे च वैजात्यानभ्युपगमान्न तत्प्रत्यक्षापत्तिरिति किं महदुद्भूतरूपादिहेतुतया नच विजातीयचक्षुःसंयुक्तविशेषणतया अभावचाक्षुषेहेतुतया वायावुद्भूतरूपाभावप्रत्यक्षस्यानुरोधेन तत्र विजातीयचक्षुःसंयोगस्यावश्यकतया वायोश्चाक्षुषापत्तिरिति रूपहेतुत्वमावश्यकमिति वाच्यं द्रव्यचाक्षुषजनकतावच्छेदकतया वैजात्यं नरस्वीकारात्तस्य च तत्रानंगीकारात् नच तथापि विजातीयचक्षुःसंयोगस्य चक्षुष्यपिसत्त्वात्तच्चाक्षुषापत्तिरित्युद्भूतरूपहेतुत्वमावश्यकमिति वाच्यं स्वप्रतियोगिकसंयोगस्य स्वस्मिन्नभावेन च क्षुषि चक्षुःप्रतियोगिकसंयोगाभावादिति चेन्न विजातीयक्रियाया एव विजातीयसंयोग

त॰प्र॰
२४
24

नियामकत्वे यत्रैकदैवद्वयोः क्रियया घटपरमाणौ च युगपत्संयोगस्तत्र परमाणावपि विजातीयसंयोगस्य
दुर्वारतया तत्र त्वत्तापत्तेर्वारणासंभवात् न च तत्तदुत्तरदेशस्यापि विजातीयसंयोगनियामकतया परमा
णवादिरूपोत्तरदेशस्य तत्र नियामकत्वाकल्पनेन तत्र विजातीयसंयोगादिति वाच्यं अनंतोत्तरदेशानां
विजातीयसंयोगनियामकत्वकल्पनापेक्षया उद्भूतरूपादिहेतुतायामेवौचित्यादिति दिक् एकेत्य
भेनास्वरसः सूचितः सत्योद्भूतत्वस्य जातित्वे नीलत्वादिना संकरप्रसंगः न च नीलत्वादिव्याप्यं ना
नैवोद्भूतत्वमिति वाच्यं तथा सति चाक्षुषत्वावच्छिन्नं प्रत्युद्भूतरूपत्वेन कारणत्वानुपपत्तेः कारणानुग
मेन व्यभिचारादिति अनुद्भूतत्वेति न च नीलत्वादिना सांकर्यमत्रापीति वाच्यं नीलत्वव्याप्यनानानुद्भू
तत्वस्योपगमात् अनुद्भूतत्वाभावकूटविशिष्टरूपत्वेन च प्रत्यक्षं प्रति हेतुत्वेन व्यभिचाराभावादिति
भावः प्रसंगाच्चक्षुर्योग्यगुणानाह योग्यगुणा इत्यादिना योग्यद्रव्यरूपमिति चक्षुर्योग्यद्रव्यवृत्तिरूप
मित्यर्थः तन्मात्रेति योग्यद्रव्यमात्रवृत्तित्वमित्यर्थः ननु तन्मात्रवृत्तीत्यत्र मात्रपदमनर्थकमित्यत आ
ह मात्रपदमिति घटाकाशसंयोगस्याकाशेऽपि वृत्तित्वान्न योग्यद्रव्यमात्रवृत्तित्वमिति भावः ननु त्वाच
प्रत्यक्षे त्वक्संयोगस्य हेतुत्वात् परमाणुवायुप्रभादीनां स्पार्शनापत्तिरिति त्वगिन्द्रिययोग्यमेव द्रव्यं त्वचा ग्रा

२४

24A

ह्यत इत्येव वाच्यं तत्र किं तद्ग्राह्यमिति हृदिस्थाशंकायामाह त्वच इति महदित्यादि तथा च द्रव्यत्वग्र-
त्ति लौकिकविषयतासंबंधेन त्वाचप्रत्यक्षं प्रति महत्त्वेनोद्भूतरूपत्वेनोद्भूतस्पर्शत्वेन च हेतुत्वा-
न्न तन्मूलस्यतापत्तिरिति भावः सामान्यतो हि द्रव्यप्रत्यक्षत्वावच्छिन्नं प्रति उद्भूतरूपत्वेन च हेतुत्वात्त्वा-
चप्रत्यक्षेपि रूपं हेतुस्तेन वायोर्न प्रत्यक्षमिति हृदयं यथाक्रमं परमाण्वादिप्रत्यक्षं वारयति तेनेत्यादि
ना प्रभाया इति नच प्रभा हि तेजसोस्त्वमित्यनेन प्रभाया रूपवत्त्वमेव न द्रव्यत्वमिति वाच्यं तदन्यमतानु-
सारेणैव तदुक्तत्वादिति प्रसंगात्त्वगिंद्रियग्राह्यगुणानाह गुणाश्चेत्यादिना त्वचो ग्राह्या इति शेषः
वहिर्ग्राह्यस्य रूपस्यापि त्वचा ग्रहणप्रसंगात् रूपातिरिक्ता इति महदुद्भूतस्पर्शवत्त्वाचेति च न
न्यात्रवृत्तित्वं तदितरावृत्तित्वे सति तद्वृत्तित्वं महदुद्भूतस्पर्शश्चेति सामानाधिकरण्येन महत्त्वविशिष्ट
उद्भूतस्पर्शश्चेत्यर्थः ननु वहिर्ग्राह्या इत्यर्थमत आह अत एवेति अत एव चक्षुर्ग्राह्यत्वविशेष-
णादेव वायविति वायुपरिमाणस्य चक्षुर्ग्राह्यत्वादिति भावः ननूद्भूतस्पर्शवद्द्रव्यत्वे चक्षुर्ग्राह्यस्यैवाप्र-
सिद्धत्वात्तेनैव प्रत्यक्षतापत्तिवारणे कृतं महदित्यादिविशेषणेनेत्यत आह नचेति तथा च प्रभापरिमाणस्य
चक्षुर्ग्राह्यत्वात्तस्यापि त्वाचप्रत्यक्षतापत्तिरतस्तद्विशेषणमावश्यकमिति भावः ननु चक्षुर्ग्राह्यत्वविशेषणे

न्या॰मु॰
२५

25

नैवपरमाणुगुणवारणे इन्द्रियत्वस्याग्रहादिति विशेषणं वैयर्थ्यमिति वाच्यं त्रुटिपरिमाणस्पार्शनवार
णायप्रकृष्टमहत्त्वपरत्वात तद्दुपादानस्यावश्यकत्वात् मात्रपदव्यावृत्तिमाह नचघटेति उद्भूत
स्पर्शतन्मात्रावृत्तित्वात् उद्भूतस्पर्शवदितरवृत्तित्वात् तथाचनतदितरावृत्तित्वरूपं तन्मात्रवृत्ति
त्वं तस्येति भावः नन्विह प्रभायां रि कर्मचेति त्वग्ग्राह्यद्रव्यसमवेतकर्मत्वव्याप्यमित्यर्थः वायो
रपि स्पार्शनप्रत्यक्षत्वादिति मीमांसकमतं तेरस्पृशयति मीमांसकानित्यादिना लाघवात्त्वाचप्रत्यक्षे रू
पस्य हेतुत्वकल्पने लाघवात् महदिति महत्त्वविशिष्टोद्भूतरूपमित्यर्थः तस्य योजकं त्वाचप्रत्य
क्षप्रयोजकं गौरवात् प्रभास्पार्शनवारणायोद्भूतस्पर्शहेतुत्वावश्यकतया त्वाचप्रत्यक्षे प्रतिरूपहेतु
त्वे गौरवात् अत इति उद्भूतरूपस्य त्वाचप्रत्यक्षाप्रयोजकत्वादित्यर्थः बहिरिन्द्रियेति आत्मप्रत्य
क्षे व्यभिचारवारणाय बहिरिन्द्रियजन्यत्वनिवेशः अत एव न नित्यसाधारण्यमपीति भावः तदभा
वात् उद्भूतरूपाभावात् नैवमिति न वायोः स्पार्शनप्रत्यक्षमित्यर्थः लाघवादिति बहिरिन्द्रियजन्य
द्रव्यसाक्षात्कारत्वापेक्षया द्रव्यचाक्षुषत्वस्यैव लाघवादित्यर्थः अत्र मीमांसकानामयमाशयः आ
त्मप्रत्यक्षे व्यभिचारवारणाय बहिरिन्द्रियजन्यद्रव्यप्रत्यक्षत्वस्य कार्यतावच्छेदकत्वे गौरवात् उद्भूत

श्री
२५

रूपस्य कार्यतावच्छेदकं बहिरिन्द्रियप्रत्यक्षत्वं वाच्यं तच्च बहिरिन्द्रियमात्रान्यत्वं मानसभिन्नयावत्त्वं वेति विनिगमना
विरहः अथ स्पर्शप्रत्यक्षत्वमेव त्वक्कार्यतावच्छेदकं स्पन्दसमवायिकारणतावच्छेदकतया च स्पर्शत्वे जातिरि
ति चेन्न तथापि प्रभायाः स्पार्शनवारणायोद्भूतस्पर्शस्य स्पार्शने प्रतिहेतुत्वावश्यकत्वापाताद्द्रव्यत्वमेव रूपज
न्यतावच्छेदकमुपेयते न तु स्पर्शप्रत्यक्षत्वं वायोः प्रत्यक्षत्वसंदेहे तत्र तस्य संदिग्धव्यभिचारकत्वात् तदुक्तं प्रवि
त्यरूपनिश्चितव्यभिचारकं लघुरूपं मत्समानाव्यभिचारेण कार्यत्वकल्पनापात्रयोगादिति तथा च वायोः
स्पार्शने बाधकाभावः साधिका च समीरोऽयं मन्दोऽयं विस्तीर्णोऽयमित्यादिप्रतीतिः न चोद्भूतस्पर्शेन वायोरनुमाना
नुमानेऽध्यक्षप्रतीत्युपपत्तिरिति वाच्यं व्याप्त्यादिप्रतिसंधानं विनापि तादृशप्रतीतेर्जायमानत्वात् अन्यथा
घटे स्पृशामीत्यादिप्रतीतेरनुमानादिनैवोपपत्तौ घटादीनामपि स्पार्शनोच्छेदापत्तेरिति अत्र प्राहुर्नैयायिकाः
कारणाभावात्कार्याभाव इति प्रतीत्या कार्यसामान्याभावे कारणाभावस्य प्रयोजकत्वं तत्र च स्पर्शप्रत्यक्षत्वा
वच्छिन्नं प्रत्युद्भूतरूपत्वेनाहेतुत्वे प्रत्यक्षसामान्याभावे उद्भूतरूपाभावस्योद्भूतस्पर्शाभावस्य चावि
शेषाभावद्वयस्य प्रयोजकत्वं वाच्यमिति गौरवं मन्मते चोद्भूतरूपाभावस्येति लाघवं उद्भूतरूपत्वेनाका
रणत्वे च तदवच्छिन्नाभावस्य प्रयोजकत्वासंभवात् हेतुत्वमावश्यकमिव न च तर्हि उद्भूतस्पर्शत्वेऽपि हेतुत्वमा

तं॰भ॰ २६

26

दायवदिनियमस्यानाविरहः भवन्मते वायोरपि प्रभायाः प्रत्यक्षत्वानंगीकारादिति चेन्न उद्भूतरूपवद्देशे विहंग
मण्डलवत्प्रभामण्डलस्यैवोपरिदेशान्तयान्तस्य च प्रत्यक्षत्वानंगीकारे उह विहंगमण्डलप्रतीत्यनुपपत्तेः संयोगप्र
त्यक्षे यावदाश्रयप्रत्यक्षस्य हेतुत्वात् एवं संयोगविभागलिंगकं चेदृशादेर्गत्यनुमानेन स्यात् न च पूर्वा
परदेशयोरुद्भूतरूपलंभानुपलंभाभ्यां संयोगविभागयोरनुमानाभ्यां गत्यनुमानं सिद्धमिति वाच्यं प्रभा
मण्डलरूपयोस्तयोर्भवन्मतेऽप्रत्यक्षत्वात् तस्मात्प्रभायाश्चाक्षुषत्वांगीकारस्यावश्यकत्वात् उद्भूतस्पर्श
त्वेन कारणत्वासंभवः न च मन्मते प्रत्यक्षत्वस्य नित्यसाधारण्यात्कथं जन्यतावच्छेदकत्वमिति वाच्यं समवा
यकालिकविशेषणतोभयसंबंधेन प्रत्यक्षत्वस्यैव जन्यतावच्छेदकत्वात् एवं रीत्या सिद्धे कार्यकारणभावे
वायोरूपाभावेन न तत्प्रत्यक्षमिति वायुर्वातीति प्रतीतिरनुमानादिनैवोपपादनीया घटादेश्चोद्भूतरूपसत्वे
न तत्प्रतीतेः प्रत्यक्षत्वमेवेति ननु गगनघटसंयोगस्पार्शनवारणाय विजातीयस्य स्पार्शनं प्रति सामानाधिक
रण्यसंबंधेन स्पार्शनाभावस्य प्रतिबंधकत्वावश्यकतया वायोः स्पार्शने वायुस्पर्शस्पार्शनानुपपत्तिः च नु
रणक स्पार्शने व्यभिचारवारणाय सति विजातीयत्वनिवेशः वैजात्यं चेदं द्रव्यावृत्ति गुणकर्मसाधारणं
न च प्रतिबध्यतावच्छेदककोटौ विजातीयेस्मिन् स्पार्शनत्वनिवेशेनानुपपत्तिरिति वाच्यं तथा सति विजातीय मु॰ २६

ननु घटस्य स्पार्शनेत्यादि प्रती
ते रनुमानादिनैवोपपन्नौ घटा
दीनामपि स्पार्शनेच्छेदाय
तिरस्तस्माह घटेत्यादि ५८

मीमांसकः शंकते ५८

26A

सत्वस्पर्शान्यत्वयोर्विशेषणविशेष्यभावे विनिगमनाविरहप्रसंगात् एवं त्वक्संयुक्तसमवायरूपसा-
मान्यसामग्र्या स्पार्शनाभावाभावरूपकारणं विनापि वायुस्पर्शस्पार्शनजननात्तस्य विशेषसामग्रीत्वासं-
भवेन त्वक्संयुक्तसमवायरूपसामान्यसामग्रीबलाद्गगनघटसंयोगस्पार्शनापत्तेर्दुर्वारत्वाच्च नच
स्पर्शस्पार्शने प्रतिस्पर्शत्वेनापि हेतुत्वं कल्पयित्वा सामान्यसामग्र्या द्रव्यसमवेतस्पार्शनत्वावच्छिन्ने ज-
ननीये स्पार्शनाभावाभावस्पर्शयोरन्यतरस्य सहकारित्वकल्पनान्नानुपपत्तिरिति वाच्यं तथा सति प्रति-
बध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पने नच वायोरप्रत्यक्षत्ववादिमते
गौरवादिति वायुप्रत्यक्षत्वस्वीकार एवोचित इति चेन्मैवं नादृष्टप्रतिबंधकाभावं विनापि त्वक्संयुक्तस-
मवायेन द्रव्यत्वस्पार्शनजननात्तस्य विशेषसामग्रीत्वासंभवेन सामान्यसामग्रीबलाद्गगनघटसंयोग-
स्पार्शनापत्तेर्दुर्वारत्वात् सड्भिन्नस्पार्शनं प्रति सड्भिन्नत्वेनापि कारणत्वं कल्पयित्वा सामान्यसामग्र्या फ-
ले जननीये नादृष्टप्रतिबंधकाभावसड्भिन्नत्वयोरन्यतरस्य सहकारित्वकल्पनादापत्तिवारणं भवति
गौरवात् तदपेक्षया गगनघटसंयोगस्पार्शने वारणाय स्पार्शनाभावविशिष्टविजातीयसत्वेनैव तादा-
त्म्येन प्रतिबंधकत्वौचित्यात् विजातीयसत्वे स्पार्शनाभाववैशिष्ट्यं च सामानाधिकरण्यघटितसामा-

त॰प्र॰
२७
27

नाधिकरण्यसंबंधेन नच विजातीयसत्त्वस्पार्शनाभावयोर्मिथो विशेषणविशेष्यभावे विनिगमनाविरह
इति वाच्यं विजातीयसत्त्वविशिष्टस्पार्शनाभावत्वेन प्रतिबंधकत्वे सामानाधिकरण्यस्यैव प्रतिबंधकतावच्छेद
कसंबंधतया गौरवात् स्पार्शनाभावविशिष्टविजातीयसत्त्वेन प्रतिबंधकत्वे तादात्म्यस्यैव प्रतिबंधकताव
च्छेदकतया लाघवात् प्रतिबध्यतावच्छेदकं च स्पर्शान्यस्पार्शनत्वं तेन वायोरप्रत्यक्षत्वेपि मतस्य स्पर्शस्पार्श
ने व्यभिचारः नच तादृशप्रतिबंधकाभावे विनापि वायुस्पर्शस्पार्शनं तन्मते तादृशविशेषसामग्र्या असंभ
वेन सामान्यसामग्रीबलाद्गगनघटसंयोगस्पार्शनापत्तिरिति वाच्यं स्पर्शस्पार्शने प्रतिस्पार्शत्वेनापि हे
तुताकल्पनेन सामान्यसामग्र्याः फलजननीये स्पर्शे तथाविधप्रतिबंधकाभावयोरन्यतरस्य सहका
रित्वोपगमात् नच प्रतिबध्यतावच्छेदककोटौ स्पर्शान्यत्वनिवेशेन स्पार्शत्वे न हेतुत्वकल्पनेन च वायोः
प्रत्यक्षत्वानंगीकारे गौरवात् वायुप्रत्यक्षस्वीकारणौचित्यमिति वाच्यं वायुप्रत्यक्षतानंगीकारे प्रकारांत
रेण लाघवसंभवात् तथाहि परमाण्वादिघटितसन्निकर्षबलाद्द्रव्यत्वस्पार्शनवारणाय द्रव्यसमवेत
स्पार्शने प्रतित्वक्संयुक्तस्पार्शनवत्समवायत्वेन हेतुत्वं वाच्यं तत्र च तुरणुकस्पार्शने व्यभिचारवारणा
य द्रव्याद्रव्यसमवेतस्पार्शनत्वं कार्यतावच्छेदकमुपेयं तस्य च सङ्ख्याद्रव्यसमवेतस्पार्शनत्वस्य कार्यता

गुण्याः
२७

27A

वच्छेदकत्वमादाय विनिगमनाविरहः वायोरप्रत्यक्षत्वे तु वायुस्पर्शस्पार्शने व्यभिचारेण द्रव्यान्यद्रव्यसमवेत
स्पार्शनत्वस्य कार्यतावच्छेदकत्वासंभवेन सङ्ख्यिन्नद्रव्यसमवेतस्पार्शनत्वस्यैव कार्यतावच्छेदकतया विनि
गमनाविरहासंभवात् न चैवमसन्निकृष्टगुणकर्मस्पार्शनापत्तिरिति वाच्यं एकाश्रयाघटितसन्निकर्षाद्धि
त्वादिप्रत्यक्षवारणाय विजातीयसत्स्पार्शनं प्रतिसामानाधिकरण्यसंबंधेन त्वक्संयोगाभावस्य प्रतिबंधक
त्वावश्यकत्वापातेनैवासन्निकृष्टगुणकर्मस्पार्शनापत्तिवारणसंभवात् न चैवं त्वक्संयुक्तसमवायेन तु ता
यामेव बीजाभावो येन तत्कार्यतावच्छेदके विनिगमनाविरहो वायुप्रत्यक्षतावादिमते प्रसज्येतेति वाच्यं अ
सन्निकृष्टद्रव्यत्वादिस्पार्शनवारणाय त्वक्संयुक्तस्पार्शनत्वस्य समवायत्वेन सङ्ख्यिन्नद्रव्यसमवेतस्पार्शनत्वा
वच्छिन्नं प्रतिहेतुता तत्र च द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहः वायोरप्रत्यक्षत्वेन वायु
स्पर्शस्पार्शने व्यभिचारात् वायुप्रत्यक्षत्ववादिमते द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनावि
रहेणानेन तु पुरुषभेदभिन्नानंतसन्निकर्षहेतुत्वकल्पनापत्तेर्वायोरप्रत्यक्षत्वांगीकार एवोचितः एतन्मते
उक्तरूपेण स्पर्शान्यत्वनिवेशेन स्पर्शत्वेन हेतुत्वकल्पनेन न च कियद्गौरवसंभवेऽपि पुरुषभेदभिन्न
सन्निकर्षहेतुत्वकल्पनापेक्षया लाघवानपायादिति सिद्धांतमतानुयायिपन्था न व्याप्तत्वक्सन्निकृष्ट

त॰प्र॰ २९ द्रव्यत्वस्पार्शनवारणाय पुरुषभेदभिन्नसन्निकर्षहेतुत्वं नोपपद्यते अपितु स्वाभिन्नद्रव्यसमवेतस्पार्शने प्र-
तिस्ववृत्तिप्रागभावप्रतियोगित्वविशिष्टपत्नवृत्तिस्पार्शने विषयतासंबंधेन तद्द्रव्यत्वसमवेतत्वसंबंधेन
28 कतित्वेनैव कारणत्वं स्ववृत्तित्वं च कालिकसंबंधेन एवं च वायुप्रत्यक्षत्वस्वीकारे पुरुषभेदभिन्नसन्निकर्षहे-
तुतायां तत्कार्यतावच्छेदके उपदर्शितगौरवस्यानवकाशः तद्धेतुत्वस्यैव कल्पनात् न च कृतिकार्यतावच्छे-
दके द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वमादाय विनिगमनाविरहः संभवदुक्तिवाच्यं भवन्मते स्पार्शान्यत्वनिवेशो न-
स्पार्शत्वेन हेतुत्वकल्पनेन च गौरवस्यातिस्फुटत्वात् वस्तुतस्तु व्यापकधर्मेण कारणताया इव कार्यताया अ-
पि कल्पनात् द्रव्यान्यद्रव्यसमवेतस्पार्शनत्वेन कार्यतावच्छेदकत्वासंभवात् स्वाभिन्नस्पार्शनत्वस्यैव वायु-
प्रत्यक्षतावादिमतेपि सन्निकर्षकार्यतावच्छेदकत्वादित्याहुः वस्तुतस्तु गुरुत्वाद्यतीन्द्रियप्रत्यक्षवारणाय ते-
षां तत्तद्व्यक्तित्वेन प्रतिबंधकत्वे गौरवात् लाघवेन विषयत्वेनैव च लौकिकप्रत्यक्षहेतुत्वं विषयत्वं च विषय- लौकिक ४
तया साक्षात्कारवत्त्वमेव तथा च तेनैव गगनघटसंयोगस्पार्शनवारणेन तदनुरोधेन विजातीयसत्त्वस्पार्शने प्र-
तिस्पार्शनाभावस्य प्रतिबंधकत्वमिति न वायुस्पर्शस्पार्शनानुपपत्तिः न चैवं विषयत्वाभावादेव नीरूप-
प्रत्यक्षकारणे रूपहेतुत्वमनावश्यकमिति वाच्यं घटादेः पाकादिना नीरूपतादशायां लौकिकप्रत्यक्षताप
उमा २९

28A

ते रूपे हेतुत्वस्यावश्यकत्वादित्यत्र मनस्त्वजातिस्त्वेन समवायातींद्रियत्ववादिवैशेषिकमतेद्रूषयितुं तन्मतमुपन्यस्य
ति वैशेषिकास्त्वित्ति न प्रत्यक्षः नेंद्रियजन्यलौकिकसाक्षात्कारविषयः संबंधप्रत्यक्षद्वृत्ति संबंधत्वस्य समवाय
यसाधारणत्वादिति भावः ननु ताद्दृशकार्यकारणभावे मानाभावइत्यत आह कथमन्यथेति अन्यथा ताद्दृशे
कार्यकारणभावाकल्पने न प्रत्यक्षइति नत्वापि घत्तः संयुक्तसमवायरूपकारणसत्वेनद्रव्यसमवेतवाह्यत्व
व्यापत्तिरिति भावः नचेति नहीत्यर्थः तथाहेतुतायामिति संबंधप्रत्यक्षे यावदाश्रयप्रत्यक्षत्वेन हेतुताया
मित्यर्थः घटाकाशसंयोगप्रत्यक्षतापत्तिरेव मानमित्याशंका निराचष्टे नचेत्यादि योग्येति द्रव्यत्वादिजा
तेर्योग्यमात्रसमवेतत्वाभावाच्च योग्यत्वेन स्यादतो गुणस्येति योग्यत्वादिति घटाकाशसंयोगस्य चायोग्या
काशवृत्तित्वेनायोग्यत्वादिति भावः नन्वेवं वायुस्पर्शस्य शब्दस्य च प्रत्यक्षं न स्यात्तयोरयोग्यवृत्तित्वादित्यत
आह किंचेति लाघवादिति संबंधप्रत्यक्षत्वापेक्षया लाघवात् लाघवमेवाह संबंधत्वं हीति संयोगत्व
स्य जातिरूपतया लाघवमन्यथेति भावः घ्राणग्राह्यगुणमाह घ्राणग्राह्य इति तन्मते गंधगतं
सामान्यं गंधत्वादि तयोः गंधगंधत्वयोः अत एव गंधे महत्त्वसामानाधिकरण्यविशेषणादेव

त·प्र·
२९
५९

उद्भूतत्वविशेषणव्यावृत्तिमाह नचेति रसनासंयोगग्रहणमाह रसनेति श्रवणसंयोगग्रहणमाह श्रवणेऽ
ति ननु चक्षुरादीनां द्रव्यग्राहकत्वे निमीलितनयनस्यापि तद्ग्रहापत्तिरत आह तस्येति सन्निकृष्टार्थग्रा
हकत्वात् सन्निकृष्टार्थमात्रग्राहकत्वात् असन्निकृष्टार्थाग्राहकत्वादिति यावत् सहकारिणः प्र
त्यक्षजननीये अपेक्षणीयाः तथा चेन्द्रियसंयोगादेरपि प्रत्यक्षहेतुतया न निमीलितनयनस्य प्रत्यक्षापत्ति
रिति भावः नन्विन्द्रियत्वस्य तेजस्त्वादिना संकरात् जातित्वासंभवेन कथं द्रव्यलौकिकप्रत्यक्षत्वावच्छिन्नं प्रती
न्द्रियत्वसंयोगयोर्हेतुत्वमिति चेन्न इन्द्रियनिष्ठैकत्वेषु वैजात्यस्वीकारात् विजातीयैकत्ववत्त्वेन हेतु
त्वात् नच चक्षुःसंयोगदशायां स्पार्शनवारणाय त्वक्संयोगदशायां च चाक्षुषवारणाय चक्षुस्त्वक्संयोग
योः स्वातन्त्र्येण स्पार्शनहेतुत्वावश्यकतयेन्द्रियसंयोगादेः प्रत्यक्षसामान्यहेतुत्वे मानाभाव इति वाच्यं प्रत्य
क्षसामान्यानुत्पादे चक्षुःसंयोगाभाववत्त्वक्संयोगाभावादीनां प्रयोजकत्वे गौरवात् लाघवादिन्द्रियसं
योगाभावस्यैव प्रयोजकत्वेनेन्द्रियसंयोगहेतुत्वावश्यकत्वात् अकारणविरहस्याकार्यविरहाप्रयोज
कत्वात् इन्द्रियसंयोगस्य संयोगेनेन्द्रियस्य वा हेतुत्वमिति विनिगमनाविरहादिन्द्रियत्वेनापि तद्धेतुत्व २९

११A

मिति ननु सर्वेषामेव सन्निकर्षाणां द्रव्यादिग्राहकत्वे आत्मनः प्रत्यक्षानुपपत्तिस्तत्र संयुक्तसमवायाभावात् एवं
रूपादेरपि तत्र संयोगाभावादिति प्रत्येकमेव द्रव्यादिग्राहकता वाच्या तत्र केन किं गृह्यत इति पृच्छायामाह केने
ति दर्शयति द्रव्यमिति संयुक्तसमवायस्य गुणमात्रग्राहकत्वे शब्दग्रहो न स्यात् स्वस्मिन् स्वप्रतियोगिकसं
योगाभावेन श्रोत्रसंयुक्तसमवायस्य शब्दे सत्त्वादत आह शब्देतरेति जातिर्द्रव्यत्वादिः संयुक्तसमवेतसम
वायस्य शब्दत्वस्य ग्रहानुपपत्तेः शब्देतरगुण इति शब्देतरेति गुणविशेषणं तत्र समवाये च अ
भावे च तथा च षड्विधसन्निकर्षाभावेन विशेषणतैव तत्र हेतुरिति भावः तस्य शब्दाभावस्येत्यर्थः अनेच
तस्य घटाभावस्येत्यर्थः नन्विन्द्रियसन्निकृष्टविशेषणतेन्द्रियसंयुक्तविशेषणता तथा च रूपादौ रसत्वा
भावग्रहानुपपत्तिरित्यत आह इन्द्रियसन्निकृष्टेति बहुविधेति इन्द्रियसन्निकृष्टविशेषणतेन्द्रियसंयुक्त
समवेतविशेषणतेत्यादिरीत्या बोध्या इन्द्रियसंयुक्तसमवेतविशेषणतया रूपादौ रसत्वाभावग्रहस्य
भवान्नानुपपत्तिरिति भावः बहुत्वात् संयुक्तसमवायादिभेदेन बहुविधत्वात् ननु रूपादिग्रहार्थम
वश्यमभ्युपेयतया संयुक्तसमवायस्य प्रत्यासत्तेरेव घटादिग्रहोपपत्तेरलं संयोगस्य प्रत्यासत्तित्वेनेत्याशं

त॰प्र॰
३

कर्त्ते नन्विति नप्रत्यासत्तिः नद्रव्यग्राहकप्रत्यासत्तिः मानाभावादिति शेषः ननु घटादिग्रहान्यथानुपप
त्तिरेव मानमत आह संयुक्तेरिति तदसंभवात् संयुक्तसमवायासंभवादित्यर्थः तस्य आत्मनः तथा चात्म
30 प्रत्यक्षे संयोगहेतुताया आवश्यकत्वेन तत्रैव द्रव्यप्रत्यक्षत्वमेव तज्जन्यतावच्छेदकमुपेयत इति भावः ननु द्र
व्यसमवेतचाक्षुषत्वावच्छिन्नं प्रति चक्षुःसंयुक्तसमवायस्य हेतुत्वेन तत एवोपपत्तेरलं चक्षुःसंयोगहे
तुत्वेन यदि चात्मप्रत्यक्षे क्लृप्तत्वात्सामान्यतो द्रव्यप्रत्यक्षत्वमेव जन्यतावच्छेदकमुररीक्रियते तदा सर
मात्मत्वमेव तथा च न च समवायत्वस्य तथात्वे रूपादिचाक्षुषानुपपत्तिरित्यन्यथानुपपत्तिरेव तत्र
बाधिकेति वाच्यं तथा सति चक्षुःसंयुक्तसमवायेनैव घटादिचाक्षुषोपपत्तेर्द्रव्यप्रत्यक्षत्वे जन्यतावच्छेद
कं साधकाभावस्यैव प्रकृते बाधकत्वादित्यत आह संक्षेप इति चक्षुःसंयुक्तसमवायस्य घ्राणकारिकोपि
सत्वान्नचाक्षुषापत्तेः क्वचित् संयुक्तचाक्षुषवन्निरूपितसमवायत्वेन हेतुत्वे वाच्ये तत्र त्रुटिचाक्षुषे व्यभिचा
रवारणाय द्रव्यान्यसमवायत्वस्य विजातीयसंयोगत्वस्य वा तज्जन्यतावच्छेदकत्वमुपेयं एवं च त्रुटि
चाक्षुषत्वस्य संग्रहीतत्वाच्चक्षुःसंयोगहेतुतावश्यकीति हृदयम् संयोगप्रत्यासत्तेरिति परमाणो मह ३

30A

त्वेनास्तीतिप्रत्ययापात्परमाणाविव घटेप्यालोकोनास्तीतिप्रत्ययात् घटेपि चक्षुःसंयोगस्यावश्यकत्वा-
च्च चक्षुःसंयुक्तविशेषणतायाएवाभावग्राहकत्वादितिभावः महदुद्भूतेति महत्त्वविशिष्टोद्भूतरूपवि-
शिष्टालोकनिरूपितसंयोगोद्रव्यचाक्षुषप्रत्यक्षेकारणमित्यर्थः सइति महदुद्भूतरूपालोकसंयोग
इत्यर्थः नन्वेवमिति एवमालोकप्रतियोगिकसंयोगस्यहेतुत्वे नेत्रसंयोगाभावात्तेजोन्तरप्रतियोगिकसं-
योगाभावात् स्वस्मिन्स्वप्रतियोगिकसंयोगानभ्युपगमादितिभावः तत्प्रभा प्रदीपप्रभा दीपप्र-
भायांदीपसंयोगस्यैवसत्त्वादतो मणिप्रभादाविति मणेःपार्थिवत्वेनतत्संयोगस्याहेतुत्वादितिभावः
ननुमणिप्रभादौतेजोलोकसंयोगस्यैवसत्त्वादतआह उद्भूतेचेति महान्धकारइत्यनेनतैजसालो-
व्यवच्छेदः अंधकारेघटादिप्रत्यक्षापत्तिवारणायतत्रालोकसंयोगस्यहेतुत्वमास्तां आलोकप्रत्यक्षे
तु तद्धेतुत्वेमानाभावः अंधकारेतत्प्रत्यक्षोदयात् अतआलोकभिन्नद्रव्यचाक्षुषत्वावच्छिन्नेप्रत्यक्षत-
स्यहेतुत्वमतोनव्यभिचारइत्याशंकते अपेति सुवर्णेति सुवर्णस्यालोकभिन्नत्वाभावेनतच्चाक्षुष-
त्वस्यालोकसंयोगकार्यतानवच्छेदकानाक्रांतत्वादितिभावः आलोकसंयोगइति आलोकनिष्ठसं-
योगोहेतुरित्यर्थः यत्रालोकवर्तिभूतलेघटआसीत्तत्रालोकप्रतियोगिकसंयोगाभावात् आलो

त॰प्र॰ कुवृत्तिसंयोगत्वेनैव हेतुत्वादिति भावः तस्य आलोकसंयोगस्य द्विनिष्ठत्वात् आलोकालोकभिन्नोभयवृ
३१ त्तित्वात् एवं उक्तरीत्यालोकसंयोगस्यालोकेपि सत्वे सुवर्णेति तत्राप्यालोकालोकसंयोगस्य सत्वादिति
भावः अनभिभूतेति अनभिभूतं रूपं यस्येति व्युत्पत्त्यानभिभूतरूपविशिष्टालोकसंयोगस्य हेतु
31 तया सुवर्णेनासंभवः सुवर्णरूपस्याभिभूतत्वात् द्रव्यचाक्षुषत्वावच्छिन्नं प्रत्यनभिभूतोद्भूतरूपवि
शिष्टालोकसंयोगस्य हेतुत्वमिति भावः अन्यथा सुवर्णरूपस्यानभिभूतत्वे द्रव्यान्तरेति अन्धका
रे घटादौ सुवर्णसंयोगाच्चाक्षुषापत्तेरित्यनभिभूतत्वं तस्येति भावः बलवत्सजातीयग्रहणकृतमग्र
हणं चाभिभव इति ~~संप्रदायमतेऽस्मियत्ति~~ संप्रदायविदस्त्वित्यादिना आलोके तद्द्रव्यचाक्षुषे आ
लोकसंयोगस्य हेतुत्वे अंधकारे सुवर्णसाक्षात्कारापत्तिरित्यतः सुवर्णभिन्नत्वमालोकविशेषणं तथा
च सुवर्णभिन्नं यत्तेजस्तद्भिन्नं द्रव्यं सुवर्णं यद्यपि च तत्प्रत्यक्षे आलोकप्रतियोगिकसंयोगो हेतुरतो
ऽन्धकारे सुवर्णादिसाक्षात्कारः स्यादेव एतत्तात्पर्यार्थः कार्यतावच्छेदकगौरवमत्रास्वरसः केचित्तु द्रव्य
चाक्षुषे आलोकसंयोगस्य प्रभासंयोगत्वेनैव हेतुता प्रभात्वं सुवर्णादिव्यावृत्तमित्याहुः सुवर्णादिसं
योगव्यावृत्तं नैव जात्यनुपेत्य विजातीयालोकसंयोगत्वेनैव हेतुत्वमित्यपि केचित् आलोकसंयोगानवर श्री ३१

31A

च्छेदकावच्छेदेन चक्षुःसंयोगे घटादिग्रहापत्तेः न चालोकसंयोगस्य चक्षुःसंयोगस्य च परस्परानवच्छेदका
वच्छेदेन सत्वादित्याशंक्यते न चापीति आलोकसंयोगादेर्हेतुत्वेपि परस्या परदिगवच्छेदेन तत्संयुक्तेति
आलोकासंयुक्तेत्यर्थः पुरुषेणेति परदिगवच्छेदेन चक्षुःसंयोगवतीति शेषः यदवच्छेदेनेति आलोक
संयोगावच्छेदकावच्छिन्नचक्षुःसंयोगत्वेन हेतुत्वादिति भावः अथ मूर्त्तयोः समानदेशताविरोधाद्भूतादा
वेकावच्छेदेन संयोगसंबंधेनालोकचक्षुषोरसंभवात् आलोकसंयोगावच्छेदकावच्छिन्नचक्षुःसंयोगः क
थमुपपद्यत इति चेन्न निविडयोरेव मूर्त्तयोः समानदेशतानंगीकारात् आलोकचक्षुषोस्तेजसत्वेन निवि
डत्वाभावात् वस्तुतस्तु वह्निनियामकसंबंधेनैव मूर्त्तयोः समानदेशताविरोधः ननु यथाकथंचित्संबं
धेनापि चक्षुःसंयोगस्य मूर्त्तनियामकत्वात् आलोकसंयोगावच्छेदकावच्छेदेनापि सत्वमव्याहतमे
व न च तथाप्यालोकसंयोगस्य कारणतावच्छेदककोटिप्रविष्टत्वात्कारणत्वमिति वाच्यं तादृशचक्षु
स्संयोगत्वेन चक्षुःसंयोगावच्छेदकावच्छिन्नालोकसंयोगत्वेन वा हेतुत्वमिति विनिगमनाविरहेण तस्
स्यापि कारणत्वात् न चालोकसंयोगं विनापि बिडालादेः सांजनचौरादेश्चांधकारे प्रत्यक्षोदयात् क

व॰प्र॰
३२

32

पेतस्य कारणत्वमितिवाच्यं विजातीयचाक्षुषप्रत्यक्षे आलोकसंयोगस्य हेतुत्वात् विडालादिसा
जात्यपुरुषीयचाक्षुषव्यावृत्तवैजात्यमिति केचित्तु ग्रेजनाभावविशिष्टालोकसंयोगाभावत्वे
नद्रव्यचाक्षुषत्वावच्छिन्नप्रतिप्रतिबंधकत्वे तदभावत्वेन च कारणता ग्रेजनाभावस्य स्वसंयुक्त
चक्षुःप्रतियोगिकसंयोगसंबंधावच्छिन्नप्रतियोगिताकः आलोकसंयोगाभावे ग्रेजनाभाववै-
शिष्ट्यं च स्वसामानाधिकरण्यसंबंधेन आलोकसंयोगाभावस्य स्वसमानाधिकरणैकत्वसंबंधावच्छि
न्नप्रतियोगिताकोवाध्यः तेन संयोगस्याव्याप्यवृत्तित्वेपि न क्षतिः सच विशिष्टाभावः क्वचिद्विशे
षणाभावप्रयुक्तः क्वचिद्विशेष्याभावप्रयुक्तः सांजनपुंसः ग्रेजनाभावविरहप्रयुक्तो विशिष्टाभावः
आलोकसंयोगस्थले चालोकाभावविरहप्रयुक्त इत्युभयत्रापि प्रतिबंधकाभावसत्त्वमव्याहतम्
विडालादिचाक्षुषे व्यभिचारवारणाय च तत्पुरुषीयत्वेन विशेषणीयमित्याहुः समवायाभावग्रहेपि
मेव विशेषणताप्रत्यासत्तिरित्युक्तं तच्च समवायाभावयोः प्रमाणसत्त्व एव संभवति तदेवं नैत्या
शंकते स्यादेतदिति समवायाभावग्राहकत्वेनैव तस्य प्रत्यासत्तित्वे स्यादत आह समवायेति प्रमा

३२

णसत्त्वे कथं तयोरसत्त्वमत आह नहीति तथा च प्रमाणाभावस्य प्रमेयाभावव्याप्यत्वात् तयोरसत्त्वमि
ति भावः ननु अयं घट इत्यादि प्रत्यक्षे घटघटत्वयोः संबंधविषयके तत्र च समवायातिरिक्तसंयोगादी
नां बाधात् समवायसिद्धिः तथा च तद्बाधसहकृतप्रत्यक्षप्रमाणस्यैव संभवात् कथं प्रमाणाभाव इत्याशं
कते ऽयं घट इत्यादि ननु समवायातिरिक्तस्य कस्यचित् संबंधस्य सत्त्वात् कथं तद्बाध इत्यत आह नही२
ति तेषां घटत्वस्य चलनादीनां अन्यः संबंधः संयोगादिः सत्त्वादिति तथा च समवायातिरिक्तस्याधा
राधेयभावात्मस्वरूपसंबंधस्य सत्त्वात् तद्विषयकत्वेनैव प्रतीतेरुपपत्तेर्नैतदन्यथानुपपत्त्या समवाय
सिद्धिरिति भावः नन्वाधारतासमवाय इति पर्याय इति सिद्धं समवायेनेत्यत आह नहीति सत्त्वात् स
मवायसत्त्वात् तस्य च समवायस्यैवाधारत्वाच्चेत् पटादावपि समवायरूपघटत्वाधारतासत्त्वे तत्रापि
शि घटत्वविशिष्टबुद्ध्यापत्तेः समवायातिरिक्तैवाधारता स्वीकार्या तथा च किं समवायेनेति भावः ननु पटे
घटत्वसमवायाभावादेव न तथा प्रतीत्यापत्तिरत आह एक एव हीति तत्सिद्धेरिति तथा च समवे२
तमिति प्रतीतेः स्वरूपसंबंधविषयकत्वेनोपपादयितुमशक्यत्वात् समवायस्वीकार इति भावः व
स्तुतस्त्वयं घट इत्यादि प्रतीतीनामनंतस्वरूपसंबंधविषयकत्वे गौरवात् लाघवेनातिरिक्तसमवा

न॰प्र॰ यद्विषयकत्वमितिध्येयं समवाये प्रमाणमुक्त्वाऽभावे तदाह नचेति असन्निति अप्रामाणिकत्वमित्यर्थः तत्
३३ त्सिद्धेः अभावसिद्धेः ननु तद्वद्यमभावो नास्तीति भ्रमः किंतु तत्साधिकरणस्वरूपत्वेनैवोपपन्नेरतिरिक्तत्वे
मानाभाव इत्याशङ्कमानमुपदर्शयति अत्र प्राभाकरा इति अतिरिक्तं अधिकरणादतिरिक्तः तत्
33 द्रूहाय अभावस्तद्रूपप्रत्यासत्तीति विशिष्टप्रमाणानुरूपप्रत्यासत्त्यंतरकल्पनेनेत्यर्थः यद्यपि समवायस्य
स्वार्थमवश्यं तत्प्रत्यासत्त्यंतरं गीकार्यं तथाप्यभावस्याधिकत्वे न तस्य प्रत्यासत्तिर्नापि केवलरूपेणैव तदेवावि
ड्यत इति भावः इदं अभावप्रतीतिविषयीभूतं तत्त्वापत्तिः अभावत्वापत्तिः तथा च तत्रापि घटाभाववत्वे रूप१
नानुवृद्धिप्रसंग इति भावः न चाभेद इति अभेदे अभावाधिकरणयोरभेदे तद्भावः आधाराधेय
भावः अनवस्थापत्तेरिति घटाभावेऽतिरिक्ताभावघटाभावत्वस्याभावे व्यतिरिक्तः कल्प्यमानतथा
त्वानवस्थेत्यर्थः ननु यद्धर्मविशिष्टे यद्धर्मावच्छिन्नवत्ताप्रतीयते तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्न
निरूपिताधिकरणतानियते एवं च भूतले भूतलत्वावच्छिन्ने निरूपिताधिकरणत्वाभावान्न
भूतले भूतलमिति प्रतीत्यापत्तिः भूतले घटाभावत्वावच्छिन्ननिरूपिताधिकरणतायाः स्वीका
राच्च भूतले घटाभाव इति प्रतीतिरुपपन्नैवेत्यस्वरसादाह किं चेति आधेयेति तदधिकरणस्य घटाभा ३३

33A

वस्वरूपत्वे इदानीमित्यनेन तद्भिन्ने इति शेषः अन्यथा तदधिकरणस्य घटाभावस्वरूपत्वे अन्यत्रापीति
घटेऽवनीतेऽपीत्यर्थः ननु विरिक्ताभाववादिमते घटे आनीते घटाभावो न नश्यति न वा गच्छति तस्य
नित्यत्वादभावत्वाच्चेति कुतो न घटाभाववत्ताबुद्धिः कथं वा भावाभावयोरेकाधिकरणवृत्तित्वविरोधः
तत्रैवोभयोः सत्वात् अत्र घटानधिकरणकालावच्छिन्नेन भूतलादिकमेव घटाभावस्य संबंधः
तथा च घटवति भूतले तेन संबंधेन घटाभावस्याविद्यमानत्वान्न घटाभाववत्ताबुद्धिर्घटाभावस्य तेन
न संबंधेनाविद्यमानत्वास्तु न विरोधिनापि घटकसंबंधेन तदधिकरणवृत्तित्वरूपविरोधस्याघातोऽपि
तिचेन्न हि विशिष्टसत्तायामनतिरेकेऽपि यथा विशिष्टसत्तानिरूपिता या गुणेऽसत्वाद्गुणे गुणकर्मा
न्यत्वविशिष्टसत्तावानिति प्रत्ययस्तथा सघटभूतलेऽपि तत्कालावच्छिन्नेन घटाभावाधिकरणताया
अनंगीकारान्न घटाभाववत्ताबुद्धिप्रसंग इत्यस्वरसादाह किंच कपाल इति केचित्तु नवृत्सादविनाश
शालिनी एकातिरिक्ताधिकरणमेवोपेयते तस्याश्च घटे आनीते नाशोपगमेन न घटवत्ताबुद्धिप्रसंग इत्यस्व
रसमाह स्यादेतदिति प्रतिक्षणमप्रामाणिकानंतानधिकरणतानां नाशाभ्युपगमे गौरवेणातिरिक्ताभा

त०प्र०
३४
34

वस्येवकल्पयितुमुचितत्वात् नचास्मदुक्तेप्येषदोषइतिवाच्यं मन्मते घटाभावाधिकरणतायांघटा
धिकरणकालस्यावच्छेदकत्वानुपगमेनानुपपत्त्यभावात् सइति घटप्रागभावो घटध्वंस इत्यर्थः स
र्वदेति प्रागभावनाशकाले ध्वंसानुत्पत्तिक्षणेचेत्यर्थः कपालकालमात्रइतिकश्चित् अन्यथा प्राग
भावध्वंसयोर्घटकालेसत्वेपिप्रतीत्यस्वीकारे कपालप्रतीतिरपीति कपालस्वरूपप्रागभावध्वंसयो
रप्रतीतौकपालमपिकथंप्रतीयेत त्रयाणामेकैकस्याप्रतीतौनकस्यापिप्रतीतिः स्यात् कस्यचित्प्र
तीतौ सर्वमेवप्रतीयेतेतिभावः अन्यथा कपालेसत्वइत्यर्थइतिकश्चित् ननुआपिघटकालावच्छे
देनघटप्रागभावध्वंसाधिकरणतायाअनभ्युपगमान्नतत्कालेतद्वत्ताबुद्धिरित्यस्वरसादाह किंचमोक्ष
इति उत्पादविनाशशालिनीमधिकरणतामंगीकृत्यघटकाले प्रागभावाधिकरणताप्रागभावध्वंसा
धिकरणतायाअनुत्पत्तेश्चनतद्वत्ताबुद्धिरित्यस्वरसादाह किंचेतीतिकश्चित् ननुपूर्वमेवदुःखिन
त्वारनादेयं असाध्यत्वेति इष्टापत्तौचश्रवणमनननिदिध्यासनधारणाध्यानसमाधिकृतमनेक
विधंदुःखंकोपिनानुभूयादितिवाच्यं ननुनित्यसुखाभिव्यक्तेरेवमुक्तित्वेननासाध्यतापत्तिरित्य

34A

तत्राह संक्षेपत इति नैरीश्वरान्वीक्षिकमतरीत्या ईश्वरीयनित्यसुखमप्रसिद्धं जीवस्य तु नित्यसुखे प्रमाणाभावेन।
नित्यसुखाभिव्यक्तिर्मुक्तिरिति लक्षणमसंभवि तस्माद्दुःखध्वंसत्वमुक्तेरसाध्यत्वापत्तिरस्त्येवेति भावः दु
रं तु चिंत्यं तन्मते दुःखध्वंसनिरूपिताधिकरणतायाः साध्यत्वसंभवत्वेव मोक्षाधिकरणतायाः साध्यत्वोप
गमादिति प्राभाकरमतेन कश्चिद्दोषः वस्तुतस्तु भूतले घटो नास्ति पर्वते घटो नास्तीत्यादिप्रतीतीनामार
मनेनाधिकरणभेदेन तत्तदधिकरणस्वरूपाभावविषयकत्वकल्पने गौरवात् एकातिरिक्तघटत्वाव
च्छिन्नप्रतियोगिताकाभावविषयकत्वमेव सुष्ठूचितं एवं घटवत्ताबुद्धिप्रति घटाभाववत्ताज्ञानत्वेन प्र
तिबंधकतायां सघटभूतलेपि यत्किंचिद्घटाभावसत्वात् घटाभाववत्ताज्ञानत्वेनैव प्रतिबंधकत्वं
वाच्यं तदपेक्षया घटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेन प्रतिबंधकत्वस्यैवौचित्यमित्यादि
रीत्यातिरिक्ताभावसिद्धिरिति निपुणतरमूहनीयं तदभावेति घटाभावाभावस्याप्यभाव इत्यर्थः
केवलाधिकरणमित्यादि केवलाधिकरणं घटाभावानधिकरणं भूतलं तदभावः घटाभावाभावः
सर्वत्र घटाभावस्थलेपि स एव अधिकरणस्वरूप एव ननु सर्वत्राधिकरणस्वरूपत्वे पूर्वं दूषणं
दत्तमेवेत्यत आह भवतु केति एवं घटाभावाभावस्याधिकरणस्वरूपत्वे तथा च यानि दूषणान्यधि

त॰प्र॰
३५
35

करणस्वरूपत्वेऽन्वयोक्तानि तानि तत्तन्मतेऽप्यवशिष्टानीति भावः न तत्सत्त्वे घटसत्त्वे उक्तयुक्तेरिति आ
धाराधेयभावानुपपत्तिरूपदूषणादित्यर्थः संप्रदायमतेऽस्वरसादेव नव्यमतमाह नव्यास्त्विति
अयं अभावत्वेन प्रत्ययः बाधकाभावात् प्रमात्वे बाधकाभावात् अन्योन्याभावस्थले ऐकत्वे स्या
देतदिति अत्र भूतले घटभेदभिन्नत्वाभावे आद्ये घटभेदभिन्नत्वे तद्भेदोपीति घटभेदभेदस्य
भेदोपीत्यर्थः भवद्भिरिति आधाराधेयभावानुपपत्तिरूपदूषणगणप्रसंगादित्यर्थः प्रामाणिक
त्वादिति बीजांकुरानवस्थायाद्वानवस्थायाः प्रमाणसिद्धत्वादित्यर्थः संदेहइति घटभेदाभा
वो घटत्वस्वरूपः इत्यादि बोध्यं स चायमिति प्रागुक्तयुक्त्यातिरिक्तत्वेन सिद्धोभावश्चेत्यर्थः तत्र त्र
यमोदिष्टमन्योन्याभावं लक्षयति तत्रेति प्रतीतिसाक्षिकइति ईदृशप्रतीतिसिद्धमखंडोपाधिरू
पमन्योन्याभावत्वमेवान्योन्याभावलक्षणमित्यर्थः प्राचीनोक्तमन्योन्याभावलक्षणं दर्शयति य
दिसमाहुरित्यादिना तादात्म्येति घटतादात्म्यं हि घटत्वं तथा च घटान्योन्याभावबोधे घटत्वं संबंधवि
धया प्रकारतया च प्रतियोगितावच्छेदकमिति तद्विधतया घटत्वस्य भाने तदवच्छिन्नप्रतियोगिता
कस्यान्योन्याभाव इति लक्षणसमन्वयः न च संयोगितादात्म्यसंयोगएवेति संयोगसंबंधावच्छि

35A

न्नप्रतियोगिताकसंयोगघटात्यंताभावेऽतिव्याप्तिरितिवाच्यं तादात्म्यसंबंधावच्छिन्नेतितदर्थात् ता
दात्म्यत्वविशिष्टत्वमेवहितादात्म्यसामान्यत्वं तादात्म्यत्वेवसंबंधताविशेषः प्रतीतिसाक्षिकः घटऽ
त्वादिरूपतादात्म्यं तादात्म्यत्वेनैव घटान्योन्याभावप्रतियोगितावच्छेदकमितिलक्षणसमन्वयः
संयोगघटात्यंताभावेचसंयोगत्वेनैवसंबंधत्वं ननुतादात्म्यत्वेनेतिनानुपपत्तिः अथध्वंसप्रागभाव
योरिवान्योन्याभावस्यप्रतियोगितावच्छेदकसंबंधेमानाभावः नचात्यंताभावस्यापितथात्विति
वाच्यं संयोगसंबंधावच्छिन्नप्रतियोगिताकघटात्यंताभाववत्ताज्ञानेसत्यपिसमवायादिसंबंधेन
घटवत्ताज्ञानोदयात् संयोगसंबंधावच्छिन्नघटनिष्ठप्रकारताशालिज्ञानंप्रतिसंयोगसंबंधावऽ
च्छिन्नप्रतियोगिताकघटाभावप्रकारकज्ञानत्वेनप्रतिबंधकत्वादत्यंताभावस्यप्रतियोगितावच्छे
दकसंबंधस्यावश्यकत्वात् अन्योन्याभावस्यचनानासंबंधावच्छिन्नप्रतियोगिताकत्वाभावेनसम
वायेनघटत्ववत्ताज्ञानंप्रतिघटान्योन्याभाववत्ताज्ञानत्वेनैवप्रतिबंधकतयाऽन्योन्याभावस्यतथानाव
श्यकत्वादित्यखंडोपाधिरूपत्वमेवसम्यगित्यस्वरसस्त्वाहुरित्यनेनसूचितः तदन्यइति अन्योन्या
भावान्यइत्यर्थः तथाचान्योन्याभावभिन्नाभावत्वंसंसर्गाभावत्वमितिलक्षणमितिभावः अत्रच

त॰प्र॰
३६

घपिनास्तीतिप्रतीतिसाक्षिकोभावः संसर्गाभावस्तदन्योऽभावोन्योन्याभाव इत्यपि वक्तुमुचितं त
थापि नास्तीतिप्रतीतेरत्यंताभावविषयकत्वेनैवोपपत्तेरतिरिक्तसंसर्गाभावत्वे मानाभावात् तथोक्तं
सोपि संसर्गाभावोपि अत्रनास्तीत्यनुभवेत्यादि अग्रेव विनष्ट इत्यादिप्रतीतिप्रदर्शनमत्यंताभा
वध्वंसयोः प्रमाणप्रदर्शनाय ननु लक्षणेपि न मन्निवेश इति चेत् नित्यत्वमात्रोक्तौ गगनादौ संस
र्गाभावमात्रोक्तौ ध्वंसप्रागभावयोरतिव्याप्तिरित्युभयोपादाने नित्यत्वं चात्र प्रागभावाप्रतियोगि
त्वे सति ध्वंसाप्रतियोगित्वं ध्वंसस्य प्रागभावप्रतियोगित्वात् प्रागभावस्य च ध्वंसप्रतियोगित्वान्न त
त्रातिव्याप्तिः एकतरमात्रोक्तौ चान्यतरत्रातिव्याप्तिरिति ध्येयं उत्पत्तिमत्वमात्रोक्तौ घटादावभावत्व
मात्रोक्तौ चात्यंताभावादावतिव्याप्तिवारणायोभयोपादानं आद्यदलेण संबंधेनोत्पत्तिः स्वाधिकरण
लक्षणवृत्तिप्रागभावप्रतियोगिलक्षणसंबंधेनोत्पत्तिर्विवक्षिता वत् अध्वस्तलक्षणयोगस्य लक्षणयोगजनि
र्मत्तेति वा तदर्थश्च स्वाधिकरणलक्षणध्वंसानधिकरणलक्षणसंबंधत्वोत्पत्तिरिति महाप्रलयवा
दी कर्तृमते तु कश्चिदपि यदीयसमयसंबंधे यदीयपदार्थसमयवृत्तिध्वंसप्रतियोगित्वं नास्ति तस्य त
त्समयसंबंधेनोत्पत्तिरित्यर्थः स्ववृत्तिपदार्थप्रागभावानधिकरणत्वं स्ववृत्तिध्वंसप्रतियोग्य

३६

36A

नधिकरणत्वं वा लक्षणत्वमिति वोध्यं स्य च ध्वंसश्च नन्वप्रतीतिरेव मानमत आह नहीति ध्वंस
स्य ध्वंसाप्रतियोगित्ववत्प्रागभावाप्रतियोगित्वमपि स्यादिति भ्रमं निराकर्त्तुमाह नत्प्रागभावश्चे
ति ध्वंसप्रागभावश्चेत्यर्थः अनेनैव प्रतियोग्यभाव एव तत्प्रागभावपदेनोक्तः अत्र प्रतीतिप्रमा
णयति उभयत्रेति प्रतियोगिदशायां प्रतियोगिप्रागभावदशायां चेत्यर्थः इदमुपलक्षणं ध्वं
सप्रागभावानधिकरणकालस्य प्रतियोग्यधिकरणत्वनियमेन ध्वंसस्य ध्वंसस्वीकारे घटोत्प
त्तेनप्रसंगात् ध्वंसस्य न ध्वंसः एवं घटप्रागभावकाले ध्वंसोत्पत्तावप्रसंगात् घटप्रागभावस्य घटध्वंसप्राग
भावरूपत्वापत्तेरपि दूरत्वं प्रागभावं जनयति विनाशीति घटादावत्यन्ताभावादावतिव्याप्तिवारणाय यथाश्रु
तं विशेषणद्वयोपादानं ननु प्रागभावाङ्गीकारे मानाभाव इत्यत आह स चेति तथा च भविष्यतीति प्रतीति
विषयतया प्रागभावस्यावश्यकत्वमिति भावः ननु भविष्यत्वस्य वर्त्तमानप्रागभावप्रतियोगित्वरूपत्वे प्राग
भावसिद्धेः स्यादेवं न किंतु वर्त्तमानोत्तरकालोत्पत्तिकत्वमेव तत्त्वं नच यत्सामग्र्यव्यवहितोत्तरीयः क्षणः
स तदुत्पत्तिमानिति सामग्रीव्याप्तेर्घटादिरिह्चितीयक्षणे घटादेरुत्पत्तिवारणाय प्रागभावे हेतुत्वमावश्यक

त.प्र.
३७
37

मिति वाच्यं उत्पन्नत्वं तदभावेन सामग्रीव्याप्तेरनुपगमात् अपि त्वतदधिकरणत्वं तदभावेनैव गम
कत्वात् तथापि जन्यद्रव्यत्वावच्छिन्नं प्रति समवायेन द्रव्यत्वेन प्रतिबंधकत्वोपगमेनानुपपत्तेर
भावात् अनेन प्रागभावादिकल्पनमपेक्ष्यैकप्रतिबंधकाभावकल्पनाया एव न्याय्यत्वादिति चे
न्नाहुः सह स्वतंतुकपटस्य लेखानधिकरणतन्त्वादौ पटोत्पत्तिवारणाय तावत्संयोगानां तत्तं
तूनां तत्तद्व्यक्तित्वेन कारणत्वमपेक्ष्यैकप्रागभावकारणत्वमेव समुचितं प्रागभावस्य च प्रतियो
गिसमानदेशत्वनियमेन पटादीनां देशनियमोपपत्तेः न च त्रिचतुरेषु तन्तुषु संयुक्तेषु च तंतुषु
पटोत्पत्तिवारणाय तत्तत्तंतूनां तत्तत्संयोगानां वा हेतुत्वमावश्यकमिति वाच्यं चरमतन्तुसंयोगव्य
क्तेरेव तच्छक्तित्वेन हेतुत्वोपगमात् चरमसंयोगानधिकरणतन्तावपि तत्पटोत्पत्त्यापातद्विरहेण तं
त्वंतरे तत्पटोत्पादनवारणासंभवात् प्रागभावस्वीकारस्यावश्यकत्वात् चरमसंयोगस्य च तत्प
टं प्रति समवायेन न हेतुता चरमसंयोगानधिकरणतंतावपि तत्पटोत्पत्तेः किंतु समवायसंबंधे
न तत्पटं प्रति कालिकसंबंधेन चरमसंयोगो हेतुरित्यलमप्रकृतविचारेण न स्य चेति प्रागभा

३७

37A

वस्यचेत्यर्थः तद्ध्वंसस्य प्रतियोगिध्वंसस्य प्रतीतिं प्रमाणयति उभयथेति प्रतियोगिदशायां ध्वंसदशा
यांचेत्यर्थः इदमुपलक्षणं प्रागभावोऽप्यनेन प्रसंगेनोपदिष्टव्यः नित्याविति नित्यत्वेचात्र प्रागभावाप्र
तियोगित्वे सति ध्वंसप्रतियोगित्वं ग्राह्यम् अत एव ध्वंसप्रागभावयोर्नैविभागइतिभावः प्रसंगाद्व्यास
ज्यवृत्तिधर्मावच्छिन्नप्रतियोगिताकाभावमतिरिक्तं साधयितुं प्रणालीमारभते नित्यश्चेत्यादिना
एकमात्रेति एकमात्रपर्याप्तिवृत्तिकइत्यर्थः अन्यश्चेति एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रति
योगिताकाभावश्चेत्यर्थः नचांत्ये एकमात्रापर्याप्तवृत्तिकधर्मावच्छिन्नप्रतियोगिताकेऽभावेघटव
तीत्यादिप्रतीतिर्द्वयप्रदर्शनमत्यंताभावान्योन्याभावभेदेन घटवतीति व्यासज्यवृत्तिधर्मावच्छिन्नाभा
वानभ्युपगमे तादृशप्रतीत्यनुपपत्तिरितिभावः नचतादृशप्रतीतेः घटाभावविषयकत्वेनैवोपप
त्तेर्नातिरिक्ताभावसाधकत्वमितिवाच्यं तथासति क्वचिद्घटाभावः क्वचिच्चपटाभावो विषय इति ता
दृशानुगतप्रतीत्यनुपपत्तेः अनुगतधर्मं विनानुगतप्रतीत्यभावात् नन्वायातं द्वित्वावच्छिन्नप्रति
योगिताकोभावस्तथापि लक्षणानामेव द्वित्वसमानाधिकरणघटत्वपटत्वावच्छिन्नप्रतियोगिताका

त॰प्र॰ ३९ भावानांप्रतियोगितावच्छेदकंतद्रूपेयेते तथाचतस्यातिरिक्तत्वाभावे मानाभावएवेत्यतआह एकघ
टवतीति घटौनस्तइतिप्रतीतेर्यदिघटप्रतियोगिताकाभावो विषयस्तथाघटद्वयवत्यपि यत्किंचिद्घटप्र
38 तियोगिताकाभावसत्वात्तादृशप्रतीत्यापत्तिः यदिचघटत्वावच्छिन्नाभावोविषयस्तदैकघटवत्यपिघ
टौनस्तइतिप्रतीत्यनुपपत्तिरित्यनायत्याऽतिरिक्तोऽभावोऽभ्युपेयतइतिभावः ननुतद्घटवतितद्घटान्य
घटत्वावच्छिन्नाभावः घटांतरवतितदन्यघटत्वावच्छिन्नाभावोविषयोवक्तुंशक्यतएवेतिचेन्न तथाप्य
नुगतधर्मंविनाऽनुगतप्रतीतेरुपपादयितुमशक्यत्वमित्यादिः प्रागेवनिवेदितत्वात् ननुयत्किंचित्
घटवतिघटपटौनस्तइतिप्रतीतेर्द्वित्वसामान्यंनप्रतियोगितावच्छेदकं तथाविधयत्किंचिद्रूपसत्वे
नतदवच्छिन्नाभावासंभवात् नापिद्वित्वविशेषः तत्तद्द्वित्वेनानुपस्थितेः केवलघटादिमत्यपि
तथाप्रत्ययेनप्रत्येकंघटत्वपटत्वादिकमपिनतथेतितन्मतेप्यनुगतप्रत्ययोऽनुपपन्नएवेतिचेन्न द्वि
त्वंद्वित्वधर्मितावच्छेदकीभूतंघटत्वंपटत्वंचतथा प्रतियोगितावच्छेदकताचात्रव्यासज्यवृत्तिरी
त्या प्रतियोगितावच्छेदकावच्छिन्नंचघटपटोभयमितिनानुपपत्तिलेशोपीतिध्येयम् तयोरिति ३९

38A

प्रतियोग्यभावयोरेकाधिकरणवृत्तित्वरूपविरोधादित्यर्थः नन्वेकस्मिन्नपि समवाये न द्वित्वमस्ये
वेत्यत आह एको द्वाविति एकस्मिन्समवाये न द्वित्वस्य सत्वेप्येको द्वाविति प्रतीत्यापत्तिरतः समवायेऽ
न तत्सत्वेपि पर्याप्तिसंबंधेन तदसत्वान्न तथा प्रतीतिरित्युपेयं एवं च प्रतियोगितावच्छेदकपर्याप्त्यधिक
रणेनैवाभावस्य विरोधान्न तदनुपपत्तिरिति भावः प्रतियोगितावच्छेदकावच्छिन्नेनैवाभावस्य विरोधा
त् प्रतियोगिमत्यपि नातिरिक्तविशिष्टाभावो विरुद्ध इत्याह अत एवेति प्रतियोगितावच्छेदकावच्छि
न्नेनैवाभावस्य विरोधादेवेत्यर्थः इयं दंडीपुरुषो नास्तीति धीः तस्य पुरुषस्य न च क्वचिद्दंडाभावः
क्वचिच्च पुरुषाभावो विषय इति वाच्यं विषयानुगमं विनाऽनुगतप्रतीत्यनुपपत्तिरित्यस्यासकृदावेदित
त्वात् नन्वायात्तूपदर्शितरीत्याऽतिरिक्तोऽभावस्तथापि तद्ग्राहकानविशेषणतापत्त्यासत्तिः किंतु च
रि३ क्षुरादिनाव[illegible]ना संभवात् यथानुमानादेः प्रमाणांतरत्वेन ग्राह्याऽभावग्रहे रूपादीनां संयोगादिसन्निक
र्षाणामभावेनेंद्रियादिग्राहकत्वासंभवात् प्राप्तस्यैवेंद्रियस्य ग्राहकत्वात् अन्यथा निमीलितनयनस्या
पि घटादिग्रहापत्तेरित्यनुपलब्ध्याख्यप्रमाणांतरमभावग्राहकमन्वेषितव्यं न च विशेषणतैव सं

त·प्र·
३९

39

न्निकर्षः तस्यास्तत्त्वेनाक्लृप्तत्वात् समवायानंगीकारेण समवायग्राहकत्वेनाप्यक्लृप्तत्वाच्च तथाच घ
टाभावस्यानुपलब्धिप्रमाणजन्यमानुपलब्धमेव ज्ञानं न तु साक्षात्कारः साक्षात्कारस्येंद्रियजन्यत्वव्या
प्यत्वात् न चैवं निमीलितनयनस्यापि घटाभावग्रहापत्तिः सदसद्भ्यामभावो विरूप्य इति नियमात् अ
भावग्रहेऽधिकरणप्रत्यक्षजनकतया तज्ज्ञानार्थमिंद्रियापेक्षणात् अत एव तज्जनकतयाऽन्यथासि
द्धमिंद्रियं नाभावग्रहे हेतुः न चाधिकरणप्रत्यक्षस्य व्यापारतयानन्ते न तदन्यथासिद्धिः व्यापारेण व्या
पारिणोऽन्यथासिद्ध्यभावात् अन्यथा चक्षुः सन्निकर्षेण चक्षुषोऽप्यन्यथासिद्धिः प्रसज्येतेति वाच्यम्
इंद्रियस्याजनकत्वसंभवेऽधिकरणप्रत्यक्षस्य तद्व्यापारत्वे तदेव न क्लृप्तसन्निकर्षाभावात् एवं चानु
पलब्धिप्रमाणस्यापि सत्वाच्चत्वार्य्येव प्रमाणानीत्यप्यसंगतमिति निष्कृष्टं भट्टमते दूषयित्वा तन्मतमु
पन्यस्यति भट्टास्त्वित्यादिना नैंद्रियग्राह्यः नैंद्रियजन्यलौकिकसाक्षात्कारविषयः क्लृप्तसन्नि
कर्षाणां संयोगादिषण्णां सन्निकर्षाणामभावात् अभावेऽसंभवात् ननु तर्ह्यभावग्रहानुपप
त्तिरत आह किंत्विति इंद्रियाप्रमाणांतरजन्यज्ञानमेव न सन्निकर्षापेक्षेति नैंद्रियसमनेतिभावः ३९

39A

प्रमाणान्तरेति धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वमिति न्यायात् अत्र उपलब्धेरुत्पत्तिविज्ञाती
यप्रमां प्रतिकरणत्वकल्पनमपेक्ष्य लक्षणप्रत्यक्षप्रमाहेतुतयाविशेषणतारूपसन्निकर्षकल्पनमे
व लघीय इत्यर्थः तथा चेन्द्रियेणैव तत्कृतं इति भावः अन्यथेति सन्निकर्षकल्पनयोपपन्नावपि प्रमा
णान्तरकल्पनमित्यर्थः कस्यापि कश्चित् लक्षणानां संयोगादिरूपाणां सन्निकर्षाणां शंकते तत्रेति प्र
त्यक्ष एव प्रत्यक्षविषय एव अयं शब्दः तथा च अन्यसाक्षात्कारत्वावच्छिन्नं प्रति सन्निकर्षत्वेन हेतु
तया प्रवेऽपि सन्निकर्षकल्पनमावश्यकं सन्निकर्षत्वेन संयोगाद्यन्यतमत्वमिति भावः अध्या
लाएवेत्यनेनास्मभाव इति शेषः तथा चाज्ञाप्यभावग्रहार्थं सन्निकर्षापेक्षणमावश्यकमिति भावः
ननु शब्देऽपि प्रमाणान्तरापत्तिरित्यरुचेः प्रतिबन्देरनुत्तरत्वादित्यस्वरसादाह किंचेति ननु व्यापाराभा
वेऽपि फलायोगव्यवच्छिन्नकारणत्वरूपकरणत्वमुपपद्यत एव अत एव साधकतमं करणमिति
सूत्रमपि अत आह व्यापारस्त्विति निमीलितनयन[illegible]यामन्धकारे च चक्षुषोऽपि फलायोगात्
स्येतरयावत्कारणसमवधानेऽपि व्यवहितोत्तरक्षणे कार्यापत्तिः स्वतन्त्रमेव फलायोगव्यवच्छिन्नत्वव्या

न॰प्र॰ एतस्य च यावत्कारणघटिततया गुरुत्वेन व्यापारवत्कारणत्वस्यैव करणत्वरूपत्वौचित्येनानुपलब्धेः प्र
४० माकरणत्वव्याघातादिति भावः उक्तमिति उक्तप्रायमित्यर्थः वस्तुतस्तु धर्मिकल्पनाप्यायेनैव सन्निकर्ष
40 कल्पनेन न तु प्रमाणान्तरकल्पनमिति पूर्वोक्तयुक्तिरनिरसनीयेति हृदयम् अनुपलब्ध्याख्यप्रमाणा
नंगीकारे घटाभाववति घटभ्रमदशायां घटाभावसत्वात् इंद्रियसंबद्धविशेषणतया घटाभावप्रत्यक्षा
पत्तिः मन्मते च घटोपलंभसत्वेनानुपलब्धेरभावान्नतत्प्रत्ययापत्तिरित्यनायत्या प्रमाणांतरकल्पनमा
वश्यकमित्याशयेन मीमांसकः शंकते नन्वेवमिति एवमनुपलब्ध्याख्यप्रमाणमनंगीकृत्येंद्रियसं
बद्धविशेषणतायाः प्रत्यासत्तिरिक्तायाः प्रत्यासत्तित्वे योग्यानुपलब्धेरपीति वस्तुतो घटाभावप्रत्यक्षे ज
ननीये भवन्मते अतिरिक्तप्रमाणत्वेनाभ्युपगताया योग्यानुपलब्धेः सहकारित्वं कल्प्यते घटाभाववति च
घटोपलंभे च योग्यानुपलब्ध्यभावादेव न घटाभावप्रत्यक्षापत्तिरिति भावः नन्वेवं किमवशिष्टमनुप
लब्धेः प्रमाणत्वेन प्रत्युतेंद्रियस्य कारणत्वे विशेषणतारूपप्रत्यासत्तिकल्पनमधिकमिति चेन्न विजा
तीयप्रमाकल्पनापेक्षया प्रत्यासत्त्यंतरकल्पनापाप्यत्वाद्व्यापारत्वाभावेन प्रमाणत्वासंभवस्य पूर्व ४०

40A

मेवदर्शितत्वाच्चेति अभावग्रहे अभावलौकिकप्रत्यक्षे अथवैकेषामिति इयं अभावग्रहेहेतुः योग्य
स्यानुपलब्धिरिति वा योग्येऽनुपलब्धिरिति वा योग्यानुपलब्धिशब्दार्थः तत्राद्यमाशंकते योग्यस्येति ज
लपरमाणाविति महत्वाभावप्रत्यक्षतानुरोधेन विजातीयप्रत्यक्षसंयुक्तविशेषणतया अवश्यमंगीकार्य्यं तथा
पृथिवीत्वाभावस्यापि ग्रहापत्तिरितिभावः दूषणान्तरमाह स्तंभेभे इति द्वितीयमाशंक्य निराचष्टे ।
अथ योग्ये इति स्वैकदेशिमतं दूषयितुं तन्मतमुपन्यस्यति यत्विति वायाविति वायोरयोग्यत्वादितिभावः
परमाणौ महत्त्वेदग्रहणानापत्तेश्चेत्यपि द्रष्टव्यं अनुभवेति वायुर्नीरूपवान् परमाणुर्न महानित्यादिप्रत्यक्ष
प्रतीतीनां विलोपप्रसंगादित्यर्थः योग्याच्चासावनुपलब्धिश्चेति कर्मधारयमभिप्रेत्याह । अत्रोच्यत इति
योग्यत्वस्य विवरणं सहकारीति तथा चाभावप्रत्यक्षसामाग्रीविशिष्टा प्रतियोग्यनुपलब्धिरेव योग्या
नुपलब्धिरित्यर्थः अत एव सहकारिसंपन्नत्वरूपयोग्यत्वविशेषणादेव योग्येति योग्यसन्निक
र्षस्यैवाभावप्रत्यक्षसामग्रीघटकत्वेन परमाणौ न पृथिवीत्वाभावग्रह इतिभावः नन्विंद्रियसन्नि
कृष्टमहत्वोद्भूतरूपवद्विशेषणतया पृथिवीत्वाभावग्रहापत्तिर्वायिनोद्भूतरूपाभावग्राहकत्वम्

त॰ प्र॰
४२

41

उद्भूतरूपाभाववति वायौ तस्याप्यसंभवादिति तत्रेंद्रियसंबद्धविशेषणतया एव योग्यसन्निकर्षत्वमुपेयं एवं
च मनस्यप्युद्भूतरूपाभावप्रत्यक्षं स्यादित्यत आह उद्भूतरूपाभावेत्विति उद्भूतरूपाभावग्रहे त्वित्यर्थः तथा
च प्रकृते रूपमनिवेश्य महत्त्वं निवेश्यमिति भावः अतः महत्त्वविशेषणात् न ग्रहः उद्भूतरूपाभावग्रहः वा
यावित्यत्र तद्ग्रह इत्यनुषज्यते ननु महत्त्वाभावग्राहकः कः सन्निकर्षः एवं गुणादौ पृथिवीत्वाभावप्रत्यक्षस्या
नुपपत्तिस्तत्रेंद्रियसन्निकृष्टमहत्त्वादिमद्विशेषणताविरहात् एवमन्योन्याभावग्राहकोपि सन्निकर्षः क इ न्यः ५
त्यत आह एवमन्यत्रापीति महत्त्वाभावादावपीत्यर्थः सन्निकर्षोऽस्ति महत्त्वाभावे इंद्रियसन्निकृष्टोद्भूतरू
पवद्विशेषणतायोग्यः सन्निकर्षः गुणादौ पृथिवीत्वाभावग्रहे त्विंद्रियसन्निकृष्टविशेषणतैव योग्यः स
न्निकर्षः अन्योन्याभावे तु पृथिवीभेदादाविंद्रियसन्निकृष्टमहत्त्वादिमद्विशेषणतायोग्यः सन्निकर्ष इत्य
र्थः ननु कुत्रचिदिंद्रियसन्निकृष्टमहत्त्वादिमद्विशेषणता क्वचिच्चेंद्रियसन्निकृष्टमहत्त्ववद्विशेषणता
योग्यः सन्निकर्ष इत्यत्र किं नियामकमत आह कर्मवशादिति तत्र तत्र तदभावग्रहानुरोधादित्यर्थः ननु
पिशाचात्यंताभावादीनामपि प्रत्यक्षापत्तिस्तत्र योग्यसन्निकर्षत्वेन योग्यानुपलब्धिसत्त्वादित्यत आह पिशा

कापुनर

41A

चात्यंताभावत्त्विति अयोग्यत्वादिति प्रत्यक्षे विषयस्य हेतुतयाऽभावप्रत्यक्षे योग्याभावत्वेन हेतुत्वोप
गमादिति भावः अयोग्यप्रतियोगिकस्यापि स्तंभे पिशाचभेदस्य प्रत्यक्षोदयात् अत्यंताभाव एव दृष्ट
ति कापुनरत्यंताभावे योग्यतेति उत्तरमपि तत्रैव बोध्यं योग्यमात्रेति पिशाचस्यायोग्यत्वे योग्यप्र
तियोगिकत्वाभावादेव न तत्र भावप्रत्यक्षमिति भावः घटपिशाचान्यतराभाववारणाय मात्रेति अती
द्रियावृत्तिप्रतियोगिताकत्वमिति तदर्थः ननु वायौ रूपसामान्याभावप्रत्यक्षानुपपत्तिस्तस्यातीद्रिया
रूपप्रतियोगिकत्वेन योग्यमात्रप्रतियोगिकत्वाभावात् एवमेतद्गुरुत्ववदत्यंताभावप्रत्यक्षापत्तिः
श्चैत्यस्वरसादाह योग्यधर्मेति पिशाचत्वघटपिशाचान्यतरत्वादीनां योग्यधर्मत्वाभावेन तद
वच्छिन्नाभावप्रत्यक्षमिति भावः वस्तुतस्तु योग्यमात्रप्रतियोगिके योग्यधर्मावच्छिन्नप्रतियोगिता
कत्वं विशेषणमित्येव पाठः योग्यमात्रप्रतियोगिकेऽभावे योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं
विशेषणं योग्यतेत्यर्थः योग्यमात्रप्रतियोगिताकत्वे सति योग्यधर्मावच्छिन्नप्रतियोगिताकत्वं यो
ग्यतेति यावत् तत्र भूतले द्रव्यसामान्याभावप्रत्यक्षवारणाय योग्यमात्रप्रतियोगिकत्वं एतद्गुरु

त्त्ववदत्यंताभाववारणाय योग्यधर्मेति वायौ रूपसामान्याभावप्रत्यक्षं नेष्यत एवेति तदसंग्रहो न दोष
ाय एतद्रूपेण तद्रूपत्वावच्छिन्नाभाववारणाय च योग्यधर्मेत्यस्य योग्यधर्ममात्रावच्छिन्नप्रति
योगिताकत्वमित्यर्थो ऽप्यवधेयं ननु पिशाचवदन्योन्याभावो ऽप्ययोग्यत्वादेव न गृह्यतइति वाच्यं तत्रान्यो
न्याभावे का योग्यता न तावद्योग्यप्रतियोगिकत्वं स्तंभे पिशाचभेदग्रहापत्तेः पिशाचवद्भेदग्रहापत्ते
श्चेत्यत आह एवमन्यत्रापीति अन्योन्याभावेपीत्यर्थः अनुभवानुसारेणेति नत्त्वधर्मावच्छिन्नप्रति
योगिताकत्वमेव तत्तदन्योन्याभावे योग्यत्वमित्यर्थः अत एव का पुनरत्यंताभावे योग्यतेति सामान्य
त एवात्यंताभावे योग्यता निरुक्ता अन्योन्याभावे त्वननुगतैव सेति ध्येयम् सर्वेति अत्यंतान्योन्याभा
वेत्यर्थः तत्किमिति अत्यंताभावे योग्यतात्वेत्यादिरूपा अन्योन्याभावे तत्तदन्योन्याभावत्वमित्येवंरू
पा नाना[illegible]व योग्यतेत्यर्थः ओमिति अंगीकारार्थकमव्ययं गुणयोग्यतावदिति यथा रूपरसादेस्तत्तदिं
द्रिययोग्यत्वं नैकं तथा प्रकृतेपीत्यर्थः केचित्तु विजातीयत्वचः संयोगाश्रयविशेषणतापाणाभावग्रा
हकत्वेन परमाणौ न पृथिवीत्वाभावग्रहः पिशाचात्यंताभावादिप्रत्यक्षवारणाय तु गुरुत्वादिवत्तादा

42A

ऽपि न तत्तद्भावत्वेन साक्षात्कारं प्रति प्रतिबंधकत्वांगीकारेणेत्याहुः स्तरसत् परमाणौ महत्त्वाभावप्र
त्यक्षानुरोधेन विजातीयचक्षुःसंयोगस्यावच्छेदकतया तेन तत्र पृथिवीत्वाभावप्रत्यक्षवारणासंभवात्
पूर्वोक्तं चक्षुरादिकं लक्षयितुं पृच्छति अत्र किमिदमिति तैजसमिति आलोकघ्राणादावतिव्याप्तिर्य
थायथमसंभवपदेशोपादानं चक्षुषस्तैजसत्वे विवादादाह रूपग्राहकमिति रूपग्राहकत्वमात्रोक्तौ
मनस्यतिव्याप्तिरतो महदिति महत्त्वमात्रोक्तौ घ्राणादावतिव्याप्तिरतो रूपग्राहकमिति रूपग्राहकं
महदित्युक्तावात्मन्यतिव्याप्तिरत इंद्रियपदं केचित्तु अत्र केचित् चक्षुषःप्राप्यकारित्वे चंद्रमसो ग्रहणा
नुपपत्तेः शाखाचंद्रमसोस्तुल्यग्रहणानुपपत्तेश्चाप्राप्यकार्य्येव तच्चाक्षुषं एवं चाप्राप्यकारित्वाविशेषाद्गो
लकमेव तदिति पार्थिवत्वमेव तस्येत्याहुः स्वरसस्तु चक्षुषोऽप्राप्यकारित्वे निमीलितनयनस्यापि चाक्षु
षापत्तेः प्राप्यकार्य्येव तच्चाक्षुषं चक्षुषस्तैजसत्वेनातिशीघ्रगामितया चंद्रमसा संयोग उपपद्यते शाखाचंद्र
मसोस्तुल्यकालग्रहणं चासिद्धं मयायुगपच्छतपत्रपत्राणिच्छिन्नानीतिवत् तथा च गोलकस्य र
घटादौ संयोगाभावे नातिरिक्तं तैजसं चक्षुः स्वीकार्य्यमिति एवमन्यत्रापि बोध्यं वायवीयमिति वाय

त.प्र.
४३
43

वीयत्वमात्रे वाय्वादिंद्रियत्वमात्रं चक्षुरादावतिव्याप्तमिति मिलितोपादानं त्वचो वायवीयत्वे विवादादाह
स्पर्शग्राहकमिति चक्षुर्मनस्यात्ममनोवारणाय विशेषणत्रयोपादानं आप्यमिति जलं चक्षुरादावतिव्या
प्तिवारणाय विशेषणद्वयोपादानं रसनस्याप्यत्वे विवादादाह रसग्राहकमिति चक्षुर्मन आत्ममनोवार
णाय [illegible] यं विशेषणत्रयोपादानं पार्थिवमिति। व्यावृत्तिः पूर्ववत् इंद्रियत्वं च शब्देतरोद्भूतविशे
षगुणानाश्रयत्वे सति ज्ञानकारणमनःसंयोगाश्रयत्वम् आत्मन्यतिव्याप्तिवारणाय सत्यंतं विशेषः
शब्दरूपविशेषगुणसत्वाच्छ्रोत्रेऽव्याप्तिः शब्देतरेति उद्भूतविशेषणं चक्षुषि तादृशरूपस्य सत्वात् उद्भूते
ति उद्भूतत्वं च नीलत्वादिव्याप्यानुद्भूतत्वाभाववद्रूपवत्त्वमेव तस्य च संयोगस्याधारणतया चक्षुरादाव
तिव्याप्तेर्विशेषेति चक्षुरादेः सत्वाद्गुणेति कालादावतिव्याप्तेर्~~मले~~ज्ञानकारणेति इंद्रियावयवसंयो
गस्यापि प्रत्यक्षकारणतयेंद्रियावयवेऽतिव्याप्तिवारणाय मनःसंयोगेति श्रोत्रं लक्षयति कर्णेति घ
टावच्छिन्ननभसोपि श्रोत्रत्वापत्तेः कर्णशष्कुलीति नभसः श्रोत्रत्वे विवादादाह शब्दग्राहकमिति
मनो लक्षयति निस्पर्शमिति मनोवैभववादिमीमांसकानां मतमादर्शयति अत्र मीमांसका इति अ

४३

43A

णुत्वाभावसिद्धेपि न विभुत्वसिद्धिरत आह किंत्विति निस्पर्शत्वं गुणादौ व्यभिचारीति द्रव्यत्वादिति इत्य
त्वं घटादौ व्यभिचारीति विशिष्टहेतुत्वमुभावने नन्वेतन्मतेमनस्त्वस्य निस्पर्शाणुत्वस्वरूपत्वासंभवेन पक्षता
वच्छेदकासिद्धिरत आह मनस्त्वं चेति आत्मान्यत्वे व्याप्तिकारणतापात्मान्यत्वे सतीति संयोगाश्रयत्वे कार
णतावपीति ज्ञानासमवायिकारणेति यत्तु मनोयोगस्य ज्ञानकारणत्वान्न ज्ञानकारणसंयोगाश्रयत्वं
चक्षुरादावतिव्याप्तमित्यतोऽसमवायीति ज्ञानासमवायिकारणं चात्ममनःसंयोग एवेति नातिव्याप्तिः के
चित्तु नवीनमतेऽदृष्टविशेषाकृष्टत्रुटेर्मनस्त्वेन पक्षतावच्छेदकस्य कस्याभावात्कथं पक्षतावच्छेदकाव
च्छेदेनानुमितिः त्रुटौ विभुत्वस्य बाधेन कथं वा तत्र विभुत्वानुमितिरत आह मनस्त्वं चेति ज्ञानासमवा
यिकारणेति पुरुषान्तरीयात्मप्रत्यक्षकारणायत्तत्तदात्ममनस्त्वावच्छिन्नप्रतिनियतात्ममनःसंयोगत्वे
न हेतुतया मनस्त्वेन त्रुटीनामवच्छेदककोटौ निवेशो गौरवेण लाघवेनैकमनसः सिद्धिः नच विजातीयसं
योगत्वेन तस्य हेतुतया नतत्र मनसो निवेश इति वाच्यं तथापि समवायेन विजातीयसंयोगस्य संयोगसंबं
धेन मनसो वा हेतुत्वमिति विनिगमनाविरहादिति भाव इत्याहुः विभुत्वे मनसो विभुत्वे संयोगानुप
पत्तेरिति तथा चोपदर्शितानुमाने पक्षतावच्छेदकासिद्धिर्वा धकेति भावः कर्मेति यथा येन क्रियया येप

ननु समवायेन रूपं प्रति सामानाधिकरण्यसंबंधेनावयवरूपादीनां हेतुतया कपालगंधादावपि रूपोत्पत्त्यापत्तेः नैव्यसत्त्वावच्छिन्नं प्रति
द्रव्यत्वेनैव हेतुत्वावश्यकतया संयोगत्वावच्छिन्नं प्रति तद्धेतुत्वे मानाभाव इति न रक्षितगौरवमत आह अप्रयोजकं चेदमिति

44

नन्वेतत्संयोगः अवयवसंयोगजः कारणाकारणसंयोगात्कार्याकार्यसंयोगः यथा हस्ततरुसंयोगात्कायतरु-
संयोगः न च विभोरिति मूर्त्तेतरद्रव्यत्वे विभुत्वे स्पर्शत्वावच्छिन्नं प्रति मूर्त्तत्वेन कारणतया मूर्त्तत्वाभावेनास्पर्श-
विनकर्मोत्पत्तिरिति भावः अनयोः आत्ममनसोः न तत्संयोगजः अवयवसंयोगजः मानाभावादिति नित्यसंयो-
गमाह कप्रत्यक्षतादेरभावादनुमानस्य चाप्रयोजकत्वादित्यर्थः साधकाभावमुक्त्वा बाधकमाह संयोगत्वावच्छे-
नेति संयोगत्वावच्छिन्नं प्रति द्रव्यत्वेन हेतुतायां तत्कार्यतावच्छेदकं जन्यसंयोगत्वमेव नित्यसंयोगस्वीकारे वा-
च्यं कार्यमात्रवृत्तिधर्मस्यैव कार्यतावच्छेदकत्वात् न चात्र जन्यत्वनिवेशे गौरवमेव तत्स्वीकारे प्रतिकूलतर्क इ-
ति भावः यद्वा नित्यवृत्तिधर्मस्यापि कार्यतावच्छेदकत्वे तन्निविरहादत आह अप्रयोजकं चेदमिति इदं वि-
भुत्वसाधकमनुमानमित्यर्थः अनुकूलतर्काभावादिति भावः संयोगत्वावच्छेदेनेति संयोगत्वस्य द्रव्यज-
न्यत्वव्याप्यत्वे न नित्यसंयोगस्वीकारे तादृशनियमभंगप्रसंगादिति भावः ननु तादृशनियमे मानाभाव इत्यत
आह अप्रयोजकं चेतीत्यपरे ॥ नानातर्कविचारणैकमतिना यत्किंचिदुक्तं मया तत्क्षन्तव्यमिह प्रविभाव्य सुधि-
यः सारार्थसंग्राहकाः ह्येद्येतद्यदि धारयेदपि जनः संजायते सोचिराद्वादीन्द्रः परवादिहृन्मणिगणाधानेकदक्षः
कृती २ इति श्रीमद्विद्वन्मुकुटमाणिक्यराजिनीराजनचरणसरोजपदरेखेन्दुन्यायवागीशश्रीदीक्षितश्रीकंठश्री

44A

ॐ प्रत्यक्षनिरूपणानंतरमुपजीव्योपजीवकभावसंगत्यानुमानं निरूपयन् प्रतिजानीते अथेति अथश
ब्दोऽत्रानंतर्यवचनः तत्रचप्रत्यक्षनिरूपणस्यार्थादवसितत्वमवगम्यते अत एव सिद्धत्वमपि निरूपयत इति
वर्त्तमानार्थकलट्प्रत्ययेन चानुमाननिरूपणस्य साध्यत्वलाभः एवं च सिद्धसाध्यसमभिव्याहारे सिद्धं साध्याय
योपकल्प्यत इति न्यायेन मणिनैतद्वपुः स्वापाद्यत्यत्रैवात्रापि प्रत्यक्षानुमाननिरूपणयोरुपजीव्योपजीव
कत्वलाभः तथा चोपजीवकत्वसंगत्यानुमाननिरूपणमिति भावः यद्यप्यनुमितिकरणत्वेनानुमानस्य
नेन प्रत्यक्षज्ञानापेक्षेति न निरूपणयोरुपजीव्योपजीवकभावासंभवस्तथापि सविशेषणे हीति न्यायेन
निरूपणप्रत्यक्षानुमानयोरेवोपजीव्योपजीवकभावलाभः अत्र चोपजीवके निरूपणीये उपजीव्यनिरूपणा
दुपजीवकत्वादिसंगतेरानंतर्यानियामकत्वेपि स्वतंत्रेच्छस्येति न्यायेनेच्छाया एव नियामकत्वान्न पौर्वापर्य
नियम इति ध्येयं ननु निरूपणप्रतिज्ञाया विषयांतरसंचाररहित्यरूपशिष्यावधानप्रयोजनकत्वेपि उन्मत्तप्रल
पितत्वादिशंकानिरासाय संगत्यभिधानस्यैवौचित्येन तत्संगतिप्रदर्शनस्यापि व्यर्थत्वादिति चेन्न द्विविधं हि
शिष्यावधानमनुपेक्षणीयत्वरूपं विषयांतरसंचाररहित्यरूपं च तत्रासंगतत्वज्ञाने नोपेक्षासंभवात्संगतिप्रद

त·प्र·
४५
45

धीनमावश्यकं तथा च संगतिज्ञाने तत्संगतत्वज्ञानासंभवात् तत्संगतत्वज्ञानमप्युद्घातोपेक्षणीयत्वं द्वितीयं
चनिरूपणप्रतिज्ञेयेति परमरहस्यमज्ञानसंधेयं ग्रंथमध्येपि मंगलाचारादपशब्दो मंगलार्थ एवेति कश्चित्
ज्ञानंतर्यं चात्र ध्वंसाधिकरणक्षणवृत्तित्वं तथा च प्रत्यक्षनिरूपणध्वंसाधिकरणक्षणवृत्तिवर्तमाननिरूप
णविषयोनुमानमिति शाब्दबोधः तत्र लक्षणस्वरूपप्रमाप्रामाण्यादिप्रकारकनिरूपणविषयेनुमाने करण
त्वमात्रस्य कुठारादौ मितिकरणत्वस्य प्रत्यक्षादावतिव्याप्तेर्वारणायानुमितिकरणत्वमिति विशिष्टोपादानं
नन्वनुपपत्त्या न्मितिनिर्वाहे नमितित्वमुपमित्या किंचिज्जन्यज्ञानकरणत्वं लक्षणं लब्धं तच्चातिप्रसक्तमेवेत्यत आह
ज्ञानुमितित्वं चेति तथा च न किंचिज्जन्यज्ञानत्वमनुमितित्वमपि तु जातिविशेष एव तदवच्छिन्नकरणत्वं च
न प्रत्यक्षादावतिव्याप्तिरिति भावः यद्वाननुव्यावृत्तिर्व्यवहारो वा लक्षणस्य प्रयोजनमिति नियमे र
लेतरभेदानुमापकमेवैतल्लक्षणं वाच्यं इतरभेदानुमानं चानुमानं प्रत्यक्षादिभ्यो भिद्यतेनुमितिकरण
त्वादित्येवं तन्नैवं यथा प्रत्यक्षादीत्याकारकं न च चानुमितेः प्रत्यक्षप्रमितिवैलक्षण्येने प्रत्यक्षप्रमाणादनु
मितिकरणत्वस्य संभवे न प्रत्यक्षभेदासत्वेन च व्यभिचारज्ञानापत्तेरिति लक्षणप्रयोजनमनुपपन्नमित्य ४५

५५A

त्यत आह अनुमितित्वं चेति प्रत्यक्षप्रमित्यनंतरमनुमिनोमीत्यनुव्यवसायानुदयात्प्रत्यक्षव्यावृत्त
मनुमितित्वमेव तद्विषयस्तच्च प्रत्यक्षेऽतिप्रसक्तम् प्रत्यक्षप्रमितिविलक्षणप्रमितिकरणत्वहेतुकमितरभे
दानुमानेऽस्त्वकरमेवेति न कोऽपि दोष इति सारं केचित्तु व्याप्तिविशिष्टपक्षधर्मताज्ञानजन्यज्ञानकर
णत्वमेवानुमितिकरणत्वं वाच्यं तत्र च व्याप्तिज्ञानत्वादेरेव गमकत्वसंभवेनाधिकस्य वैयर्थ्यमिति नेत
रभेदानुमानेऽननुपपन्नमित्यत आह अनुमितित्वं चेति तथा च ज्ञातिरूपानुमितित्वावच्छिन्नकरणत्व
मेव तल्लक्षणं न तु ज्ञस्त्वप्रमितिमध्यघित्वशे कापीत्याहुः ननु अनुमानत्वमनुमितिकरणत्वं तथा चेतरभेदानुमा
ने पक्षतावच्छेदकहेतौ भेदेनान्वयव्याप्तिज्ञानस्यैवानुमितिहेतुतया हेतौ साध्याधिकरणवृत्तित्वरूपव्या
प्तिज्ञाने जायमाने एवं तु तस्य वृत्तिविघटनपा साध्येऽपि हेत्वधिकरणवृत्तित्वग्रहसंभवेन पक्षतावच्छेदकाश्रये सा
ध्यसिद्धेः सिद्धसाधनापत्तिरिति नियमे दृष्टावश्यकः यदि च हेतौ साध्याधिकरणवृत्तित्वे ज्ञाते विपक्षतावर
च्छेदकावच्छेदेन साध्यसिद्धेरनुदयान्न सिद्धसाधनावकाशः अन्यथा पृथ्वी इतरभेदवती गंधवत्त्वा
दित्यत्रापि पृथिवीत्वाधिकरणे घटादावितरभेदस्य निश्चितत्वादनुमित्युच्छेद एव स्यात् किं च व्यतिरेक

त॰पू॰
४६
46

व्याप्तिज्ञानस्यानुमितिकरणतया साध्यसामानाधिकरण्यस्य तत्राघटकत्वेन लिङ्गसाधनमिति विभाव्य
तेन व्याप्त्युद्देश्यतावच्छेदकविधेययोरैक्ये न शाब्दबोधानुपपत्तिरिव अन्यथा दण्डवान् दण्डवानित्यादेर्निराकां
क्षत्वानुपपत्तेरिति मैवं अनुमानपदवाच्यत्वस्य लक्ष्यतावच्छेदकत्वेन कुत्राप्यनुपपत्तेरभावादिति केचि
त्तु नामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधानभ्युपगमादनुमितिकरणमित्यस्यानुमितिसंबंध्यभि
न्नकरणत्वमर्थः अनुपूर्वकमाधातुना नुमितिः करणल्युटा च करणं बोध्यते तथा चानुमितिकरण
मनुमितिसंबंध्यभिन्नकरणमिति शाब्दबोधो नानुपपन्नः करणतायाः कार्यघटितत्वेनानुमितिकर
णस्य करणस्य करणपदार्थत्वेऽप्यनुमितिसंबंध्यभिन्नानुमितिकरणमिति बोधोपि नानुपपन्नः विधे
यतापर्याप्त्यधिकरणोद्देश्यतावच्छेदकयोरैक्य एव शाब्दबोधानभ्युपगमात् अन्यथा दण्डवान् दण्
डवानितिबोधानुपपत्तेरित्याहुः नन्वनुमितित्वस्यैवानुमितिलक्षणे लक्षणलक्ष्यतावच्छेदकयोरै
क्यमत आह जन्यज्ञानेति जन्यज्ञानजन्यत्वाव्यभिचारिणी जन्यभावधीजन्यत्वाव्यभिचारिणी च या जाति
स्तद्वदनुभवत्वमनुमितित्वमिति लक्षणार्थः जन्यज्ञानं व्याप्तिज्ञानं तज्जन्यत्वाव्यभिचारिणी तद्व ४६

46A

न्यत्वव्याप्याजन्यशब्दधीजन्यत्वव्यभिचारिणी च या जातिरनुमितित्वं तद्वत्त्वमादाय लक्षणसमन्वयः
तथा च तस्य स्वरूपतो लक्ष्यतावच्छेदकत्वेन तादृशजातित्वेन च लक्षणत्वेन न तयोरैक्यमिति भावः ननु अ
न्यशब्दधीजन्यत्वव्यभिचारिजातिमत्त्वं भवत्वमेव लक्षणमस्तु किमिता विशेषणेनेत्यत आह प्रत्यक्षत्वे
ति अतिव्याप्तिं निराकरोति ज्ञानाजन्येति जन्यज्ञानाजन्य इत्यर्थः नित्ये ईश्वरसाक्षात्कारे तद्धीति त
त् प्रत्यक्षत्वं धीजन्यत्वं जन्यज्ञानजन्यत्वं तथा च प्रत्यक्षत्वस्य जन्यज्ञानजन्यत्वाव्याप्यत्वान्नातिव्याप्ति
रिति भावः तत्रापि जन्यज्ञानजन्यत्वाव्यभिचारित्वेऽपि अतिव्याप्तिमुपपादयति तद्धीति चाक्षुषत्वे
हीत्यर्थः तदाश्रयाणामिति चाक्षुषत्वाश्रयाणामित्यर्थः जन्यपदोपादाने च चाक्षुषत्वस्य जन्यज्ञाना
जन्ये निर्विकल्पके सत्त्वेन जन्यज्ञानजन्यत्वाव्यभिचारित्वाभावान्न तद्दोषप्रत्यक्षेऽतिव्याप्तिरिति भावः
जन्यजन्यत्वाव्यभिचारीत्युक्तावपि चाक्षुषत्वस्य जन्यशरीरादिजन्यत्वव्याप्यत्वात् तथैवातिव्याप्तिरित्यत
ज्ञानेति यदि च ज्ञानपदोपादानेऽपि कालोपाधिविधया जन्यज्ञानजन्यत्वं निर्विकल्पकेऽपीति चाक्षुष
त्वमादायोक्तदोषतादवस्थ्याज्जन्यज्ञाननिरूपितासाधारणजन्यतावश्यं निवेशनीया तथा च ज्ञानप

असाधारणकारणतानिरूपिता या जन्यता साऽसाधारणजन्यता असाधारणकारणता च जन्यत्वानवच्छिन्नकार्यतानिरूपितकारणताश्रयत्वं तथा च ज्ञानपदानुपादानेऽपि
जन्यशरीरादिरूपकारणता या जन्यज्ञानत्वावच्छिन्नप्रतिकारणत्वेन जन्यज्ञानत्वावच्छिन्नकार्यतानिरूपितत्वाज्जन्यनिरूपितासाधारणजन्यत्वाभाववति निर्विकल्पकादौ
प्रत्यक्षत्वस्य सत्त्वात् प्रत्यक्षत्वस्य व्यभिचारित्वेनातिव्याप्तिवारणासंभवात् किं ज्ञानपदोपादानं १४

ता॰प्र॰
४७
47

शानुपादानेपि जन्यत्वावच्छिन्नं प्रत्येव शरीरत्वेन हेतुतया शरीरादि निरूपिता साधारणजन्यत्वं न नि
र्विकल्पक इति न द्वेष्यमिति विभाव्यते तथापि चाक्षुषत्वावच्छिन्नं प्रति चक्षुष्ट्वेन हेतुतया जन्य चक्षु
रादि जन्यत्व व्यापकत्वं चाक्षुषत्वस्येति न दोष वारणाय ज्ञानपद निवेशः तथा च जन्यज्ञान निरूपिता सा
धारणजन्यत्वमिति न काप्यनुपपत्तिः ज्ञानत्वाव्यभिचारीत्युक्तौ प्रत्यक्षादेरवारणाज्जन्यज्ञानत्वाव्यभि
चारीत्युक्तावपि चाक्षुषत्वादेरवारणाज्जन्यज्ञानजन्यत्वाव्यभिचारीत्युक्तं जन्यज्ञानजन्यत्वसमाना
धिकरणेत्युक्तौ तत्व ज्ञानत्व प्रत्यक्षत्वादेरवारणादव्यभिचारीति ननु तथापि जन्यज्ञानजन्यत्वाव्यभि
चारिजातिमद्दृष्टभवत्वमित्यात्मत्वमलं व्यभिचारीत्युक्ते नेत्यत आह उपमितित्वेति उपमितित्वशाब्दत्वयोर
तिदेशवाक्यार्थज्ञानपदज्ञानादिरूपजन्यज्ञानजन्यत्वाव्यभिचारित्वेनातिव्याप्तिरिति भावः अतिव्या
प्तिं निराकरोति तद्धीति उपमितित्वं शाब्दत्वं हीत्यर्थः यथोक्तस्येति जन्यशाब्दज्ञानेत्यर्थः एतदेवो
पपादयति उपमितौ नामिति अतिदेशेति गोसदृशो गवयपदवाच्य इत्याकारक शाब्द विषयक ज्ञानज
न्यत्वादित्यर्थः सर्वासामित्यनेनोपमितित्वस्य तादृशज्ञानजन्यत्व व्याप्यत्वं लब्धं एवं च तद्व्यभिचारित्व ४७

47A

स्यतत्त्वासंभवान्नातिव्याप्तिरिति भावः शाब्दानुभवानां शाब्दबोधात्मकानुभवानां क्वचिच्छब्दानुभ
वानामिति पाठः तत्र शाब्दप्रयोज्यानुभवानामित्यर्थः नन्वत्र प्रथमजन्यत्वोपादानवैयर्थ्यमित्याशंकते नचे
ति व्यभिचारीत्येव एवकारेण प्रथमजन्यत्वव्यवच्छेदः उत्तरयति अनुमितित्वस्येति असंभवादिति
तथा च तादृशजात्यप्रसि[illegible]तद्धत्वमादाय न लक्षणसमन्वसंभव इति भावः निषेधयति तस्येति
तत्त्वज्ञानवृत्तिवैजात्यस्येत्यर्थः शाब्देति आत्मा शरीरादिभ्यो भिन्नः तत्त्वमसीत्यादिवाक्यविशेषपर
विषयकेत्यर्थः इदं च मननेन शब्दस्याप्युपनीतभानमभिप्रेत्याव्यभिचारित्वादिति तथा च तस्य
शाब्दज्ञानजन्यत्वव्यभिचारित्वाभावादेव वारणमिति भावः ननु निदिध्यासनोपयोगमननेन तत्त्व
ज्ञानजनकमननस्याप्यशाब्दज्ञानजन्यत्वव्यभिचारित्वमेवेत्यत आह ज्ञातिपदेवेति वाकारस्तत्त
त्वज्ञानस्य मननजन्यत्वानंगीकारेपि न क्षतिरिति सूचनाय यद्वात्मनः शरीरादिभिन्नत्वेन श्रुतस्या
त्मनो युक्तिभिरनुचिंतनं मननं तदुक्तं श्रोतव्यः श्रुतिवाक्येभ्यो मंतव्यश्चोपपत्तिभिरिति तच्चा
नुमानादिजन्यमनुमित्यात्मकमेव [illegible]नुमितानुपनीतभाननिषेधेन च तस्य शाब्दविषयक

त्वासंभवाल्लिंगोपहितलैंगिकभानेप्रमाणाभावे न लिंगविधयापिशाब्दस्यानुमितौ भानासंभवाच्च
शाब्दज्ञानजन्यत्वव्यभिचारित्वं तत्राद्युक्तमेवेत्यत आह जातिपदं चेति वाकारश्चात्र मननस्य शाब्दवि
षयकत्वानभ्युपगमेपि न क्षतिरिति सूचनाय केचित्तु शब्दविशेषविषयकेति श्रोतव्यो मंतव्य २
श्चेत्यादिश्रुतिवाक्यरूपशाब्दज्ञानेनेत्यर्थः तन्न्यायस्येत्यादि जन्यत्वे प्रयोज्यत्वं जन्यशब्दज्ञानप्रयो
ज्यत्वाव्यभिचारित्वादिति भावः तथा च जन्यशब्दधीजन्यत्वव्यभिचारित्वपदेन जन्यशब्दज्ञानप्रयो
ज्यत्वव्यभिचारित्वमेव विवक्षणीयं तत्त्वज्ञानवृत्तिवैजात्यस्य च शाब्दज्ञानप्रयोज्यत्वव्याप्यत्वादेव
नातिप्रसंग इति भावः ननु भक्तित्वादिवारणाय जातिपदस्य मानसावृत्तिजातिपरत्वावश्यकत्वे
तत एवात्राप्यतिप्रसंगवारणे किं जन्यत्वपदस्य प्रयोज्यत्वमंगीकृत्य गादृशातिव्याप्तिवारणेनेत्य
त आह जातिपदं चेति वाकारश्च जन्यत्वपदस्य प्रयोज्यपरत्वाभावेपि न क्षतिरिति सूचनायेत्याद्यु
क्तदूषणं शाब्दज्ञानप्रयोज्यत्वव्यभिचारित्वविवक्षणे वेदादिवाक्यरूपशाब्दज्ञानजन्यादृष्टजन्य
त्वस्यान्वितमितावपि सत्त्वादनुमितित्वस्यापि तत्प्रयोज्यत्वव्यभिचारित्वाभावादसंभवापत्तेरिति २

48A

अत एवेति जातिपदस्य मानसावृत्तिजातिपरत्वादेवेत्यर्थः भक्तित्वेति आराध्यत्वेन ज्ञानं भक्तिः
आराधना च गौरवित प्रीतिहेतुभूतक्रिया फलावश्यंभावनिश्चयश्च श्रद्धेति तल्लक्षणे बोध्ये आ
राध्यभक्तिज्ञानं विना आराध्यत्वेन ज्ञानासंभवात् एवं फलज्ञानं विना फलावश्यंभावनिश्चयासंभ
वाच्च भक्तित्वश्रद्धात्वयोर्ज्ञन्यज्ञानजन्यत्वाव्यभिचारित्वस्य सत्वात् जन्यपराद्धीजन्यत्वव्यभि
चारित्वस्यापि सत्वाच्च तत्रातिव्याप्तिः जातिपदस्य मानसावृत्तिजातिपरत्वे चैतयोर्मानसवृत्तित्वे
नातिप्रसंग इति ननु भक्तित्वश्रद्धात्वादेर्जातित्वे मानाभावादेव नातिव्याप्तिरत आह आदेरि
ति आदिनाऽऽपत्तित्वपरिग्रहः आपाद्यत्वस्य विधेयतातिरिक्तत्वे मानाभावेन वह्निमनुमित्यं नगर
मपि वह्निमापादयामीति प्रतीत्यापत्तेस्तादृशानुव्यवसायप्रतिवह्निविधेयकापत्तित्वेनैव हेतुता
याऽऽपत्तित्वजातेरावश्यकत्वेन तद्वारणाय जातिपदस्य मानसावृत्तिजातिपरत्वमावश्यकमिति हृ
दयम् अनुभवपदव्यावृत्तिमाह अनुभवपदमिति स्मरामीत्यनुगतप्रतीत्याऽनुभवसामग्री
प्रतिबध्यतावच्छेदकतया वासिद्धं स्मृतित्वमादायातिप्रसंगवारणायेत्यर्थः अनुभवपदेऽर

५१

पाशने च स्मृतिभिन्नज्ञानत्वरूपानुभवत्वस्य स्मृतावसत्वान्नातिव्याप्तिरिति भावः ननु तथाप्येता
दृशापरोक्षत्वजातिमादायैव लक्षणस्य शाब्दबोधादावतिप्रसंगः न चैतादृशजातौ प्रमाणाभावः अनुमि
त्यादिसाधारणीयबाधादिप्रतिबध्यतायामाहार्यप्रत्यक्षे व्यभिचारवारणाय प्रत्यक्षान्यज्ञानत्वस्यावश्यं नि
वेशनीयतया तेषां मिथो विशेषणविशेष्यभावे विनिगमकाभावाद्गौरवात्तदपेक्षया परोक्षत्वजातेरेव प्रतिबध्यताव
च्छेदकत्वौचित्यादित्यत आह दिगिति अनुभवत्वं विहाय परोक्षत्वस्य स्मृतौ परोक्षत्वं विहायानुभवत्वस्य प्र
त्यक्षेऽनुमितौ चोभयोः समावेश इत्यनुभवत्वेन संकरात्परोक्षत्वं न जातिः एवं भिन्नविषयकानुमि
त्सा विरहविशिष्टानुमितिसामग्रीप्रतिबध्यतावच्छेदकतया सिद्धानुमित्यन्यज्ञानत्वरूपजातिमाद
य संकरात् विधेयतया आपत्तिसाधारण्येन वा प्रतिबध्यतावच्छेदकत्वासंभवेऽपि अनुमितित्वादे
विशिष्यानुमितित्वादिकं निविश्य वा बाधबुद्धेः प्रतिबंधकत्वमिति नाहार्यप्रत्यक्षे व्यभिचारः अत एव
शाब्दबोधे बाधबुद्धेः प्रतिबंधकत्वस्यास्मत्तया लाघवाद्योग्यताज्ञानं शाब्दे हेतुरिति सिद्धान्तः अ
नाप्यत्वा प्रत्यक्षान्यत्वेन निविश्य वाऽऽहार्यप्रत्यक्षे व्यभिचारो वारणीयः वस्तुतस्तु जन्यतासंबंधेन वा ४९

49A

धविशिष्टान्यत्वावच्छिन्नं प्रतीच्छायाहेतुत्वे न च बाधाभावस्य हेतुत्वोपगमे मप्रत्यक्षानुमित्यादिसाधारणैककार
र्यकारणभावेनैवोपपत्तेः परोक्षत्वनिवेशस्यानर्थक्यादिच्छाविशिष्टत्वावच्छिन्नंप्रतीच्छायाहेतुत्वे तेन च नेच्छा
शून्यकालेऽबाधकाले च स्वविशिष्टबुद्ध्यापत्तिः अन्यथेच्छायाउत्तेजकत्वेऽप्रामाण्यज्ञानाभावादिभिर्विशेष
णविशेष्यभावे विनिगमनाविरह इत्यादिकं बहुतरमूहनीयं नन्वनुमितित्वजातौ मानाभावेन लक्षणमसंभ
वि नचानुमिनोमीत्यनुव्यवसायविषयतया तत्सिद्धिः योग्यात्मविशेषगुणानां विषयविनिर्मोकेणाभा
नानुपगमात् केवलमनुमिनोमीत्यनुव्यवसायस्यासिद्धेः न च पर्वतेन वह्निमनुमिनोमीत्यनुव्यवसायविष
यतया तत्सिद्धिरिति वाच्यं वह्निप्रकारकानुमितित्वस्य तद्विषयत्वे वह्निमान् पर्वतो घटवानित्यनुमित्य
नंतरं तादृशानुव्यवसायापत्तेः वह्निनिष्ठविधेयताशालिज्ञानत्वस्य तद्विषयत्वावश्यकत्वेऽनुमितित्व
स्यानिवेशात्तद्विषयतया तत्सिद्धेरभावात् न च पर्वतोद्देश्यकवह्निविधेयकानुमितित्वस्य धूमपरामर्श
जन्यतावच्छेदकतया तत्कोटिप्रविष्टत्वेन तत्सिद्धिरिति वाच्यं साध्यसाधनादिभेदेन व्याप्तेर्भेदात्तयाऽऽ

त॰प्र॰ लोकपरामर्शजन्यानुमितौ व्यभिचारवारणाय स्वाव्यवहितोत्तरत्वेनोत्पत्तिकत्वसंबंधेन धूमपरामर्शवि-
५॰ शिष्टानुमितित्वतत्कार्यतावच्छेदकत्वस्यावश्यकत्वेन तत्रानुमितित्वमनिवेश्य धूमपरामर्शविशिष्टज्ञा-
50 नत्वस्यैव तत्वोपगमात्तत्कोटिप्रविष्टतया तत्सिद्धेरसंभवात् एवं सिद्ध्यभावविशिष्टत्वस्यैव सिद्ध्यभावका-
र्यतावच्छेदकतया तत्कार्यतावच्छेदकतयापि न तत्सिद्धिरिति चेन्नैवं वह्निनिष्ठविधेयताशालिज्ञानत्वस्य व-
ह्निमनुमिनोमीत्यनुव्यवसायविषयत्वे पर्वतो वह्निमान्स्यादित्यापत्त्यनंतरमपि तादृशानुव्यवसायापत्तेः
तथाहि वह्निमापादयामीत्यनुव्यवसायस्य वह्निप्रकारकापत्तित्वविषयत्वे वह्निमान्पर्वतो घटवान्स्या-
दित्यापत्त्यनंतरमपि तादृशानुव्यवसायापत्त्या वह्न्यापादकापत्तित्वमेव तद्विषयो वाच्यः तत्र चापाद्यत्व-
स्यापाद्यभेदेन भिन्नस्यातिरिक्तत्वस्यैकल्पने गौरवादनुमित्यादिसाधारणविधेयत्वमेवापाद्यत्वं तथा-
चानुमित्यनंतरमापादयामीत्यनुव्यवसायापत्त्याऽऽपत्तित्वस्येवापत्त्यनंतरमप्यनुमिनोमीत्यनुव्यव-
सायापत्तेरनुमितित्वस्याविसिद्धेः एवं पर्वते वह्निरित्यादिशाब्दबोधानंतरमपि तादृशानुव्यवसायाप- शिवा ५॰

50A

त्तिः शाब्दबोधे प्राङ्नि·र्दिष्टस्यैवोद्देश्यत्वेन चरमनिर्दिष्टस्य च विधेयत्वेन तत्र वह्नेर्विधेयताया आवश्यकत्वात्
अन्यथा वह्निपर्वतेनवह्नित्वयोरेवोद्देश्यविधेयभावस्वीकारे पर्वते वह्नि र्वह्निः पर्वत इति शाब्दबोधयोरुद्देश्यवि
धेयभावावैलक्षण्येनावैलक्षण्यप्रसंगात् अथ विधेयतायामनुमितित्वे च मानाभावो वह्निप्रकारकत्वानव
स्यैव वह्निमनुमिनोमीत्यनुव्यवसायविषयत्वात् विषयतयानाद्यशानुव्यवसायं प्रति च तत्तदनुमितिसामग्री
विशिष्टज्ञानत्वेन तादात्म्यप्रत्यासत्त्या हेतुत्वं कार्यतावच्छेदकं च वह्निप्रकारकतत्तत्सामग्रीविशिष्टज्ञान-
विषयकमानसत्वमेव तत्तदनुमितिसामग्री च बाधाभावसिद्ध्यभाववत्परामर्शादिरूपा सामग्रीविशि
ष्टत्वे च स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसंबंधेन न चैतदपेक्षया वह्निनिष्ठविधेयताया एवानुमितित्वेन लाघ-
वाद्विधेयताया अनुमितित्वस्य च सिद्धिरिति वाच्यं लाघवमात्रेणातिरिक्तविषयतासिद्धावव्यवहितोत्तरत्वादेनि
वेशे गौरवेण धर्मपरामर्शजन्यतावच्छेदककोटिप्रविष्टत्वेनाप्यतिरिक्तविषयतासिद्धिप्रसंगात् एवमनु
मितिं प्रति विलक्षणविषयताशालिज्ञानत्वेन हेतुत्वे वोपपन्ने व्याप्त्यादिविषयतानिवेशप्रयोजनाभावाच्चेति

ने॰प्र॰ लाघवमात्रेणातिरिक्तविषयतासिद्धेरभावात् विधेयतायां मानाभावेन सामग्रीविशिष्टज्ञानत्वेन हेतुत्व
५२ स्यावश्यकत्वे विधेयतायाश्चिवानुमित्यानुमितित्वेपि मानाभावइति चेन्न लाघवेनातिरिक्तविषयतायाश्चानर
51 भ्युपगमे व्याप्यत्वंनंतरं नाद्यशानुव्यवसायवारणाय बाधाभावस्यावच्छेदककोटौ निवेशे गौरवान्नद्घटितानु र
मितिसामग्रीविशिष्टवह्निप्रकारकानुमितित्वेनैवापत्त्यनंतरं नाद्यशानुव्यवसायवारणे लाघवेनानुमितित्व
ज्ञातेरावश्यकत्वात् वस्तुतस्तु सामग्रीजन्यत्वानुपस्थितिदशायामपि वह्निनानुमिनोमीत्यनुव्यवसायोदया
त्सामग्रीजन्यज्ञानत्वावच्छिन्नाभावस्य तद्विषयत्वाभावेन वह्निनिष्ठविधेयताशाल्यनुमितित्वावच्छि
न्नाभावस्य तद्विषयत्वावश्यकत्वाद्विधेयतायाश्चानुमितित्वजातेश्च सिद्धिः नच स्वव्याप्यवत्तापरामर्शादि र
घटितसामग्रीविशिष्टज्ञानत्वसंबंधावच्छिन्नसाध्यनिष्ठप्रतियोगितावच्छेदकताकज्ञानाभाव एव तद्वि
षय इति वाच्यं तस्य संबंधत्वे मानाभावात् वह्न्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वव
ह्न्यनियामकसंबंधस्याभावप्रतियोगितावच्छेदकतानवच्छेदकत्वाच्चेति कृतं पल्लवितेन ननु ज्ञायमान ५२

51A

लिंगस्यानुमितिकरणत्वेऽतीतानागतहेतुकानुमितेरपलापः तस्यानुमितेः पूर्वमसत्वात् अन्यस्य च
व्याप्यत्वेनाज्ञानात् व्याप्तेरैक्याभावेन यत्र विशिष्टे विशेषणमिति न्यायेन परामर्शस्तत्र परामर्शे सर्वं व्या
प्तिज्ञानस्यासंभवेन च व्याप्तिज्ञानत्वेनापि न करणत्वसंभव इत्याशयेन पृच्छति नन्विति लघुपदार्थेति
हेतुसाध्याभावज्ञानादिकमित्यर्थः नचाभावज्ञानत्वेन ज्ञानत्वेन वाऽनुमितिहेतुत्वे परामर्शादिशून्यका
लेऽप्यनुमित्यापत्तिरिति वाच्यं विशेषसामग्री सहकृताया एव सामान्यसामग्र्याः फलोपधायकत्वेन परा
मर्शाद्यभावेनाप्यभावादिति वक्ष्यति अत्र यद्यपि व्याप्तिघटकेष्वेव वक्तुमुचितं तथापि व्याप्तिविशिष्टप
क्षधर्मताज्ञानरूपपरामर्शद्वारा तस्य करणत्वसूचनाय तथोक्तिः ननु व्याप्तेर्निर्वक्तुमशक्यतया क
थं तद्घटकपदार्थज्ञानं करणमित्याशयेन पृच्छति अथ केयमिति साध्यात्यंताभाववदिति वह्निमा
न् धूमादित्यादौ वह्न्यभाववति जलहृदादौ धूमस्याविद्यमानत्वाल्लक्षणसमन्वयः धूमवान्वह्नेरित्य
त्र धूमाभाववत्ययोगोलके वह्नेर्विद्यमानत्वान्नातिव्याप्तिः पर्वतीयेति पर्वतीयवह्नेस्तद्वृत्तित्वेनात्यं

त·प्र· ५२ ताभाववतीत्यर्थः पूर्वलक्षणवृत्तित्वविशिष्टवह्न्यभाववह्निघटोभयाभाव समवायसंबंधावच्छिन्नवह्न्यभा
दीनां वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वेन साध्या
52 भावविशेषणेन वारणं संभवतीति तत्परित्यागः ननु साध्यतावच्छेदकसंबंधावच्छिन्नसाध्यतावच्छेदका
वच्छिन्नप्रतियोगिताकाभावाधिकरणनिरूपितहेतुतावच्छेदकसंबंधावच्छिन्नवृत्तित्वसामान्याभाववत्
त्वे व्याप्तिः समवायसंबंधावच्छिन्नवह्नित्वावच्छिन्नप्रतियोगिताकवह्न्यभाववारणाय साध्यतावच्छेदकसंबं
धावच्छिन्नत्वसाध्यतावच्छेदकत्वनिवेशः अत एव पर्वतीयवह्न्यभावस्यापि निरासः न च पर्वतीयवह्नित्वेप
र्वतीयत्वविशिष्टवह्नित्वे न याचविशिष्टस्यानतिरेकाद्वह्नित्वावच्छिन्नप्रतियोगिताकत्वमस्त्येवेति वाच्यं सा
ध्यतावच्छेदकावच्छिन्नेत्यस्य साध्यतावच्छेदकपर्याप्तावच्छेदकताकत्वार्थकत्वेन पर्वतीयत्ववह्नित्वोभयप
र्याप्तावच्छेदकताया शुद्धवह्नित्वपर्याप्तत्वाभावेनानुपपत्त्यभावात् यदि चोभयादेः प्रत्येकानतिरिक्ततया प
र्वतीयत्ववह्नित्वोभयपर्याप्तावच्छेदकताया अपि शुद्धवह्नित्वपर्याप्तत्वादुक्तदोषस्तदवस्थ एवेति विभाव्यते शिवा ५२

तदा साध्यतावच्छेदकभिन्ननिष्ठावच्छेदकभिन्ननिष्ठावच्छेदकतानिरूपकत्वे सति किंचिदवच्छे
दकत्वाविवक्षितसाध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपकप्रतियोगिताकत्वमिति निष्कर्षो बोध्यः
सत्यंतनिवेशात्पर्वतीयत्ववह्नित्वोभयावच्छिन्नप्रतियोगिताकमादाय विशेष्यदलनिवेशाच्च पर्वतीयत्व
विशिष्टवह्नित्वावच्छिन्नप्रतियोगिताकमादाय यथायथं न प्रसंगः वह्न्यभाववति धूमावयवे समवायेन धू
मस्य सत्त्वाद्धेतुतावच्छेदकसंबंधनिवेशः धूमाभाववज्जलहृदवृत्तित्वाभावस्य वह्नौ सत्त्वाद्धूमवान् वह्ने
रित्यादावतिव्याप्तिवारणाय सामान्याभावेति इत्थं वायोगोलकवृत्तित्वस्यापि सामान्यान्तर्गततया तद
भावस्य हेतावसत्त्वान्नातिव्याप्तिः न च तथाप्ययोगोलकवृत्तित्वघटोभयाभावस्य सत्त्वादतिप्रसंगतादव
स्थ्यमिति वाच्यं तादृशावृत्तित्वत्वावच्छिन्नाभावस्य सामान्याभावपदेन लाभात् अथ कालिकसंबंधे
न वह्न्यभाववति पर्वतादौ धूमस्य सत्त्वात्साध्याभाववत्त्वमभावीयदैशिकविशेषणतायविशेषणतैव वाच्यं ए
वं च घटत्वाभाववान् पटत्वादित्यादौ घटत्वाभावाभावस्य साध्याभावस्य घटत्वरूपस्य समवायेनैव सत्ता

त॰प्र॰
५२
53

रभावीयविशेषणतयातदधिकरणाप्रसिद्धिः अत्र केचित् भूतले घटो नास्तीत्यत्र च घटाभावो नास्तीति
प्रतीतावपि अभावीयदैशिकविशेषणताविषयकत्वमनुभूयते इति भावाभावसाधारणीं विशेषणतामं
गीकृत्याप्रसिद्धिं परिहरंति तदसत् तथासत्यपि कालिकसंबंधावच्छिन्नप्रतियोगिताकस्याकाशाभावा
भावस्य साध्यतायामात्मत्वादिहेतावव्याप्तेः आकाशाभावरूपस्याभावस्याभावीयविशेषणतयात्म
निवृत्तेः एवं भावाभावसाधारणविशेषणतास्वीकारेऽभावीयविशेषणतया भूतलत्वं निर्घट इति प्रतीत्या
पत्तेश्चेति चेन्नैवं साध्यवत्ताग्रहविरोधितानियामकसंबंधेन साध्याभाववत्त्वस्य विवक्षितत्वात् घटत्वाभा
ववान् पटत्वादित्यादौ समवाय एव घटत्वाभाववत्ताग्रहविरोधितानियामक इत्यप्रसिद्धेरसंभवात् न
नु तथापि ज्ञानिमान् सत्वादित्यादौ ज्ञानत्वाभाववत्सामान्यादिनिरूपितहेतुतावच्छेदकसमवायेन वृत्ति
त्वाप्रसिद्ध्याऽव्याप्तिरिति चेन्न स्वाधिकरणावृत्तिसाध्याभावकत्वमित्यस्य तदर्थत्वात् अथैवमपि ध्व
माधिकरणे कालिकसंबंधेन वह्न्यभावसत्वादव्याप्तिः अभावीयविशेषणतयाऽवृत्तित्वनिवेशे च घटत्वा

शिवा
५२

भाववान् प्रमेयत्वादित्यत्राति व्याप्तिर्घटत्वाभावाभावस्य घटत्वविशेषणतया ऽवृत्तेः तथा च साध्यवत्ता
ग्रहविरोधितानियामकसंबंधेनवृत्तित्वमावश्यं निवेशनीयं तथा सत्ताभाववान् जात्यभावादित्यत्राव्या
प्तिः जात्यभावाधिकरणसामान्यादिनिरूपितसाध्यवत्ताग्रहविरोधितानियामकसमवायसंबंधावच्छि
न्नवृत्तित्वाप्रसिद्धेरिति चेन्न स्वाधिकरणावृत्तिसाध्याभावाधिकरणताकत्वस्य विवक्षितत्वात् साध्या
भावाधिकरणता च साध्यवत्ताग्रहविरोधितानियामकसंबंधावच्छिन्ना बोध्या अत्र वृत्तित्वं स्वरूपसंबं
धेनैव ग्राह्यं इत्थं च जात्यभावाधिकरणसामान्यादिनिरूपितस्वरूपसंबंधावच्छिन्नवृत्तित्वस्य प्रमेयत्वा
देः प्रसिद्धत्वात् तदभावस्य च सत्ताभावाभावाधिकरणे ऽसत्वेनानुपपत्त्यभावादिति अव्याप्यवृत्तिसाध्य
काव्याप्तिवारणाय प्रतियोगिवैयधिकरण्यमप्यत्र निवेशनीयं केचित्तु हेतुतावच्छेदकसंबंधावच्छिन्न
वृत्तितीयस्वरूपसंबंधावच्छिन्नप्रतियोगिताकः साध्याभाववद्वृत्तित्वसामान्याभावो व्याप्तिः तेन स
त्तावान् जातेरित्यादौ न क्वापि दोष इत्याहुः परे तु साध्याभाववद्वृत्तित्वमित्यत्र सत्तावान् जातेरित्यादावप्र

त॰प्र॰
५४
54

सिद्धिवारणाय हेतुतावच्छेदकसंबंधसामान्ये साध्याभाववदनुयोगिकत्वस्वप्रतियोगिकत्वएतदुभयाभा
वविशिष्टस्वत्वं व्याप्तिरिति प्राहुरिति न क्वाप्यनुपपत्तिरिति चेत् अत्रोच्यते तथापि केवलान्वयिनि साध्याभा
वाप्रसिद्ध्या व्याप्तिलक्षणमव्याप्तमेव ननु व्याप्तिर्नानुमितिकरणत्वेनाभिमतस्य व्याप्तिज्ञानस्य व्यतिरेक
व्यभिचारेणावसरश्च न संभवति वस्तुगत्या वाच्यत्वाभावाप्रसिद्धावपि प्रतियोगितया वाच्यत्वीयो भाव इत्याकार
कभ्रमात्मकज्ञानमादायानुमितेरुपपन्नत्वात् तथाहि साध्यनिष्ठविषयतानिरूपिताभावविषयतानिरू
पिताधिकरणविषयतानिरूपितवृत्तित्वविषयतानिरूपिताभावनिष्ठविषयतानिरूपितहेतुतावच्छेदका
वच्छिन्नत्वनिष्ठविषयतानिरूपितपक्षनिष्ठविषयताशालिज्ञानत्वेनैवानुमितिहेतुत्वं तच्च भ्रमसाधारणमुपप
द्यत एव अन्यथाभावो न वाच्यत्वीय इत्येतादृशविशेषदर्शनकाले तदनुपपत्तिरेव न च तदानीमप्यत एवानुमि
तिरिति वाच्यं तस्यास्तथाप्यननुभूयमानत्वादिति चेत् तथापि निर्धर्मितावच्छेदकज्ञानस्य बाधबुद्धिप्रतिबध्य
तमाऽभावो न वाच्यत्वीय इति ज्ञानकालेऽपि प्रतियोगितया वाच्यत्वीय इति निर्धर्मितावच्छेदकज्ञानोत्पत्तौ बाधर

शिवा
५४

54A

काभावेनानुमितेरुपपत्तेः अभाववत्त्वमनिवेश्य साध्यीयवद्वृत्तित्वज्ञानत्वस्यैवानुमितिहेतुत्वादिति चेन्मै
वं अवृत्तित्वज्ञानस्य निर्धर्मितावच्छेदकज्ञानं प्रत्यपि प्रतिबंधकतया प्रतियोगितया वाच्यत्वमवृत्ति इति ज्ञान
काले वाच्यत्वीयवद्वृत्तित्वज्ञानस्याप्यसंभवेनानुमित्यपलापस्य दुरुद्धरत्वादिति निपुणतरमालोचनीयं
सूक्ष्मदर्शिभिरिति ननु नीलघटे यत्किंचिद्घटप्रतियोगिकभेदसत्त्वे नीलघटो घटान्य इत्यादिवाक्यस्या
पि प्रामाण्यापत्तिरित्यन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकान्योन्याभावबोधं प्रत्येव किंचित्पदसम
भिव्याहृतान्यादिपदत्वेन हेतुत्वमुपेयं एवं च प्रकृतेपि साध्यवन्यदसमभिव्याहृतान्यादिपदस्य साध्यवत्ता
वच्छिन्नप्रतियोगिताकान्योन्याभावबोधकत्वमेव तथा च साध्यवत्तावच्छिन्नप्रतियोगिताकान्योन्याभा
ववद्वृत्तित्वमेव लक्षणं लभ्यते तत्र च नोक्तदोष इत्याशयेन शंकते अथेति साध्यवत्त्वेति साध्यतावच्छे
दकावच्छिन्नसाध्यवत्त्वेत्यर्थः अन्यथा साध्यवत्त्वस्य साध्यरूपत्वेन पर्वतीयवह्निमदन्योन्याभावावा
रणात् साध्यतावच्छेदकनिष्ठावच्छेदकतानिरूपितसाध्यनिष्ठावच्छेदकतानिरूपकप्रतियोगि

ताकान्योन्याभाववदवृत्तित्वमितितु निष्कर्षः साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभाव
विवक्षणेन पूर्वोक्तलक्षणे पिचालिनीन्यायेनाव्याप्तिनिरासस्संभवेप्यत्यंताभावस्याव्याप्यवृत्तितया संयो
गी द्रव्यत्वादित्यादावव्याप्तिः इह चान्योन्याभावस्याव्याप्यवृत्तितया संयोगवदन्योन्याभावस्य द्रव्येऽस
त्वेनैव नाव्याप्तिरिति पूर्वत्र प्रतियोगिवैयधिकरण्यादिनिवेशाङ्गौरवमिति भ तत्र तथाविधं विवक्षितमि
ति ध्येयम् अव्याप्तिं निरस्यति नचेति नहीत्यर्थः केवलान्वयीति इदं प्रमेयं वाच्यत्वादित्यादावित्य
र्थः अत्यंताभावाप्रतियोगित्वं केवलान्वयित्वं प्रमेयत्वस्य च सार्वत्रिकत्वात्तद्वदन्याप्रसिद्ध्याऽव्याप्ति
रिति भावः लाघवात्साध्यवदन्यावृत्तित्वरूपव्याप्तिज्ञानमेवानुमितिहेतुः केवलान्वयिनि च तादृशज्ञा
नासंभवेनानुमितिरेव नोपेयते एवं च नाव्याप्तिरिति मीमांसकमतमुपदर्शयति अत्र मीमांसका इति इह
प्रमेयत्वमिति साध्यवदन्यावृत्तित्वस्य ज्ञानाभावे चानुमित्यसंभवादनुमिनोमीत्याकारकलौकिकप्रत्य
क्षानुदयापत्तिरित्यर्थः नचान्योन्याभावे प्रमेयत्ववत्प्रतियोगिकत्वभ्रमदशायामिव तादृशानुभवोपप॰

55A

त्तिरितिवाच्यं तथापिप्रमेयत्वस्यकेवलान्वयित्वज्ञानदशायांसाध्यवदन्यावृत्तित्वानुपपत्तिर्तादवस्थ्यात्
कारणबाधात् विशेषदर्शनदशायांसाध्यवदन्यावृत्तित्वज्ञानस्यानुमितिकारणस्यैवाभिमतस्यबाधात्
असंभवात् भ्रांतिरिति ३ प्रमेयत्वमनुमिनोमीतिप्रतीतिः प्रमेयत्वविधेयकानुमितिरेवतादृशा
नुव्यवसायविषयः कारणबाधेनचप्रमेयत्वविधेयकानुमितिरनुत्पत्त्याविषयबाधेनतादृशप्रतीते
र्भ्रमत्वमित्यर्थः व्यभिचारेण व्यतिरेकव्यभिचारेण तद्धेतुः साध्यवदन्यावृत्तित्वरूपव्याप्तिबुद्धेः
रित्यर्थः कारणत्वासिद्धेरिति सिद्धेतस्यकारणत्वेतदभावेननतथानुमितिरित्युपेयं तादृशा
नुमितावेवव्यभिचारेण तस्यैवकारणत्वमसिद्धं नचपरेणतादृशानुमितिरेवनेष्यत इतिवाच्यं तत्रा
नुभवस्यप्रमाणत्वेनदर्शितत्वात् यथाकथंचित्प्रतीतेःप्रमात्वस्यशक्योपपादनत्वेप्रमेयत्वप्रतीतेर्भ्रम
त्वकल्पनायाअन्याय्यत्वाच्च अन्यथाक्वापिविषयव्यवस्थानस्यादितिभावः साध्यवदन्यत् प्रमेयत्वव
दन्यदलीकमित्यनेन प्रमेयत्वस्यान्यत्वंसूचितं नन्वलीकस्यज्ञानविषयत्वेमानाभावइत्यतआह असा
दिति शशशृंगमितिप्रतीतिविषयस्यशशीयशृंगस्यापारमार्थिकत्वेनालीकत्वमेवेतिभावः असा

त॰प्र॰ त्वोतिरिक्ति ज्ञानविषयत्वस्य कालसंबंधित्वव्याप्यत्वादित्यर्थः तेन न सिद्धासिद्धिव्याघातः असतो विभाने र
५६ कालासंबंधित्ववत्त्व लोक एव ज्ञानविषयत्वस्य सत्वेम तद्व्याप्यत्वं तस्य संभवतीत्यर्थः तस्य निरासान् शशशृंग
56 मित्यादि प्रतीति अप्रशृंगस्य शशीयत्वभानोपगमेनान्यथाख्यात्यैवोपपत्तिरिति न तदन्यथानुपपत्त्यात सि
द्धिरिति भावः आत्मख्यातसत्ख्यातिस्तथापि प्रमेयत्वसाध्यका व्याप्तिपरिहारे पि जे यत्र साध्यके दुर्वारैवेति तद्व्य
न्तु दुर्जनद्गतिन्याये नाह किंचेति कश्चित्तु सिद्धासिद्धिव्याघाताद्दाह किंचेतीति तदसत् उक्तयुक्त्यानत्परिहा
रात् इत्यमपीति असत्ख्यातिस्वीकारे पीत्यर्थः अव्याप्तिः साध्यवदन्याप्रसिद्धिनिबंधना व्याप्तिः तथा
व्याप्तिमेव दर्शयति नहीति भवद्भिः असत्ख्यातिवादिभिः विरोधादिति शेषः लीलावतीकारोक्तमनत्र
मार्शकेत अन्ये त्विति संबंधः साध्यसामानाधिकरण्यं धूमवान् वह्नेरित्यादौ धूमसामानाधिकरण्यसत्त्वा
दति व्याप्तिरतः कार्त्स्न्येनेति अयोगोलकीयवह्नौ धूमसामानाधिकरण्याभावान्न दोषः अत्रास्वरसमाह
तत्रेति तत्र लक्षणवाक्ये वदंति दूषणं वदंति कार्त्स्न्ये साध्ये साधने साधनवति वृत्ति प्रश्नमुखेन तदेवाह
कोयमिति साध्ये कार्त्स्न्ये दूषणेनैव साध्यवति कार्त्स्न्ये विवक्षिते दूषणसंभवे न दृष्यकृत नवोक्तं प्रसिद्धानुमाने ५६

56A

वह्निमान् धूमादित्यादावव्याप्तिमेव विवृणोति नहीति अयं पिंडीयवह्नेरिति अत्र निरूपितत्वं षष्ठ्यर्थः अ
यः पिंडीयवह्निनिरूपितसामानाधिकरण्याभावादित्यर्थः एकव्यक्तिकेति द्रव्यं पृथिवीत्वादित्यादावित्यर्थः
तत्रहेतोरैक्येनानेकाशेषत्वरूपकार्त्स्न्याप्रसिद्ध्याव्याप्तिरिति भावः एकमात्रवृत्तीति एतद्रूपवानेतद्रूसा
दित्यादावित्यर्थः तत्रैकमतेऽप्येकेन हेतुमन्नुक्तरूपकार्त्स्न्यासंभवादिति भावः ननु हेतावेव कार्त्स्न्यं विव
क्षितं तथा च प्रकृते कार्त्स्न्यस्य व्यापकत्वरूपतया हेतुतावच्छेदकव्यापकसाध्यसामानाधिकरण्यमिति नि
ष्कर्ष इति चेन्न द्रव्यं सत्त्वादित्यादौ सत्तायाः एकव्यक्तिकत्वेन सत्तात्वव्यापकद्रव्यत्वसामानाधिकरण्यसत्त्वद
तिव्याप्तेः ननु तथापि हेतुमति कार्त्स्न्यं विवक्षितं तथा च हेतुव्यापकसाध्यसामानाधिकरण्यं तत्त्वं व्यापक
त्वं चावच्छेदकतया यत्र यत्र धूमस्तत्र तत्रावच्छेदकतया वह्निसामानाधिकरण्यसत्त्वाद्वह्निमान् धूमा
दित्यादौ लक्षणसमन्वयः पर्वते धूमे वह्निसामानाधिकरण्यमिति प्रतीतेः अथवा हेत्वधिकरणता व्याप
कसाध्याधिकरणतावच्छेदकत्वं तत्त्वमिति चेन्न साध्याधिकरणवृत्तित्वरूपसामानाधिकरण्यस्य तत्तदाधेयभे

त॰प्र॰ देन भिन्नं तथा तद्वन्निष्ठाभावाप्रतियोगित्वरूपव्यापकत्वस्यासंभवात्प्रथमस्याति दुष्टत्वात् द्वितीये चैत
५७ द्रूपे स्वहेतुव्यापकं यत्साध्यं तत्सामानाधिकरण्यस्यैव लघुत्वात् तस्यापि च वक्ष्यमाणव्याप्तिरूपत्वया गुरुत्वे
57 न हेयत्वादिति न किंचिदेतत् ननु साध्यसमानाधिकरणस्व समानाधिकरणयावत्कत्वं व्याप्तिरित्यनेन न
यावंतः साध्यसमानाधिकरणास्ते सर्वे हेतुसमानाधिकरणा इत्यर्थलाभः स्यात् तत्र चायं गोरश्वत्वादि
त्यो गोत्वसमानाधिकरणद्रव्यत्वादीनामश्वत्वसामानाधिकरण्यादतिव्याप्तिवारणाय यावत्त्वनिवेशः
इत्थं च गोत्वप्रकारकप्रमाविशेष्यत्वादीनामपि यावदंतःपातितया ऽश्वत्वसामानाधिकरण्याभावेन च ना
तिव्याप्तिः इदं तु न संगच्छते इदं वाच्यं ज्ञेयत्वादित्यत्र वाच्यत्वसमानाधिकरणानां यावतामेव ज्ञेयत्वसमा
नाधिकरणत्वाल्लक्षणसंभवेपि वह्निमान् धूमादित्यादौ वह्निसमानाधिकरणानां यावतामयोगोल
कत्वादीनां धूमासामानाधिकरण्यादव्याप्तेः धूमवान् वह्नेरित्यादावतिव्याप्तेश्चेत्यत आह यत्समानाधि
करणा इति वह्निसमानाधिकरणानां द्रव्यत्वादीनां धूमसामानाधिकरण्याद्व्यभिचारिण्येतिव्याप्तिवार ५७

57A

णायथावंनइति इदमेव समन्वयति भवति चेत्यादिना धूमस्येति निरूपितत्वं षष्ठ्यर्थः धूमनि
रूपिता वह्निनिष्ठा व्याप्तिर्नेत्यर्थः अथ द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यादौ विशिष्टसत्तायां सत्ता
याश्चैक्येन सत्तासमानाधिकरणानां गुणत्वादीनां द्रव्यत्वसामानाधिकरण्याभावादव्याप्तिः एवं गुण
कर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्रातिव्याप्तिश्च जातिसमानाधिकरणानां सर्वेषां सत्तासामाना
धिकरण्यादिति चेन्न विशिष्टस्यातिरिक्तत्वमंगीकृत्यैतल्लक्षणाभिधानात् विशिष्टसत्तायाः शुद्धस
त्तायाश्चैक्ये गुणः सत्तावानिति प्रतीतिवत् गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्याप
त्तेर्विशिष्टस्यातिरिक्तत्वमेवोपेयते एवं च नोक्ताव्याप्त्यतिव्याप्ती ननु विशिष्टस्यातिरिक्तत्वेपि सत्ता
धिकरणतायाश्चैक्येन गुणो गुणकर्मान्यत्वविशिष्टसत्तावानिति प्रतीत्यापत्तिवारणाय विशिष्टस्या
तिरिक्तत्वांगीकर्त्रापि विशिष्टनिरूपिताधिकरणताया अतिरिक्तत्वमवश्यं स्वीकर्तव्यं एवं च किं वि
शिष्टस्यातिरिक्तत्वस्वीकारेणेति पूर्वोक्तदोषस्तदवस्थ एवेत्यतो विशिष्टस्यानतिरिक्तत्वेपि लक्षणमा
ह यद्विशिष्टेति यद्विशिष्टसमानाधिकरणयावंतः साध्यसमानाधिकरणास्तद्वत्वेति पावं

यत्पक्षे हेतुतावच्छेदकपरं द्रव्यं गुणकर्मान्यत्वे सति सत्त्वादित्यत्र विशिष्टस्यानतिरिक्तत्वेनाव्याप्तिरतोय
द्विशिष्टेत्युक्तं केचित्तु विशिष्टस्यानतिरिक्तत्वे एवोक्ताव्याप्त्यतिव्याप्ती अत आह यद्विशिष्टेति तथा च
पूर्वलक्षणे हेतुतावच्छेदकस्य साध्यतावच्छेदकनिवेशादित्याहुस्तदसत् न ह्येवं तेनैव लक्षणा
न्तरकथनस्यासंगतत्वापत्तेः तस्मान्मदुक्तरीतिरेवात्रानुसर्तव्या न चैवमपि गुणकर्मान्यत्वविशि
ष्टसत्तावान् जातेरित्यत्रातिव्याप्तेः साध्यतावच्छेदकस्यापि निवेशनावश्यकत्वादिति वाच्यं विशिष्टस
त्तायाविशिष्टनिरूपिताधारतासंबंधेन साध्यतायां जातिसमानाधिकरणगुणत्वादीनां विशिष्टनिरू
पिताधारतासंबंधेन विशिष्टसत्ताधिकरणद्रव्यवृत्तित्वाभावेनातिव्याप्तेरभावात् समवायेन तस्याः
साध्यत्वे तु सद्धेतुत्वादेवोक्तदोषाभावादित्यभिप्रायात् यदि च समवायेनैव तत्साध्यता गुणे गुणकर्मा
न्यत्वविशिष्टसत्ता नास्तीति धीबलाद्गुणकर्मान्यत्वविशिष्टसत्ताभावस्य गुणे सत्त्वेन विशिष्टसत्तात्वाव
च्छिन्नाभाववद्वृत्तितया व्यभिचारित्वं न च सोऽभावो न प्रतियोगिव्यधिकरण इति वाच्यं प्रतियोगितााव
च्छेदकावच्छिन्नस्य प्रतियोगिव्यधिकरणसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारितया तस्य तत्रापि सत्त्वा ५८

58A

तु अन्यथा मूर्त्तत्वमूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ मूर्त्तत्वादित्यादेर्व्यभिचारित्वानुपपत्तिः लाघवेन नि
रवच्छिन्नसाध्याभाववद्वृत्तित्वस्यैव व्यभिचारित्वाच्चेति समवायेन विशिष्टसत्तायाः साध्यतायामप्यति
व्याप्तिरिति विभाव्यतेन दा साध्यतावच्छेदकमपि निवेश्यं अत एव वह्निविशिष्टसमानाधिकरणयावंतः
साध्यतावच्छेदकावच्छिन्नसाध्यसमानाधिकरणस्तद्वत्त्वं वा अग्रे च तेन द्रव्यं गुणकर्मान्यत्वे सति सत्ता
दित्यादौ विशिष्टसत्ताया अनतिरेकेपि नाव्याप्तिः न वा गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यादावति
व्याप्तिरिति पुस्तके स्रजोलितः पाठो दृश्यत इति न काप्यनुपपत्तिः तत्र चानतिरिक्तत्वे पीत्यपिनाविशिष्टस्या
तिरिक्तत्वमंगीकृत्य पूर्वलक्षणं सूचितं इदमेवलक्षणं संगमयति भवति चेति न चेदृशमिति स्ववि
शिष्टसमानाधिकरणं सर्वं धूमसमानाधिकरणमिति नेत्यर्थः वह्नित्वविशिष्टसमानाधिकरणयावंद
न्तर्गता योगोलकत्वादेर्धूमासमानाधिकरणत्वादिति भावः धूमव्याप्तिः धूमनिरूपिता व्याप्तिः अ
त्र च साधनतावच्छेदकसंबंधेन साधनाधिकरणत्वं बोध्यं अन्यथा समवायेन धूमाधिकरणवृत्ति धू
मावयवत्वादीनां वह्निसामानाधिकरण्याभावादव्याप्तेः एवं साध्याधिकरणत्वमपि साध्यतावच्छेदकसं

त॰प्र॰ ५८ बंधेन अन्यथावह्न्यधिकरणवृत्त्ययोगोलकत्वादीनामपि कालिकसंबंधेन धूमाधिकरणायोगोलकवृत्ति
त्वादतिप्रसंगापत्तेः धूमसमानाधिकरणानां संयोगेन वह्न्यधिकरणपर्वतनिष्ठत्वादिवृत्तित्वात् समवायेन व
59 ह्निसाध्यके संयोगेन धूमहेतुकेऽतिव्याप्तेश्च एवं साधनाधिकरणवृत्तित्वघटकसंबंधेन साध्याधिकरणवृत्ति
त्वं वाच्यं अन्यथा वह्निसमानाधिकरणायोगोलकत्वादीनामपि धूमाधिकरणमहानसादौ कालिकसंबंधेन वृ
त्तित्वादतिव्याप्तिताद्रवस्थ्यमिति ननु अत्र साधनाधिकरणवृत्तित्वं यदि साधनतावच्छेदकसंबंधेन विवक्षितं त
दैतद्रूपसमवेतरसादावेतद्रूपभिन्नं गुणत्वादित्यादौ गुणत्वाधिकरणसमवेतानां यावतामेतद्रूपभिन्नसमवे
तत्वादतिव्याप्तिः एतद्रूपमात्रसमवेतस्यासिद्धेः नापि साध्यतावच्छेदकसंबंधेन जातिमान् मेयत्वादि
त्यादौ मेयत्वाधिकरणसमवेतानां यावतीनां जातिमत्समवेतत्वादतिप्रसंगात् न च विषयतया तद्वृत्ति
त्वं विवक्षणीयं वह्निमान् धूमादित्यादौ विषयतया धूमाधिकरणवृत्तीनां धूमतन्मात्रविषयकज्ञाना
दीनां वह्न्यधिकरणेऽपि विषयतया वृत्तेर्लक्षणसमन्वयः धूमवान् वह्नेरित्यादावयोगोलकमात्रविषय
कज्ञानादीनां धूमासमानाधिकरणत्वान्नातिव्याप्तिरिति वाच्यं घटभिन्नो मेयत्वादित्यत्र मेयत्वाधिक

59A

रणवृत्तित्वानां घटभिन्नत्वसामानाधिकरण्यादतिव्याप्तिः घटमात्रविषयकज्ञानस्याप्रसिद्धत्वात् नच र
येनकेनचित्संबंधेन साधनाधिकरण वृत्तित्वं विवक्षितं द्रव्यं सत्त्वादित्यादौ सत्ताधिकरणवृत्तीनां यावतामेव
कालिकसंबंधेन साध्याधिकरणवृत्तित्वस्य विवक्षितत्वात् (द्रव्यत्वाधिकरणकालवृत्तित्वादतिव्याप्तिरि
ति चेन्न येनयेन संबंधेन साधनाधिकरणवृत्तयो यावंतस्तेन संबंधेन साध्याधिकरणवृत्तयस्तद्वत्त्वस्य वि
वक्षितत्वात् यदि चैवमननुगम इति विभाव्यते तदा विशेषणताविशेषेण संबंधेन साधनाधिकरणवृत्तयो या
वंतः विशेषणताविशेषसंबंधेन साध्याधिकरणवृत्तयस्तद्वत्त्वमिति बोध्यं धूमवत्त्वप्रकारकप्रमाविशेष्यत्वा
दीनां वह्निसमानाधिकरणत्वाल्लक्षणसमन्वयः अयोगोलकत्वप्रकारकप्रमाविशेष्यत्वस्य च धूमासमाना
धिकरणत्वान्नव्यभिचारिण्यतिप्रसंग इति निगर्वः केवलान्वयिनि लक्षणमुपपादयति क्वचिदेवमिति इ
दं निरुक्तव्याप्तिलक्षणं केवलान्वयिनि केवलान्वयिसाध्यके प्रमेयमभिधेयत्वादित्यादौ एवंचेति मन
मपास्तमित्यनेनान्वयः एवं च एतादृशस्य व्याप्तित्वे च लाघवादिति हेतुव्यापकसाध्यसामानाधिकर
ण्यरूपव्याप्त्यपेक्षया लाघवादित्यर्थः तत्र प्रतियोगिवैयधिकरण्यादिनिवेशेन गौरवादिति भावः साध्यव

त॰प्र॰
६॰

दिति साध्यवदन्यावृत्तित्वस्य गगनादावपि सत्वेन वह्निसाध्यकगगनादावतिव्याप्तिरतः साध्यसामा-
नाधिकरण्यमिति नचमत्र व्याप्तिसत्वेपि पक्षधर्मताज्ञानविरहेणैवानुमितिवारणे किंतद्वारणाय विशे-
60 षणोपादानेनेतिवाच्यं गगनमवृत्तोन्यवृत्तित्वज्ञानस्य गगने पर्वतवृत्तित्वज्ञाने ग्राह्याभावावगाहितया प्रति-
तिबंधकत्वेन तदनुत्पन्नावपि भिन्नविषयकत्वस्य गगनवान् पर्वत इति ज्ञानोत्पत्तौ बाधकाभावेन पक्षध-
र्मताज्ञानस्यापि संभवेन तद्वारणाय विशेषणोपादानस्यावश्यकत्वात् इदं तु घटत्वपटत्वोभयस्मादि-
त्यत्र विरुद्धेतिव्याप्तिवारणाय तस्यावश्यकत्वाच्च इदं तु साध्यसामानाधिकरण्यज्ञानस्यान्वयव्यतिरे-
काभ्यां कारणत्वाभिप्रायेण अन्यथा वृत्तिमत्वनिवेशेनापि गगनादिवारणसंभवतीति बोध्यं नचेद-
मिति साध्यवदन्यावृत्तित्वमित्यर्थः नेदमनुमानमिति न केवलान्वयिसाध्यकानुमानमित्यर्थः व्या-
प्तिज्ञानाभावात्तादृशानुमितेरसिद्ध्या नतत्करणतया तदनुमानस्वीकार इति भावः ततोपीति साध्यवद-
न्यावृत्तित्वसामानाधिकरण्यरूपव्याप्तिस्वरूपतोपि अस्य निरुक्तव्याप्तिस्वरूपस्य लघुत्वात् अभा-
वाप्रवेशेन लघुत्वात् ननु यावत्त्वस्य व्यापकत्वादेरन्यस्य दुर्वचनया व्यापकत्वस्य चाभावघटितत्वेन ६॰

60A

गुरुतया कुतो स्य गस्तुत्वमिति चेन्न अपेक्षाबुद्धिविषयत्वरूपस्यैव गुरुत्वस्य तत्र प्रवेशनीयत्वात्
वस्तुतस्तु साध्यवदन्यावृत्तित्वस्य स्वाधिकरणवृत्तिसाध्याभाववकत्वरूपस्यावश्यं निवेशनीयतयाऽवृत्ति
त्वस्य च साध्यवदन्यगत विशेषितानियामकसंबंधेनावश्यं वक्तव्यतया विशेषितानियामकत्वस्य च समवा
याभावीयविशेषणतासाधारणस्यानुगतस्याभावात् गौरवेण निरुक्तव्याप्तिस्वरूपस्यैव लघुत्वात्
निरुक्तव्याप्तिस्वरूपे च विशेषणतया विशेषणैव सामानाधिकरण्यनिवेशे न व्यापकतावशेषप्रतियोगिवै
यधिकरण्याप्रवेशेन लाघवस्यातीव स्फुटत्वात् एवं गुरुधर्मावच्छिन्नसाध्यके साध्यतावच्छेदकावच्छि
न्नाभावाप्रसिद्ध्याऽव्याप्तिवारणाय साध्यतावच्छेदकावच्छिन्ननिष्ठाभावप्रतियोगितानवच्छेदकधर्माव
च्छिन्नाभाववदवृत्तित्वं व्याप्तिरिति वक्तव्ये तत्र च तादृशप्रतियोगितानवच्छेदकेत्यत्र तादृशप्रतियोगि
तावच्छेदकत्वावच्छिन्नप्रतियोगिताकभेदनिवेशनेन संभवति घटत्वावच्छिन्नवन्निष्ठाभावप्रतियोगिता
वच्छेदकत्वावच्छेदकतया कंबुग्रीवादिमत्वावच्छिन्नवन्निष्ठाभावप्रतियोगितावच्छेदकत्वस्याप्रसिद्धत्वेन तादृशा
भावाप्रसिद्धेः किंतु तादृशप्रतियोगितावच्छेदके यत्तत्तद्व्यक्तित्वावच्छिन्नप्रतियोगिताकभेदकूटएव

त॰प्र॰
६१
निवेशयइतिगौरवाद्दुर्ज्ञेयत्वान्नतादृशव्याप्तिज्ञानंहेतुरितिबोध्यं ॥ समुपलब्धानां प्रमेयत्वमनुमिनोमीत्य
नुव्यवसायबलादेवतत्स्वीकारआवश्यकइतिप्रागेवोक्तमिति सर्वत्रव्यभिचारशंकासंभवेनव्याप्तिग्रहा
61 नुदयात्कारणाभावेनानुमितेरसिद्धानतत्कारणतयाऽनुमानप्रामाण्यमितिचार्वाकमतंदूषयितुंतन्म
तमनुवदन्नस्यति का३चार्वाकाइति किंचिदिति धूमसमानाधिकरणत्वसामानाधिकरण्येनवह्निसामाना
धिकरण्याभावसंशयेधूमसमानाधिकरणत्वावच्छेदेनवह्निसामानाधिकरण्यरूपव्याप्तिग्रहानुदयादि
त्यर्थः ननुतादृशशंकायांव्याप्तिग्रहेकिंबाधकमित्यतआह नचेति नहीति ईदृशशंकायांधूमसा
मानाधिकरण्यत्वसामानाधिकरण्येनवह्निसामानाधिकरण्यत्वाभावशंकायां तस्याःतादृशशंकायाइ
त्यर्थः तत्प्रतिबंधकत्वात् तादृशव्याप्तिग्रहेप्रतिबंधकत्वात् ननुभूतलत्वसामानाधिकरण्येनघटाभा
ववत्ताज्ञानस्यनिर्णयात्मनोभूतलत्वावच्छेदेनघटवत्ताज्ञानेबाधनिर्णयविधयाप्रतिबंधकत्वेपितादृश
शंकायाःकथंप्रतिबंधकत्वं ग्राह्यसंशयस्यापिप्रतिबंधकत्वेचपर्वतोवह्निमान्नवेतिसंशयेनुमित्यादेरनु
त्पत्त्यापत्तिरितिचेन्न यद्धीसामग्रीपक्षप्रतिबंधकायत्रविशेषादर्शनेनतद्धीरपिनवेतिन्यायेनविशिष्टप्र ६१

61A

त्यहे विशेषदर्शनाभावविशिष्टेतरभावप्रकारकज्ञानत्वेन संशयस्यापि प्रतिबंधकत्वांगीकारान्न च
न्यथास्याण्वीपुरुषोवेति संशयोत्तरं विनैव विशेषदर्शनं प्रत्यक्षापत्तेः नन्वबाधनिश्चयस्याभावात्
संशयस्य च तन्मतेऽप्रतिबंधकत्वात्तदिति यदि चाप्रामाण्यज्ञानाभावादिभिर्विशेषणविशेषणाभावे
विनिगमनाविनिगमनाविरहेण विशेषदर्शनस्योत्तेजकत्वासंभवान्न विशेषदर्शनाभावविशिष्टत
दभावप्रकारकज्ञानत्वेन संशयस्य प्रतिबंधकत्वं विशेषदर्शनशून्यकाले संशयोत्तरप्रत्यक्षानुत्प
त्तिश्च संशयोत्तरप्रत्यक्षे विशेषदर्शनस्य हेतुत्वकल्पनेनैव तदभावादेवोपपन्नेरिति विभाव्यते तदा
तादृशसंशयस्य सामग्रीप्रतिबंधिकावोध्येति निगर्वः ननु घटकुम्भधूमाग्न्योः सामानाधिकरण्यमे
वतादृशशंकाविरोधीत्याशयेनाह नचेति भूयोदर्शनात् वह्निधूमसाध्यसाधनयोः सहचारदर्शनात्
तन्निवृत्तिः व्यभिचारशंकानिवृत्तिः शतशः इति घटादिरूपपृथिवीलोहलेख्यत्वपार्थिवत्वा
दित्यादौ घटादौ पार्थिवत्वलोहलेख्यत्वयोः सामानाधिकरण्येपि हीरके व्यभिचारग्रहादित्यर्थः

त·प्र·
६२
62

तथा च व्यभिचारेण भूयोदर्शनस्य ताद्दशशंकाप्रतिबंधकत्वमिति भावः ननु धूमवह्न्योः कार्यका
रणभावश्च धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादिति तर्क एव धूमो वह्निव्यभिचारी नवेति शं
कानिवर्तकः पार्थिवत्वलोहलेख्यत्वयोस्तु कार्यकारणभावाभावात् यदि लोहलेख्यं न स्यात्तर्हि पार्थि
वं न स्यादिति तर्कासंभवान्न तत्र व्यभिचारशंकाविरह इत्याशंक्याह नच [illegible]कीदिति धूमो यदि वह्निव्य-
भिचारी स्यात्तर्हि वह्निजन्यो न स्यादित्यर्थः तन्निवृत्तिः व्यभिचारशंकानिवृत्तिः व्याप्तिग्रहमूलकत्वे
न आपाद्यापादकयोर्व्याप्तिग्रहमूलकत्वेन अनवस्थानादिति तर्कमूलभूतव्याप्तावपि व्यभिचार
शंकानिरासार्थं तर्कान्तरापेक्षायामनवस्थेत्यर्थः तथा च मूलशैथिल्यान्न तर्कस्य तच्छंकानिवर्त-
कत्वमिति भावः अत्र विपर्ययतत्कोटिमात्रापर्यवसानमिष्टापत्तिर्मूलशैथिल्यं चेति तर्के त्रयो दो
षाः विपर्यये तत्कोटिमात्रपर्यवसायिन एव तर्कस्य तदभावशंकानिवर्तकत्वात् तदितरकोटिपर्य
वसाने च तदसंभवात् विपर्यये तत्कोटिमात्रापर्यवसानस्य दूषकत्वं बोध्यं इष्टापत्तेश्च तर्ककार ६२

62A

णीभूतापाद्यव्यतिरेकनिरूपितविघटकत्वेन मूलशैथिल्यस्य तत्कारणीभूतापाद्यापादकव्याप्तिग्रह
प्रतिबंधकत्वेन यथायथं दूषकत्वं बोध्यं उपसंहरति इत्थं चेति व्यभिचारशंकाप्रतिबंधकस्याभावेनार
ज्ञागरूकेव्यभिचारसंशये त्वित्यर्थः ग्राहकाभावात् व्यभिचारज्ञानाभावरूपग्राहकाभावात् कुतश्चि
ति कुतो हेतोरनुमानं प्रमाणं स्यादित्यर्थः अनुमितिकरणतयैवानुमानस्य प्रामाण्ये व्याप्तिनिश्चये
चानुमितेरभावात्तत्करणतयानुमानप्रामाण्यं दुरापास्तमिति भावः व्यभिचारज्ञानविरहादिकमिति
तद्वत्ताज्ञानं प्रति तदभाववत्ताज्ञानाभावस्य हेतुतयाऽव्यभिचाररूपव्याप्तिग्रहे साध्याभाववद्वृत्ति
त्वादिरूपव्यभिचारज्ञानाभावो हेतुरित्यर्थः आदिना सहचारज्ञानपरिग्रहः न च साध्याभाववद्
वृत्तित्वांशे संशयसत्वे व्याप्त्यग्रहात् संशयनिश्चयसाधारणव्यभिचारज्ञानाभावहेतुर्वाच्यस्तथा
च पक्षीयसाध्यसंदेहात्मकव्यभिचारसंशयस्यापि प्रतिबंधकत्वप्रसक्तावनुमानमात्रोच्छेदप्रसंगइ
ति वाच्यं साध्याभाववत्वांशे निश्चयात्मकवृत्तित्वांशे संशयनिश्चयसाधारणव्यभिचारज्ञानाभा
वस्यैव हेतुत्वात् ननु ज्ञानादीनामव्याप्यवृत्तितया व्यभिचारत्वज्ञानसत्वेपि घटावच्छेदेनात्मनि

त॰प्र॰ ६२

समवायेन तदभावसत्त्वाद्व्याप्तिग्रहापत्तेरिति चेन्न समवायसंबंधावच्छिन्नप्रतियोगिकव्यभि-
चारज्ञानविशिष्टात्मत्वाभावस्य स्वसमानाधिकरणसंबंधेन व्यभिचारज्ञानाभावस्य वा हेतुत्वा-
त् तस्य च व्याप्यवृत्तित्वादिति अथ तथापि धूमवह्न्योः सहचारज्ञानस्य व्याप्तिग्रहहेतुत्वे मानाभा-
63 वः न च विरुद्धे सहचारभ्रमाद्व्याप्तिभ्रमदर्शनादन्वयव्यतिरेकाभ्यां तस्य कारणत्वमिति वाच्यं ग्रा-
हकसामग्रीक्रमयौगपद्याभ्यामेव सहचारग्रहव्याप्तिग्रहक्रमयौगपद्ययोरुपपत्तेः तयोः परस्परं हे-
तुत्वे मानाभावादिति चेन्नैवं यत्समानाधिकरणयावंतो धर्मा इत्यत्र धर्मे हेतुसामानाधिकरण्यरूप-
सहचारज्ञानस्य विशेषणज्ञानत्वेन हेतुतया तस्यैवादिपदेन संग्रहात् न तु साध्यसाधनसहचारग्र-
हस्यापि एवं प्रतिबंधकाभावांतरस्याप्यादिपदेन संग्रहीतत्वादिति दिक् ननु व्यभिचारज्ञानवि-
रहः संशयनिश्चयसाधारणज्ञानाभावः सर्वत्र तत्संशयसत्त्वे च कथं संभव इत्याशंकानिराचष्टे नचे-
ति तर्कात् धूमो यदि वह्निव्यभिचारी स्यात्तर्हि वह्निजन्यो न स्यादिति तर्कात् अनवस्थां निरस्य-
ति क्वचित्तन्मूलभूत इति तर्कमूलभूतेत्यर्थः तन्निवृत्तेः व्यभिचारशंकानिवृत्तेः ननु सर्वत्र ६३

63A

व्यभिचारशंकाकोटिस्मरणं वा स्यादेव तत्राह अनुभूयते चेति तथा च प्रमाणाभावेन संशयसामग्र्यभा-
वेन कल्प्यते इति भावः ननु तर्कस्य व्यभिचारशंकानिवर्तकत्वे मानाभावः अनाहार्यशंकायास्तर्कका-
र्यीभूतज्ञानेनैव निरस्तत्वात् तथा हि व्याप्तिप्रतिपन्नधर्मितांशे अनाहार्यरूपमापाद्यव्यापादकर-
वत्ताज्ञानमापाद्यव्यतिरेकनिश्चयश्च हेतुः व्याप्तिश्चान्वयतो व्यतिरेकतश्च तथा च धूमो यदि वह्निव्यभि-
चारी स्यात्तर्हि वह्निजन्यो न स्यादित्यत्र वह्निव्यभिचारित्वं वह्निजन्यत्वाभावव्याप्यमित्यन्वयव्याप्तिज्ञाने-
नैव वह्निजन्यत्वाभावे वह्निव्यभिचारित्वव्यापकत्वग्रहाद्वह्निव्यभिचारित्वव्यापको वह्निजन्यत्वाभाव इ-
ति ज्ञानसंपत्त्याऽऽपाद्यव्यतिरेकनिर्णयविधया तदभावज्ञानस्य च सत्त्वात् वह्निव्यभिचारित्वव्यापका-
भाववत्ताज्ञानसंभवान्नानाहार्यव्यभिचारित्वशंकासंभवः एवं वह्निजन्यत्वव्यापकीभूताभावप्रति-
योगि वह्निव्यभिचारित्वमिति व्यतिरेकव्याप्तिग्रहेऽपि वह्निव्यभिचारित्वाभावे वह्निजन्यत्वव्यापकत्वग्र-
हे तुल्यवित्तिवेद्यतया वह्निजन्यत्वेऽपि वह्निव्यभिचारित्वाभावव्याप्यत्वग्रहे वह्निव्यभिचारित्वाभाव-
व्याप्यं वह्निजन्यत्वमिति ज्ञानसंभवेन तद्वत्ताज्ञानस्य चापाद्यव्यतिरेकनिर्णयविधया सत्त्वेन तदभाव

त.प्र॰ व्याप्यवत्ताज्ञानस्य सत्वात् तादृशशंकोदयः न चान्वयिन्यायाद्यक व्यापकमापाद्यं तदभाववांश्चायमि
६४ ति ज्ञाने मितव्यापकाभाववत्ताज्ञानस्य विशिष्टवैशिष्ट्यावगाहिन एव तद्धत्ताज्ञानप्रतिबंधकतयाक
ल्पनस्य विरोधित्वं एवं व्यतिरेकिण्यापादकाभाववान् व्याप्यश्चापाद्याभाववत्त्वेऽश्चायमिति ज्ञानसंभवेपि तद
64 भावव्याप्यवत्ताज्ञानस्यापि विशिष्टवैशिष्ट्यावगाहिन एव तत्र प्रतिबंधकत्वात्तदसंभव एवेति वाच्यम्
धूमव्यापको वह्निः वह्न्यभाववांश्चायमिति ज्ञानद्वयसाधारण्याय तद्धर्मावच्छिन्नविशेष्यकव्यापकत्व
\- ग्रहकालीनतद्धर्मावच्छिन्नाभाववत्तानिश्चयत्वेन व्यापकाभाववत्ताज्ञानस्य प्रतिबंधकत्वात् एवं गुरु
त्वव्याप्यं करादिकरारिमांश्चायमिति ज्ञानद्वयसाधारण्याय तद्धर्मावच्छिन्नविशेष्यकव्यापकत्व
ग्रहकालीनतद्धर्मावच्छिन्नवत्तानिश्चयत्वेन तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वादुक्तज्ञानद्वय
सत्वात्तत्संशयासंभवात् यदि च व्यतिरेके आपादकाभावे आपाद्याभावव्यापकत्वग्रहे आपाद्याभावे
आपादकाभावव्याप्यत्वज्ञानस्यानैयत्यं तुल्यविनिर्बधत्वे मानाभावात् एवं व्यापकाभाववत्ताज्ञान
स्य तदभावव्याप्यवत्ताज्ञानस्य च विशिष्टवैशिष्ट्यावगाहिन एव लाघवात् प्रतिबंधकत्वे उक्तज्ञानद्वयस्या ६४

64A

प्रतिबंधकत्वेपि तद्वतेरोत्पन्नविशिष्टज्ञानादेव प्रतिबंध इति प्रकृते आपादकसंशयोत्पन्नो बाधकाभा
वइति विभाव्यते तथाप्यापाद्याभाववत्तानिश्चयस्यापादकज्ञानेव्यावर्त्तकधर्मदर्शनविधयाप्रतिबंधकत्व
मप्याहत्तमित्यनाहार्य्यव्यभिचारित्वसंशयासंभवात् आहार्य्यशंकायास्त्वविरोधित्वात्तर्कस्यैववैयर्थ्य
मिति चेदत्रोच्यते अनाहार्य्यशंकानिवृत्तिसंभवेप्याहार्य्यशंकानिवर्त्तकत्वेनेव तर्कस्योपयोगः तस्या
अप्रतिबंधकत्वेतु तस्यामण्यप्रतिबंधकत्वमेव नचतथापितर्कस्याहार्य्यज्ञानरूपस्य कथमाहार्य्यशं
काप्रतिबंधकत्वमाहार्यज्ञानस्याप्रतिबंधकत्वाच्चप्रतिबध्यत्वाच्चेति वाच्यं अनिष्टप्रसंजनात्म
कतर्केणापादकज्ञाने आपाद्यज्ञानरूपानिष्टसाधनत्वज्ञानजननेनापादकज्ञाने द्वेषोत्पत्त्या तत्रे
च्छाविरहात्तद्विच्छेदरूपकारणाभावेनाहार्य्यशंकानुदयात् तर्कैतन्निवर्त्तकत्वस्यार्थवशसंपन्नत्वा
त् अतएवापादकांशे संशयात्मकज्ञानमपि तर्कहेतुः अन्यथा तन्निर्णयस्यैव हेतुत्वेकारणीभू
तापादकनिर्णये तर्कात्तद्द्विष्टसाधनताज्ञानसंभवेपि संशये द्विष्टसाधनताज्ञानाभावेन तदिच्छोत्प
त्तौबाधकाभावेनाहार्य्यशंकानिवर्तकत्वासंभवात् केचित्तु तदापादककापत्तित्वेनाहार्य्यानाहार्य्य

त॰प्र॰
६५
65

साधारणतद्विशिष्टबुद्धित्वप्रतिबध्यप्रतिबंधकभावः समानविषयकत्वासंभवेपि फलबलात्कल्प
नीय इति तर्कोपयोगित्वमाहुः अन्ये तु व्यभिचारशंकाया उत्तेजकतया तर्कोपयोग इत्याहुः यद्यपि
बाधकालीनमिथ्याज्ञानं ज्ञानमाहार्य्यं तथापि प्रकृते इच्छाजन्यत्वमात्रमापादकांशे आहार्य्यत्वं बोध्यं
तर्कस्तु द्विविधः व्याप्तिग्राहको विषयपरिशोधकश्च आद्यस्तु उक्त एव द्वितीयस्तु पर्वतो यदि निर्वह्निः
स्यात्तर्हि निर्धूमः स्यादित्याकारकः विषयस्यानुमितिविषयस्य साध्यस्य परिशुद्धिः विरोधिशंकावि
धूननं ननु साध्यव्याप्यवत्तापरामर्शे साध्यसंशयस्यानवकाशात्कुतस्तस्य विरोधित्वं आद्यसंश
यस्याप्रतिबंधकत्वाच्च तर्केणापि वा कथं तन्निरास इति चेन्मैवं स्वरसवाहिनः संशयस्य विशेषद
र्शनप्रतिबध्यत्वेप्यप्रतिबंधकत्वेपि चान्याहितस्य तस्याप्रतिबध्यत्वात्प्रतिबंधकत्वाच्च तथा च यथा
धूमाद्वह्निमता तेन भवितव्यं तथा कुतश्चिद्वह्न्यभावसाधकाद्वह्न्यभाववतापि भवितव्यमिति शंका
यत्र तत्र किं वह्निविरहसाधकमिति प्रमाणजिज्ञासा जायते विरोधिप्रमाणजिज्ञासायां च बाधक
प्रमाणशंका तथा च साध्याभावशंकाजन्यते सा च सत्यपि परामर्शे अन्याहितत्वादुत्पद्यते अप्रमाण्य ६५

प्र१

65A

शंकाहितेवार्यशंकासत्वात्पक्षे निश्चये निर्वह्निः स्यादित्यादितर्केण वा निष्टप्रसंजनात्मना विरोधिप्र-
माणजिज्ञासानुत्पत्तौ बाधकप्रमाणशंकानिवृत्तौ तदा हि तत्साध्यशंकाया अपि निवृत्तिः अन्यविधा
यास्तु साध्यशंकायाः सतिपरामर्शेऽसंभवात् प्रतिबंधकत्वाच्च सर्वमवदातं इत्यत इति महानसीयध-
मवह्न्योः सन्निकर्षेण तच्चैव व्याप्तिग्रहे न तु पर्वतीयधूमेपि पर्वतीयवह्नेरसन्निकर्षेण तन्निरूपित-
व्याप्तिग्रहासंभवादिति भावः स्मर्यत इति महानसीयधूमे धूमत्वधर्मिनावच्छेदकीकृत्य व्याप्त्य-
नुभवस्ततः पर्वतीयधूमे धूमत्वज्ञानादेकसंबंधिज्ञानमपरसंबंधिस्मारकमिति न्यायेन तादृशव्याप्ते-
श्च स्मरणं जायते जाते व्याप्तिस्मरणे विशेषणज्ञानाद्वह्निव्याप्योयं धूमः पर्वतवृत्तिरिति व्याप्यपक्षोपनीत
भावात्मकं प्रत्यक्षं तेन तस्यानुमितिरित्याखंडलार्थः … च महानसे धूमवृत्तिव्याप्तेः पर्वतीयधूमेऽसत्वात्कथं
तत्र तत्प्रत्यक्षमिति वाच्यं यद्विशिष्टसमानाधिकरणः सर्वसाध्यसमानाधिकरणस्तद्धर्मवत्त्वमित्यत्र तद्ध
र्मिवत्त्वं तद्धर्मावच्छिन्नस्यैव पर्यालोचनया धूमत्वस्यैव व्याप्तित्वलाभात्तस्य च पर्वतीयधूमेपि सत्वात् नचैवधू
मत्वस्यैव व्याप्तित्वे तस्य व्याप्यतावच्छेदकत्वानुपपत्तिरभेदेऽवच्छेद्यावच्छेदकभावानभ्युपगमादिति

त॰ प्र॰
६६
66

वाच्यं घटकारणतात्कारणतावच्छेदकत्वयोर्दंडत्वदंडत्वोपहितानुपहितभेदादेव तस्य समर्थनीयत्वा
त् अत एव परामर्शीयं पक्षस्य व्याप्तेः पक्षवृत्तिधर्मसत्त्वेनैकैव हि सा व्याप्तिरित्यनेन चिंतामणिकारे
णापि तथाभिहितं नच यो यत्र पूर्वमवगतः स एव तत्र संस्कारवशाद्यथार्थप्रत्यये भासत इति निय
मात्पर्वतीयधूमे पूर्वं व्याप्तेरनवगमात्कथं व्याप्तेरुपनीतभानं यत्र चंदने सौरभं घ्राणेनोपलब्धं तत्रै
व चक्षुषा सुरभिचंदनमित्युपनीतभानमन्यत्र त्वनुमानादिति वाच्यं यद्धर्मावच्छेदेन यद्धर्मो गृहीतं
तद्धर्मावच्छेदेन तदुपनीतभानमित्यस्य नियमात् अस्ति चात्र धूमत्वेनैव व्याप्तिग्रह इति धूमे धू
मत्वेनैव व्याप्तेरुपनीतभानमिति इदं तु सामान्यलक्षणानंगीकारे बोध्यं वस्तुतस्तु सामान्यल
क्षणांगीकारेण व्याप्तेर्नानात्वेपि न दृश्यनियमाभ्युपगमेपि च न क्षतिः महानसीयधूमे धूमत्वेन व
ह्निव्याप्तिज्ञाने जायमाने धूमत्वव्याप्यवह्नित्वसामान्यलक्षणया यावद्धूमवह्निभाने यावद्वह्निनिरूपित
यावद्धूमनिष्ठव्याप्तिज्ञानमेव जायत इति पर्वतीयधूमेपि व्याप्तेः पूर्वं गृहीतत्वेन तदुपनीतभाने बा
धकाभावादनुमितिः स्यादुपपन्नैवेत्यभिप्रायेणाह यद्वेति केचित्तु तत्रेत्यादि महानसीयधूमनिष्ठा र ६६

व्याप्तिस्तत्रैव गृहीता ततः पर्वतीये धूमे धूमत्वस्पर्शिना न्महानसीयधूमनिष्ठव्याप्तेरेव स्मरणं ततः
पक्षवृत्तिधूमे महानसीयधूमनिष्ठव्याप्तेरुपनीतभानं ततोनुमितिरित्यर्थः तथा च भ्रमात्मकपरा
मर्शादेवानुमितिरिति भावः ननु सल्लिंगपरामर्शस्यैव प्रमानुमितिहेतुतया यथार्थपरामर्शाऽ
भावे कथं प्रमात्मिकानुमितिरित्यत आह यद्वेतीत्याहुस्तदसत्र धूमत्वस्यैव व्याप्तत्वेन सल्लिंगप
रामर्शस्यैव पूर्वकल्पेपि संभवात् यद्यपि यत्समानाधिकरणाऽत्यन्तत्वं व्याप्तिरित्युक्तेर्व्याप्तेर्नाना
त्वं ग्रंथकृदभिमतं तथापि यद्विशिष्टेति द्वितीयलक्षणस्यैव निर्दुष्टत्वेन तदभिप्रायेण सल्लिंग
परामर्शमादायैव योजयितुं शक्यत्वे भ्रमात्मकपरामर्शमादायोक्तकुसृष्टेरनादरणीयत्वादिति
मकिंचिदेतत् धूमत्वसामान्यलक्षणप्रत्यासत्त्येति अत्र च ज्ञायमानं सामान्यं प्रत्यासत्तिर्बोध्या न
चेंद्रियसंबद्धं तथा तेन निमीलितनयनस्य सामान्यलक्षणप्रत्यासत्त्या जन्यज्ञानापत्तिः तथा चेंऽ
द्रियसंयुक्ते धूमे धूमत्वज्ञानानंतरं धूमत्वसामान्यलक्षणया यावद्धूमविषयकं धूमाऽन्या

त॰त्र॰ ६७ 67

कारकं ज्ञानं जायते इंद्रियसंबंधश्चक्षुःसंयुक्तसमवायः धूलीपटले धूमभ्रमानंतरं धूमादग्निज्ञाना
नुदयापत्तेः तथाच तदुत्तरं धूलीपटले धूमत्वेन व्याप्तिग्रहाज्ज्ञायमानाद्यावद्धूमानुमितेरुच्छेदप्रसं
गात् पर्वतीयधूमे व्याप्त्यग्रहात् किंत्विंद्रियसंबद्धविशेष्यकज्ञानप्रकारत्वरूपो वैज्ञानिकः संबंध
इंद्रियसंबंधश्चात्रालौकिको बोध्यः तेन निमीलितनयनस्य न तदापत्तिः ज्ञानं च तदिंद्रियजन्यं ग्रा
ह्यं तेन पुरोवर्त्तिनि दोषवशाद्गृह्यमाणेन स्मर्य्यमाणघटत्वेन न यावद्घटचाक्षुषापत्तिः इदं च बहि
रिंद्रियस्थले बोध्यं तेन न तथाविधमानसेऽपि न क्षतिः अत्र च ज्ञायमानसामान्यस्य प्रत्यासत्ति
त्वे यत्र नानाकपालेष्वेक एव घटः प्रत्यासन्नस्तत्र तद्घटनाशादशायां तद्घटवत्त्वसामान्यलक्षणया
यावत्तद्घटवतां ज्ञानं न स्यात् न च तत्र घटत्वमेव तद्व्यक्तिसंबंधेन परम्परया प्रत्यासत्तिरिति वाच्यं य
त्र तद्व्यक्तिसंबंधेन परंपरया घटत्वेन भाते किंतु तद्व्यक्तित्वेन तद्व्यक्तिप्रकारेण तद्व्यक्तिमतां ज्ञानं तत्राग
त्यभावात् न च तत्र परंपरया तद्व्यक्तित्वमेव प्रत्यासत्तिरिति वाच्यं तद्व्यक्तित्वस्य तद्व्यक्तिरूपरसाद्यात्म ६७

67A

कत्वात्तस्यापि नष्टत्वादिति तथाविधसामान्यज्ञानं प्रत्यासत्तिर्वाच्या तत्र न तावद्धटत्वाश्रययावद्व्य
क्तिविषयकप्रत्यक्षे इंद्रियसंबद्धविशेष्यकज्ञानप्रकारीभूतघटत्वत्वेन तथाविधघटत्वज्ञानत्वेन वा
हेतुता यावद्विषयकत्वस्य कार्यतानवच्छेदकत्वेपि विनिगमनाविरहेण यावद्विषयकत्वस्यापि वक्त
संपन्नत्वेन तन्निवेशप्रयोजनाभावात् अथ संयोगाजन्यस्वविषयकज्ञानाजन्यघटत्वातिरिक्तघ
टवृत्तिधर्माप्रकारकघटप्रत्यक्षं प्रति तथाविधघटत्वत्वेन तथाविधघटत्वज्ञानत्वेन वा हेतुता नि
र्विकल्पकोत्तरोत्पन्नघटप्रत्यक्षे व्यभिचारवारणाय स्वविषयकज्ञानाजन्यत्वनिवेशः पटत्वेन
घटत्वभ्रमानंतरं यत्र पटवृत्तित्वोपनीतभानं तत्र पटत्वेन घटप्रत्यक्षोदयात्तत्र च घटत्वज्ञानाभावाद्व्य
भिचारवारणाय स्वविषयकज्ञानाजन्यत्वनिवेशः द्रव्यत्वसामान्यलक्षणाजन्यप्रत्यक्षवारणा
य घटत्वातिरिक्तेत्यादीति चेन्न तथा सति घटत्वद्रव्यत्वोभयसमूहालंबनस्य तत्परापरकार्य
कारणभावापत्तेः किं च घटत्वादिप्रकारतानिरूपितलौकिकसान्यघटादिमुख्यविशेष्यतासा

त॰प्र॰
६८
68

लिचाक्षुषत्वावच्छिन्नं प्रति चाक्षुषप्रकारीभूतघटत्वत्वादिना घटत्वादिप्रकारताशालिचाक्षुषत्वा
दिना वा हेतुता बोध्या प्रथमे विषयत्वसमवायघटितसामानाधिकरण्यं द्वितीये च समवायघ-
टितसामानाधिकरण्यं प्रत्यासत्तिः विशेष्यतायां घटत्वप्रकारतानिरूपितत्वनिवेशाद्द्रव्यत्वा
दिना सामान्यलक्षणाजन्यज्ञाने न व्यभिचारः निर्विकल्पकानन्तरोत्पन्नघटद्वयमुख्यविशेष्यकलौ-
किकचाक्षुषे व्यभिचारवारणाय लौकिकान्यत्वनिवेशः घटत्वप्रकारकतद्घटस्मरणजन्यघटा-
द्युपनीतभाने घटत्वप्रकारकचाक्षुषरूपकारणविरहाद्व्यभिचारवारणाय विशेष्यतायां मुख्यत्व
निवेशः मुख्यविशेष्यतात्वं च प्रकारतान्यविशेष्यतात्वं वहिरिन्द्रियजन्यज्ञाने उपनीतं विशेषणा
तयेव भासते मानसे त्वनियम इति नियमाद्विशेषणत्वेनैव घटादेर्भानान्न मुख्यविशेष्यत्वमि
ति कारणतावच्छेदककोटौ घटत्वादिप्रकारताकत्वनिवेशाच्च निर्विकल्पकोत्तरं सामान्यलक्ष-
णाजन्ययावद्घटग्राह्यत्वापत्तिः पुरोवर्त्तिनि दोषवशात्तत्त्वेनागृह्यमाणेन स्मरणप्रकारीभूतघ ६८

68A

टत्वेनयावद्घटचाक्षुषवारणाय चाक्षुषत्वनिवेशः समवायेन घटत्वप्रकारकज्ञानवत्त्वात्कालिका
दिसंबंधेन घटत्वाश्रययावत्तत्त्वापत्तिवारणाय संबंधविशेषोपि निवेशनीय इति प्राचीनमतनिष्क
र्षः नवीनमतं दर्शयितुं शंकते नन्विति तदाश्रय इति सामान्याश्रय इत्यर्थः साक्षात्कारः स्यादि
ति चाक्षुषसाक्षात्कारः स्यादित्यर्थः तेन मानससाक्षात्कारोदयेपि न क्षतिः नवीनमतमभिप्रेत्य सि
द्धांतयति यत्सामान्यमिति यदित्यस्य सामान्येनाभेदान्वयः तत्प्रकारकतदाश्रयेति मानससा
क्षात्कारसामग्रीसत्त्वात् लौकिकेति सामग्री च तत्तत्सन्निकर्षो लोकसंयोगादिरूपा सहकारि
त्वादिति बहिरिंद्रियजन्यज्ञाने सहकारित्वादित्यर्थः विमुद्रितनयनस्य चक्षुःसंयोगादिरूपसा
मग्रीसत्त्वाच्च प्रत्यक्षमिति नच धूलीपटले धूमभ्रमानंतरं धूमा इति ज्ञानं न स्यात् धूमत्वाश्रय
लौकिकप्रत्यक्षसामग्रीसत्त्वादिति वाच्यं तदाश्रयेत्यस्य तद्धर्मप्रकारतानिरूपितविशेष्यताश्रयेत्यर्था
त् धूमत्वप्रकारतानिरूपितविशेष्यताश्रये धूलीपटले लौकिकप्रत्यक्षसामग्रीसत्त्वेनादोषात्

त॰प्र॰ ननु प्राचीनमते तत्पुरुषीयधर्मत्वाश्रयविषयकालौकिकचाक्षुषत्वावच्छिन्नं प्रति तत्पुरुषीयच
६९ क्षुःसन्निकृष्टविशेष्यकतत्पुरुषीयचाक्षुषप्रकारीभूत धर्मत्वत्वेन हेतुतया तेनैव विमुद्रितनया
69 नस्यापि प्रत्यक्षतापत्तिवारणसंभवे गुरुतरसामग्र्याः सहकारित्वकल्पने गौरवमिति चेन्नैवं ग्रं
थनमसिसंयोगाभिनीसम्यात्तजनितद्रव्यविषयकचाक्षुषोत्तरमालोकसंयोगविगमे पिनादृशाकार
णासत्वात्सकलद्रव्यसाक्षात्कारधाराया आपत्तेः तादृशसामग्र्याः सहकारित्वकल्पनस्यावश्यक
त्वात् एवं च धर्मत्वाश्रयप्रत्यक्षे ज्ञानप्रकारीभूतधर्मत्वत्वेनैव हेतुत्वं न त्विंद्रियभेदेन पुरुषभे
देन वा कार्यकारणभाव इत्यपि लाघवम् अपि एवं च चक्षुःसन्निकृष्टपुरोवर्तिनि घटत्वस्य हप्रति
बंधकदोषसत्वे न घटत्वस्मरणवलाद्याबहुद्रव्यचाक्षुषापत्तिः न च तदाश्रयेत्यस्य तद्धर्मविशिष्टत्व
पीस्तथा च तद्धर्मविशिष्टलौकिकप्रत्यक्षसामग्र्याः सहकारित्वात्तद्धर्मांशेपि लौकिकप्रत्यक्षसा
मग्रीसहकारित्वलब्ध्या प्रकृते घटत्वांशे दोषाभावघटितसामग्र्यसत्वान्न घटत्वाश्रयपावच्छा ६९

69A

न्यक्षापत्तिरिति वाच्यं तथा सति धूलीपटले धूमभ्रमानंतरं धूमाऽनितिज्ञानानुदयापत्तेः धूमत्वेनै
लौकिकप्रत्यक्षसामग्र्यसत्वादिति चेन्न तत्र यावद्धूमचाक्षुषस्वीकारेऽप्यापत्तेरिति नव्यमतनिरा
वैः अत्र केचित् ज्ञानलक्षणाप्रत्यासत्त्यस्वीकारे सुरभिचंदनमित्यादौ सौरभत्वादिभानानिर्वाहात्
तत्स्वीकारमावश्यकं सौरभत्वसामान्यलक्षणया सौरभज्ञाननिर्वाहेपि सौरभत्ववृत्तिधर्मज्ञानाऽ
भावेन सौरभत्वभानस्य सामान्यलक्षणया निर्वाहासंभवात् अत एव दीधितिकृतः सुरभिचंदन।
मित्यादौ सौरभत्वादेरपि भानमित्याह तन्न न संगच्छते सौरभत्वप्रकारकसौरभविशेष्यकप्रत्य
क्षत्वावच्छिन्नं प्रति सौरभत्वप्रकारकज्ञानत्वेन सामान्यलक्षणप्रत्यासत्तेर्हेतुत्वोपगमेन सौरभत्व
वृत्तिधर्मज्ञानाभावेपि सौरभत्वज्ञानबलादेव सौरभत्वभानोपपत्तेरिति ज्ञानलक्षणप्रत्यासत्तिस्वी
कारो निरर्थकः अथ सामान्यलक्षणाप्रत्यासत्तेर्जननीयेतद्धर्मप्रकारतानिरूपितविशेष्यताशालिलौ
किकप्रत्यक्षसामग्र्याः सहकारित्वात्तां विना कथं सामान्यलक्षणया सुरभिचंदनमित्यादौ सौर
भस्य सौरभत्वस्य वा भानमिति ज्ञानलक्षणास्वीकार आवश्यक इति चेन्न सामान्यलक्षणयातत्

त॰ प्र॰ द्रव्यमीश्वरयमुख्यविशेष्यताशालिलौकिकप्रत्यक्षजननीयेन तत्राश्रयलौकिकप्रत्यक्षसामग्र्याः सहका
रित्वात् प्रकृते नेतरभावेऽपि सौरभविशेषणकालौकिकप्रत्यक्षजनने बाधकाभावादित्याहुः तन्न य
70 त्र सौरभत्वांशे उपनीतभानात्मकं सौरभत्वप्रकारकं चन्दनविशेष्यकं सौरभं चन्दनमिति भ्रमात्मकं ज्ञा
नं तत्र सौरभत्वज्ञाने सौरभत्वज्ञानरूपसामान्यलक्षणया न निर्वहति सौरभत्वप्रकारतानिरूपित
सौरभनिष्ठविशेष्यताशालिज्ञानत्वस्यैव सौरभत्वज्ञानरूपसामान्यलक्षणाप्रत्यासत्तेः कार्यतावच्छे
दकत्वात् तदुक्तं दीधितिकृता इदं च धर्मविषयकं ज्ञानं धर्मिणः प्रत्यासत्तिरितरत्तु यद्विषयकं ज्ञानं त
स्येति तथा चैवं दर्शनत्वस्य सौरभत्वानाश्रयत्वेन तत्र सौरभत्वज्ञानार्थं ज्ञानलक्षणास्वीकारस्यावश्य
कः न च तत्र दोषवलादेव सौरभत्वभानमिति वाच्यं प्रत्यक्षस्येन्द्रियसन्निकर्षजन्यत्वनियमेन सौ
रभत्वांशे सन्निकर्षस्यावश्यकत्वात् अत एव रजतत्वांशे लौकिकसन्निकर्षाभावादलौकिकसन्निक
र्षस्य चावश्यकत्वान्नान्यथाख्यातिः किं त्वगृहीतासंसर्गकग्रहणस्मरणात्मकं ज्ञानद्वयमि
ति प्राभाकरः तथा च तादृशनियमस्य सर्वसिद्धत्वात् सौरभत्वज्ञानार्थं ज्ञानलक्षणास्वीकार इति ७०

70A

ॐ ननु व्याप्तिज्ञानस्यानुमितिहेतुत्वसंभवेपि केवलव्याप्तिज्ञानकालेप्यनुमित्यापत्तिरित्याशंक
ते नत्विति ननु पक्षवृत्तिधर्मविशेष्यकं व्याप्तिज्ञानं कारणं तच्च पक्षवृत्तिधूमो वह्निव्याप्य इत्या
कारकं तत्सत्वे चानुमित्युत्पत्तौ न कस्यापि विवाद इत्याशंकते मचेति सर्वत्र धूम इति पक्षवृत्तित्वा
वगाहिज्ञानं कारणमिति तावद्दुर्वचं वह्निव्याप्यधूमवान्पर्वत इति ज्ञानादप्यनुमित्यनापत्ते तत्राधे
यतया भाने मानाभावात् किंतु वस्तुगत्या पक्षवृत्तित्वविषयकं तत्वं च धूमो वह्निव्याप्य इत्यत्रापि
धूमत्वेन पर्वतीयधूमविषयकत्वादस्तनमिति ततोनुमित्यापत्तिरिति भावः यत्तु दृष्टांते धू
मो वह्निव्याप्य इति ज्ञानाद्दृष्टांतेनुमित्यापत्तिरित्याशंकते नत्वितीति तन्नुच्छं दृष्टांते महानसा
दौ वह्निमत्ताज्ञानसत्वेन पक्षताविरहादेवानुमितेरनुदयात् अन्यथा सिद्धांतेप्यगतेः न हि व्याप्य
त्वरूपेण पक्षताविशिष्टहेतुमत्तानिश्चयः कारणमिति तदर्थः। तथासति पक्षतायाः परामर्शीकु
क्षिनिवेशापत्त्या कारणतावच्छेदकतापत्त्या कारणत्वानुपपत्तेः किंतु पक्षत्वं साध्याधिकरण

त॰प्र॰ ७१ त्वमेव तथाच व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं कारणमित्यर्थो लभ्यते तत्तु महानसादा
वपि संभवतीति पक्षताविरहात्तत्रानुमितिरित्यवोपेयमिति द्रष्टव्येनेति एकरूपावच्छिन्न
71. व्याप्तिपक्षधर्मतावगाहिज्ञानत्वेन हेतुत्वोक्तौ तु वह्निव्याप्यवानिति ज्ञानादनुमित्यनापत्तिरिति
भावः व्याप्यत्वप्रकारेणेति व्याप्तिविशिष्टवैशिष्ट्यावगाहिज्ञानं कारणमित्यर्थः नन्वेवं खण्डशो
व्यभिचारसहचारयोर्ग्रहवतो व्यभिचरितवह्निसहचरितं धूमवानिति ज्ञानात् एवं विशेष्यवि
शेषणे तत्रापि विशेषणांतरमिति न्यायेन वह्निव्याप्यधूमवानिति ज्ञानाच्चानुमित्यनुदयापत्ति
रिति चेन्न व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन लाघवात्कारणत्वे सिद्धे तेनानुमित्यभावेऽ
प्यापत्तेः लाघवं च व्याप्त्यंशे निश्चयत्वानिवेशेन अन्यथा वह्निव्याप्तिमान् वह्निव्याप्यभाववान्यो
धूमस्तद्वान्पर्वत इति व्याप्त्यंशे संशयात्मकज्ञानादनुमित्यापत्तेः व्याप्त्यंशे निश्चयात्मकतादृशज्ञा
नत्वेन कारणताया वाच्यत्वेन गौरवात् मन्मते च विशिष्टवैशिष्ट्यावगाहिबोधे विशेषणतावच्छेदक ७१

71A

प्रकारकनिश्चयत्वेन विशेषणतावच्छेदकाभावप्रकारकज्ञानाभावत्वेन कार्यकालवृत्तितया कारण
त्वेन व्याप्त्यंशे संशयात्मकतादशायां ज्ञाने विशिष्टवैशिष्ट्यविषयत्वाभावेनैवापत्त्यभावादिति दिक् व्या
प्तिविशिष्टवैशिष्ट्यावगाहित्वं च व्याप्त्यवच्छिन्नप्रकारतानिरूपितपक्षतानिष्ठविशेष्यताशालि
त्वमिति यावत् एवं च वह्निव्याप्यधूमः पर्वत इत्याधेयतासंसर्गकपर्वतप्रकारकज्ञानस्यापि संग्र
ह इति वाच्यं अप्रामाण्यज्ञानद्वयस्यानेककत्वानुरोधेन निश्चयत्वद्वयनिवेशानुरोधेन च तत्र योः
यगे वहे तु तायां ज्ञावच्छेदकत्वात् अन्यथैकविधपरामर्शसत्त्वेऽन्यविधाप्रामाण्यज्ञानसत्त्वेऽनुमित्य
नापत्तेः मिथोविशेष्यविशेषणभावे विनिगमनाविरहाच्च नानासंबंधावच्छिन्ननानाधर्मावच्छि
न्नावच्छेदकताया एकव्यासंभवेनावच्छेदकताया व्यासज्यवृत्तित्वासंभवात् नन्वेवं वह्निव्याप्यधू
मः पर्वत इति ज्ञानादनुमित्यनुदयापत्तिः तत्रोक्तविशिष्टवैशिष्ट्यानवगाहित्वाभावादिति चेन्न त
स्यापि स्वातंत्र्येणेहे तुत्वोपगमात् अव्यवहितोत्तरत्वनिवेशेन च परस्परजन्यानुमितौ न व्यभि
चारः वस्तुतस्त्वनुमितेः पक्षविशेष्यकत्वनियमेनाण्वरपि विशेष्याध्यवसायक इति न्यायेन

त॰प्र॰
७२
72

पत्तविशेष्यकपरामर्श एव हेतुर्न तु व्याप्यविशेष्यकोपीति ध्येयं उक्तातिप्रसंगं वारयति नचेत्
ति नचैवं वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञानादनुमित्यनुदयापत्तिरिति वाच्यं तदुत्तरपरामर्शो गी
कारेण तदुपपत्तेरिति भावः निरूप्यपदमिति निरूप्यत्वे च तदभावाप्रकारकत्वे सति तत्प्रकारकत्वे
तथा च धूमवत्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमाभावप्रकारताशून्यत्वे सति धूम[illegible]
त्पर्वतत्वावच्छिन्नविशेष्यतानिरूपितवह्निव्याप्यधूमप्रकारताशालिज्ञानत्वेन पर्वतोद्देश्यकव
ह्निविधेयकानुमितौ हेतुत्वं नीलपर्वतो वह्निव्याप्यधूमाभाववान् पर्वतो वह्निव्याप्यधूमवांश्चे
ति निर्णयसंग्रहाय प्रथमधूमवत्त्वनिवेशः नीलपर्वतो वह्निव्याप्यधूमवान्नवेति संशयवारणा
य द्वितीयधूमवत्त्वनिवेशः नीलपर्वतो वह्निव्याप्यधूमवानिति निरूप्यस्य च तादृशानुमितौ स्वातं
त्र्येण हेतुतया न ततोनुमित्यनुत्पत्तिः अथ पर्वतत्वसामानाधिकरण्येन धूमाभावावगाहि व
ह्निव्याप्यधूमवान्वह्निव्याप्यधूमाभाववांश्च पर्वत इति ज्ञानादनुमित्यनापत्तिरिति चेन्न धर्मि
तावच्छेदकसामानाधिकरण्येनोभयकोट्यवगाहिज्ञानं समुच्चयः अवच्छेदकावच्छेदेनान्यतर

72A

कोट्यवगाहिज्ञानं संशय इति नियमात् तथा च पर्वतत्ववह्निव्याप्यवज्ज्ञानस्य हेतुतायां पर्वतत्वव्या
पकत्वविशिष्टदेशिकविशेषणतासंबंधावच्छिन्नधूमाभावप्रकारताशून्यत्वनिवेशः पर्वतत्वा
वच्छेदेन वह्निव्याप्यवज्ज्ञानस्य हेतुतायां च शुद्धदेशिकविशेषणतासंबंधावच्छिन्नधूमाभाव
प्रकारताशून्यत्वनिवेश इति ननु अनुमितिं प्रति परामर्शत्वेन हेतुत्वे कारणत्वघटकानन्यथासिद्धत्वनि
यतपूर्ववृत्तित्वरूपधर्मद्वयविशिष्टपरामर्शत्वावच्छेदेन कल्पनीयं वह्निव्याप्यो धूमो धूमवान् पर्व
त इति ज्ञानद्वयस्यानुमितिहेतुत्वे तु परामर्शहेतुत्वेन क्लृप्तनियतपूर्ववृत्तिताकस्यैवानन्यथासिद्ध
त्वमात्रं कल्प्यते तथा च विशिष्टपरामर्शत्वेन हेतुत्वमसंभवदुक्तिकमिति मिश्रकृष्टमीमांसकम
तं दर्शयति मीमांसकास्त्विति व्याप्यतावच्छेदकेति व्याप्यतावच्छेदकत्वेन दृष्टप्रसिद्धो यो धर्मस्त
त्प्रकारकपक्षधर्मताज्ञानमित्यर्थः अनेनैवानुपदं तद्रूपेण व्याप्तिग्रहादित्यवक्ष्यति यथाश्रुते
व्याप्यांशे भ्रमात्मकज्ञानादनुमित्यनुदयापत्तेः तत्र वस्तुगत्या व्याप्यतावच्छेदकत्वाभावात् व्या

त·प्र·
७३
73

प्तिज्ञाने व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञाने सहकारि तादृशव्याप्तिज्ञानेनानुमितेर्जननीयात्
यां सहकारि धूमो वह्निव्याप्य इत्यंपर्वतवृत्तीति ज्ञानादनुमित्यापत्तिं वारयति व्याप्यतावच्छेदक
मिति व्याप्यतावच्छेदकतया गृहीतमित्यर्थः स्वमते लाघवं दर्शयति एवं चेति ज्ञानद्वयादपीत्य
पिना वह्निव्याप्यधूमवान्पर्वत इति ज्ञानसंग्रहः तथा च नैयायिकमते ज्ञानद्वयात्परामर्शकल्पपि
त्वाऽनुमितिस्वीकारे गौरवमिति भावः लाघवादिति विशिष्टनिष्ठ्यत्वरूपलघ्वेकधर्मावच्छेदेना
न्यथासिद्धत्वमियत्पूर्ववृत्तित्वकल्पनाया गुरुधर्मद्वयावच्छेदेनान्यथासिद्धत्वकल्पनापेक्षया लघु
त्वादित्यर्थः ननु कारणतावच्छेदकलाघवसंभवेपि यत्र धूमो वह्निव्याप्यो धूमवान्पर्वत इति ज्ञानं
ततोऽनुमितिस्तत्र भवता विशिष्टपरामर्शकल्पयित्वानुमितिकल्पने तज्ज्ञानत्तद्धूमादिगौरवं द्वार
णाघपलापश्चेत्यत आह किं चेति वह्निव्याप्यतावच्छेदकधूमत्वादीनां तत्राभानादित्यर्थः तथा
च लाघवाद्विशिष्टवैशिष्ट्यावगाहिज्ञानत्वरूपलघ्वेकधर्मावच्छेदेन कारणत्वे सिद्धे यत्र तादृशज्ञा ७३

73A

न द्रव्यं तत्राप्यनन्तरविशिष्टपरामर्शं कल्पयित्वानुमितिस्वीकारः लाघवानुरोधेन तृणाद्यपलापस्या
पि न्याय्यत्वात् फलमुखगौरवस्यादोषत्वात् मीमांसकमते तु व्याप्यत्वांशेऽभिन्नांशे तदवच्छेदकाद्वह्निव्याप्य
वान्निति विशिष्टपरामर्शात्सर्वथैवानुमितेरपलाप इति वस्तुतस्तु व्याप्यतावच्छेदकप्रकारकव्याप्तिज्ञा
नव्याप्यतावच्छेदकप्रकारकपक्षधर्मताज्ञानयोर्हेतुत्वेपि वह्निव्याप्यो धूम आलोकवान्पर्वत इति ज्ञानाद
नुमित्यापत्तिः आलोकत्वस्य वस्तुगत्या व्याप्यतानवच्छेदकत्वात् व्याप्यतावच्छेदकत्वेन गृह्यमाणधर्म
प्रकारकपक्षधर्मताज्ञानत्वेन हेतुत्वेपि तथा आलोकत्वस्यापि कदाचिद्व्याप्यतावच्छेदकत्वेन ग्रहात्
तत्कालीनतत्पुरुषीयव्याप्यतावच्छेदकप्रकारकग्रहविषयधर्मेण युक्तौ तत्कालीनतत्पुरुषीयत्वनि
वेशे गौरवात् एतेन गृह्यमाणव्याप्यतावच्छेदकताकधर्मप्रकारकपक्षधर्मताज्ञानत्वेन पक्षधर्मि
ताग्रह प्रकारीभवद्धर्मावच्छिन्नविशेष्यकव्याप्तिज्ञानत्वेन वा एकधर्मेण मयापि कारणत्वं कल्प
नमिति परास्तम् कालादिप्रवेशेन गौरवात् इति धूमत्वप्रकारकपक्षधर्मताज्ञानत्वे न हेतुत्वं वाच्यं त

त॰प्र॰
१४
74

यत्र वह्निव्याप्यो धूमो धूमवान्पर्वत इति ज्ञानद्वयस्य न तावत्पर्वतोद्देश्यकवह्निविधेयकानुमिति
सामान्ये नियतपूर्ववर्त्तित्वं लक्षणं वह्निव्याप्यालोकवान्पर्वत इति परामर्शजन्यतादृशानुमितौ तयोर
भावात् किन्त्वनुमितिविशेषे तथात्वं ननु विशिष्टपरामर्शस्यापि वह्निव्याप्यवानिति शाब्दपरामर्शज
न्यानुमितावसत्त्वेऽपि किं लाघवमेतन्मत इति न जानीमह इति रिक्तं ननु व्यभिचारज्ञानकालेऽपि नि
र्द्धर्मितावच्छेदकव्याप्यवत्तापरामर्शसम्भवेनानुमित्यापत्तेर्व्यभिचारस्य हेत्वाभासत्वानुपपत्त्या हेतुता
वच्छेदकमनिवेश्य निश्चयत्वनिर्वचनानुपपत्त्या व्याप्तेर्निर्वक्तुमशक्यत्वात् यावद्धेतुतावच्छेदकगर्भव्या
प्यवत्तापरामर्श एव हेतुर्वाच्यस्तथा च व्याप्यवानिति शाब्दपरामर्शस्थले कथमनुमितिरित्यस्वरसादन
न्याह तस्मादिति वह्निव्याप्यवानित्येवंरूपादिति वह्निव्याप्यधूमवानित्येवंरूपादित्यर्थः प्रसिद्धत्वादेवे
त्यवकारेण मीमांसकाभिमतज्ञानद्वयस्य व्यवच्छेदः व्याप्त्यंशे संशयात्पक्षधर्मतांशे संशयाद्वानु
मित्यापत्तिवारणाय व्याप्त्यंशे निश्चयत्वं पक्षधर्मतांशे निश्चयत्वं निवेशनीयं नैयायिकमते च व्याप्त्यंशे १४

74A

निश्चयत्वमनिवेश्य व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वेन हेतुत्वमुपेयते व्याप्त्यंशे संशयात्म
कज्ञानेन च विशिष्टवैशिष्ट्यविषयकत्वाभावेनैवापत्त्यभावादिति पूर्वमेवावेदितत्वात् एवं धर्मद्वयाव
च्छेदेन हेतुत्वकल्पनात् एकधर्मावच्छेदेनैव तत्कल्पनमित्यास्तां विस्तरः तृतीयत्वमिति अनुमिति
कारणीभूतलिंगपरामर्शस्य तृतीयत्वं कथमित्यर्थः प्रथममिति दृष्टान्ते यद्धूमदर्शनं तत्प्रथममि
त्यर्थः ततइति पर्वते धूमदर्शनानन्तरं धूमो वह्निव्याप्य इति स्मरणात्मकं व्याप्तिज्ञानं द्वितीयमित्य
र्थः तद्विशिष्टेति व्याप्तिविशिष्टेत्यर्थः स्मृतायां व्याप्तौ वह्निव्याप्यधूमवान्पर्वत इति ज्ञानमेव तृती
यमिति भावः केचित्तु दृष्टान्ते धूमदर्शनं प्रथममित्यर्थः व्याप्तिज्ञानं दृष्टान्तीयधूमस्य व्याप्तिमत्तया
ज्ञानं द्वितीयमित्यर्थः तद्विशिष्टेति दृष्टान्ते प्रागनुभूतव्याप्तिविशिष्टस्य हेतोः पक्षवृत्तित्वावगाहि
ज्ञानं तृतीयमित्यर्थ इति व्याचक्रुः गौरवादिति लिंगपरामर्शत्वापेक्षया तृतीयलिंगपरामर्शत्वेन हे
तुत्वे गौरवादित्यर्थः ननु प्रामाणिकं गौरवं न दोषायेत्यत आह व्यभिचाराच्चेति महान
सादौ सिद्धिसत्वेपि सिसाधयिषाधीनानुमित्युत्पत्त्या तृतीयलिंगपरामर्शाभावेन व्यभिचारा

न॰म॰ ७५ दित्यर्थः फलायोगव्यवच्छिन्नत्वरूपकारणत्वरूपकरणत्वमभिप्रेत्य परामर्श एवानुमानमिति के
चित् एवं लिंगपरामर्शस्यानुमितिहेतुत्वे लिंगस्यापि तत्त्वं विशिष्टे कारणतावच्छेदकं प्रमाणमस
75 ति बाधके विशेषणस्यापि कारणत्वग्रहणात् इति न्यायेन विशेषणीभूतलिंगस्यापि कारणत्वग्रहाद्
दंडत्वादेरपि कारणत्वापत्त्या सत्यं न विशेषः तत्रान्यथासिद्धेरेव बाधकत्वात् एवं विनिगमनाविरहेण
पि लिंगस्यानुमितिकरणत्वमित्याम नं स्याचार्यास्तु उभयमतं निराकर्तुं स्वमतमाह सोयमिति व्या
पाराभावादिति फलायोगव्यवच्छिन्नकारणत्वस्य व्यापारवत्साधारणकारणत्वापेक्षया गुरुत्वेन
नहेयत्वादिति भावः यथा चैतत्तथा प्रत्यक्षपरिच्छेदे विवेचितं ननु यत्र परामर्शानंतरं सिद्धिनाशस्त
तोनुमितिस्तत्र योग्यविभुविशेषगुणनाशत्वावच्छिन्नं प्रति स्वोत्तरोत्पन्नगुणत्वेन हेतुतया परामर्श
स्यापि सिद्धिनाशरूपव्यापारवत्त्वात् कारणत्वसंभवत्येवेति चेन्न यज्ज्ञानपदं विषयस्य यज्ज्ञानक
त्वं तस्यैव तद्व्यापारत्वमिति नियमेन तज्ज्ञातीयेऽन्यत्र तथास्वासंभवेन तस्यानुमानत्वाङ्गीकारस्यासं
भवित्वादिति नापीति अनुमितेः करणमित्यनुषज्यते परामर्शव्यापारकमित्यनेन करणलक्ष ७५

णसंबंधस्थितं भवतीति ॥ अतीतानागतधूमविषयकोयत्रमानसोवह्निव्याप्यवत्तापरामर्शस्तत्रानुमि-
त्यनुदयापत्तेरित्यर्थः ॥ नचतत्र तत्प्रागभावादीनामेव लिंगत्वमास्तामितिवाच्यं तेषांतत्राप्याप्यत्वेनापरा
मृश्यमाणत्वादितिभावः ॥ नचातीतलिंगस्थलेनुमितेः एवंतस्यसत्वेनहेतुत्वमस्त्वतआह ॥ अनन्य
थेति ॥ अनुमित्यव्यवहितपूर्वक्षणावच्छेदेनतत्सत्वमितिभावः ॥ ननुकारणत्वंकार्याव्यवहितपूर्वक्षणा
वच्छेदेनकारणतावच्छेदकसंबंधावच्छिन्नकार्याधिकरणवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्वं
तच्चातीतानागतधूमस्यस्थलेनुमित्यव्यवहितपूर्वंधूमासत्वेपि नतत्संबंधावच्छिन्नप्रतियोगिताकाभा
वस्यासंभवाद्दत्तमेव ॥ तथाहि नतावत्ताधूमाभावोध्वंसप्रागभावौभवतस्तयोः संबंधावच्छिन्नप्र
तियोगिताकत्वेसामान्यधर्मावच्छिन्नप्रतियोगिताकत्वेचमानाभावेनतथात्वासंभवात् ॥ तत्वेप्र
माणसत्वेचएकविशेषवतिसामान्यधर्मावच्छिन्नप्रतियोगिताकध्वंसप्रागभावयोरनभ्युपगमा
त् ॥ धूमाधिकरणेनयोस्तथात्वासंभवात् ॥ नाप्यत्यंताभावः ॥ प्रतियोगिवद्ध्वंसप्रागभावयोरत्यंता
भावविरोधित्वादितिचेन्न ॥ तयोर्विरोधित्वेमानाभावात् ॥ अन्यथांतराप्ययामघटेरक्तरूपंनास्तीतिप्र

तीत्यनुपपत्तेः तस्याध्वंसादिविषयकत्वेभ्र तभाविरक्तवतिरक्तघटवतिरक्तघटेऽपि तदापत्तेरिति
एकत्र ध्वंसप्रतियोगित्वाभावयोर्विरोधमानाभावेऽन्यत्रापि तयोस्तत्सामानाधिकरण्येवाधका
भावः इत्थं चातीतभाविधूमवत्यपि धूमो नास्तीति प्रतीत्या धूमात्यन्ताभावसत्वेनानुमितिस्वरूप
कार्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकधर्मवत्त्वस्वरूपकारणत्वासंभवात् न ज्ञाप्यं
मानं लिंगमनुमापकमिति दिक् ननु धूमवति धूमात्यन्ताभावसत्वे व्याप्यवृत्तिक्रियादीनां
संयोगादिकं प्रति हेतुत्वोपपत्तये कारणतालक्षणे कार्याधिकरणवृत्त्यभावेऽत्यन्ताभावे प्र
तियोगिवैयधिकरण्यं वह्निमत्त्ववा हेतुमत्ताग्रहविरोधितानियामकसंबंधेनावश्यं विवक्षणीयं
एवं च धूमाधिकरणे धूमात्यन्ताभावसत्वेऽपि तस्य प्रतियोगिवैयधिकरण्याभावात् धूमवत्ता
ग्रहविरोधितानियामकसंबंधेन वह्निमत्त्वाभावाच्च न नाद्यशंका किंत्वन्य एव नाद्यशोभावर
स्तत्प्रतियोगितानवच्छेदकत्वं धूमत्वे तुल्यमेव न च धूमानधिकरणकालावच्छेदेन धूमाभावे
ऽपि प्रतियोगिव्यधिकरण एवेति वाच्यं प्रतियोगिव्यधिकरणत्वं हि न प्रतियोग्यधिकरणवृत्ति

76A

त्वं सामानाधिकरण्यस्य व्याप्यवृत्तित्वमानाभावात् किंतु प्रतियोग्यनधिकरणवृत्तित्वं अन्यो
न्याभावस्य व्याप्यवृत्तितया प्रतियोग्यधिकरणे न प्रतियोग्यनधिकरणत्वसंभवः अन्यथा
ऽव्याप्यवृत्त्यसंग्रहेनादव्याप्यादिति धूमाभावस्य प्रतियोग्यधिकरणत्वाभावात् नचैवं रा
सभसंयोगादीनामपि घटकारणतापत्तिस्तद्वृत्तेरीत्यान्यस्यापि प्रतियोग्यवैयधिकरण्याभावा
दिति वाच्यं अनन्यथासिद्धपदेनैव निराकरणात् नच रासभादीनामपि तेनैव वारणे कारणता
लक्षणे नियतपूर्ववैयर्थ्यमिति वाच्यं स्वरूपमेव तद्विभावय नच रासभसंयोगादिवल्लिङ्गस्या
प्यन्यथासिद्धत्वमिति वाच्यम् अन्यथासिद्धेरेकस्यानिर्वक्तुमशक्यतया तत्तद्व्यक्तिभेदकूटस्यै
व निवेशनीयतया गौरवेण धूमव्यक्तिभेदानिवेशात् विशिष्टकारणताग्राहकप्रमाणम
सति बाधके विशेषणस्यापि कारणत्वं गमयतीति नियमस्य साधकस्य सत्वाच्च अन्यथेन्द्रिय
संयोगादीनां हेतुत्वे इन्द्रियस्यापि हेतुत्वानुपपत्तेः एवं विषयितया लिङ्गविशिष्टं सामं कारणं
ज्ञानविशिष्टं लिंगं वेत्यत्र विनिगमनाविरहोपि तद्धेतुत्वसाधकः ननु परामर्शप्रमाणलिं

न·प्र· गस्यानुमितिसामान्येन हेतुत्वं धूलिपटलादपि भ्रमानुमित्युदयेन तत्र लिंगाभावात् न च प्रमा-
११ नुमितौ तद्धेतुत्वं अनुमितिसामान्ये तु परामर्श एव हेतुरिति वाच्यं यत्सामान्ये यत्सामान्यं प्रयोजकं तद्वि-
77 शेषे तद्विशेषस्यैवासति बाधके प्रयोजकत्वात् परामर्शप्रमात्वस्यैवानुमितिप्रमात्वप्रयोजकत्वौ-
चित्यादिति चेन्न लिंगत्वेन तावद्व्याप्तिपक्षधर्मतावत्त्वेन धूलिपटले तत्त्वस्यादिति किन्तु तद्धेतुत्व-
नस्य च तत्राप्यक्षतत्वादिति न किंचिदेतदिति वाच्यम् अतमखण्डितमेवेति चेन्नैवं कार्याधिकरण-
वृत्तियत्प्रतियोग्यधिकरणतानवच्छेदककार्यत्व वह्नित्वरूपस्य एवावच्छेदेन कार्याधिकर-
णवृत्त्यभावप्रतियोगितानवच्छेदकधर्मवत्त्वे सति कार्याधिकरणे सत्त्वस्यैव कारणत्वपदार्थत्वा-
त् नस्य चात्रातीतलिंगेऽसत्त्वादिति दिक् नवीनास्तु नहि वयं लिंगज्ञानत्वेन कारणतां ब्रूमो येनोक्त-
नियमाविरूपेण विनिगमनाविरहो वा भवेत् किं तु ज्ञानत्वेनैवेति न लिंगस्य हेतुत्वं व्याप्तिप्रकारक-
पक्षधर्मताज्ञानरूपपरामर्शात्मकविशेषसामग्रीविरहाच्च न यत्किंचिज्ज्ञानादनुमित्यापत्ति-
रिति प्राहुः ननु यत्र विशिष्य विशेषणमिति न्यायेन परामर्शादनुमितिस्तत्र व्याप्तिज्ञानस्य परा ११

77A

मर्शद्वाराकरणत्वासंभव इत्यत आह साध्यज्ञानं चेति ननु साध्यत्वं सिद्धिकर्मत्वादिरूपं तथा गुरु
तरमत आह लिंगज्ञानं चेति लिंगनिवेशेपि गौरवादाह जन्यज्ञाने इति जन्यपदं नित्यस्य स्वरूपयोग्य
त्वे फलावश्यंभाव इति नियममभिप्रेत्य तदनंगीकारे तु नोपादेयमेवेतत् अतिप्रसंगादिति परामर्श
शून्यकालीनघटज्ञानादनुमितिप्रसंग इत्यर्थः व्यापारेण परामर्शरूपव्यापारेण तद्विरासा
त् अतिप्रसंगनिरासात् न चैवं घटज्ञाने पर्वतो वह्निमानित्यनुमितिजनकत्वव्यवहारापत्तिः इ
ष्टत्वात् कार्यत्वेन ज्ञानत्वेन कार्यकारणभावात् भवन्मतेपि जनकत्वव्यवहारस्यांगीकृतत्वा
त् नन्वनुमितित्वावच्छिन्नजनकत्वव्यवहारो नानुभूयते इति चेत् तावतान्यभावादिति नन्वे
तावता परामर्शस्य व्यापारद्वाराज्ञानमनुमितिकरणमिति करणमिति सिद्धं तथाच यत्र वह्निव्या
प्यधूमवानिति स्मरणात्मकः परामर्शस्तत्रानुमितिर्न स्यात् परामर्शव्यापारकस्य ज्ञानस्य तत्राभा
वादित्यत आह ज्ञानपदमिति सविषयकेति तथा च सविषयकत्वेनैवानुमितिकरणत्वेन सं
स्कारस्यैव स्मरणात्मकपरामर्शद्वाराकरणत्वसंभवान्नानुपपत्तिरिति भावः ननु सविषयकत्वे

स्वज्ञानत्वापेक्षया गुरुत्वेन ज्ञातत्वमेव तज्ज्ञानकतावच्छेदकं न चोक्तानुपपत्तिस्तत्रापि स्वजन्यसं
स्कारजन्यस्मरणरूपपरामर्शस्यैव व्यापारत्वसंभवादित्यभिप्रेत्याह पूर्वानुभवाणेवेति इयता प्रबं
धेनानुमानस्वरूपं निरूप्य तद्विभागमाह तच्चेति अनुमानं अनुमितिकरणं ननु केवलान्वयि
त्वमत्यंताभावाप्रतियोगित्वं इत्थं च इदं वाच्यं ज्ञेयत्वादित्यत्रोपपन्नावपि इदं वाच्यं घटत्वादित्यादा
विकेवलान्वयित्वप्रसंग इत्यतः पारिभाषिकं केवलान्वयिपदार्थमाह तत्रेति तेषु मध्ये इत्यर्थः केवला
न्वयि साध्यकेति केवलान्वयि साध्यविधेयकानुमितिजनकत्वं तत्वमित्यर्थः इत्थं च इदं वाच्यं
घटत्वादित्यत्रापि केवलान्वयिवाच्यत्वरूपसाध्यकत्वान्नासंग्रह इति भावः साध्यविशेषणीभू
तकेवलान्वयित्वं निर्वक्ति तत्त्वं च इति अत्यंताभावाप्रतियोगित्वं केवलान्वयित्वमित्यर्थः नन्वेवमा
काशाभावादीनां केवलान्वयित्वानुपपत्तिराकाशरूपाभावप्रतियोगित्वादिति चेन्न वृत्तिमदत्यंता
भावाप्रतियोगित्वस्य विवक्षितत्वात् आकाशस्य वृत्तिमदभावइति न दोषः केचित्तु घटाभावो
नास्तीति प्रतीत्या घटाभावाभावसिद्धावप्याकाशाभावो नास्तीति प्रतीतेरभावादाकाशाभावा

78A

भावेमानाभावः प्रतियोगित्वं च स्वरूपसंबंधविशेष एव न त्वभावविरहात्मत्वमिति नाकाशेऽा
काशाभावप्रतियोगित्वानुपपत्तिः एवं च वृत्तिमत्त्वविशेषणानुपादानेपि न क्षतिरित्याहुः वस्तु
तस्तु यन्निष्ठाभावप्रतियोगित्वमेव तत्त्वं संयोगाभावादीनां केवलान्वयित्वोपपत्तये प्रतियोगि
वैयधिकरण्यमप्यत्र निवेशनीयं प्रतियोगिवैयधिकरण्यं चात्र प्रतियोग्यनधिकरणवृत्तित्वं न तु
प्रतियोग्यधिकरणावृत्तित्वं तथा सत्यधिकरणभेदेनाभावभेदाभावात् संयोगाभावस्य संयोगाधिकर
णावृत्तित्वाभावेन तादृशाभावांतराप्रतियोगित्वात् संयोगस्यापि केवलान्वयित्वापत्तेः तथा विवक्षि
ते तु संयोगानधिकरणवृत्तित्वविशिष्टसंयोगाभावाप्रतियोगित्वाभावान्नोक्तापत्तिः इत्थं चाकाश
रूपाभावस्य निरुक्तप्रतियोगिवैयधिकरण्याभावेनैवाकाशाभावस्य केवलान्वयित्वोपपत्तिः वृत्तिमत्त्वं म ४
न्यंताभावेन देयं न चैवमप्याकाशाभावस्य प्रतियोगिवैयधिकरण्याप्रसिद्ध्या तादृशाभावांतराप्रतियो
गित्वाकाशेऽतिव्याप्तिरिति वाच्यं यादृशप्रतियोगितावच्छेदकसंबंधसामान्ये यत्प्रतियोगिप्रतियो
गिकत्व यादृशाभावाधिकरणानुयोगिकत्वोभयाभावस्तादृशप्रतियोगितासामान्यत्वस्य विवक्षितत्वात्

त॰मू॰ ७९ त्वात् तस्य चाकाशाभावस्साधारणत्वात् वृत्तिनियामकसंयोगादिरूपव्यधिकरणसंबंधावच्छिन्नप्र
तियोगिताकएवाकाशाभावः केवलान्वयी तथाच वृत्तिनियामकसंबंधे आकाशप्रतियोगिकत्वाभा
79 वेनोभयाभावसत्वात्प्रतियोगिव्यधिकरणएवेति नातिव्याप्तिः इत्थंच वृत्तिमत्वमत्यंताभावेनदेय
मेव आकाशस्य निरुक्तप्रतियोगिवैयधिकरण्याभावेनैवाकाशाभावस्य केवलान्वयित्वापपत्तेरि
ति अन्योन्याभावप्रतियोगितानवच्छेदकत्वेसतिवृत्तिमत्वंवाततत्वमित्यादिकं तत्स्वयंदर्शयति
यथेति नन्वभिधाविषयत्वमभिधेयत्वं अभिधाचास्मात्पदादयमर्थो बोद्धव्य इत्याकारिकेच्छा सा
चास्माकीनेव तथाचास्माकीनयावज्ज्ञाद्यशेच्छाविषयत्वंवा यत्किंचिज्ज्ञाद्यशेच्छाविषयत्वंवानत्वं
तत्रनाद्यः यावदिच्छाविषयत्वस्यक्वाप्यसत्वात् नापरः अस्मदीययत्किंचिदिच्छाविषयत्वस्यस
वत्रासत्वादित्यत आह अभिधेयत्वमिति भगवदिच्छायाः सर्वविषयकत्वेन तद्विषयत्वस्यसर्वत्र
सत्वादिति भावः एतदेवोपपादयति तच्चेति ताद्यशाशक्तिविषयत्वंचेत्यर्थः अभिधेयत्वस्यता
द्यशेच्छारूपशब्दशक्तिरूपत्वे विषयतासंबंधस्यवृत्त्यनियामकत्वेन इहाभिधेयत्वमित्यभिधे ७९

79A

यत्वावगाहिप्रतीत्यनुपपत्तेस्त्वाह घटत्वेति विषयत्वस्वरूपत्वमेव तत्स्याभिहितमिति ध्येयं ननु सामान्य
तत्त्वदजन्यत्वप्रकारकतद्बोधविशेष्यकेच्छाविषयत्वं एकोधर्मो नास्त्येव सर्वसाधारणस्य तत्त्वस्या
भावात् किंतु विशिष्यघटपदजन्यत्वप्रकारकबोधविशेष्यकेच्छाविषयत्वादिकमेव तत्त्वं तच्च
प्रत्येकं नकेवलान्वयीत्यतस्त्वाह वस्तुपदेति तथा च वस्तुपदजन्यत्वप्रकारकवस्तुबोधविशेष्य
केच्छाविषयत्वं सर्वसाधारणं संभवत्येवेति नोक्तापत्तिरित्यर्थः भगवज्ज्ञानविषयत्वादिति प्र
मेयत्वादिसामान्यलक्षणाप्रत्यासत्तिजन्यास्मदादिज्ञानविषयत्वस्यापि केवलान्वयित्वमित्यपि
बोध्यं अनुमितिं प्रति साध्यसंदेहरूपपक्षतायाः कारणतया केवलान्वयिसाध्यकस्थले संदेहाभा
वेनानुमितिसामग्र्यभावान्नेदमनुमानमिति मीमांसकमतं दर्शयति अत्र केचिदिति पक्षता
याहेतुत्वे युक्तिमाह यत्रेति साध्यवत्त्वेनेति संदिग्धसाध्यवत्त्वं पक्षत्वमिति प्राचीनलक्षणस्य
यदि संदेहविषयीभूतसाध्यवत्त्वमर्थस्तदानीतानागतसाध्यकेऽनुमितेरुच्छेद इति साध्यप्र
कारकसंदेहविषयत्वमेव पक्षत्वमिति भावः अतः कथमिति तथा च नपूर्वोक्तो विभाग इति २

त॰ प्र॰
८
80

भावः सिसाधयिषेति अत्र साध्यनिश्चयस्य सिसाधयिषाविरहेण वैशिष्ट्यमेककालावच्छेदे
नैकात्मवृत्तित्वं अतो न विभिन्नकालीनपुरुषांतरीयसिसाधयिषाविरहसत्त्वेपि सिसाधयिषा॰
धीनानुमित्यनुपपत्तिः केवलान्वयिनि पक्षतामुपपादयति साध्येति इहापि केवलान्वयिसा
ध्यकस्थलेपि संशय इति अनंतरं पक्षतेति शेषः संशयं विनेति घनगर्जितेन मेघानुमान॰
स्थल इत्यादि यत्र च संशयोस्ति तत्रापि लिंगदर्शनव्याप्तिस्मरणादिना तन्नाशान्नतस्यानुमि॰
त्यव्यवहितपूर्वक्षणवृत्तित्वमिति भावः ननु साध्यनिश्चयेऽनुमित्यनुत्पत्त्या साध्यनिश्चयाभाव
स्यैव पक्षतात्वमस्तु कृतं विशिष्टांतेनेत्यत आह साध्येति विशिष्टांतमिति सिसाधयिषाविरह
विशिष्टंसाध्यनिश्चये विशेषणमित्यर्थः विवक्षितेन तु न दोष इत्याह तत्रेति विशेषणाभावप्रयु
क्तो विशिष्टाभावस्तत्राप्यक्षतेति भावः सिसाधयिषाविरहाभावस्य सिसाधयिषाया एव पक्षता
त्वे सिसाधयिषाशून्यकालेऽसति च साध्यनिश्चयेनुमित्यनुत्पत्त्या विशेष्यनिवेशेन विशिष्टा
भावस्यैव पक्षतात्वमवधेयं ननु पर्वतोद्देश्यकवह्निविधेयकानुमितिं प्रति सिसाधयिषाविर ८॰

80A

ह्रविशिष्टवह्निप्रकारकपर्वतविशेष्यकनिश्चयत्वावच्छिन्नाभावरूपपक्षतायाहेतुत्वेपाषाणमयोवह्नि
मान्पर्वतस्तेजस्वीत्यादिप्रकारकपर्वतविशेष्यकनिश्चयसत्वेपर्वतोवह्निमानित्यनुमित्यनुमित्यनुपप
त्तिः एवंपर्वतोवह्निमानितिसिद्धिसत्वेद्रव्यंवह्निमत्पर्वतोद्रव्यंवानित्यनुमित्यनुदयापत्तिरित्यत
आह संक्षेपइति तथाचपर्वतत्वावच्छिन्नोद्देश्यतानिरूपितवह्नित्वावच्छिन्नविधेयताशालिसंयो
गसंसर्गकानुमितिंप्रतिपर्वतोद्देश्यकवह्निविधेयकानुमितिगोचरेच्छाविरहविशिष्टपर्वतत्वा
वच्छिन्नविशेष्यतानिरूपितवह्नित्वावच्छिन्न[illegible]
ताशालिनिश्चयत्वावच्छिन्नाभावत्वेनहेतुत्वान्नोक्तानुपपत्तिरितिभावः अत्रचयत्रानुमितीच्छास
त्वेपर्वतोवह्निमानित्यनुमितिवारणायपर्वतोद्देश्यकवह्निविधेयकानुमितिगोचरेच्छात्वेनेच्छायानि
वेशः अनुमितिर्जायतामित्याद्यननुगतेच्छानांनतद्व्यक्तित्वेन पर्वतेवह्निमनुमिनुयामित्याद्यनु
गतेच्छानांतुपर्वतोद्देश्यकत्वप्रकारतानिरूपितवह्निविधेयकत्वप्रकारताकानुमितिगोचरे
च्छात्वेनोत्तेजकत्वंबोध्यं ननुसर्वसाधारणपर्वतोद्देश्यकवह्निविधेयकानुमितिगोचरेच्छात्वेन

तथा सति घटानुमितिसामग्रीसत्त्वे पर्वतो वह्निमानिति सिद्धिसत्त्वेऽनुमितिर्जायतामितीच्छासत्त्वे
ऽनुमित्यनुमित्यापत्तेः सिद्धिप्रतिबन्धीभूतघटानुमितिं प्रत्यपीच्छाया विषयसिद्ध्याद्यापत्तेर
योगात् तासामिच्छादीनां तत्तद्व्यक्तित्वेनोत्तेजकत्वे तत्तदनुमितिसामग्रीसमव[illegible]न कालीनानामेव
तथाविधेच्छानामुत्तेजकतया घटानुमितिसामग्रीकालीनायास्तस्या अनुत्तेजकत्वात् अनुगते
च्छानां बाधकाभावात् सर्वासामनुगतरूपेणोत्तेजकत्वमिति ननु धूमपरामर्शसत्त्वे पर्वतो वह्निमा
निति सिद्धिसत्त्वे सत्यां चालोकेन वह्निमनुमिनुयामितीच्छायां पर्वतो वह्निमानित्यनुमित्यापत्ति
रिति चेन्न धूमलिंगकानुमितिं प्रति धूमलिंगकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावत्वेन हेतु
त्वात् एवमालोकादिस्थलेपि तदुक्तं दीधितिकारेण लिंगविशेषेणापि च नियन्त्रितं पक्षत्वमिति
अथ वह्निव्याप्यधूमवान् वह्निव्याप्यालोकवांश्च पर्वत इति समूहालम्बनात्मकपरामर्शकाले सिद्धिसत्
त्वे आलोकेन वह्निमनुमिनुयामितीच्छाकाले आलोकलिङ्गकानुमित्युत्पद्यतां तस्याश्च धूमपरामर्श
जन्यत्वेन धूमलिङ्गकत्वात् पूर्वं धूमलिङ्गकत्वप्रकारकेच्छाविरहविशिष्टसिद्ध्यभावरूपकारणा

81A

भावाद्व्यभिचार इति आलोकपरामर्शविशिष्टालोकलिङ्गकेच्छायामपि नत्वोत्तेजकत्वमाव-
श्यकं एवं रूपलिंगकपरामर्शविशिष्टरूपलिंगकेच्छायामपि एवं च धूमलिङ्गकेच्छायामपि
पि धूमपरामर्शविशिष्टायाः एव लाघवेनोत्तेजकत्वे नैकैवानुमितिपक्षतयोः कार्यकारणभा-
व इति लिङ्गभेदेन पक्षतानां याः कारणत्वे मानाभाव इति चेन्न स्वाव्यवहितोत्तरक्षणोत्पत्तिकत्वसं-
बंधेन धूमलिंगकेच्छाविरहविशिष्टसिद्धिविशिष्टपक्षे स्यानुमितिं प्रति धूमलिंगकेच्छावि-
रहसिद्ध्यभावस्य हेतुत्वोपगमात् उक्तसमव्याप्तत्वेनैव धूमलिंगकेच्छाविरहविशिष्टसिद्धि-
विशिष्टानुमिते रसमव्याप्त्यभिचाराभावात् न चोक्तस्थले धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभा-
वं विनापि याधधशसामग्रीबलात् धूमलिंगकानुमितिरुत्पन्ना नाधधसामग्रीबलाद्धूमलिङ्गक-
परामर्शकाले सिद्धिसत्वेप्यनुमित्यापत्तिरिति वाच्यं धूमलिंगकेच्छाविरहविशिष्टसिद्ध्यभाव-
धूमलिंगकपरामर्शघटितसामग्र्यालोकलिंगकेच्छाविरहविशिष्टसिद्ध्यभावालोकपराम-
र्शोभयघटितसामग्र्योरन्यतरस्यैव तत्र नियामकत्वात् अन्यथा तत्तल्लिंगपरामर्शविशिष्टत-
त्तल्लिंगकेच्छानामुत्तेजकत्वेनावश्यंभावकत्वस्यैकत्र निवेशेनैषां मिथ्यो विशेषणविशेष्यभावे वि

त॰प्र॰
८२
82

निगमनाविरहप्रसंगात् ननु पर्वतोद्देश्यकवह्निविधेयकानुमितिंप्रति स्वीयव्याप्तिनिष्ठप्रकारता
निरूपितविशेष्यतावच्छेदकीभूतधर्मवल्लिंगकत्वप्रकारकत्वस्वसामानाधिकरण्योभयसं
बंधेन वह्निव्याप्यवत्तानिर्णयविशिष्टतायाः सिसाधयिषाविरहविशिष्टसिद्ध्यभावत्वेन कारणत्वा
एकरूपेणैवेच्छाया उत्तेजकत्वं न तु लिंगभेदेन समूहालम्बनस्थले चालोकलिंगकपरामर्शविशि
ष्टालोकलिंगकेच्छाया एव तथात्वे व्यभिचारानवकाशादिति चेन्मैवं तथाप्यनुमितिजीयनामित्यन
नुगतेच्छानामननुगमकरूपाभावेन तत्तदिच्छाभावकूटस्यैकत्र निवेशनीयतया तेषां मिथो विशेष
णविशेष्यभावविरहप्रसंगात् अवच्छेदकताया व्यासज्यवृत्तित्वस्य च निरस्तत्वात् तस्मात्तत्तल्लिंग
कपरामर्शकालीनतत्तदिच्छाभावं निवेश्य तत्तल्लिंगभेदेन पक्षताया हेतुत्वमेवोचितमिति दिक् के
वलव्यतिरेकिणं लक्षयति असत्सपक्ष इति सिद्धसिद्धिव्याघातभयादाह तत्त्वं चेति असत्सपक्षत्वं
चेत्यर्थः पक्षातिरिक्त इति अनिश्चितसाध्यसाधनसहचारकत्वमिति स्वरूपकीर्तनं न तु विवक्षितं
तथातिविशेषवैयर्थ्यात् किंत्वनिश्चितसाध्यकत्वं तत्त्वं साध्यसाधनयोः इतरभेदपृथिवीत्वयोः
ननु तत्रासाहचर्यसत्त्वेपि भ्रमात्मकतन्निश्चयसत्त्वान्नानिश्चितसाध्यकत्वमत आह निश्चीयतेवे ८२

82A

ति साधनसहचारनिवेशप्रयोजनाभावेन तदनिवेश्या निश्चितसाध्यकत्वमेव तदस्तु कृतं पक्षातिरि
क्त इति विशेषणेनेति शंकते नचेति एवकारेण पक्षातिरिक्त इत्यस्य व्यवच्छेदः उत्तरयति घटादावि
ति प्रत्यक्षत एवेति घटो न जलादीति प्रतीतेः नच परमाणुसंसर्गाभाववदतींद्रियप्रतियोगिकत्वे
न कथमितरभेदः प्रत्यक्षः योग्यानुपलब्धिविरहात् तन्मतेपि घटाचान्योन्याभावोपि न प्रत्यक्षः किंतु
वायुर्वातीतिवत्तस्य लिंगमहेद्यपक्षीणत्वादिति वाच्यं न किंतु यत्सत्त्वमनुपलब्धिविरोधितद्भावस्यैव प्र
योग्यत्वात् नत्वैंद्रियकप्रतियोगिकस्यैव अन्यथा जलपरमाणौ पृथिवीत्वाभावग्रहापत्तेः इत्थं चापि
ण च भेदस्यैवेतरभेदस्यापि प्रत्यक्षत्वोपपत्तिः निश्चितत्वादिति तदुपादाने च घटस्य पक्षत्वात् तत्र नि
श्चयेपि पक्षातिरिक्ते निश्चितसाध्यकत्वमस्त्येवेति भावः पक्षतावच्छेदकावच्छिन्नातिरिक्तत्वं वा
त्र पक्षातिरिक्तत्वं बोध्यं नातो घटादेरपि यत्किंचित्पक्षातिरिक्तत्वादुक्तदोषः अन्यथेति घटादावित
रभेदनिश्चये इत्यर्थः तद्घटितेति साध्यघटितेत्यर्थः विशिष्टबुद्धिरिति विशेषणज्ञानस्य हेतुतया
साध्यज्ञानं विना साध्यघटितव्याप्तिज्ञानासंभवादिति भावः साध्यनिश्चये इतरभेदनिश्चये ८

त॰प्र॰
८२
83

तस्य घटस्य पक्षत्वमिति सिद्ध्यभाववत्त्वादिरूपं पक्षत्वमित्यर्थः घटे इतरभेदनिश्चयेनेतरभेद
निश्चयाभावरूपपक्षत्वाभावात्कथं पृथिवीसामान्यस्य पक्षत्वमिति भावः पृथिवीत्वेन पक्ष
तावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकावच्छेदेन साध्यसिद्धेरेव प्रतिबंधकतया प्रकृते
पृथिवीत्वसामानाधिकरण्येन घटादावितरभेदनिश्चयेपि पृथिवीत्वावच्छेदेनानुमितौ न क्षति
रिति भावः नचैवमंशतः सिद्धसाधनस्य दूषकत्वविलोपप्रसंग इति वाच्यं पक्षतावच्छेदको
तद्दूषकत्वस्येष्टत्वात् पक्षतावच्छेदकनानात्व एव तद्दूषकत्वांगीकारात् यथात्ममनसे
नित्ये आत्ममूर्त्तत्वादित्यत्रानित्यावागितिबुद्धेरुद्देश्यायाः सिद्धावुभयधर्मावच्छेदेनानित्यत्वा
नुपपत्तिरिति तदवच्छेदेन पृथिवीत्वावच्छेदेन पक्षतेति इतरभेदनिश्चयाभावरूपपक्षतावि
रोधित्वादित्यर्थः विरोधित्वंच सहानवस्थानरूपं बोध्यम् इह घटे सा पृथिवीत्वावच्छेदेनेतर
भेदनिश्चयः सर्वत्रेति परमाण्वादिरूपपृथिव्यामित्यर्थः तन्निश्चयेति इतरभेदनिश्चयाभा
वादित्यर्थः परमाण्वादेरयोग्यतया प्रत्यक्षेण तत्र तस्य निश्चेतुमशक्यत्वात् तथा च पृथिवी ८२

83A

पृथिवीत्वसामानाधिकरण्येन निश्चयसत्वेप्यवच्छेदकावच्छेदेन निश्चयाभावसत्वात् पतादेः यत्तत्र
मव्याहतमेवेतिभावः इदंचघटादौ पृथिवीत्वेनेतरभेदनिश्चयमभिप्रेत्य वस्तुतस्तुघटत्वेनैवेतरे
तरभेदनिश्चयेन पृथिवीत्वेन न तन्निश्चयात् पृथिवीत्वधर्मितावच्छेदककानुमित्युत्पत्तौ बाधका
भावः तद्धर्मितावच्छेदककानुमितौ तद्धर्मितावच्छेदककसिद्धेरेव प्रतिबंधकत्वादिति ध्येयं अन्वे
ति व्यतिरेकयोः साध्याभावहेत्वभावयोः सहचारात् उक्तेति ऽन्वयव्याप्तिरित्यत इत्यर्थः लाघ
वेनानुमितिसामान्ये ऽन्वयव्याप्तिज्ञानस्यैव हेतुत्वादिति भावः नचैवमितरव्यापकीभूताभावा
प्रतियोगिपृथिवीत्ववती पृथिवीतिपरामर्शादितरभेदज्ञानशून्यकाले पृथिव्यामितरभेद इतीत
रभेदविशेष्यकानुमितेरुच्छेदः एवं स्वातंत्र्येणेतरभेदज्ञानशून्यकाले तादृशपरामर्शात् पृथिवी इतर
भेदवतीत्यनुमित्युदयप्रसंग इति वाच्यं अन्वयव्याप्तिज्ञानस्यैवानुमितिहेतुत्ववादिनामाचार्या
णां तदनुत्पादे इष्टापत्तेः ग्रंथ इत्यनेनास्वरसः सूचितः सच विशेषणज्ञानविधया सहचारज्ञा
नस्यान्वयव्याप्तिग्रहहेतुतया साध्याभावहेत्वभावयोः सामानाधिकरण्यस्यान्वयव्याप्त्यघटकत

त.प्र याविशेषणत्वाभावेन तज्ज्ञानस्य कथं तादृशव्याप्तिग्रहे हेतुतेति न च व्यभिचारज्ञानविरोधि सहचार
८४ ज्ञानत्वेनोभयसहचारज्ञानयोरपि हेतुत्वमिति वाच्यं ग्राह्याभावानवगाहितया व्यतिरेकसहचारज्ञा
84 नस्य व्यभिचारज्ञानविरोधित्वाभावात् अत्र केचित् प्राचीनमतेऽन्वयव्याप्तिज्ञाने विभिन्नधर्मिकत्वे
पि व्यतिरेकसहचारज्ञानस्यान्वयव्यतिरेकाभ्यां यथा हेतुत्वं अन्वयव्याप्तिज्ञानमेव चानुमितिसामा
न्ये हेतुरित्युच्यते तथान्वयसहचारज्ञानं व्यतिरेकव्याप्तिज्ञाने हेतुस्तज्ज्ञानमेव चानुमितिसामान्ये
हेतुरित्युच्यतां विनिगमकाभावात् न चैवमन्वयव्याप्त्यवगाहिवह्निव्याप्यधूमवत्तापरामर्शादनुमि
तेरनुपपत्तिरिति वाच्यं भवतामितरभेदाभावव्यापकीभूताभावप्रतियोगिपृथिवीत्ववती पृथिवी
ति व्यतिरेकव्याप्त्यवगाहिपरामर्शादनुमित्यनुदयेऽष्टापत्तेरिव ममापि तत्र तदनुत्पादस्येष्टत्वादि
ति तन्न अन्वयव्याप्तिज्ञानस्य हेतुत्वे लाघवस्यैव विनिगमकत्वात् तथाहि व्यतिरेकव्याप्तिरभा
वनिष्ठा धूमे तद्वह्न्यादेः स्वाश्रयव्यापकीभूताभावप्रतियोगित्वसंबंधेन निरूपकाभावप्रतियोगि
त्वसंबंधेन वा तथा चैतादृशगुरुतरसंबंधेन व्याप्तिविशिष्टधूमवत्त्वावगाहिपरामर्शत्वेन हेतुत्वे गौ ८४

84A

एवं सामानाधिकरण्यादिरूपान्वयव्याप्तिज्ञानस्यानुमितिहेतुत्वे स्वरूपसंबंधेन वह्निनिरूपित
व्याप्तिविशिष्टहेतुमत्तानिश्चयस्यैव तत्त्वमिति लाघवं किंचैवं साध्याभावाप्रसिद्ध्या व्यतिरेकव्याप्तिज्ञा
नासंभवेन केवलान्वय्यनुमानोच्छेदप्रसंग इति दिक् अन्वयव्याप्तिज्ञानमिव व्यतिरेकव्याप्तिज्ञानम
प्यनुमितिहेतुः न च केवलान्वय्यनुमित्यनुरोधेनान्वयरूपव्याप्तिहेतुभावे नान्वयव्याप्तिज्ञानेनैवोपप
न्नौ तस्य पृथक्कारणत्वकल्पने गौरवमिति वाच्यं इतरभेदज्ञानस्य व्यकाले इतरव्यापकीभूताभावप्र
तियोगिपृथिवीत्ववती पृथिवीत्यादिपरामर्शादितरभेदविशिष्टकानुमितेः स्वातंत्र्येणेतरभेदज्ञा
नसत्वेनाद्यपरामर्शादितरभेदविशेषणकानुमितेरपलापप्रसंगेन तद्धेतुत्वस्यावश्यकत्वात् प्रामा
णिकगौरवस्य चादोषत्वात् न चैवं परस्परव्यतिरेकेपि परस्परेण कार्योत्पादनात् परस्परजन्यानुमिर
तौ तयोर्व्यभिचार इति वाच्यं भवन्मतेऽन्वयसहचारज्ञानयोरन्वयव्याप्तिज्ञानहेतुत्वे तद्व्यभिचारवार
णायाव्यवहितोत्तरत्वनिवेश इति मन्मतेपि परस्परजन्यानुमितौ व्यभिचारवारणायाव्यवहितोत्तरत्व
स्य निवेशनीयत्वादित्यन्वयव्यतिरेकाभ्यामुभयविधव्याप्तिज्ञानस्यानुमितिहेतुत्वमिति मणिकार

त॰प्र॰ ८५ 85

मतं दर्शयति साध्याभावेत्यादिना अनुमितिः साध्यविधेयकानुमितिः ननु हेत्वभावनिरूपित
साध्याभावनिरूपितव्याप्तिज्ञानं हेत्वभावविधेयकानुमितिं जनयतु न तु साध्यविधेयकानुमितिं अ
नुमितौ व्यापकतावच्छेदकरूपेण व्यापकस्यैव भाननियमात् अन्यथा वह्निव्याप्तिज्ञानाद्धटानु
मित्यापत्तिरित्याशंकते नचेति अन्यव्याप्तिग्रहात् अन्यनिरूपितव्याप्तिज्ञानात् हेत्वभावनिरू
पितव्याप्तिज्ञानादिति यावत् अन्यानुमितिः साध्यविधेयकानुमितिः नन्वन्यव्याप्तिज्ञान
स्यान्यविधेयकानुमितिजनकत्वे बाधकाभाव इत्यत आह अतिप्रसंगादिति घटनिरूपितव्या
प्तिज्ञानात् पटविधेयकानुमितिप्रसंगादित्यर्थः पक्षधर्मतेति स्वाश्रयव्यापकीभूताभावप्रतियो
गित्वसंबंधेन साध्याभावनिरूपितव्याप्तिविशिष्टहेतुमत्तावगाहिनिश्चय इत्यर्थः साध्यानुमापकमि
ति साध्यविधेयकानुमितिविशेषे हेतुरित्यर्थः व्यतिरेकव्याप्त्यवगाहिपरामर्शाद्वह्नितोऽनुमितिज
नक इति यावत् व्यापकतावच्छेदकरूपेण व्यापकस्य भानमिति नियमस्तु अन्वयव्याप्त्यवगाहिपरा
मर्शजन्यानुमितिस्थल एवेति द्रष्टव्यं ननु गगनादिभिन्नभेदस्य निश्चितत्वेन पृथिवी इतरेभ्यो भि ८५

85A

यते पृथिवीत्वात् घटवदित्यन्वय्येव न तु व्यतिरेकी निश्चितसाध्यवत्त्वमेव दृष्टान्तत्वे प्रयोजकं न त्वप
क्षान्यत्वमपीति चेन्न अन्वयसहचारग्रहदशायां व्यतिरेकसहचारेणैव व्याप्तिग्रहोदयात् तदु
क्तमाचार्यैः आस्तां तावदयं सहृदुपदेशः केवलव्यतिरेकलक्षणं नावसिद्धमिति अन्वयव्यतिरेकिणं
लक्षयति उभयथान्यदिति केवलान्वयिकेवलव्यतिरेकान्यदित्यर्थः प्रसिद्धानुमानमिति वह्निमान् धू
मादित्यादीत्यर्थः कैश्चिदन्वयसहचारमात्रगृहीतव्याप्तिकत्वं केवलान्वयित्वं व्यतिरेकसहचारमा
त्रगृहीतव्याप्तिकत्वं केवलव्यतिरेकित्वं उभयसहचारगृहीतव्याप्तिकत्वमन्वयव्यतिरेकित्वं दृशा
विशेषधूमस्यापि केवलान्वयित्वकेवलव्यतिरेकित्वे इष्टे एव न चैवं विभागव्याघातः उपधेयसंक
रेऽप्युपाधेरसंकरादिति अत एवाह संक्षेपइतीत्याहुः नन्विदं ज्ञायमानलिंगस्यानुमानत्ववादिमते
उपपद्यते न तु लिंगज्ञानस्यानुमानत्ववादिमते अत एवानुपदमेव एवं हेत्वाभिहितमिति वक्ष्यतीति चे
न्न तस्यानुमानं त्रिविधमित्यस्यानुमितिजनकं लिंगज्ञानविषयीभूतं लिंगं त्रिविधमित्यर्थः अथा
नुमितिकरणत्वस्यैव विभागोचित्यात् लिंगस्य त्रिविधत्वकीर्तनमसंगतमिति वाच्यं केवलान्वयि

त॰प्र॰ लिंगकानुमितिजनकत्वं केवलव्यतिरेकिलिंगकानुमितिजनकत्वान्वयव्यतिरेक्युभयलिंगकानुमितिज
८६ नकत्वभेदेन लिंगज्ञानस्य त्रिविधत्वेन लिंगस्यापि त्रिविधत्वसंभवात् वस्तुतो लिंगज्ञानस्यैव त्रिविधत्वं।
लिंगस्य तु तद्विषयत्वेन तत्त्वं केवलान्वयिसाध्यकानुमानमित्यस्य च केवलान्वयिसाध्यकानुमितिज
86 नकज्ञानविषय इत्यर्थः एवं पक्षातिरिक्तेपि निश्चितसाध्यकत्वमित्यस्य पक्षातिरिक्तेऽनिश्चितसाध्य
कानुमितिजनकज्ञानविषयत्वमित्यर्थः उभयान्य इत्यस्य केवलान्वयिकेवलव्यतिरेकिसाध्यविषे
यकानुमितिजनकज्ञानविषय इत्यर्थः एवं हेतावभिहित इत्यस्य तादृशज्ञानविषयीभूते हेतावभि
हिते इत्यर्थः इति न शङ्काकलंकलेशोपीति तत्त्वनिर्णयवादिविजयरूपैककार्यकारित्वात् प्रसंगाच्च हे
त्वाभासान्निरूपयति एवमिति तदाभासाः हेत्वाभासाः हेतुवदवभासन्त इति योगाद्धेतोर्धर्म्मैव
हेत्वाभासपदवाच्य इति ध्येयम् अनुमितितत्करणान्यतरप्रतिबंधकयथार्थज्ञानविषयत्वं हेत्वाभा
सत्वं बाधतदभावव्याप्यवत्ताज्ञानादीनां साक्षादेवानुमितिप्रतिबंधकत्वात् बाधसत्प्रतिपक्षयोर्लक्षण
समन्वयः व्यभिचारज्ञानादीनामनुमितिकरणव्याप्तिज्ञानादिप्रतिबंधकत्वेन तद्विषयत्वेन व्यभि ८६

86A

चाबादेर्हेत्वाभासत्वोपपत्तिः अतएव व्यभिचारादिसंग्रहायानुमितिप्रतिबंधकेति विहायानुमितितत्कार
णान्यतरेत्युक्तं नचतद्धेतोरेवेतिन्यायेन व्यभिचारज्ञानस्यानुमितिप्रतिबंधकत्वमेवास्त्विति वाच्यम्
धूमपरामर्शकाले आलोको वह्निव्यभिचारीति व्यभिचारज्ञानकाले अनुमित्यनुदयप्रसंगात् नचतद्धर्माव
च्छिन्नलिंगकानुमितिं प्रति तद्धर्मावच्छिन्नविशेष्यकव्यभिचारज्ञानस्यैव प्रतिबंधकत्वमिति वाच्यं गौरवा
त् साक्षादविरोधिनो ज्ञानस्य जनकज्ञानविघटकत्वेनैव विरोधित्वाच्च नचैवं धूमो वह्निव्याप्य इति ज्ञानकाले
भि नेन्द्रियादिजन्यव्यभिचारज्ञानकालेप्यनुमित्युदयापत्तिरिति वाच्यं इष्टत्वात् तदुक्तं कारणाएणी किन्त्व
सिध्येदिति व्यभिचारादिभ्रमसाधारणातिप्रसंगभंगाय यथार्थेति विभजते मेत्रेति तत्र त्रिविधे सव्यभिचा
रे निरूपणीये साध्यवदन्येति साध्याभाववद्वृत्तित्वमिति कृते धूमाभाववदयोगोलकवृत्तित्वेन धूमवान्
वह्नेरित्यादौ लक्षणसंभवेपि कपिसंयोगी एतद्वृक्षत्वादित्यत्र कपिसंयोगाभाववद्वृत्तित्वादेतद्वृत्तित्वस्यापि
नत्वापत्तिः प्रतियोगिवैयधिकरण्यादिनिवेशे चातिगौरवमिति तत्परित्यागः अन्योन्याभावस्य चाव्याप्य
वृत्तित्वान्नदोषः नच कपिसंयोगिघटे भयभेदवारणाय प्रतियोगिवैयधिकरण्यनिवेशआवश्य

त.प्र. कइतिवाच्यं साध्यतावच्छेदकावच्छिन्नसाध्यवत्तावच्छिन्नप्रतियोगिताकभेदवद्वृत्तित्वस्य विवक्षणात्
८७ नहि कपिसंयोगत्वावच्छिन्नकपिसंयोगवदन्यत्वस्यैतद्वृक्षे सत्त्वमिति यदि चान्योन्याभावस्याव्याप्यवृत्ति
87 त्वं विभाव्यते तथापि प्रतियोग्यवृत्तित्वस्यैव लाघवेन निवेशनीयत्वात् प्रतियोगिवैयधिकरण्याघे
तया लाघवस्यास्फुरत्वात् न च द्रव्यं गुणकर्मान्यत्वविशिष्टसत्त्वादित्यत्र विशिष्टस्यानतिरिक्तवृत्ति
त्वेन सत्ताया द्रव्यभिन्नगुणादिवृत्तित्वादतिप्रसंग इति वाच्यं साध्यवदन्यनिष्ठाधिकरणतानिरूपक
ताकतावच्छेदकहेतुतावच्छेदकावच्छिन्नत्वस्य तदर्थत्वात् लक्ष्ये लक्षणं योजयति यथेत्यादि
ना ननु यद्यन्योन्याभावो व्याप्यवृत्तिस्तदा कपिसंयोगी एतद्वृक्षत्वादित्यत्रातिव्याप्तिः प्रतियोग्य
वृत्तित्वनिवेशे च गौरवमित्यत आह साध्यासमानाधिकरणेति साध्याधिकरणावृत्तित्वमत्र साध्या
समानाधिकरणत्वं न तु साध्यानधिकरणवृत्तित्वं अन्यथा वह्न्यनधिकरणवृत्तिद्रव्यत्वादिसामाना
धिकरण्यस्य धूमेऽपि सत्त्वेन वह्निमान् धूमादित्यादावतिप्रसंगापत्तेः अत्र च साध्याधिकरणावृत्ति
त्वं येन संवंधेन तेन संवंधेन तदधिकरणत्वं विशेष्यतया विशेषणतया वाऽवृत्तित्वं तदधिकरणत्वं च वो ८७

87A

ध्यं एतेन यत्किंचित्संबंधेनावृत्तित्वोक्तौ संयोगादिनावृत्तिपर्वतत्वसामानाधिकरण्यमादाय
धूमादावतिव्याप्तिः संबंधसामान्येनावृत्तित्वोक्तौ तु धूमवदन्यत्वादेरपि कालिकादिसंबंधेन धू
मवद्वृत्तितया तद्वृत्तिगगनादिरेव तत्सामानाधिकरण्यस्य च वह्न्यावसंभवापत्तेरिति परास्तं
तत्सामानाधिकरण्यं च तदधिकरणे हेतुतावच्छेदकसंबंधेन संबंधित्वं नातः कालिकादिसं
बंधमादाय धूमादावतिव्याप्तिरिति यद्यप्यसाधारणादिसाधारणमेतत् तथापि उपध्येयसंकरे
प्युपाधेरसंकरादिति तत्साधारण्यपि यत्तत्तिविरहः असाधारणत्वाद्यज्ञानेपि एतज्ज्ञानेनुमि
प्रतिबंधादिति यत्तु समस्तविपक्षव्यावृत्तत्वमसाधारणत्वं निश्चितसाध्यवद्व्यावृत्तत्वे सति
निश्चितसाध्याभाववद्वृत्तित्वमिति यावत् शब्दो नित्यः शब्दत्वादित्यादौ सर्वेभ्यो नित्येभ्योऽनित्ये
भ्यश्च शब्दस्य व्यावृत्तत्वाल्लक्षणसमन्वयः न च शब्दोऽनित्यः शब्दत्वादिति सद्धेतौ शब्देऽनित्य
त्वानिश्चयदशायां निश्चितसाध्यवद्व्यावृत्तत्वादसाधारण्यापत्तिः इष्टत्वात् असाधारणस
त्प्रतिपक्षयोरनित्यदोषत्ववादिनां प्राचां मतेनैतल्लक्षणादिति तन्मतं दूषयितुं स्वलक्षणमाह

न॰प्र॰
८८

88

साध्येति ननु सपक्षव्यावृत्तत्वमसाधारणत्वमित्यस्य का गतिरित्यत आह इदमेवेति पूर्वं निरु
क्तार्थकमेव न तु निश्चितसाध्यवद्व्यावृत्तत्वं तत्र येन शब्दोऽनित्यः शब्दत्वादित्यस्य संग्रहः स्यादि
ति अव्याप्तिरिति अनित्ये शब्दे शब्दत्वस्यासत्त्वेनानित्यत्वव्यापकाभावप्रतियोगित्वस्य शब्दत्वेऽ
सत्त्वादिति भावः सन्दिग्धत्वादिति नन्वसाधारणस्य प्रतिपक्षतयोरनित्यदोषत्ववादिप्राचीनमते
सन्दिग्धेतावपि तत्सम्भव इति चेन्न बाधभ्रमेऽनुमितिप्रतिबंधाद्बाधस्याप्यनित्यदोषत्वापत्तिः यदि
बाधबुद्ध्याप्रतिबंधान्नानुमितिस्तत्र हेत्वन्तरदुष्ट इति विभाव्यते तदा प्रकृतेऽप्यसाधारण
सत्प्रतिपक्षस्थले तदभावव्याप्यवत्ताज्ञानेनानुमितिप्रतिबंधो न तत्र हेत्वन्तरपि दुष्ट इत्यस्यसत्त्व
त्वादिति भावः एतज्ज्ञानं असाधारणत्वज्ञानं साक्षात् ग्राह्याभावव्याप्यावगाहित्वात् व्यति
रेकीति व्यतिरेकव्याप्तिमत्सत्प्रतिपक्षत्वात् तथा च तदभावव्याप्यवत्ताज्ञानमुद्रयानुमि
तिविरोधित्वमिति भावः ननु साध्यव्याप्यवत्ताज्ञानं साध्याभावव्याप्यवत्ताज्ञानं चात्र संगृह्णमि
ति सत्प्रतिपक्षाभेदप्रसंग इत्याह न चैवमिति एवं सत्प्रतिपक्षरूपत्वे सत्प्रतिपक्षत्वमिति ८८

88A

तथाचैवं तस्य तदंतर्गतत्वे सव्यभिचारस्त्रिविध इति विभागव्याघात इति भावः हेत्विति साध्यव्या
प्यहेतुसाध्याभावव्याप्यहेत्वोर्भेद एव सत्प्रतिपक्षत्वं यथा ह्रदो वह्निमान् धूमात् ह्रदो वह्न्यभाववा
न् ह्रदत्वादित्यादौ प्रकृते चैकस्यैव शब्दत्वस्योभयसाधकत्वेन तत्स्योभयलिंगकत्वघटितसत्प्रति
पक्षत्वमिति भावः अद्यहेतोरिति तथाच साध्यसाधनयोः सहचारग्रहे ऽन्वयव्याप्तिग्रहेणान्व
यित्वमिति भावः तथा चेति नित्यत्वाभावव्यापकीभूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिवत्त्वमा
हि नित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात् साध्यमिवानित्यत्वाभावो नित्यत्वं तथाच नित्यत्वव्यापकी
भूताभावप्रतियोगित्वरूपव्यतिरेकव्याप्तिवत्त्वमाद्य नित्यत्वव्याप्यशब्दत्ववत्तापरामर्शात् साध्याभा
वोपि साधनीयः नच विरुद्धोभयसाधनं संभवेति किंतु परस्परानुमितिप्रतिबंध एवेत्यर्थः
विरुद्धयोः साध्यसाध्याभावयोः अनिर्णय इति अनुमित्यनुपपत्तिरित्यर्थः अनिर्णय इत्यनेन
सत्प्रतिपक्षस्थले संशयात्मिकानुमितिरिति रत्नकोशकारमतमादर्शितं तदभावव्याप्यवत्ताज्ञा
नस्य विशिष्टबुद्धिसामान्यविरोधितया सत्प्रतिपक्षस्थले न संशयाकारानुमितिः किंतु परस्प
रानुमितिप्रतिबंध एवेति सिद्धांतिमतं तत्र प्रत्यक्षस्थले तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधक

त॰प्र॰
८९
89

त्वेप्यनुमितौ तत्प्रतिबंधकत्वाकल्पनेन संशयानुमितौ बाधकाभावः संशयत्वस्यार्थसमाज
ग्रस्तत्वेपि साध्यतदभावव्याप्यवत्तापरामर्शाभ्यां साध्यतदभावानुमितौ जायमानायां फलतः
संशयानुमितेरुपपत्तेः प्रत्यक्षस्थले तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वे कल्पनीये प्रत्यक्ष
त्वमनिवेश्य तत्तत्कारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति क
थमनुमित्युपपत्तिरिति तु नाशंकनीयं इच्छायाउत्तेजकत्वानुरोधेन विशिष्यैव प्रत्यक्षत्वं निवेश्य
प्रतिबध्यप्रतिबंधकभावस्यावश्यकत्वात् न च शाब्द[illegible]स्थले इच्छाया उत्तेजकत्वात्तत्रैव प्रत्य
क्षान्यज्ञानत्वं तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति वाच्यं प्रत्यक्षान्यत्वज्ञानत्व
योर्विशेष्यविशेषणभावे विनिगमनाविरहेण तदपेक्षया शाब्दत्वस्यैव तत्प्रतिबध्यतावच्छेदकत्वा
त् परोक्षत्वजातेरनुभवत्वेन संकरान्न तस्यापि तत्त्वमिति अनुमितौ तत्प्रतिबंधकत्वस्याक्लृप्ततया
न संशयानुमितौ किंचिद्बाधकमिति प्राहुः तदभाववत्ताज्ञानविशिष्टान्यत्वावच्छिन्नं प्रति
तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधकत्वं इच्छाविशिष्टत्वावच्छिन्नं प्रति चेच्छा[illegible]भेदेन हेतुत्व
मिति आहार्यानुमितेरंगीकारेण तदभावव्याप्यवत्ताज्ञानसत्त्वेन इच्छाबलात् नापि तदभाव ८९

ने।

व्याप्यवत्ताज्ञानाभावरूपकारणवत्त्वात्संशयानुमित्युत्पत्तिरिति दिक् लाघवादाह अवृत्तिसाध्यक
त्वमिति नचैवं धूमवानाकाशादित्यादेरसंग्रह इति वाच्यं स्वरूपासिद्ध एव तन्निवेशात् केचित्तु
केवलान्वयिधर्मावच्छिन्नपक्षकत्वमनुपसंहारित्वं उदाहरणं च सर्वमनित्यं प्रमेयत्वादित्यादि व्य
तिरेकव्याप्तिग्रहप्रतिबंधकत्वात्रदूषकताबीजमित्याहुः साध्येति साध्यतावच्छेदकसंबंधेन
साध्याधिकरणे हेतुतावच्छेदकसंबंधेन वृत्तित्वमित्यर्थः तेन समवायेन वह्नेः साध्यतायां संयोगे
न धूमहेतोः संयोगेन वह्न्यधिकरणवृत्तित्वेपि [illegible]त्वाधिकरणे ऽव्यत्वस्य कालिकादिना वृत्तिमान
त्वेपि चाव्याप्तिः साध्यतावच्छेदकावच्छिन्नाधिकरणनिष्ठाधिकरणतानिरूपकतानवच्छे
दकहेतुतावच्छेदकावच्छिन्नत्वमिति निष्कर्षः तेन गुणकर्मान्यत्वविशिष्टसत्तावान् गुणत्वात्
गुणो गुणकर्मान्यत्वविशिष्टसत्तादित्यादौ यथायथं नाव्याप्तिः उपाधीति असाधारणत्वविरुद्ध
त्वाद्युपाधीनां भेदादित्यर्थः विरुद्धत्वज्ञानेऽसाधारणत्वाद्यज्ञाने च नुमिति प्रतिबंधादिति भावः
सत्प्रतिपक्षः साध्यधीविरोधिपरामर्शः न चांश्वहेतुः सत्प्रतिपक्षित इति योगार्थमभिप्रेत्याह

त॰प्र॰
९
10

पक्षेइति अत्र साध्यधीप्रतिबंधकः परामर्शः सत्प्रतिपक्षश्चेत्तावतैव सामंजस्ये पक्षइतिसंपाता
पातमिति कश्चित्तन्न पक्षविशेष्यकसाध्याभावव्याप्यवत्तापरामर्शस्य भ्रमत्वादिविशेष्यकसा
ध्यवत्ताज्ञानाविरोधितया पक्षविशेष्यकत्वलाभाय तत्पदस्यावश्यकत्वात् इदंच सत्प्रतिपक्ष
स्यानित्यदोषत्वांगीकर्तृप्राचीनमते लक्षणंबोध्यं स्वमतेतु पक्षे साध्याभावव्याप्यहेतुमत्त्वं सत्प्र
तिपक्षः अतएवोभयसाधारण्याय संदेहमेव यथाजलमित्यादिनोदाहृतवान् नेदमुक्तमिति
उक्तत्वाभावव्याप्यतेजस्त्ववदिदमितिज्ञानं मुक्तत्वरूपसाध्यधीप्रतिबंधकमिति भावः सत्प्रति
पक्षफलंतु परस्परप्रतिबंधे न परस्परानुमितिप्रतिबंधएव तथाहि पर्वतो वह्निमान् धूमात् प
र्वतो वह्न्यभाववान् पाषाणमयत्वादित्यादौ वह्निव्याप्यवत्तापरामर्शसत्वान्नवह्न्यभावानुमितिः
वह्न्यभावव्याप्यवत्तापरामर्शसत्वान्नवह्न्यभावानुमितिः वह्न्यभावव्याप्यवत्तापरामर्शसत्वाच्चन
वह्न्यनुमितेरप्युपपत्तिः तद्विशिष्टबुद्धित्वावच्छिन्नंप्रति तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंध
कत्वमिति निबंधकृतस्तु प्रकृतसाध्यसाधकहेत्वोः किंतत्त्वमिति जिज्ञासेव सत्प्रतिपक्षफले ९

अत एव प्रकृतसाध्यसाधकहेत्वोः किं तत्त्वमिति जिज्ञासाजनकाव्याप्तिपक्षधर्मतोपस्थितिः प्रक
रणसमद्गतिलक्षणमपीत्याहुः यत्तु कोणकारास्तु तत्प्रकारकप्रत्यक्षे तदभावव्याप्यवत्ताज्ञान
स्य प्रतिबंधकत्वेपि प्रयोजनाभावेनानुमितौ तत्प्रतिबंधकत्वस्याकल्पनात् संशयत्वस्यार्थसमा
जगस्तत्वेपि साध्यतदभावव्याप्यवत्तापरामर्शाभ्यां जायमानानुमितिः संशयरूपैव जायते उ
भयप्रकारकत्वे निश्चयत्वायोगात् संशयानुमितिरेव सत्प्रतिपक्षफलमिति ननु तदभावव्या
प्यवत्ताज्ञानकाले तत्प्रकारकोपनीतभानाद्यनुदयेन तत्र सत्प्रतिबंधकत्वे कल्पनीये प्रत्यक्ष
त्वमनिवेश्य तत्प्रकारकबुद्धित्वमेव तत्प्रतिबध्यतावच्छेदकं तच्चानुमितिसाधारणमिति कथ
मुभयपरामर्शकाले उभयविधेयकानुमितिरितिचेन्न इच्छाकालेनाहार्य्यप्रत्यक्षोत्पत्त्या चा
क्षुषत्वस्पार्शनत्वादिप्रकारकेच्छानामुत्तेजकत्वानुरोधेन विशिष्यप्रतिबंधकतायाश्चावश्यकत्वा
त् घटस्पार्शनसामग्रीसत्त्वे घटचाक्षुषेच्छायां सत्यामसत्यां च चाक्षुषसामग्र्यां घटस्पार्शनाप
त्तेस्तासामेकत्र निवेशायोगात् तत्तत्सामग्रीविशिष्टतत्तदिच्छाकूटस्योत्तेजकत्वे गौरवमिति

त॰ प्र॰
८१
91

नच शाब्दस्थले इच्छाया उत्तेजकत्वात् तत्रैव प्रत्यक्षान्यज्ञानत्वं तत्प्रतिबध्यतावच्छेदकं तच्चानु
मितिसाधारणमिति वाच्यं प्रत्यक्षान्यज्ञानत्वयोः मिथो विशेषणविशेष्यभावे विनिगमनाविरहेण
तदपेक्ष्य शाब्दत्वस्यैव प्रतिबध्यतावच्छेदकत्वात् परोक्षत्वजातेरनुभवत्वेन संकरान्न तस्यापि त
त्त्वमिति तत्प्रतिबंधकत्वस्याखंडतयानुमितौ न किंचिद्बाधकमिति अत्र केचित् इच्छाया
उत्तेजकत्वानुपगमे न तदभावव्याप्यवत्ताज्ञानविशिष्टान्यत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ता
ज्ञानत्वेनैकमेव प्रतिबंधकत्वं इच्छाविशिष्टत्वावच्छिन्नं प्रति इच्छात्वेन हेतुतया एककार्यका
रणभावे नैव निर्वाहे तस्यानुमितिसाधारणतया नसंशयानुमितिरुत्पत्तुमर्हतीति तदभावव्याप्य
वत्ताज्ञानस्य विरोधिनः सत्वात् आहार्यानुमितेरनंगीकारेणेच्छाकालेपि तदुत्पत्त्यसंभवादि
ति निर्गर्वाः असिद्धिं निरूपयति असिद्धिस्त्विति परामर्शेति व्याप्तिप्रकारकपक्षधर्मताज्ञानं
परामर्शः तत्प्रतिबंधकत्वं च व्याप्यत्वासिद्धेर्व्याप्तिज्ञानविघटकत्वेन स्वरूपासिद्ध्याश्रयासि
द्ध्योः पक्षधर्मताज्ञानविघटकत्वे न व्यभिचारादिज्ञानस्यापि व्याप्तिज्ञानविघटकत्वेन तद्विष ८१

91A

येव्यभिचारादावतिप्रसंगात् व्यभिचारादन्यत्वं प्रतिबंधकतावच्छेदकधर्मविशेषणं परामर्श
प्रतिबंधकज्ञानविषयत्वमित्युक्तौ घटादेरपि समूहालंबनज्ञानविषयत्वादतिव्याप्तिरतः प्रतिबंध
कतावच्छेदकत्वपर्याप्त्यनुधावनं अवच्छेदकत्वं च विषयतया न प्रतिबंधकतावच्छेदकतापर्या
प्त्यधिकरणत्वं तेनासिद्ध्यादिघटकेनातिव्याप्तिरिति स्वरूपासिद्ध्याद्यन्यतमत्वमेवतत्त्वमित्य
पि केचित् सा असिद्धिः यथाक्रमेणलक्षणान्याह पक्षइत्यादिना पक्षतावच्छेदकविशि
ष्टपक्षे हेतुतावच्छेदकावच्छिन्नहेतोरभावः स्वरूपासिद्धिरित्यर्थः तेनोत्पत्तिकालीनो घटः पृ
थिवीगंधप्रागभावादित्यादौ नातिप्रसंगः नवा गुणो द्रव्यं सत्वादित्यादौ विशिष्टस्यानतिरिक्त
तया विशिष्टसत्वाभावप्रतियोगिनि सत्वे ऽतिव्याप्तिः तत्राप्युत्पत्तिकालीनत्वरूपपक्षतावच्छे
दकविशिष्टे गंधप्रागभावस्य विद्यमानत्वेन हेत्वभावासंभवात् सत्तात्वावच्छिन्नाभावस्य गुणे
ऽसत्वाच्च यथोक्तेन दोषः पक्षइति पक्षेपक्षतावच्छेदकस्याभावइत्यर्थः गगनीयत्वेति गगनी
कमलाप्रसिद्धेरितिभावः एतदुभयेति स्वरूपासिद्ध्याश्रयासिद्धिभिन्नत्वविशिष्टासिद्धित्वं

त॰प्र॰ व्याप्यत्वासिद्धित्वमित्यर्थः तदुभयवारणायोभयभिन्नेति घटादिवारणाय च विशेष्यदलं धूलीप
८२ टलेति पर्वतो वह्निमान् धूलीपटलादित्यादौ धूलीपटले वह्निव्याप्यसत्त्वेन धूमादिनिष्ठवह्निव्या
प्यभावस्य टस्य सत्त्वादिति भावः यथाश्रुते धूमनिष्ठव्याप्यभावस्यालोकेऽपि सत्त्वात्तस्याप्यसि
92 द्धित्वप्रसंगः साध्यसाधनभेदेन व्याप्तेर्भिन्नत्वादिति ननु पर्वतः काञ्चनमयवह्निमान् धूमा-
त् एवं पर्वतो वह्निमान् काञ्चनमयधूमादित्यादौ साध्ये साध्यतावच्छेदकस्याभावः साध्या
प्रसिद्धिः एवं हेतौ हेतुतावच्छेदकस्याभावो हेत्वप्रसिद्धिरित्येवंरूपयोः साध्याप्रसिद्धिहेत्वप्र
सिद्ध्योर्व्याप्यत्वासिद्धिव्यतिरिक्तत्वसंभवेनासिद्धेस्त्रिविधत्वमनुपपन्नमित्यत आह साध्या
प्रसिद्धेरिति वाशब्दोऽप्यर्थे तथा च साध्याप्रसिद्धिर्हेत्वप्रसिद्धिरपि व्याप्यत्वासिद्धिरित्यर्थः
हेतुतावच्छेदकावच्छिन्ने साध्यतावच्छेदकावच्छिन्ननिरूपितनियतसाध्यसामानाधिकरण्य
मेव व्याप्तिः साध्यतावच्छेदकहेतुतावच्छेदकयोरप्रसिद्धौ तादृशव्याप्तेरसंभवित्वेनैव तयोरपि
व्याप्यत्वासिद्ध्यन्तर्भावितत्वमेव आश्रयासिद्धेस्तु तथात्वासंभवादतिरिक्तत्वमेवेति नासिद्धेस्त्रैविध्या ८२

१२A

नुपपत्तिरिति भावः अत्र पर्वतो वह्निमान् नीलधूमादित्यादौ नीलरूपविशेषणस्यासंकोचकविशे
षणत्वेन नीलधूमत्वं व्याप्यतावच्छेदकं व्यभिचारवारकत्वात् व्याप्तिग्रहानौपयिकत्वाच्च किंतु धू
मत्वमेव तथा स्वसमानाधिकरणव्याप्यतावच्छेदकांतराघटितधर्मस्यैव व्याप्यतावच्छेदकत्वनिय
मात् धूमप्रागभाववत्त्वसंग्रहाय स्वसमानाधिकरणेति स्वस्यापि स्वघटितत्वादंतरेति तदघटित
त्वं च तद्विषयकप्रतीतिविषयत्वमेव तथा च नीलधूमत्वावच्छिन्ने व्याप्यभावाद्व्याप्यत्वासिद्धिः एवं
तदंतर्भावः अत एव तदुद्भावने निग्रहोऽपि ननु व्यापके व्यर्थविशेषणत्वेन दोषाव्याप्तेर्दोषः इति
नियमे किं विनिगमकमिति चेन्न तदेवेदि हेतुतावच्छेदकावच्छिन्नहेतुसमानाधिकरणाभाव
प्रतियोगितावच्छेदकत्वाभावविशिष्टसाध्यतावच्छेदकावच्छिन्नसाध्यसामाना-
धिकरण्यमेव व्याप्तिः एवं सममनियतेन लघुधर्मेणावच्छेदकसंभवति गुरो तदभावादिति न्यायेन स्व-
रूपसंबंधरूपावच्छेदकत्वस्य गुरुधर्मेऽनंगीकारात् नीलधूमत्वावच्छिन्नसमानाधिकरणा-
भावप्रतियोगितावच्छेदकत्वस्य धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वापेक्षया

गुरुत्वेन प्रतियोगितानवच्छेदकतया तादृशाभावाप्रसिद्ध्या नतेन रूपेण व्याप्तिरिति के
चित्तु कंबुग्रीवादिमान्नास्तीति प्रतीतेरविशेषाद्गुरुधर्मोपि प्रतियोगितावच्छेदक एवेति
स्वसमानाधिकरणानादृशधर्मान्तराघटितधर्मस्यैव व्याप्यतावच्छेदकत्वमिति नियमस्
स्याप्रयोजकत्वान्नीलधूमत्वमपि व्याप्यतावच्छेदकमिति अत एव नीलधूमत्वादेर्वार
णीयत्वेत्विति दीधितिकारोप्याह नचैवं तदनुद्भावने वादिनिग्रहानुपपत्तिः मन्मतेनेन
रूपेण व्याप्यत्वासिद्धेर्वन्निग्रहोपपत्तेरिति वाच्यं धूमादिति वक्तव्ये नीलधूमादित्यु
क्तिरनुचितेति न्यूनाधिकोक्त्या वादिनिग्रहादित्यालोपपत्तिवर्तिनेन वाधं लक्षयति पक्षइति
पक्षतावच्छेदकविशिष्टपक्षे साध्यतावच्छेदकावच्छिन्नप्रतियोगिताकसाध्याभावव
त्वमित्यर्थः तेन रूपकालावच्छिन्नो घटोगंधवान् पृथिवीत्वादित्यादावाधलक्षणावच्छे
देन घटेगंधाभावसत्वेपि नातिव्याप्तिः एवं महानसीयवह्न्याद्यभावस्य पर्वते सत्वेपि नप
र्वतोवह्निमान् धूमादित्यादेर्बाधितत्वापत्तिरिति वाधदशायामपक्षधर्मोहेतुरनैकांति

93A

कोवेति नियमाद्वाधस्य प्रतिबंधकत्वेमानाभावइत्याशंकते नचेति अत्र ह्रदो वह्निमान् धू
मादित्यादौ असिद्धिरेवेति स्वरूपासिद्धिरेव इतं व्यर्थं बाधस्य प्रतिबंधकत्वेनेत्यर्थः पराम
र्शोत्पादनात् वह्निव्याप्यधूमवान् ह्रद इति परामर्शोत्पादनात् बाधे सति वह्न्यभाववान् ह्रद इति
बाधे सतीत्यर्थः तथा च तत्र परामर्शादयेनासिद्ध्यादेर् दूषकता बाधस्यैवदोषत्वमिति भावः
ननु वह्निव्याप्यवत्ताज्ञानकाले कथं वह्न्यभाववत्ताज्ञानं तदभावव्याप्यवत्ताज्ञानस्य प्रतिबंधक
स्य सत्त्वादिति चेन्न अलौकिकतद्वत्ताज्ञानत्वावच्छिन्नं प्रति तदभावव्याप्यवत्ताज्ञानस्य वि
रोधितया ऽनुमानिकेंद्रियादिजन्यवह्निव्याप्यवत्ताज्ञानकालेपि प्रात्यक्षिकवह्न्यभाववत्ता
ज्ञानोदये बाधकाभावादिति भावः असंकीर्णबाधस्थलमप्याह आद्यकालावच्छिन्नेति
दोषांतरेति असिद्ध्यादिरूपदोषेत्यर्थः दोषांतराभावमेवोपपादयति नहीति व्याप्यस्य
सत्त्वे व्यभिचारित्वमेव एतावतैव स्वरूपासिद्धिरेव दोष इत्यतो व्याप्तिपक्षवृत्तित्वयो
रुभयोरभावनिराकरणं एवंपि धर्मितावच्छेदकसामानाधिकरण्येन तदभाववत्ता

त॰प्र॰
६४
ज्ञानस्य धर्मितावच्छेदकसामानाधिकरण्येन नतत्प्रकारकबुद्धेन प्रतिबंधकत्वं तथापि ग्र्यव-
च्छेदकावच्छेदेन तद्विशिष्टबुद्धौ ग्र्यवच्छेदकावच्छेदेन नतदभाववज्ज्ञानस्य विरोधितयैतद्दो-
षं ननु गंधव्याप्यपृथिवीत्ववज्ज्ञानपरामर्शाज्जायमानायां घटो गंधवानित्यनुमितौ पक्षतावच्छे-
94 दकधर्मसामानाधिकरण्यावगाहित्वात्प्रमैव न तु पक्षतावच्छेदकावच्छेदेन तदनुमितौ पक्ष-
तावच्छेदकत्वव्यापकत्वविशिष्टसंबंधघटितव्यापकतायां गंधे ग्रहात् व्यापकताघटकसं-
बंधेनैव व्यापकस्यानुमितौ तथा च सद्धेतोरस्य कथं वाधितत्वमित्यत आह हिमिति ग्र्यव-
च्छेदकावच्छेदकावच्छेदेनानुमितौ पक्षतावच्छेदकव्यापकत्वविशिष्टसंबंधेन व्यापकत्वाव-
गाहिपरामर्शे शुद्धसाध्यतावच्छेदकसंबंधघटितव्यापकत्वावगाहि ग्र्यवच्छेदकावच्छेदेन हे-
तुमत्तावगाहिपरामर्शयोरन्यतरस्य जनकत्वेन प्रकृते गंधप्रागभावाभाववत्वावच्छिन्नत्वविशि-
ष्टसमवायघटितं गंधनिष्ठव्यापकत्वावगाहिपरामर्शसत्वेपि गंधप्रागभावकालत्वावच्छिन्न-
त्वविशिष्टसमवायसंबंधेन पृथिवीत्वरूपहेतुमत्तावगाहिपरामर्शसत्वाद्गंधप्रागभावकालाव ६४

94A

च्छेदेन घटे ज्ञायमानागंधानुमितिर्भ्रम एवेति तस्याभासत्वमसत्तमेवेति भावः ननु व्यभिचारज्ञा
नस्यानुमितिकारणव्याप्तिज्ञानविघटकतया परंपरयानुमितिप्रतिबंधकज्ञानविषयतयाव्य
भिचारादेर्हेत्वाभासत्वं तथोपाधेरपि स्यात् उपाधिज्ञानस्यापि व्यभिचारज्ञानद्वारा व्याप्ति
ज्ञानविघटकत्वेनानुमितिप्रतिबंधकज्ञानविषयत्वात् तथा च पंचैव हेत्वाभासा इत्यनुप
पन्नमित्यभिप्रेत्याशंकते नन्विति एत एवेति पंचैवेत्यर्थः तदन्यतमत्वमिति सव्यभिचाराद्यन्य
तमान्तर्गतत्वमित्यर्थः तस्य उपाधेः अनैवंभूतत्वात् अहेत्वाभासत्वात् अत एव सव्यभि
चाराद्यन्यतमान्तर्गतत्वादिव वस्तुतस्तु सत्यप्युपाधिज्ञाने उपाधिना सव्यभिचाराद्यनुमानेन
व्याप्तिज्ञानप्रतिबंधाभावादनुमित्युत्पत्त्यानुमितिकारणव्याप्तिज्ञानविघटकत्वाभावेन प
रम्परया निरूपकतयानेहेत्वाभासत्वं एवं सिद्धसाधनस्यापि पक्षताविघटकतया न तत्त्व
मिति वादिविजयरूपैककार्यकारित्वसंगत्या हेत्वाभासानंतरमुपाधिं निरूपयति नन्विति
आचार्यमते उपाधिपदं पंकजादिपदवद्योगरूढं उपसमीपवर्त्तिनि स्वीयधर्मानादधार

त॰प्र॰ ९५ नीत्युपाधिरिति योगात्स्वनिष्ठव्याप्तिरूपधर्मसंक्रामकत्वलब्धा साध्यव्याप्यत्वे लब्धे न केवल
साध्यव्यापनामात्रेण दूषकत्वमिति साध्यव्यापकत्वेऽलं विरपि तथा च साध्यसमव्याप्त्येक
घटितमेवोपाधिलक्षणं तत्तेन सम्यक् समव्याप्तस्यैवोपाधित्वे विषमव्याप्तेऽपि व्यभिचारोन्नायक
95 त्वसम्भवतिपक्षोन्नायकत्वादिदूषकतावीजस्य सत्त्वे न तस्याप्युपाधित्वात् तत्राप्याप्यत्वेरिति
साध्यव्याप्यत्वांशमपहाय यत्रदर्थसाध्यव्यापकत्वमात्रघटितलक्षणमाह साध्यव्यापकत्वे सती
ति ननु व्यापकत्वेन दृष्टिष्टात्यन्ताभावाप्रतियोगित्वं तत्प्रतियोगित्वे चाव्यापकत्वं एवं च साध्य
समानाधिकरणात्यन्ताभावाप्रतियोगित्वे सति साधनसमानाधिकरणात्यन्ताभावप्रतियोगित्व
मिति स्यात् न च द्रव्यं सत्त्वादित्यादौ संयोगाद्युपाधावव्याप्तिः व्याप्तेश्च द्रव्यं पृथिवीत्वादित्यादौ
संयोगादौ उभयत्रैव वैयधिकरण्यनिवेशो चातिगौरवं साध्यत्वसाधनत्वयोर्व्यापकत्वव्याप्य
त्वरूपत्वाव्यभिचारिणि तदसंभवश्च साध्यत्वप्रकारकज्ञानविषयत्वसाधनत्वप्रकारकज्ञा
नविषयत्वादिना तयोर्निवेशो भ्रमात्मकज्ञानमादाय प्रसिद्धिसंभवेऽपि यत्र न तादृशो भ्रमस्तत्र ९५

95A

त्रानुपपत्तिर्ज्ञानस्यैकैवेत्यत आह तद्व्यापकत्वं चेति लाघवादभावागर्भं व्यापकत्वमाह तदि
तीतिकश्चित्तत्समानाधिकरणा इति तद्धर्मावच्छिन्नसमानाधिकरणायावन्तो यद्धर्मावच्छि
न्नसमानाधिकरणास्तद्वत्त्वं तद्धर्मावच्छिन्ने तद्धर्मावच्छिन्नव्यापकत्वं अत्र च यावत्पदोपादाने नव
ह्निमान् धूमादित्यादौ साधनाव्यापकस्य रासभादेर्वह्निसमानाधिकरणमहानसत्वादिरूपय
त्किंचिद्धर्मनिष्ठसामानाधिकरण्यनिरूपकत्वेपि न रासभादावतिव्याप्तिः यावत्त्वस्याव्यापक
त्वादन्यस्य दुर्वचनतया तत्समानाधिकरणत्वव्यापकसामानाधिकरण्यनिरूपकत्वमर्थः प
र्य्यवस्यति तदव्यापकत्वं च तत्समानाधिकरणत्वसमानाधिकरणाभावप्रतियोगिसामाना
धिकरण्यनिरूपकत्वं न सर्वस्यापि द्वित्वादिनात्ताद्दशाभावप्रतियोगित्वात्तद्वन्निष्ठाभावप्र
तियोगितानवच्छेदकधर्मवत्त्वं तदर्थो वाच्यः तथा च ताद्दशप्रतियोगितानवच्छेदकप्रमेयत्व
मादायातिप्रसंगवारणाय यद्धर्मावच्छिन्नसमानाधिकरणत्वत्वं तद्धर्मावच्छिन्नसमानाधि
करणत्ववन्निष्ठाभावप्रतियोगितानवच्छेदकं तद्वत्त्वमेव तद्धर्मावच्छिन्नव्यापकत्वं एवम्

न॰ प्र॰
९९

96

व्यापकत्वं तद्धर्मावच्छिन्नसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकसमानाधि
करणत्वत्वं बोध्यं यद्धर्मावच्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितानवच्छेद
कसमानाधिकरणत्वत्वावच्छिन्नसामानाधिकरण्यनिरूपकतावच्छेदकत्वे सति यद्धर्मावर
च्छिन्नसमानाधिकरणधर्मनिष्ठाभावप्रतियोगितावच्छेदकसामानाधिकरण्यत्वावच्छिन्नसा
मानाधिकरण्यनिरूपकतावच्छेदकं यद्रूपं तद्धर्मावच्छिन्नस्तद्धर्मावच्छिन्नसाध्यसमानाधि
करणतद्धर्मावच्छिन्नहेतावुपाधिः गुणकर्मान्यत्वविशिष्टसत्तावान् जातेरित्यत्र विशिष्ट
सत्तायाः सत्तानतिरेकितया सत्त्वावव्यापकतया साध्याव्यापकत्वप्रसंगेन द्रव्यं गुणकर्मान्यत्व
विशिष्टसत्तावानित्यादौ सत्त्वाद्यव्यापकतया साधनाव्यापकत्वप्रसंगे न च संयोगादावव्याप्त्य
तिव्याप्त्योर्वारणाय लक्षणे तद्धर्मावच्छिन्नत्वयद्धर्मावच्छिन्नत्वयोर्निवेशः लक्ष्ये लक्षणं संग
मयति यथेति तत्र आर्द्रेन्धनं तत्समानाधिकरणत्वात् आर्द्रेन्धनसमानाधिकरणत्वात्
धूमसमानाधिकरणमहानसत्वादिनिष्ठाभावाप्रतियोगिसामानाधिकरण्यनिरूपकत्वे ९९

धूमव्यापकत्वमक्षतमिति भावः अयः पिंड इति वह्निसमानाधिकरणो यः पिंडत्वनिष्ठाभाव
प्रतियोगिसामानाधिकरण्यनिरूपकत्वेव वह्न्यव्यापकत्वादिति भावः सद्धेतौ तु वह्निमान्
धूमादित्यादौ तु नैवं वह्निव्यापकः धूमाव्यापकः कश्चिदित्यर्थः ननु पक्षातिरिक्ते साध्यव्याप
कतानां ग्रहादुपाधेर्दूषकत्वं न च महानसादौ तदभावे नैव वह्निव्यापकस्य पर्वते च धूमाव्यापकस्य प
क्षेतरत्वस्यैवोपाधेः संभवात् कथं न तत्रोपाधिरित्यत आह तत्रेति हेतोरिति हेतोः धूमस्य साध्य
व्याप्यत्वात् ननु ततः किमित्यत आह साध्यव्याप्याव्यापकस्येति तथा च पक्षेतरत्वं वह्न्यभाव
व्यापकं वह्निव्याप्यधूमाव्यापकत्वादित्यनेन साध्याव्यापकत्वान्न पक्षेतरत्वमुपाधिः न च धूमो व
ह्न्यव्याप्यः वह्निव्यापकपक्षेतरत्वाव्याप्यत्वादित्यनेन धूमे एव वह्न्यव्याप्यत्वं सिध्यतो व्याप्तिग्रह
स्याभयत्रसत्त्वादिति वाच्यं धूमत्वावच्छिन्ने प्रति वह्नित्वेन हेतुतया कार्यकारणभावरूपानुकूल
तर्कसत्त्वादेव धूमे वह्निव्याप्यत्वसिद्धौ तद्व्यापकत्वेन पक्षेतरत्वे वह्न्यव्यापकत्वनिश्चयादिति भा
वः इदं उक्तोपाधिलक्षणं यथाकाकइति मित्रातनयस्य पक्षत्वे साधनावच्छिन्नसाध्यव्या

त॰प्र॰ ६७ पकपक्षधर्मावच्छिन्नसाध्यव्यापकयोरैक्यप्रसंगेन वक्ष्यमाणदोषासंगतेस्तत्तयोरसंक
रप्रदर्शनायकाकपर्य्यन्तानुधावनं तत्र शाकपाकजत्वं श्यामत्वेति शुद्धश्यामत्वव्यापक
97 मित्यर्थः किंत्विति साधनीभूतमित्रातनयत्वावच्छिन्नश्यामत्वव्यापकमित्यर्थः विवक्षि
तमिति मित्रातनयत्वरूपसाधनावच्छिन्नश्यामत्वव्यापकत्वात् गौरमित्रातनयेऽवृत्ति
त्वेन च मित्रातनयत्वरूपसाधनाव्यापकत्वाच्च शाकपाकजत्वे लक्षणसमन्वयः शुद्धसाध्यव्या
पके चार्द्रेन्धनादौ शुद्धसाध्यव्यापकत्वादेव सुतरां साधनावच्छिन्नसाध्यव्यापकत्वमिति भावः
वायुरिति वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्युक्ते प्रत्यक्षस्पर्शाश्रयत्वरूपसाधनाव
च्छिन्नप्रत्यक्षत्वव्यापकतयाऽव्याप्त्यसंगतिरतः प्रमेयत्वपर्य्यन्तानुधावनं तत्र रूपवत्त्वं ननु शु
द्धसाध्यव्यापकसाधनावच्छिन्नसाध्यव्यापकस्योभयबहिर्भूतस्य तस्योपाधित्वमेवेत्यत आ
ह किंत्विति तथा च साधनावच्छिन्नसाध्यव्यापकस्यैव पक्षधर्मावच्छिन्नसाध्यव्यापकस्यापि व्य
भिचारोन्नायकत्वादि दूषकतावीजसाम्येनोपाधितया तत्राव्याप्तिरिति भावः तद्धर्मेति व ६७

97A

ह्निर्द्रव्यत्वावच्छिन्नप्रत्यक्षवतीत्यर्थः। वह्निष्ठं चात्मान्यत्वं मानसविषयान्यत्वं वा तदव०
च्छिन्नप्रत्यक्षत्वं स्वरूपादावपि तत्र च न रूपसत्त्वमिति द्रव्यत्वनिवेशः द्रव्यत्वावच्छिन्नप्रत्यक्ष
त्वमात्मादावपीति वह्निष्ठनिवेशः यथोक्तस्थले काकः श्यामो मित्रातनयत्वादित्यादौ
तथाविधेति पक्षधर्मीभूतवह्निर्द्रव्यत्वावच्छिन्नेत्यर्थः पक्षे काकादौ ऽसत्त्वादिति इद
मुपलक्षणं प्रागभावो विनाशी प्रमेयत्वादित्यादौ जन्यत्वावच्छिन्नविनाशित्वव्यापकेभाव
त्वोपाधावुदासीनधर्मावच्छिन्नसाध्यव्यापकेऽव्याप्तिरित्यपि द्रष्टव्यं ननु साधनपक्षधर्म
योर्नतत्त्वेन निवेशः किंतु यत्किंचिद्धर्मत्वेनेति नोक्ताव्याप्तिरित्याशंकते तथेति कचि
त्काकः श्यामो मित्रातनयत्वादित्यादौ कचित्तु वायुः प्रत्यक्षः प्रमेयत्वादौ धूमवान्
वह्नेरित्यत्र शुष्कसाध्यव्यापके आर्द्रेन्धनादौ च पक्षधर्मद्रव्यत्वादिकमादाय संगतिः उ
पाधित्वापत्तेरिति तथा च सदनुमानमात्रोच्छेद इति भावः नाद्यश्च वह्निमति महानसान्य
त्वावच्छिन्नवह्निमति पर्वतादौ ऽसत्त्वादिति महानसत्वाभावस्यैत्यादि स्वानधिकर

त.प्र. णेति स्वं उपाधित्वेनाभिमतं धूमवान् वह्नेरित्यादौ स्वं आर्द्रेंधनं तत्तदनधिकरणं यद्धूमा-
९८ धिकरणमयोगोलकं तद्वृत्तिद्रव्यत्वरूपधर्मावच्छिन्नधूमव्यापकत्वादार्द्रेंधने लक्षणसम-
98 न्वयः एवं स श्यामो मित्रातनयत्वादित्यादौ स्वं शाकपाकजत्वं तदनधिकरणं यन्मित्रात-
नयत्वाधिकरणं गौरमित्रातनयः तद्वृत्तिमित्रातनयत्वरूपधर्मावच्छिन्नश्यामत्वव्यापक-
त्वाच्छाकपाकजत्वमुपाधिः वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादित्यादौ स्वमुद्भूतरूपवत्त्वं
तदनधिकरणं यत्प्रत्यक्षस्पर्शाश्रयत्वाधिकरणं वायुस्तद्वृत्तिर्बहिर्द्रव्यत्वरूपधर्मावच्छिन्नप्र-
त्यक्षत्वव्यापकत्वादुद्भूतरूपवत्त्वे लक्षणसंगतिः वह्निमान् धूमादित्यादौ तु महानसत्वाभा-
वो नोपाधिः तत्र हि स्वं महानसत्वाभावस्तदनधिधूमाधिकरणं महानसमेव तद्वृत्तिद्रव्य-
त्वरूपधर्मावच्छिन्नवह्निमति महानस एव तस्यासत्वान्नातिव्याप्तिरिति ध्येयम् ननु द्रव्यं सत्त्वा-
दित्यादौ गुणकर्मान्यत्वविशिष्टसत्वेऽव्याप्तिर्विशिष्टसत्तायाः सत्तानतिरिक्ततया सत्तान-
धिकरणसाधनाधिकरणाप्रसिद्धेः एवं धूमवान् वह्नेरित्यत्रार्द्रेंधनादीनां द्रव्यत्वादिना- ९८

18A

पाधित्वापत्तेश्चेत्यत आह यद्येति स्वपदमुपाधित्वावच्छेदकत्वेनाभिमतपरं इत्थं च विशिष्ट
स्यानतिरिक्तत्वेपि विशिष्टनिरूपिताधिकरणताया अनतिरिक्तत्वात् गुणकर्मान्यत्वविशिष्ट
सत्तात्वावच्छिन्नानधिकरणसत्त्वाधिकरणं गुणादेव प्रसिद्धं तच्छन्नि सत्त्वादिरूपधर्मावच्छि
न्ने द्रव्यत्वादिव्यापकत्वात् गुणकर्मान्यत्वविशिष्टे लक्षणसमन्वयः धूमवान् वह्नेरित्यादौ र
स्वपदेन द्रव्यत्वेनोपादानं तु प्रकृते तत्र द्रव्यत्वावच्छिन्नानधिकरणवृत्त्यधिकरणाप्रसिद्धेः किं वा
र्द्रेंधनत्वादेव न पाचार्द्रेंधनत्वेनैवोपाधित्वं न तु द्रव्यत्वेनेति नोक्तदोषप्रकृतिभावः व्यापकत्व
स्याभावादिघटितत्वेन गुरुतया लघु तदाह तच्चेति तादृशसाध्यव्यापकत्वं चेत्यर्थः धूमवा
न् वह्नेः वायुः प्रत्यक्षः प्रत्यक्षस्पर्शाश्रयत्वादिति सद्धेतोमित्रातनयत्वादित्यादावार्द्रेंधनोद्भू
तरूपशाकपाकजत्वादिरुपाकमंजनं सं गमयति भवति हीत्यादिना वह्निमान् धूमादि
त्यत्र महानसत्वाभावेऽतिप्रसंगं वारयति न चैवमिति सद्धेतोः एवं न च संभवतीत्यन्वयः
सद्धेतोः धूमादेः एवं उक्तधर्मावच्छिन्नाक्रांतः कश्चिदिति उपाधिर्न संभवतीत्यर्थः नदे

त॰प्र॰
९९
99

बाह नहीति वह्निमान् धूमादित्यादौ पर्वतेतरत्वानधिकरणधूमवत्पर्वतादिनिष्ठद्रव्यत्वा
दिरूपधर्मावच्छिन्नवह्निसमानाधिकरणः पर्वतत्वाद्यापितेन पर्वतेतरत्वत्वावच्छिन्नस
मानाधिकरणोऽतिपर्वतेतरत्वेऽतिव्याप्तिरित्याह अत एवेति नाधश्च धर्मावच्छिन्नसाध्यव्या
पकत्वाभावादेवेत्यर्थः तदेवाह पक्षेति धर्मे पर्वतत्वादौ तत्सामानाधिकरण्याभावा
त् पर्वतेतरत्वसामानाधिकरण्याभावात् वह्निरनुष्णः कृतकत्वादित्यादौ पक्षे बाधेन
साध्यव्यापकतया प्रमिते वह्नीतरत्वादौ बाधोन्नीतत्वात्संग्रहः सममेवेति ह्यदयं उपाधेर्दू
षकतावीजं व्यभिचारोन्नायकत्वं सत्प्रतिपक्षोन्नायकत्वं वा तथाहि धूमवान् वह्नेरित्य
त्र वह्निर्धूमव्यभिचारी धूमव्यापकार्द्रेन्धनव्यभिचारित्वात् व्यापकव्यभिचारित्वे व्याप्यव्य
भिचारित्वावश्यकत्वात् एवं वह्निमदयोगोलकं धूमाभाववत् आर्द्रेन्धनाभावात् व्याप
काभावे व्याप्याभावावश्यंभावात् इति व्यभिचारोन्नायकत्वे न सत्प्रतिपक्षोन्नायकत्वेन
वाऽऽर्द्रेन्धनस्योपाधित्वं न च यथा हेतोः साध्यव्यापकोपाधिव्यभिचारेण साध्यव्यभि ९९

11A

वारः साधनीयस्तथा साध्यव्याप्यहेत्वव्यापकतयोपाधेः साध्याव्यापकत्वमपि सेत्स्यति विनि
गमनाविरहात् व्याप्तिग्राहकस्य चोभयत्रापि साम्यादिति वाच्यं अनुकूलतर्कादिनोपाधेः
साध्यव्यापकतानिश्चयेन एवोपाधेर्दूषकताबीजमिति न चिंतनमित्यभिसंधायाह संक्षेप इति
स्वार्थपरार्थभेदेनानुमानं द्विधा तत्र स्वयं धूमाद्ग्निमनुमाय वह्न्यर्थं यत्र प्रवर्त्तते तत्स्वार्था
नुमानं यत्र तु स्वयं वह्निमनुमाय वह्न्यर्थिपरप्रतिपत्त्यर्थं वाक्यं प्रयुंक्ते तत्परार्थानुमानं तत्र
स्वार्थानुमानं सुगमत्वादुपेक्ष्य परार्थानुमानप्रकारमेवाह तच्चानुमानमिति ननु पक्षध
र्मत्वं सपक्षे सत्त्वं विपक्षाद्व्यावृत्तिरबाधितविषयत्वमसत्प्रतिपक्षत्वं चेत्यादिपंचरूपोपपन्न
लिंगप्रतिपादकवाक्यत्वं न्यायत्वं पंचरूपोपपन्नो धूम इति वाक्ये निव्याप्तेरतो न्यायत्वं नि
र्वक्ति न्यायश्चेति धूमात्पर्वतो वह्निमानित्यादिव्युत्क्रमोक्तप्रतिज्ञादिसमुदायेऽतिव्याप्ति
वारणाय क्रमिकेति कमकसंप्रदायाविरुद्धेत्यर्थः न्यायत्वं पंचसु पर्याप्तमिति सूचना

त०प्र०
१००
100

यसमुदाय इति तेन पंचमस्य हेतोनैव समुदाये लक्ष्ये कृते समुदायस्य न्यूनत्वेनेति दूषणमन
नवकाशं तथा चायं तस्मात्तथेत्युपनयनिगमने प्राचां नवीनमते नाह वह्निव्याप्येत्या
दि प्रतिज्ञात्वाद्यज्ञाने तद्घटितन्यायत्वाज्ञानात् परार्थानुमानासंभव इति प्रतिज्ञात्वा
दि लक्षयति तत्रेति तेषु प्रतिज्ञादिषु मध्ये इत्यर्थः तत्र संकेतादित्यर्थ इति कश्चित् तन्न
पर्वतो वह्निमानित्युदासीनवाक्येति व्याप्तिवारणाय न्यायघटकेति पर्वतो वह्निमानालो
कादित्यन्यायांतरघटकप्रतिज्ञायाः पर्वतो वह्निमान् धूमादिति न्यायघटकप्रतिज्ञा
त्वापत्तिवारणाय एतन्न्यायेति अवयवेति अवयवविभाजकाः पंचोपाधयः प्रतिज्ञा
त्वहेतुत्वोदाहरणत्वोपनयत्वनिगमनत्वभेदात् तत्र यथायोग्यं लक्षणान्यवसेयानि
पक्षे साध्यनिर्देशः प्रतिज्ञेति सूत्रं पक्षविशेष्यकसाध्यप्रकारकज्ञानजनकवाक्यं प्र
तिज्ञेत्यर्थकं तच्च पर्वतो वह्निमानित्युदासीनवाक्ये ऽतिप्रसक्तमिति तन्नेत्याह किंतु ए १००

100A

तद्धूमादिति अत्रोदासीनवाक्येऽतिव्याप्तिवारणाय न्यायघटकेति तद्धूमाभावोक्रमेत्तदिति
एतन्न्यायघटकात्तद्धूमादिति शब्दस्तद्घटीत्यर्थः एवमग्रेपि ताद्यप्रोति अवयवविभाजके
त्यर्थः प्रतिज्ञादिलक्षणघटकीभूतमवयवत्वं निर्वक्ति अवयवत्वं चेति अत्रैव प्राचीन
सम्मतमाह उक्तं चेति ननु प्रतिज्ञाद्यन्यतमत्वं प्रतिज्ञाभिन्नत्वे सति हेत्वादिभिन्नेयत्तद
द्भिन्नत्वं अत्र च प्रतिज्ञात्वं पर्वतो वह्निमानिति भागयोः प्रत्येकं पर्याप्तं व्यासज्यवृत्तिर्वा आ
द्ये प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदस्य तद्घटके सत्त्वेन प्रतिज्ञैकदेशेऽतिव्याप्तिः द्विती
ये प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदस्य प्रत्येकं पर्वतो वह्निमानिति भागयोः सत्त्वेन प्र
तिज्ञाभिन्नत्वाद्युभयभागघटकभेदस्य च प्रतिज्ञायामसंभव इति चेन्न प्रतिज्ञात्वाद्यवच्छि
न्नप्रतियोगिताकभेदाधिकरणतावच्छेदकं यत्तदवच्छिन्नप्रतियोगिताकभेदाधिकरणता
वच्छेदकं यत्तदवच्छिन्नत्वस्य विवक्षितत्वात् प्रतिज्ञात्वस्य व्यासज्यवृत्तित्वोपगमेन प्रति
ज्ञैकदेशे प्रतिज्ञात्वावच्छिन्नप्रतियोगिताकभेदसत्वात् प्रतिज्ञात्वावच्छिन्नप्रतियोगिता

कभेदाधिकरणतावच्छेदकं पर्वत इति भागत्वं तदवच्छिन्नप्रतियोगिताकभेदाधिकरणता
वच्छेदकं च प्रतिज्ञात्वं प्रतिज्ञान प्रतिज्ञैकदेश इति प्रतीतेः व्यासज्यवृत्त्यधिकरणता॰
कभेदाभ्युपगमात् प्रतिज्ञाहेतुसमुदायो न प्रतिज्ञेति प्रतीतेः प्रतिज्ञाहेतुसमुदाये प्र
तिज्ञाभेदसत्त्वात् न प्रतिज्ञाहेतुसमुदायेप्यतिव्याप्तिः व्यासज्यवृत्त्यधिकरणताकभे
दानंगीकारे तु प्रतिज्ञात्वाद्यवच्छिन्नाधिकरणताकभेदे पंचकाधिकरणतानवच्छेदकत्वे
सति प्रतिज्ञात्वाद्यवच्छिन्नाधिकरणताकभेदप्रतियोगितावच्छेदकं यत्तदवच्छिन्नभेदा॰
धिकरणतावच्छेदकं यत्तदवच्छिन्नत्वमर्थोवसेयः प्रतिज्ञैकदेशवारणाय सत्यंतनिवे॰
शः पर्वतो वह्निमानिति भागयोः प्रत्येकं प्रतिज्ञाभेदसत्त्वेन तादृशभागत्वस्य प्रतिज्ञा॰
त्वावच्छिन्नप्रतियोगिताकभेदाधिकरणतावच्छेदकत्वात् व्यासज्यवृत्त्यधिकरणताक
भेदानभ्युपगमात् प्रतिज्ञाहेतुसमुदाये प्रतिज्ञाभेदासत्त्वेन प्रतिज्ञाहेतुसमुदायेऽति
व्याप्तिवारणाय विशेष्यदलनिवेशः ननु प्रतिज्ञायां प्रतिज्ञाहेतुसमुदायभेदसत्त्वेन तादृ

101A

शाभेदप्रतियोगितावच्छेदकं तावच्छासमुदायत्वं तदवच्छिन्नभेदस्य चैतादृशसमुदायेऽसत्त्वेना
तिव्याप्तिविरहादिति प्रतिज्ञादीनां न्यायघटकघटितत्वाच्च नोदासीनेऽतिव्याप्तिरिति ध्येयम्
मतत्त्वं च प्रतिज्ञादिवाक्यैः खण्डवाक्यार्थबोधस्ततो वाक्यैकवाक्यतया न्यायरूपमहावाक्यार्थबो
धः अवांतरवाक्यार्थज्ञानस्य समस्तवाक्यार्थज्ञानहेतुत्वात् तथा च वह्निसंबंध्यभिन्नः प
र्वतो धूमीयज्ञानज्ञाप्यत्वं वीप्सायास्तात्पर्यग्राहकतया वह्निपदस्य धूमव्यापकवह्निल
क्षणया धूमसंबंध्यभिन्नो धूमव्यापकवह्निसंबंध्यभिन्न इत्युदाहरणार्थबोधः वह्निव्याप्य
धूमसंबंध्यभिन्नः पर्वतः वह्निव्याप्यवत्त्वनिधूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्न इति प्रत्येकं बो
धः ततश्च धूमज्ञानज्ञाप्यवह्निसंबंध्यभिन्नपर्वताभिन्नधूमव्यापकवह्निसंबंध्यभिन्नधूम
संबंध्यभिन्नवह्निव्याप्यधूमसंबंध्यभिन्नः पर्वतो वह्निव्याप्यवत्त्वनिधूमज्ञानज्ञाप्यवह्नि
संबंध्यभिन्न इति वाक्यैकवाक्यतया न्यायार्थबोधः ततो न्यायार्थज्ञानसहकृतमनसा धू
मवानयं वह्निमानिति धूमविशिष्टवह्निवैशिष्ट्यमिति स्यायेन मानसं ज्ञानं जन्यते तेन

त॰प्र॰ १०२ 102

चपरामर्शोत्पद्यते ततः परस्मादनुमितिः नच न्यायार्थज्ञाने नाहत्येव परामर्शोत्पा
द्यतां कुतमंतरा विशिष्टवैशिष्ट्यावगाहिज्ञानजनने तिवाच्यं तस्य वादिवाक्यजन्यत्वे
नानाप्तोक्तत्वादप्रामाण्यशंकाकलंकितत्वेनानुमित्युपधायकपरामर्शानुत्पादकत्वा
त् अन्यथाऽप्तवाक्यादिवन्यायजन्यज्ञानादेवानुमितिस्वीकारापत्तेः तथाच न्यायज
न्यज्ञानेन तन्तत्पदार्थोपस्थापने सति धूमविशिष्टे वह्निवैशिष्ट्यमिति मानसपरिच्छेदा
नंतरं परामर्शोत्पाद इत्यंगीकरणीयं अत एव चिंतामणिकारेणानुमितिचरमकारण
लिंगपरामर्शप्रयोजकशाब्दज्ञानजनकवाक्यत्वं न्यायत्वं तादृशशाब्दज्ञानजनकशाब्द
ज्ञानजनकवाक्यत्वमवयवत्वमिति लक्षणमुपन्यस्तं तथापि समयसम्बंधादिना वि
प्रतिपन्नेर। यद्यपि विप्रतिपत्तेः पक्षपरिग्रहे हेत्वभिधानस्याकांक्षितत्वेन प्रथमहेत्वभि
धानमेवोचितमिति प्रतिज्ञानन्यायांगं तथापि समयसंबंधादिना विप्रतिपन्नेरं तद
नत्वेन हेतुवाक्यस्य निष्प्रतियोगिकान्वयबोधासमर्थत्वात्प्रतिज्ञान्यायांगं पर्वतो १०२

102A

वह्निमान् कुत इत्याकांक्षायां प्रतिज्ञानंतरं हेतूपन्यासः अत्र पर्वतो वह्निमानिति प्रतिज्ञा
यां ज्ञानविषयवह्निलक्षणा धूमादित्यत्र हेतुत्वं पंचम्यर्थः तस्य निरूपकतया प्रतिज्ञैक
देशार्थज्ञानेऽन्वयः ज्ञायमानलिंगस्यानुमानत्वनये धूमपदं यथाश्रुतमेव लिंग
ज्ञानस्यानुमानत्वनये धूमपदस्य धूमज्ञानमर्थः एवं च धूमज्ञानजन्यज्ञानविषयव
ह्निमानिति वाक्यैकवाक्यतया प्रतिज्ञाहेतुभ्यामन्वयबोध इति केचित् केचित्तु प्रति
ज्ञायां ज्ञाने न लक्षणा प्रथममनाकांक्षितत्वात् किंतु धूमपदस्य धूमज्ञाने पंचम्याश्च
ज्ञाप्यत्वे लक्षणा तद्विभक्तावपि लक्षणास्वीकारादित्याहुः एतन्मते च सार्वलाक्षणि
कस्थलेऽन्वयबोधानंगीकारेण सिद्धांतविरोधः वस्तुतस्तु पंचम्या ज्ञानज्ञाप्यत्वमर्थः धू
मस्य च ज्ञानेऽन्वयः संबंधिकस्थले एकदेशेऽप्यन्वयस्वीकारादित्यलमप्रकृतविचारेण
कथमस्यागमकत्वं व्याप्तिपक्षधर्मतया चेति तत्र व्याप्तिप्रदर्शनायोदाहरणप्रसंगः त
त्र प्रथमयत्पदेन पक्षोध्याने द्वितीययत्पदेन तदन्यपक्षोध्याने एवं च धूमवन्महानसं वह्नि

त॰प्र॰
१०३
103

मत् धूमवान् महानसान्यच्च धूमवत् वह्निमदिति बोधे यावत्साधनाश्रयाश्रितसा
ध्यसंबंधरूपा व्याप्तिरुदाहरणे न प्रदर्श्यते तत्र च यत्पदघटितवीप्सा न तु तत्पदे पि विरू
पोपस्थितयोरपि एकेन तत्पदेन परामर्शसंभवात् सर्वनाम्नो बुद्धिस्थवाचकत्वादिति
अत एव यद्यत्साध्यं प्रतिजहि जगन्नाथ नम्रस्य तन्मे इत्युक्तं ननु संचारिणी दीपशिखे
व रात्रौ यं यं व्यतीयाय पतिंवरा सा नरेन्द्रमार्गाट्ट इव प्रपेदे सो सा हि यानम्रमुखी बभूव वि
वर्णभावं स स भूमिपाल इत्यत्र सा सा हि यानम्रमुखी बभूवेत्यादौ चक्कथं न हि तत्पदे वीप्से
ति चेत् यत्र प्रत्येकपदयोरावश्यापि तं प्रत्येकरूपेणैव तत्पदेन परामर्श इति तत्र तत्पदे वी
प्सा यथा स स भूमिपाल इत्यादौ यत्र तु सामान्यरूपेणैव तत्र न तत्पदे वीप्सा यथा यद्यत्सा
ध्यं प्रतिजही त्यादाविति न कश्चिद्दोषः वस्तुतस्तु व्यापकसामानाधिकरण्यरूपव्याप्ति
बोधकत्वमुदाहरणस्य यदा पि विधया वा क्वापि विधया वा न संभवतीति वह्निपदस्य धूम
व्यापकवह्निलक्षणा वीप्सा च तात्पर्यग्राहिका यत्पदसमभिव्याहृततत्पदार्थतावच्छेदक १२

103A

व्यापकत्वं विधेये भासते तत्र तत्पदेन वीप्सा यथा यो यो धूमवान्सोऽग्निमानित्यत्र यत्प
दसमभिव्याहृततद्धूमवत्पदार्थतावच्छेदकीभूतधूमव्यापकत्वं विधेये वह्नौ भासते यत्र
तु यत्पदसमभिव्याहृततत्पदार्थतावच्छेदकधर्मसामानाधिकरण्यं विधेये भासते तत्र न
त्वेष वीप्सा यथा स स भूमिपाल इत्यादौ सा सा हि या न म्रमुखी बभूवेत्यादौ च तत्र यत्प
दसमभिव्याहृततत्पदार्थतावच्छेदकीभूतभूमिपालत्वकान्तरालीत्वव्यापकत्वस्य विवरणी
भावनम्रमुखीत्वरूपविधेये बोधादन्वयासंभवेन भूमिपालत्वकान्तरालीत्वादिसा
मानाधिकरण्यमेव विधेये भानमावश्यकमिति तत्र तत्पदेऽपि वीप्सेति रहस्यं उदाहर
णान्तरं पक्षधर्मताप्रदर्शनायोपयोगः विशिष्टपरामर्शस्यानुमितिहेतुत्वव्यवस्था
पनेनोदाहरणान्तरावन्याप्रयोग इति मीमांसकमतं निरस्तं बोध्यं उदाहरणोपनयस्त
पमक्ष पक्षद्वयमिति बौद्धमतमप्यसमंजसं कथायामाकांक्षाक्रमेणैवाभिधानात् प्र
तिज्ञाहेतूपन्यासस्यावश्यकत्वात् धूमादित्येव प्रयोगो न तु धूमवत्त्वादिति मन्तुघोष्यर्थ

१०४ त्वादिति येमन्यंते तेषां मते अत्र वह्निव्याप्यो धूम इत्येवोपनयः स्यात् ननु वह्निव्याप्य धूम
वानिति मनुपो व्यर्थत्वादित्यवधेयम् अबाधितत्वासत्प्रतिपक्षितत्वबोधनाय निगमन
104 प्रयोगः नच बाधाभावस्येतरभावव्याप्यवत्ताज्ञानस्य भावस्य वा हेतुत्वेन तत्ज्ञानस्येति किं तद्
बोधनेनेति वाच्यं यदवगमे सति यत्र भवति तन्नरभाववज्ज्ञानसाध्यमिति नियमेन तज्ज्ञान
स्याहेतुत्वात् नच घटाभावज्ञाने घटप्रत्यक्षानुदयेन तत्रापि घटाभावाभावज्ञानस्य कार
णत्वापत्तिरिति निरितिवाच्यं परोक्षज्ञाने नादृशनियमाभ्युपगमात् अत्र केचित् पक्षे साध्या
भावो बाधः तदभाववत्त्वसाध्यमेवेति पक्षे साध्यवत्ताज्ञानमनुमितिहेतुरित्यायातं तथा च सिद्ध
साधनं यदि च पक्षे साध्याभावप्रमा बाधस्तस्यापि तदभाववज्ज्ञानस्य विना पक्षे साध्यनिश्चयम
संभवितया सिद्धसाधनतादवस्थ्यादिति यदवगमे सति यन्न भवति तदभावज्ञाने सत्येव भव
त्येवेति बाधाभाववज्ज्ञाने सति बाधज्ञानानुदयेन बाधज्ञानप्रतिबंधाभिप्रायेणाबाधितत्वादिति
बोधनं नतु ज्ञानस्य हेतुत्वाभिप्रायेणेति वदंति केचित्तु अनुमितिप्रमायां गुणानुरोधेन योग्यत १०४

104A

ताव संशयनिश्चयसाधारणमबाधितत्वादिज्ञानमनुमितिहेतुरित्याहुः ननु तथापि निगमने
न कथमबाधितत्वादिबोधनं अपदार्थत्वादवाक्यार्थत्वादिति न वाच्यं नस्माद्वह्निमानित्यस्मात्स्वाद
त्वेन प्रयोजनजिज्ञासायामबाधितत्वादिज्ञानमेव प्रयोजनं तया वसीयते तद्बोधश्च लक्षणया य
दि च मानसबोधादिनानान्यथानिर्वाहे लक्षणाकल्पनमन्याय्यं यथा धूमोस्तीति वाक्यस्य वह्निपर
स्याप्यानुमानिकवह्निबोधमादाय तात्पर्यनिर्वाहस्तथा प्रकृतेपीति विभाव्यते तदा मानस एव
तद्बोध इति रहस्यमत्रानुसंधेयम् किंचिज्जल्पितमत्र न यदुत्तरं कृत्वा हृदि ध्याय तां दोषेरा
वृतमस्ति युक्तिनिवहं वाक्यमदीयं बुधाः चेद्द्रुः किं न फलं किनो पि भवति श्लाघ्यो ग्रगण्यः स
तां बालत्वं यदि नत्र हेतुरधुनाबालीयमेतद्वचः ॥ ॥ इति श्रीदीक्षितश्रीकेशवशर्मविर
चितायां न्यायसिद्धांतमंजरीदीपिकायामनुमानपरिच्छेदः समाप्तः ॥ ॥ श्रीगणेशाय न
मः अनुमाननिरूपणेनानुमाने जिज्ञासानिवृत्ताववश्यवक्तव्यत्वमुपमाने स्तीत्यवसरसंग
त्योपमानं निरूपयते अथेति लक्षणस्वरूपप्रामाण्यादिभिर्निरूप्यते निरूपणप्रतिज्ञा च

बृहत्तर्कप्रकाशिका

त॰प्र॰ शिष्यावधानायैव तत्र उपमानेन निरूपणीये अत्रोपमितिकरणत्वं लक्षणं लक्ष्यतावच्छे
१०५ दकं चोपमानपदवाच्यत्वं यद्यप्येकत्रोपाधिरूपेणान्यत्र च स्वरूपेणोपमितित्वस्य निवेशान्ना
भेदः अत एवोपमितित्वस्य द्वैविध्येनोत्कीर्त्तनं ननूपमितित्वस्यैवोपमितिलक्षणत्वे लक्ष्य
105 लक्ष्यतावच्छेदकयोरभेदापत्तिरत उपाधिरूपेणापि तदाह शब्देति अनुमित्यादीत्यादिपदाच्छ
ब्दादिपरिग्रहः वह्निमानित्यादीति विशिष्योत्कीर्त्तनेन गगनं शब्दवदित्यादौ शब्दविषय
कत्वसामानाधिकरण्यं सूचितं अत एव शब्दविषयकत्वसमानाधिकरणजातिमदित्युक्तौ
अनुमितित्वशाब्दत्वादेरपि तथात्वात्तद्वारणायाव्यभिचारीति व्याप्यत्वार्थकं गगनं शब्दव
दित्यनुमितिवृत्तितद्व्यक्तित्वस्य शब्दविषयकत्वव्याप्यत्वात्तदादायातिव्याप्त्या धर्मपदं विहा
यजातीति श्रावणेति श्रावणप्रत्यक्षस्य शब्दविषयकत्वावश्यंभावेन श्रावणत्वस्य नाद्य
प्राप्तातिव्याप्तिरिति भावः ननु परोक्षत्वमिंद्रियजन्यज्ञानभिन्नज्ञानत्वं तथाचासंभवः ज्ञा
नमात्रस्य मनोरूपेंद्रियजन्यतयोपमितेरपि परोक्षत्वाभावादित्यत आह प्रत्यक्षान्यपरमि १०५

105A

ति तथाचन मयोक्तं पदार्थत्वे येनासंभवः स्यादिति भावः ननु कीदृश्योः औषधीज्वरहंत्रीमिष

वेमुद्गपर्णीसदृश्योरौषधीज्वरहंत्रीत्युक्तरितेज्वरहरणतादृश्योरौषध्योः कार्यकारणभावउपमान

नेनावधार्य्यते एवं चेदृशास्थले उपमितेः शब्दविषयकत्वाभावान्नोपमितिशब्दविषयकत्व

व्यभिचारिणीजातिः तथाचासंभवइत्याशंकते नन्विति उपमितिर्हीति शक्तिपरिच्छित्तिर्दे

वसुपमानफले ज्वरहरणौषध्योः कार्यकारणभावस्त्वनुमानेनावधार्य्यते एवेति शब्दविष

यकत्वव्याप्यत्वमुपमितित्वस्याक्षतमितिनासंभवइतिभावः अतिदेशवाक्यार्थज्ञानंकर

णं सादृश्यज्ञानंसहकारि अतिदेशवाक्यार्थस्मृतिर्व्यापारः उपमितिः फलमितिसंप्रदार

यमतंवक्ष्यति आवश्यकत्वात्सादृश्यज्ञानंकरणं अतिदेशवाक्यार्थस्मृतिर्व्यापार उ

पमितिः फलमितिनवीनमतेनाह सादृश्यज्ञानादिति तथाचसादृश्यज्ञानंकरण

मितिभावः प्रत्यक्षादावंतर्भावासंभवात्परिशेषेणतस्यातिरिक्तत्वंव्यवस्थापयितुंप्रमा

न०प्र० त्तीमारभ्भते नद्येतनदिति प्रत्यक्षमिति यद्यपिप्रत्यक्षसामान्यमध्ये मानसमपिनिविष्टमेव
१०६ इत्यंच मानसमितिपदमगुपन्यासोऽयुक्तस्तथापि न व्यापारविरहे विजायमानत्वादिति
106 हेत्वनुपपत्त्याऽपत्थ्याद्यानसंनिराकृतं गोवलीवर्द्दन्यायेन चात्र प्रत्यक्षपदं मानसान्यपरं
मितिध्येयम् ततः मानसादनुभूयमानत्वात् उपमित्यनंतरमुपमिनोमीत्यनुव्यवसा
योदयान्मानसानंतरं चतादृशप्रतीत्यनुदयान्न मानसत्वं तस्यादित्यर्थः अनुभवानाद
रेत्वाह अन्यथेति अनुभवानादरे इत्यर्थः अनुमिनोमीत्यनुव्यवसायस्य मानसानंत
रानुदयेनानुमितेरतिरिक्तत्वसिद्धिः अनुभवापलापेतु नस्यात्त्रय्यतिरिक्तत्वं विलीयि
तेतिभावः व्याप्तिज्ञानादीत्यादिपदात्पक्षधर्मताज्ञानपरिग्रहः पदानामिति शाब्दबोधस
मान्ये पदजन्यपदार्थोपस्थितेर्हेतुतया तच्छून्यकाले चोपमिन्नुनु त्वत्स्यानोपमिते स्तद्रूपत्व
मितिभावः ननुगोसदृशो गवयपदवाच्य इत्याकारकं सोसाधयमाश्रये गवयपद वाच्यता १०६

106A

वगाहित्वानमुपमानं ततश्च गोसादृश्यावच्छिन्ने गवयपदवाच्यत्वावगाहिनी उपमितिरुत्प
द्यते तत्र च गवयत्वविशिष्टोपस्थापकपदाभावेपि गोसादृश्योपस्थापकपदसत्वात् एवाद्
त्वेबाधकाभावइत्यत उपमित्याकारं परिछिनत्ति उपमिनावितिं अयमिति गवयइत्यर्थः
यथाश्रुते त्वयमिति निर्देशत्वावच्छेदेन गवयपदवाच्यत्वावगाहित्वे गवयत्वावच्छेदेन गवयपद
वाच्यत्वावगाहनादिन्युक्तिविरोधात् अन्यथा अप्रतीतमूलत्वअघटापत्तेरितिदोषानुद्धाराच्च
नन्विति ननु गोसादृश्यावच्छेदेन गवयपदवाच्यत्वावगाहिनमितिविभक्तिपरिणामेना
न्वयः तस्य गोसादृश्यस्य गोरवेण गवयत्वापेक्षया गोरवेण तदनवच्छेदकत्वात् गवय
पदवाच्यत्वानवच्छेदकत्वात् ननु गोसदृशो गवयपदवाच्य इत्यत्र गवयत्वस्यावच्छेदकत्वे
नैव च्छेदेन गवयपदवाच्यत्वस्याप्रतीत्या तदुपपत्तयेप्रमित्यंतरं स्वीकरणीयमिति महद्गौरवमि
ति तदपेक्षया गोसादृश्यस्य गवयत्वापेक्षया गुरुत्वेप्यवच्छेदककत्व कल्पनं न्याय्यं धर्मिकल्पर
नातो धर्मकल्पनायालघीयस्त्वमिति न्यायादित्यत आह अन्यथेति गोसादृश्यावच्छेदेन

कत्वमंगीकृत्यप्रमांतराकल्पनेइत्यर्थः व्यवहारः शाब्दबोधः शब्दप्रयोगोवा नप्रतीतंमूलं
यास्त्रियस्येत्यर्थः शक्तिज्ञानामूलकमेवस्यादितियावत् गोसादृश्यावच्छेदेनगवयपदवाच्यता
वगाहनात् अतिदेशवाक्यार्थज्ञानोत्तरोत्पन्नज्ञानाद्गवयइतिपदाच्छाब्दबोधोऽनुभवसिद्ध
इतिविलीयेत तत्प्रकारकशाब्दबोधेतत्प्रकारकशक्तिग्रहस्यैवहेतुतयागवयपदवाच्यत्वप्रका
रकशक्तिग्रहाभावात् एवंव्यवहारंप्रतिव्यवहर्तव्यज्ञानस्यहेतुतयातादृशशाब्दबोधा
भावात् तदुत्तरंतादृशव्यवहारानुपपत्तिश्चेतिगवयत्वावच्छेदेनैवगवयपदवाच्यत्वावगा
हिज्ञानमुपेयमिति तच्चगवयत्वविशिष्टोपस्थापकपदाभावान्नशाब्दात्मकंभवितुं एतेन
शब्दत्वनिराकरणप्रस्तावेगवयपदवाच्यतावच्छेदकत्वंगवयत्वस्यगोसादृश्यस्यवेतिविचार
स्यप्रकृतानुपयोगित्वं अतिदेशमित्याकारप्रदर्शनस्योचित्यादित्यपास्तं उक्तव्याख्ययैव
सर्वसामंजस्यादितिध्येयं नापिस्मृतिरित्याह नवेति अनुभवागोचरस्यस्मृत्यगोचरत्वा
दितिभावः अतः अस्मात्प्रत्यक्षादिष्वंतर्भावासंभवात् अतिरिक्तैव अनुमित्यादिभ्योऽति १०७

107A

रिक्तैव दृयं अयंगवयपदवाच्यइतिप्रतीतिः अयंगवयपदवाच्यइतिप्रतीतिः प्रत्यक्षादि॰
भ्योभिन्नेनेतद्विरुद्धधर्मवत्वादित्यनुमानेनबोध्यं संप्रदायमतमाह तस्याःकरणमिति सादृ
श्यविशिष्टे सादृश्याश्रये गोसदृशोगवयपदवाच्यइतिवाक्यार्थानुभवइत्यर्थः तत्स्मृ॰
तिः तादृशवाक्यार्थस्मृतिः द्वारं व्यापारः गवयत्वेति अयंगोसदृशइत्याकारकसा
दृश्यनिश्चयः अतिदेशवाक्यार्थानुभवरूपोपमानसहकारीत्यर्थः ननुसादृश्यकरण
कज्ञानवद्वैधर्म्यकरणकज्ञानस्याप्यतिरिक्तत्वापत्तिरित्यतआह तत्त्वेति ननु सादृश्य
ज्ञानं वैधर्म्यज्ञानजन्योपमितिं व्युत्पादयति यथेति तच्छब्दार्थेति जलादिविधर्मगु
णवतीपृथ्वीतिगुरुवाक्यार्थस्मरणादित्यर्थः एवंगंधवतीति पूर्वंजलादिविधर्मगुण
त्वेनेदानींतुगुणत्वेनेतिभेदः इत्युन्नेतिइति गुरुणाइत्युन्नेतइत्यर्थः ननुवैधर्म्यज्ञा
नजन्यज्ञानस्योपमितित्वस्वीकारेसादृश्यवैधर्म्यज्ञानयोःपरस्परजन्योपमितौव्यभिचा

त.प्र. रेणकथं कारणत्वसंभवइत्यतआह तस्मादिति सादृश्यज्ञानजन्योपमितेरेववैधर्म्यज्ञान
१०८ जन्योपमितेरप्यनुभवसिद्धतयाऽपलापानर्हत्वादित्यर्थः यत्किंचिदिति सादृश्यवैधर्म्य
108 विशिष्टान्यतरविशिष्टइत्यर्थः विशिष्य विशेषधर्मपुरस्कारेण अपरिचितइति अ
निर्णीतशक्तिकपदवाच्यत्वरूपइत्यर्थः गवयपदवाच्यं किंचिदस्तीति सामान्यतः शक्ति
निर्णयाद्विशिष्येत्युक्तं अतएव सामान्यधर्मप्रकारकत्वा तस्यावांतरधर्मप्रकारकजिज्ञा
सोत्पत्तिरिति तत्तया विशेषधर्मप्रकारकजिज्ञासाबोधकः कीदृग्गवयइति प्रश्नोप्युपपद्य
तइति बोध्यं करणमिति उपमितिसामान्ये सादृश्यवैधर्म्यान्यतरधर्मितावच्छेदकक
विशिष्यानिर्णीतशक्यतावच्छेदकपदवाच्यत्वरूपवाक्यार्थानुभवः करणमित्यर्थः २
विसंधवोप्युपमितिप्रसंगइत्यतआह किंचिद्धर्मविशिष्टेति गवयत्वादिरूपधर्मविशि
ष्टइत्यर्थः तद्वत्ताधीरिति यद्विशिष्टपदवाच्यत्वानुभवस्तद्वत्ताधीरित्यर्थः गवयत्वा १०८

108A

द्विविशिष्टसादृश्यादिधीरितियावत् नन्वेकधर्मविशिष्टसादृश्यज्ञानेधर्मान्तरविशि
ष्टेपदवाच्यत्वावगाह्युपमित्यनुदयात् तद्धर्मावच्छेदेन सादृश्यज्ञानेतद्धर्मावच्छेदेनैव
पदवाच्यत्वावगाहिनीउपमितिरित्युपेयं एवंचगवयत्वादिरूपलघुधर्मानुपस्थितौ
यदागुरुधर्मविशिष्टएवसादृश्यज्ञानंतदातदवच्छेदेनैवपदवाच्यत्वावगाहिनीस्या
दित्यत्रेष्टापत्तिमाह यदावेति लघुधर्मे गवयत्वादिरूपज्ञातौ गुरुधर्मेति विलक्ष
णसंस्थानत्वरूपगुरुधर्मविशिष्टेत्यर्थः सादृश्यादीत्यादिपदाद्वैधर्म्यपरिग्रहः त
दवच्छेदेनैव विलक्षणसंस्थानत्वरूपगुरुधर्मावच्छेदेनैववाच्यताग्रहः गवयपद
वाच्यताग्रहः सः गुरुधर्मविशिष्टेपदवाच्यताग्रहः बाधादिति लघुधर्मोपस्थितौ
लघुधर्मेशक्यतावच्छेदके संभवति गुरुधर्मे तत्स्वीकारस्यान्याय्यतयालघुधर्मविशि
ष्टएवपदवाच्यत्वावगाहिज्ञानमुत्पद्यते गुरुधर्मविशिष्टविषयकज्ञानेतत्प्रामाण्यपर

त॰प्र॰
१०९
109

ज्ञानंनतरं तंतरं जायत इति भावः कोचित्तु लघुधर्मी नुपस्थितौ गोसादृश्याद्यवच्छेदे
नापि पदवाच्यत्वावगाहनात् सादृश्यं पगौरवेणानवच्छेदकमित्युक्तयुक्तिकमित्य
त आह यद्वेति गुरुधर्मविशिष्टे सादृश्यादिधर्मविशिष्टे तदवच्छेदेनैव सादृ
श्यावच्छेदेनैवेति यथेइति व्याचक्षते तदसत् गुरुधर्मविशिष्ट एव सादृश्यज्ञानं जायते इ
त्यस्यासंगतत्वापत्तेः गोसदृशो गोसदृश इति सादृश्यज्ञानस्यासंभावितत्वादिति दि
क् ननु संभवत्येवं यद्यनुमानस्य प्रामाण्यं अनुमानाधीनशक्तिग्रहमूलकत्वाद्वाक्या
र्थानुभवरूपोपमानस्य तदेव न प्रमाणाभावात् एवं नोपमानशब्दयोरपीति व्याहृ
तं चत्वारि प्रमाणानि नचाहि वह्न्यादिगोचरप्रत्यक्षेर्वह्निव्याप्यवत्तापरामर्शस्य विशे
षदर्शनमूलकत्वप्रत्यक्षादेवोपपत्तेर्नानुमानस्य प्रमाणत्वं नचान्वयव्याप्तिज्ञानकालेसा
ध्यतानस्यावश्यकत्वाद्वह्न्यादिविषयकोपनीतभानोपपत्तावपि इतरभेदज्ञानस्यान्य १०९

109A

कालीनेतरव्यापकीभूताभावप्रतियोगि पृथिवीत्ववती पृथिवीत्यादिव्यतिरेकव्याप्तिज्ञानका
लेइतरभेदज्ञानाभावात्तदुपनीतभानासंभवेन तत्र प्रमित्यन्तरस्वीकारस्यावश्यकइतिवाच्यम्
अभावत्वादिसामान्यलक्षणसन्निकर्षबलादेवेतरभेदगोचरप्रत्यक्षोपपत्तेः एवं घटमानये
तिवाक्यश्रवणानन्तरं घटकर्मत्वानयनकृत्यादीनां परस्परसंसर्गविषयकविलक्षणप्रमि
त्यसिद्धिः शाब्दबोधात् एवं पदार्थोपस्थितेरावश्यकतया तादृशमानसोपनीतभानेनैव
निर्वाहात् नचसंसर्गोपस्थितेरनैयत्यात्कथं संसर्गबोध इतिवाच्यं बाधाभावादिबला
त्तस्यापि संसर्गतयाभाने बाधकाभावात् नचतदुपनीतभानं प्रति तदुपनायकज्ञानत्वेन
कार्यकारणभावे व्यभिचार इतिवाच्यं सांसर्गिकविषयताभिन्नालौकिकविषयतायास्तज्ज
न्यतावच्छेदकत्वेन व्यभिचाराभावात् प्रमित्यन्तरस्वीकारे तन्नियामकबहुतरकार्यकारण
भावकल्पनापेक्षया सांसर्गिकविषयताभेदनिवेशे लाघवस्यातिस्फुटत्वात् योग्यताज्ञा

त०प्र० स्य शाब्दसामान्यहेतुतया संसर्गविषयकयोग्यताज्ञानसत्वात् सांसर्गिकविषयताभेदानि
११० वेशेपि तत्यभावाच्च एवं गवयत्वविशिष्टे सादृश्यज्ञानसहकृतगोसदृशो गवयपदवाच्य इति
110 ज्ञानेनतरोत्पन्नमयं गवयपदवाच्य इति ज्ञानमप्युपनीतमेवेतिकथमेवेति चेदत्राहुः लिं
गपरामर्शानन्तरोत्पन्नप्रमितुत्तरं मनुमिनोमीत्यनुव्यवसायस्तावदनुभवसिद्धः तद्विषय
यीभूतानुमितित्वाख्यजातिविशेषावच्छिन्नकरणतया अनुमानस्य प्रमाणान्तरत्वं अथ
वह्निमान् पर्वतो घटवान् इत्यत्र मित्यनन्तरं पर्वते वह्निमनुमिनोमीत्यनुव्यवसायात् पक्षावह्नि
निष्ठविधेयताख्याविलक्षणविषयताविशेषउपगंतव्यः यदभावात्तदनंतरं न तादृशानु
व्यवसायः एवं चानुमिनोमीत्यनुव्यवसायस्य तादृशविशेषविषयकत्वेनोपपत्तेरल
मनुमितित्वरूपजातिस्वीकारेणेतिकृतं तदवच्छिन्नकरणतया प्रमाणान्तरत्वमितिचेन्न
लिंगपरामर्शविरहे तादृशविषयताज्ञानानुत्पत्यातदवच्छिन्नकरणतयैवतस्यप्रमाणा ११०

110A

रत्वमिति वस्तुतस्तु अनुमिनोमीत्यनुव्यवसायस्य तादृशविषयतामात्रविषयकत्वेऽप्या
पत्तिः शाब्दबोधोत्तरमपि तादृशानुव्यवसायापत्तेः अनुमित्यापत्तिशाब्दबोधादिषु तादृशा
विषयताया ऐक्यात् अनुमितित्वजात्यंगीकारे त्वापत्त्यादिषु तादृशजात्यसत्त्वान्न तादृ
शानुव्यवसायापत्तिरिति तदवच्छिन्नकरणताया अनुमानस्य प्रमाणान्तरत्वमावश्यकं
एवं शाब्दश्रवणानन्तरं जायमानज्ञानोत्तरं शाब्दयामीत्यनुव्यवसायोत्पत्त्या तद्विषयत
या सिद्धशाब्दत्वाख्यजातिविशेषावच्छिन्नकरणतया शब्दप्रामाण्यसिद्धिः एवमु
पमिनोमीत्यनुव्यवसायबलादुपमानस्यापि प्रमाणान्तरत्वमिति नन्वायात्वनुमिति
त्वादिसत्त्वेऽपि तन्मात्रत्व तत्त्वव्याप्यमेवास्तां तदवच्छिन्नकरणस्य च न प्रमाणान्तरत्वमि
ति यथानुमित्यादेर्मानसत्वे तदुत्तरं साक्षात्करोमीत्यनुव्यवसायापत्तेरनुमित्यादेः साक्षा
त्कारत्वादिति चेन्न लौकिकविषयताशालिसाक्षात्कारत्वस्यैव तादृशप्रतीतिविष

ता॰प्र॰ यत्वात् अत एव सुरभि चंदनमित्याद्युपनीतभानानंतरं चंदनं पश्यामि न सौरभमि
१११ ति सार्वजनीनः प्रत्ययः संगच्छते तथा च लौकिकविषयतायाः साक्षात्कारत्वव्यंजकत
याऽनुमित्याद्युत्तरं साक्षात्कारत्वप्रत्ययः अप्येवं तत्र प्रत्यक्षविषयत्वे मानाभावः साक्षा
त्करोमीति प्रत्ययाभावेन प्रत्यक्षस्याप्रयोजकत्वलब्धानुमानस्यापि मानत्वेन वक्त
व्याकत्वात् अत्र केचित् अनुमितित्वादेः प्रत्यक्षत्वव्याप्यत्वे लाघवमेव तथाहि
अनुमितिसामग्रीकाले प्रत्यक्षसामग्रीकाले प्रत्यक्षवारणाय अनुमितिसामग्र्याः प्र
त्यक्षं प्रति प्रतिबंधकत्वं कल्पनीयं प्रत्यक्षत्वव्याप्यत्वे अनुमित्यात्मकप्रत्यक्षस्यैवोत्पत्ता
तदकल्पनप्रयुक्तलाघवमस्त्वस्मभेवेति तदसत् अनुमितित्वस्य चाक्षुषत्वव्याप्यत्वे
त्वाच परामर्शोत्तरोत्पन्नज्ञानेऽनुमितित्वानापत्तेः चाक्षुषत्वस्य तद्व्यापकत्वमत एवा
संभविः परस्परव्यभिचारिणोस्तयोरेकत्र समावेशो सांकर्यापत्तेरिति चाक्षुषादिविरु १११

ह्येतदुपगंतव्यं एवं चानुमितिसामग्रीकाले चाक्षुषादिकारणा चाक्षुषादिकं प्रत्यनुमि
तिसामग्र्याः प्रतिबंधकत्वं कल्पनीयं नन्वनुमितित्वादे मानसत्वव्याप्यत्वव्याप्यत्वमेवा
स्तामनुमितिसामग्रीकाले मानसकारणाय मानसं प्रत्यनुमितिसामग्र्याः प्रतिबंधकत्वक
कल्पने गौरवं मन्मते त्वनुमित्यात्मकमानसस्यैवोत्पादेनेष्टापत्तिः नचवह्न्यनुमिति
काले घटादिमानसकारणसत्वे तत्र प्रतिबंधकत्वस्यावश्यकतया घटादिकमनिवेश्य मा
नसत्वमेतत्प्रतिबध्यतावच्छेदकमिति वाच्यं घटादिमानसं जायतामितीच्छानामनुत्तेज
कत्वानुरोधेन विषयं निविश्यैव प्रतिबध्यप्रतिबंधकत्वकल्पनावश्यकत्वात् एवं च शाब्द
स्थलेपीति मैवं घटादिचाक्षुषसामग्रीकाले वह्निमानसानुदयेन चाक्षुषसामग्र्या मा
नसं प्रति प्रतिबंधकतायां घटादिचाक्षुषसामग्रीकाले वह्न्यनुमित्युत्पत्तेरनुमित्यन्यमा
नसत्वमेव चाक्षुषसामग्रीप्रतिबध्यतावच्छेदकं वाच्यमिति अनुमित्यन्यत्वनि

वेशे गौरवात् एवमनुमितिसामग्रीकालेऽनुमित्यन्यमानसवारणायानुमित्यन्यमा
नसत्वमप्यनुमितिसामग्र्याः प्रतिबध्यतावच्छेदकमुपेयमित्यनुमितिसामग्र्याः प्रति
बंधकत्वमावश्यकं अनुमित्यन्यत्वनिवेशे गौरवं पुनरधिकं एवं शाब्दोपमितिस्थले श
शाब्दान्यत्वोपमित्यन्यत्वनिवेशे गौरवमिति तेषां मानसान्तर्भावेनेति स्पष्टं चत्वारि प्र
माणानीति दिक् ॥ ॥ इति श्रीकंठदीक्षितविरचितायां न्यायसिद्धान्तमंज
रीदीपिकायामुपमानपरिच्छेदः समाप्तः ॥ ॥ ॥

ॐ श्रीगुरुगणेशाभ्यां नमः ॐ जटाजूटलसद्गंगाजलभूषितमस्तकं पुनातु गिरिजाप्रेमपात्रमेकम
नेकधा उपजीव्योपजीवकभावसंगत्योपमाननिरूपणानंतरं शाब्दं निरूपयन् शिष्यावधानाय प्रतिजानी
ते अथेति अथ ज्ञायमानस्य पदस्य शाब्दप्रमाणतयापदे उपमानोपजीवकत्वाभावात्फलयोः स्वरूपफलो
योश्च संगतिर्बोध्या तस्याश्च फलनिष्ठत्वेपि स्वाश्रयकरणत्वात्मकपरंपरासंबंधेन करणनिष्ठत्वात्करण
योरानेतर्य्याभिधानमित्याशयकत्वमवसेयं तथाहि शक्तिपरिच्छित्तिरेवोपमितिस्तस्याश्च सर्वस्या एव शा
ब्दबोधजनकत्वेन फलयोरुपजीव्योपजीवकत्वसंभवः एवं स्वरूपफलयोरपि अतिदेशवाक्यार्थज्ञान
रूपोपमानप्रमाणस्योपमितिद्वारा शाब्दबोधोपजीव्यत्वादिति केचित्तु ज्ञायमानं पदं करणमित्यस्य शक्तत्वे
न ज्ञायमानमित्यर्थांशस्य विशेषणे हि विधिनिषेधौ विशेषणमुपसंक्रामतः सति विशेष्यबाधे इति न्यायेन स्व
र्गाभ्यस्त इतिवद्विशेषणीभूतशक्तिज्ञानमादायोपमानोपजीवकत्वसंभवेन स्वरूपतउपजीवकत्वम
पि संगतिरित्याहुः पदज्ञानस्य शाब्दप्रमाणत्वांगीकर्त्तृनवीनमतेनूपमितेः शक्तविषयकत्वेनातिदेश

न॰प्र॰ वाक्यार्थज्ञानात्मकोपमानप्रमाणस्योपमित्यात्मकशाब्दप्रमाणोपजीव्यत्वेन स्वरूपत उपजीवकत्वमस्तु
११२ ल्पमेवेति द्रष्टव्यं नन्वतिदेशवाक्यरूपशाब्दप्रमाणस्यापि ऊम निरेशवाक्यार्थज्ञानरूपोपमानोपजीव्य
त्वादुपमानमेवादौ निरूपितं न तु शाब्द इत्यत्र किं विनिगमकमिति चेन्न प्रमाणतावच्छेदकधर्मावच्छि
113 न्नोपजीव्यतानिरूपितोपजीवकताया एवात्र संगतित्वात् प्रमाणतावच्छेदकधर्मश्चेन्द्रियत्वादिः अ
वच्छिन्नत्वं व्यापकत्वं एवं चोपमानस्य संकेतमात्रग्राहकतया सर्वस्यैवोपमानस्य शाब्दप्रमाणोप
जीव्यत्वं शाब्दस्य तु न सर्वस्यातिदेशार्थज्ञानात्मकोपमानोपजीव्यत्वं घटमानयेतिशब्दे तदभावात्
न च पदज्ञानत्वेन शाब्दत्वावच्छिन्नं प्रति हेतुतया घटमानयेतिशब्दनिरूपितशाब्दत्वावच्छिन्नका
र्यताया उपमाने सत्त्वादुक्तदोषतादवस्थ्यमिति वाच्यं प्रमाणविभाजकोपाधिनियतधर्मावच्छिन्ना
या उपजीवकताया विवक्षितत्वात् प्रमाणविभाजकोपाधिश्च साक्षात्कारकरणत्वादिः अवच्छि
न्नत्वं चात्र स्वरूपसंबन्धविशेषः इयं च शाब्दत्वादेरुपमितिकरणत्वानियतत्वादतिदेशवाक्यार्थ ११३

(113A)

ज्ञानत्वादेरेव तथात्वेन तस्य च प्रमासमावच्छेदकशाब्दप्रमाणत्वव्यापकोपस्थितौ व्यक्ता निरूपितोपा
स्थितौवकतानवच्छेदकत्वादुक्तदोषाभावात् केचित्तु यत्र कीदृग्गवय इति प्रश्नानन्तरं चित्रलेखादिना
तादृशपिण्डप्रदर्शनेन अतिदेशवाक्यं विनापि मानसरूपातिदेशवाक्यार्थज्ञानात्मकोपमानोदयेन
व्यभिचाराच्छब्दोपमानेनुपस्थितौ व्यइत्युपमानेन शाब्दोपस्थितौवकत्वाभावान्नावि। नियम इति वदन्ति तन्न
इसत् शाब्दीयाकांक्षा शब्देनैव प्रपूर्यत इति न्यायात् तत्रापीदृग्गवय इत्यभिप्रायिकशाब्दकल्पनाया
आवश्यकत्वात् शाब्दीआकांक्षा शाब्दबोधगोचरेच्छा शब्देनैव विषयसिद्धिद्वारा निवर्त्त्यत इति तद
र्थात् यदि च यदाप्रष्टुर्जिज्ञासामात्रेऽज्ञानं तु शाब्दबोधे तत्र शाब्दकल्पनाया अनवकाशः तत्र शाब्द
गोचरेच्छाया अभावेन तादृशन्यायस्यानवतारात् न चातिदेशवाक्यार्थशाब्दत्वेनैवोपमितिकरणत्वया शा
ब्दकल्पनमावश्यकं पदजन्यपदार्थोपस्थितेरेव शाब्दबोधहेतुत्वात् शाब्दी शाब्दबोधोपयोगिनी आ
कांक्षा अन्वयप्रतियोग्युपस्थितिरिति कृत्वा शब्देनैव प्रपूर्यते संपाद्यत इत्यर्थात् तादृशन्यायस्याप्यवतारा
दिति वाच्यं अतिदेशवाक्यार्थशाब्दत्वेनोपमितिकरणत्वे मानाभावात् परित्यज्य च विशिष्टताव्यभिचार

केवलयं गृह्यमाणे व्यभिचारकेण कारणत्वकल्पनानुदयात् नचनिश्चयत्वमनपेक्ष्य शाब्दत्वस्य लघु
नयानन्निवेशाएव सम्यगिति वाच्यं सा धर्म्यज्ञानत्वस्योपमानत्ववादिमतइव अतिदेशवाक्यार्थस्मृतिस्त
पव्याप्याभावेनैवानतिप्रसंगे निश्चयत्वप्रवेशप्रयोजनाभावादिति विभाव्यते तथापि शक्तिग्रहार
च्छाब्दबोधोदयेन व्यभिचाराच्छब्दप्रमाणे ह्युपमानोपजीवकत्वव्याघातः काचित्कोपजीवकत्वस्य
च शाब्दप्रमाणइवोपमानप्रमाणेपि सत्त्वाद् विनिगमनानाताद्वस्थ्यादिति न किंचिदेतत् तथात्वस्य
तंत्रेच्छस्य निर्णीगपर्य्यनुयोगानर्हत्वादिति न्यायएव विनिगमको ननु संगतिरिति तस्यास्तुल्यत्वेपि
नेत्वतितितिप्राकु बितिदिक् निरूप्यत इति लक्षणस्वरूपप्रामाण्यादिप्रकारकवर्त्तमाननिरू
पणाविषयः शाब्दइत्यर्थः तत्र शब्दे निरूपणीये शाब्देति अत्र शाब्दप्रमितिकरणत्वं लक्षणं
प्रमाणशब्दपदवाच्यत्वं च लक्ष्यतावच्छेदकं प्रमितिकरणत्वमात्रस्य हास्यावतिप्रसक्तमतः शा
ब्देति ननु शाब्दत्वं शब्दजन्यत्वं तथा च शब्दजन्यप्रमाकरणत्वं लक्षणं पर्य्यवस्यति तच्च विषयार
विषया शब्दजन्यप्रत्यक्षप्रमितिकरणे श्रोत्रेन्द्रिये तिव्याप्तमित्यत आह शाब्दत्वेति तथा च शाब्द

114A

त्वरूपजात्यवच्छिन्नप्रमितिकरणत्वेन तत्रेति नातिव्याप्तिरिति भावः केचित्तु गतीनाना
गतशब्दानुसंधानादपि शाब्दबोधोदयाच्छब्दो न करणं किंतु शाब्दज्ञानं इत्थं च शाब्दजन्यप्र
माकरणत्वेऽसंभवः शाब्दज्ञानजन्यप्रमाकरणत्वस्य लक्षणत्वे तु विषयविधया शाब्दज्ञान
जन्यप्रत्यक्षप्रमाकरणे मनस्यतिव्याप्तिरत आह शाब्दत्वं चेतीत्याहुः शाब्दत्वस्य प्रत्यक्षा
द्यन्यत्वरूपत्वे गौरवादाह शाब्दत्वं चेतीत्यपि केचित् ननु लक्षणलक्ष्यतावच्छेदकयोरेवा
भेद इत्यत आह जन्येति केचित्तु ननु शाब्दाद्घटं प्रत्येमीत्येवानुभवो न तु शाब्दयामीति
त्मविशेषगुणानां विषयविनिर्मोकेण भानानभ्युपगमात् तथा च शाब्दजन्यघटादिवि
धेयकज्ञानत्वमेव तद्विषयोऽनतिरिक्तशाब्दत्वजातिरित्यत आह जन्यपरधीतीत्याहुः
तदसत् शाब्दलिंगकघटानुमितेरपि शाब्दजन्यघटविधेयकज्ञानत्वेन तद्व्युदासायापि शा
ब्दयामीति प्रतीत्यापत्तेः शाब्दत्वजातिस्वीकारस्यावश्यकत्वात् तदस्वीकारमादाय पद्धिती
यलक्षणप्रणयनेन तद्व्यापकशाब्दत्वस्यैवान्यथासिद्धमगंगथासंगतेश्चेत्यवधेयम् जन्यपरधी

जन्यत्वव्यभिचारिणी अनुभवत्वव्यापिका च या जातिः प्रत्यक्षत्वादिस्तच्छून्यत्वे सति पक्षविषय
कत्वाव्यभिचारिणी या जातिस्तद्रूपमिति तत्त्वं तच्छून्यधीत्वमिति लक्षणार्थः अतिव्याप्तिं वारयति न
त्रेति प्रत्यक्षानुमितिस्मृतिष्वित्यर्थः तादृशीनां जन्यपरक्षी जन्यत्वव्यभिचार्यनुभवत्वानां व्या
पकानां सत्त्वादिति तथा च तच्छून्यत्वाभावान्नातिव्याप्तिरिति भावः स्मृतित्वस्य जातित्वं अनुभ
वस्मृतिप्रतिबध्यतावच्छेदकत्वेन ननु प्रत्यक्षाद्यवृत्तिव्याप्तिवारणाय जातिशून्यत्वे सतीत्यास्तां य
द्विशेषादेविशिष्टानत्वादिजातिसत्त्वासंभव इति विभाव्यते तदाऽनुभवत्वव्यापकजातिशून्यत्वे स
तीत्येवास्त्वित्यत आह जातिशून्यत्वमिति जातिशून्यत्वमात्रमित्यर्थः अनुभवत्वेति अनुभव
त्वव्यापकजातिशून्यत्वमात्रमित्यर्थः अनुभवत्वादीनामिति आदिना ज्ञानत्वगुणत्वसत्त्वादि
परिग्रहः तथा चैतादृशजातीनां सत्त्वाज्जातिशून्यत्वे न वक्तव्यमिति भावः अत्र यद्यपि ज्ञानत्वादीना
मित्येव वक्तुमुचितं तथापि तद्व्यापकेत्यत्र तच्छब्देनानुभवत्वपरामर्शाय अनुभवत्वादीनामित्युक्तं
तद्व्यापकेति अनुभवत्वव्यापकेत्यर्थः अनुभवत्वव्यापकेत्यस्य व्यावृत्तिमाह अन्येति तथा ११५

115A

असंभवितायामिति जन्यपदधीजन्यत्वव्यभिचारीत्यर्थः नन्वनुभवत्ववारणायानुभवान्यमेवो
पादीयतामित्यत आह आरीतामिति आदिनाज्ञानत्वपरिग्रहः अनुभवत्वाव्यापकं चानुभवनिष्ठ
भेदप्रतियोगितावच्छेदकत्वं तेनानुभवत्वादिव्युदासः नन्वनुभवत्वव्याप्यत्वमेव किं नोपादीय
ते कृतमव्यापकघटितत्वेनेति चेन्न व्यापकसामानाधिकरण्यादिरूपव्याप्यत्वनिवेशे गौरवात् ए
वमनुभवत्वस्यापि स्वव्याप्यत्वान्न वारणाय भेदघटितव्याप्यत्वस्यावश्यं वाच्यतयातिगौरवाच्च मन्म
तेनुभवनिष्ठभेदप्रतियोगितावच्छेदकत्वस्यानुभवत्वेनानुपपत्त्यभावात् स्मृतावतिव्याप्तिवार
णाय चरमधीपदस्यानुभवपरत्वं विना निर्वाहाच्चेति परजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजा
तिशून्यत्वमिति कृतेऽसंभवः ज्ञायमानपदस्य करणत्वासंभवेन प्रत्यक्षत्वस्यापि परजन्यत्वव्यभि
चारित्वादतः परेधीति इत्थं च जन्यपदव्यावृत्तिमाह पदधीति नन्वनुमितित्वस्यापि तादृशस्य सत्त्वा
त्कथमतिव्याप्तिरत आह अनुमितित्वस्येति भगवदिति अनुमितित्वस्य शरीरपदधीजन्यत्वव्याप्य
त्वेनात्मत्वादिजातिदेवतथा तच्छून्यत्वं चानुमितावपीत्यतिव्याप्तिः जन्यपदोपादाने चानुमितित्व

त॰चं॰
११६
116

स्यापितथात्वेन तच्छून्यत्वाभावान्नदतिरिति भावः अतः अतिव्याप्त्यादितः समुदितमिति जन्यपद
धीजन्यत्वव्यभिचारिणानुभवत्वाव्यापकजातिशून्यान्तमित्यर्थः अत्र च जन्यत्वव्यभिचारीति जन्यधी
त्वव्यभिचारीति धीत्वव्यभिचारीति धीजन्यत्वव्यभिचारीति जन्यज्ञानजन्यत्वव्यभिचारीति वा जन्य
जन्यत्वव्यभिचारीति वा नोक्तम् अनुमितित्वस्य व्याप्तिज्ञानत्वव्याप्यत्वात्तद्व्यभिचारिजातिशून्यत्वस्यानु
मितावपि सत्त्वादतिव्याप्तेः जन्यपदधीत्वव्यभिचारिजातिशून्यत्वमात्रोक्तौ शाब्दत्वस्यापि तथात्वेना
संभवापत्तिरिति विशिष्टमुपादेयमेव ननु जन्यपदधीजन्यत्वव्यभिचार्यनुभवत्वाव्यापकजातिशून्य
त्वमेव लक्षणमस्तु कृतं विशेष्यदलेनेत्यत आह उपमिताविति उपमितेः पदविषयकातिदेशवा(
क्यार्थज्ञानजन्यत्वनियमेन जन्यपदधीजन्यत्वव्यभिचारिप्रत्यक्षत्वादिजातिशून्यत्वाभावादिति भावः
शून्यान्तं पदविषयकत्वाव्यभिचारिजातिशून्यत्वमित्यर्थः पदविषयकशाब्दबोधे पदस्यापि भानात्पद
विषयकत्वसमानाधिकरणशाब्दत्वशून्यत्वाभावादसंभव इति समानाधिकरणेति विहायाव्यभिचारी
ति ननु सर्वत्र शाब्दबोधे पदभाने बाधकाभावाच्छाब्दत्वस्यापि पदविषयकत्वाव्यभिचारित्वमेवेति ११६

चेन्न व ज्ञापदजन्यपदार्थोपस्थितितात्पर्यज्ञानादिरेव शाब्दबोधहेतुस्तथा शब्दस्य सर्वत्र भाने माना
भावात् यत्र भिन्नविषयकानुमितिसामग्रीकाले घटमानयेति शाब्देच्छाबलाच्छाब्दबोधः तत्र शब्द
विषयकशाब्दं जायतामितीच्छाविरहविशिष्टानुमितिसामग्र्याः प्रतिबंधकत्वेन शब्दशाब्दानुपप
त्तेश्च घटशाब्देच्छाया अपि तत्रोत्तेजकत्वे मतद्विच्छाभावकूटनिवेशेनातिगौरवात् मिथो विशेष्य
विशेषणभावविनिगमनाविरहेणानंतकार्यकारणभावापत्तेश्चेति शब्दाविषयकशाब्दस्यैवोत्प
त्त्या शाब्दत्वस्य पदविषयकत्वाव्यभिचारित्वाभावेनासंभवाभावात् इति न किंचिदेतत् ज्ञाताविर
ति ज्ञाप्याद्यावित्यर्थः अत्र ज्ञानाभावादिति भावः मणिकृतस्तु प्रयोगहेतुभूतार्थतत्त्वज्ञानजन्यः
शब्दः प्रमाणमिति शब्दलक्षणं प्रयोगो वाक्यं तद्धेतुभूतं यदर्थतत्त्वज्ञानं तज्जन्यशब्दत्वं प्रमाणशा
ब्दत्वमित्यर्थः वाक्यार्थभ्रमसमालयवह्निना सिंचतीत्यादावयोग्येतिव्याप्तिवारणाय तत्त्वपदं तथापि
पदार्थतत्त्वज्ञानमादाया योग्येऽतिव्याप्तिः प्रयोगहेतुभूतेति इत्थं वाक्यार्थपरस्य वाक्यार्थपर्यवसाना
नपदार्थतत्त्वज्ञानमादायातिव्याप्तिः तथा हि हेतुपदस्य व्याख्या न भूतपदस्य भूसा मावितिधात्व

त०प्र०
११७
117

नुसारात् इतरनैरपेक्ष्यमुत्पन्नं तथा सजातीयनैरपेक्ष्यं स्यात् विवक्षितं तथा यत्प्रयोगप्रतिपाद्यज्ञानं
प्रयोगे कर्त्तव्ये प्रयोगप्रतिपाद्यज्ञानान्तरं नापेक्षते तेन तादृशार्थतत्त्वज्ञानजन्यत्वं लक्ष्यं नहि वाक्यार्थज्ञा
नवत्पदार्थज्ञानमप्यर्थज्ञानानपेक्षं प्रयोगहेतुः वाक्यार्थज्ञानस्यैवापेक्षणादिति अत्र च प्रयोगो
वाक्यं तथा च तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकं यज्ज्ञानं प्रकृतवाक्ये जननीये
स्वस्मिन् जननीये प्रयोगप्रतिपाद्यज्ञानान्तरं तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयक
ज्ञानान्तरं नापेक्षते तेन तादृशार्थतत्त्वज्ञानजन्यत्वमर्थः वाक्यार्थज्ञानेन वाक्ये जननीये स्वपूर्ववर्त्ति
पदार्थतत्त्वज्ञानस्यापेक्षणात् अन्यथा तस्याहेतुत्वापत्तेरिति स्वोत्तरोत्पन्नत्वमपि स्वजन्यज्ञान
विषयविषयकज्ञानान्तरे विशेषणीयं तथा च तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविष
यकं यत्प्रकृतवाक्यार्थप्रमात्मकं ज्ञानं स्वस्मिन् जननीये तत्कालीनतत्पुरुषीयस्वोत्तरोत्पन्नस्व
जन्यज्ञानविषयविषयकप्रमान्तरं नापेक्षते तेन तादृशप्रकृतवाक्यार्थज्ञानजन्यशाब्दत्वं तत्कालीन
तत्पुरुषीयप्रमाणशाब्दत्वमिति फलितम् अत्र स्वोत्तरोत्पन्नेत्यत्र स्वपदं समर्थतत्त्वज्ञानपरं स्वप ११७

117A

न्तराणि प्रकृतवाक्यपराणि पदार्थान्तरज्ञानेन च वाक्यजननीये स्वोत्तरोत्पन्नप्रकृतवाक्यजन्य
ज्ञानविषयविषयकस्ववाक्यार्थज्ञानस्यापेक्षणात् तत्पदार्थतत्त्वज्ञानजन्यत्वमादायाप्रायोग्येति र
व्याप्तिरिति संस्कारादेव तद्व्याप्तेर्लक्षणे शब्दपदं प्रमाणमात्रस्य लक्ष्यत्वे प्रत्यक्षादावव्याप्तेर्लि
ङ्गे विशब्दपदमनुपयुक्तमतो नीयमिति ननु तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयके
यत्र मानसं ज्ञानं स्वस्मिन् जननीये तत्कालीनतत्पुरुषीयस्वजन्यज्ञानविषयविषयकप्रमान्तरं
नापेक्षते तादृशप्रमाजनकशब्दत्वे तत्कालीनतत्पुरुषीयप्रमाणशब्दत्वमिति फलितं प्रमात्वं
च यावद्भ्रमभिन्नत्वं नानन्तर्घटिकप्रमामादायातिप्रसंगः इत्थं च वह्निना सिंचनीयमित्यादेः पदार्थ
तत्त्वज्ञानस्य स्वसमानजातीयवाक्यार्थज्ञानान्तरापेक्षतया तदादायातिव्याप्त्यभावे धिकरणाभि
धाने वाक्यरूपे हेतुसाधनता प्रमामादायातिप्रसंगः तस्य वह्निकरणकसेकानुकूलकृतिमानि
तिप्रकृतवाक्यजन्यज्ञानविषयकरणत्व घटकीभूताभावरूपविषयकार्थतत्त्वज्ञानत्वात्
तेन च वाक्ये जनयितव्ये सजातीयज्ञानान्तरानपेक्षणादिति एवं शब्दोद्भवमिति वाक्यस्यापि तत्

दृशावाक्यजन्यज्ञानविषयतयातादृशवाक्यजन्यज्ञानविषयवाक्यविषयकवाक्यरूपेष्टसाध
नताप्रमामादायशाब्दो द्रव्यमित्ययोग्यवाक्येतिव्याप्तिः अपिचपयःकरणकसेकानुकूलकृति
मान् गुणश्च द्रव्यमित्यंशिकभ्रमात्मकसमूहालम्बनजन्येपयसासिंचतीत्यादिवाक्येऽव्याप्तिः
तादृशवाक्यार्थज्ञानस्यभ्रमभिन्नत्वाभावात् ईश्वरीयवाक्यार्थज्ञानस्यचस्वसमानजातीयाऽ
स्मदीयवाक्यार्थज्ञानसाधारणतयातदारायत्तलक्षणगमनात् अन्यथानदीयपदार्थतत्त्वज्ञान
माशपाशेगेतिप्रसक्तेर्ईश्वरत्वादितिकथमेतदितिचेन्मैवं यादृशार्थतत्त्वज्ञानं स्वसमानजा
तीयज्ञानांतरानपेक्षं तत्संप्रयोगहेतुस्तज्जन्यत्वमितिनलक्षणार्थः किंतु प्रयोगहेतुभूते यदर्थ
तत्त्वज्ञानं प्रकृतवाक्यार्थविषयकं तत्त्वज्ञानं तज्जन्यत्वं लक्षणे तत्कालीनतत्पुरुषीयस्वजन्य
ज्ञानं यद्यत्संसर्गकं यद्यत्प्रकारकं तावच्छिन्नं यद्यद्विशेष्यताकं तत्तत्संसर्गकतत्प्रकारकत
द्विशेष्यकभ्रमभिन्नज्ञानजन्यशाब्दत्वं तत्कालीनतत्पुरुषीयप्रमाणशाब्दत्वमितिपर्यव
सितोऽर्थः वह्निनासिंचतीत्यादौ वह्निकरणकसेकानुकूलकृतिमानितिबोधोदयेनतद्वि

118A

षयविषयकज्ञानस्य भ्रमत्वान्नतत्राति व्याप्तिः एवं शब्दोद्भवमित्यादावपि भ्रमात्मकसमूहा-
लम्बनजन्येपयसा सिंचतीत्यादौ तवीश्वरीयप्रमामादाय संगतिः एवमन्यत्रशुकोदीरितवाक्येमो-
निश्लोकादावपि अथ यत्र वह्निना सिञ्चति पयसा सिञ्चतीत्यादिवाक्याभ्यां वह्निकरणकसे-
कानुकूलकृतिमान्पयःकरणकसेकानुकूलकृतिमानिति समूहालम्बनशाब्दबोधः तत्र
पयसासिञ्चतीत्यादिवाक्येऽव्याप्तिः तद्वाक्यजन्यज्ञाने यद्यद्विशेष्यताकं तत्तद्विशेष्यताकभ्रम-
भिन्नज्ञानाप्रसिद्धेरितिमैवं यद्यद्विशेष्यताकत्वांशे समन्यतानत्तद्विशेष्यताकत्वांशे भ्रमभिन्न-
ज्ञानत्वस्य विवक्षितत्वादित्याहुः इदं च बुबोधयिषापूर्वकवाक्यत्वावच्छिन्नं प्रति वाक्यार्थज्ञा-
नं हेतुरिति सिद्धान्ताशयेन वस्तुतस्तु बुबोधयिषायाः अन्यथासिद्धतया तस्य करणत्वासंभवेन तदुपेक्ष्य
शाब्दप्रमितिकरणं शब्द इति फलघटितमेव लक्षणमत्रकृतमिति ध्येयं प्रत्यक्षातिरिक्तप्रमाणस-
त्वे मानाभाव इति शब्दस्याप्रमाणतया व्यर्थं तन्निर्वचनेनेतिकटाक्षयन् शब्दस्य प्रमाणत्वं साधय-
ति सोयं शब्द इति शाब्दप्रमितिकरणं शब्द इत्यर्थः सकलेति शब्दं प्रमाणमित्यनुभवविषय इत्य

त.प्र.
११९
119

र्थः इत्यत्रत्यइति तादृशप्रत्ययस्यान्यविषयकत्वेबाधाच्छब्दविषयकत्वएवपर्य्यवसानेनशाब्दसि
द्धिः प्रतीतेस्तदसाधकत्वेपदार्थमात्रोच्छेदइतिभावः ननुस्वयंशाब्दत्वंनास्तीतिब्रूमोऽपितुतः
स्यातिरिक्तशाब्दप्रमितिकरणत्वंनास्तीत्यतआह तज्जनकत्वमपीति तस्यशाब्दस्य जनकत्वमपि
शाब्दप्रमितिजनकत्वमपीत्यर्थः वस्तुतस्तु सोयंशब्दइतिपाठः शाब्दयामीतिप्रतीतिसिद्धःशा
ब्दबोधइत्यर्थः तज्जनकत्वमपिशब्देनाद्यशाब्दप्रमितिकरणत्वमपीत्यर्थः तथाद्दूरघटत्वं तत्र
हेतुमाह ग्रामेपेति प्रतीतेरिति वाक्यादमुमर्थंप्रत्येमीतिज्ञानस्यप्रत्यक्षविषयत्वासंभवेनप्र
त्यक्षातिरिक्तप्रमितिस्वीकारः तत्करणस्वीकारश्चावश्यकइतिभावः ननुस्तुशाब्दस्यप्रमाणान्त
रत्वमास्तांचतज्जन्यज्ञानस्यप्रत्यक्षातिरिक्तत्वंतथाप्यनुमितित्वात्मकत्वमेवतज्जन्यज्ञानस्या
स्त्वतोवैयर्थ्यमित्यतकत्त्रिरूपणेनेत्यतआह केवलमिति अनुमानविधया अनुमानत्वेन अन्य
थावेति शाब्दविधयावेत्यर्थः ननुतस्यप्रत्यक्षातिरिक्तप्रमितिजनकत्वमेवनास्तीतिविचारइतिभा
वः विप्रतिपद्यंतइति विप्रतिपत्तिश्चशाक्यः अनुमितित्वासमानाधिकरणप्रमितिविभाजको ११९

119A

पाध्यवच्छिन्नजन्यतानिरूपितप्रमाणविभाजकोपाधिनियतधर्मावच्छिन्नजनकताश्रयो न वेत्याका
र। अत्र विधिकोटिर्नैयायिकानां निषेधकोटिर्वैशेषिकाणां विधिकोटिप्रसिद्धिः प्रत्यक्षप्रमाणे इंद्रियसं
वप्रत्यक्षप्रमाणतया प्रत्यक्षप्रतींद्रियत्वेन हेतुत्वेन तादृशजनकताश्रयत्वात् निषेधप्रसिद्धिश्च घटादावेव स
त्व भा अत्र सिद्धसाधनवारणायानुमितित्वासमानाधिकरणप्रमितिविभाजकोपाध्यवच्छिन्नत्वनिवेशः
प्रत्यक्षे विषयस्य हेतुतया घटादस्यापि साक्षात्कारत्वावच्छिन्नजन्यतानिरूपितजनकताशालित्वात् प्रमा
णविभाजकोपाधिनियतधर्मावच्छिन्नत्वनिवेशः अनुमितिभिन्नशाब्दाविषयकप्रमितिकरणं न वेति
प्रत्यक्षानुमित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतासामान्यको न वेत्याकारो वा पक्षमिति अनुमि
तिभिन्नशाब्दाविषयकप्रमितिकरणमित्यर्थः अतो न सिद्धसिद्धिव्याघातः नत्वनुमानं न तु प्रत्यक्षानु
मित्यन्यतरत्वव्याप्यानुभवनिष्ठजन्यतानिरूपिमान्यकं अतो न शाब्दलिंगकानुमानमादायबाधः न
न्विदं घटानयनादिरूपार्थवत् शाब्दवत्वादित्यनुमानं स्यादत आह शाब्दस्येति अर्थीव्याप्यत्वात् स्वज
न्यप्रतिपत्तिविषयार्थनिरूपितव्याप्यभाववत्वादित्यर्थः अव्याप्यत्वमेव दर्शयति नहीति नरदृत्ति॰

त·प्र· त्वात् आकाशादेर्वृत्तित्वात् तथा चाव्यभिचरितसामानाधिकरण्यरूपव्याप्तिः शब्देन संभवति सा
१२० ध्यहेत्वोर्वैयधिकरण्यादिति भावः ननु घटमानयेतिपदानि तान्यर्थविषयस्मारितपदार्थसंसर्गज्ञा
नपूर्वकाणि आकांक्षादिमत्पदकदंबकत्वादित्यत्र न वैयधिकरण्यं नच रजतज्ञानवानयमितिज्ञा
120 नाद्रजतमिति प्रवृत्त्यापत्तिवारणाय पुरोवर्त्तिविशेष्यक इदन्त्वावच्छेदकप्रकारकज्ञानस्यैव प्रवर्त्तक
तया न तत्सिद्धिरिति वाच्यं लाघवाद्वृत्तिविषये इदन्त्वावच्छेदकवैशिष्ट्यावगाहिज्ञानत्वेनैव घटा
नेयनत्ववद्विशेष्यप्रवर्त्तकतया साध्यस्य ज्ञानपरस्य च प्रमापदत्वेन प्रमाघटकतया प्रकृते तस्याप्य
दुष्टत्वात् नचानुमितेर्व्यापकतावच्छेदकप्रकारकत्वनियमेन स्मारितपदार्थत्वेनैव रजतत्वादिः सि
द्धेत् न तु रजतत्वादिना प्रमेयत्वादिना तादृशज्ञानस्य प्रवर्त्तकत्ववारणाय रजतत्वप्रकारकज्ञानस्यै
व प्रवर्त्तकत्वादिति वाच्यं पूर्वं रजतत्वादिना रजतत्वादेरुपस्थितत्वादितरबाधबलात्तेन रूपेणानुमि
तौ भानसंभवात् अत एव सकर्तृकत्वानुमाने लाघवोपनीतमेकत्वादिकमपि भासते लाघवज्ञाने
तरबाधातिरिक्तस्थल एव च व्यापकतानवच्छेदकरूपेण भानानुपगमादिति यद्वा एते पदार्था १२०

120A

स्तात्पर्यविषयमिथःसंसर्गवत्त्वमाकांक्षादिमत्पदस्मारितत्वादित्यनुमानेन विशिष्यरजतर
त्वादेः पक्षतावच्छेदकतयानसिद्धिः नचनदीजलसंसर्गपरतयोच्चारिते ऽहो विमलं जलं न
द्याः कच्छे महिषश्चरतीति वाक्येऽप्यन्वयायके नदीकच्छपदार्थयोर्व्यभिचारः नातात्पर्यगर्भसत्त्वा
दिति वाच्यं तात्पर्यगर्भपरस्परनिरूपिताकांक्षादिमत्त्वाभावेनैवाव्यभिचारात् ननुतथापि
हेतुतावच्छेदकावच्छिन्नहेतुमत्तानिश्चयस्यैवानुमितिहेतुतया यत्र योग्यतासंशयस्तत्रयो
ग्यतागर्भहेतुमत्तानिश्चयाभावादन्वयबोधाप्रसंगः नच योग्यतासंशयस्यबाधसंशयप
र्यवसन्नतयासाध्यसंशयस्यचानुमित्यननुगुणतयापक्षताघटकसंशयातिरिक्तसंशयान्यत्व
मेवहेतुमत्तानिश्चयत्वमितिवाच्यं गौरवात् साध्यव्याप्यसाध्यवान्नवेत्याकारकसंशयादनु
मित्यापत्तेश्चेति चेन्न अयमालोकोऽधूमोवा उभयथापिवह्निव्याप्य इत्यत्रहेतुतावच्छेदकसंदे
हेपिनैयायिकैरनुमितेरभ्युपगमात् व्याप्यवत्तानिश्चयत्वेनैवानुमितिहेतुत्वं तस्यचायोग्य
तारूपहेतुविशेष्यसंदेहेपिसंभवान्नकाप्यनुपपत्तिरनत्याह दिप्यतेचेति ननुव्याप्तिभ्र

त॰प्र॰ मादेवानुमितिरस्तु न च भ्रमात्मकपरामर्शजन्यानुमितेर्भ्रमत्वापत्तिरिति वाच्यं विषयबाधस्यैव भ्रम
१२१ त्वनियामकत्वेन दोषाभावादित्यत आह इष्यते चेति इत्यपि कश्चित् आप्नोतीति पदनिष्ठव्याप्ति
121 ज्ञानशून्यानामित्यर्थः न चेति न हीत्यर्थः अयं व्याप्तिज्ञानशून्यकालीनः शब्दप्रयोज्योऽनुभवः
तस्याः अनुमितेः निर्विषयव्याप्तिज्ञानाजन्यत्वाविलक्षणैवानुमितिः न च तस्या अनुमितित्वसत्वे र
मानाभावः समाने विषये शाब्दसामग्र्या बलवत्वात् अनुमितिं प्रति शाब्दसामग्र्याः प्रतिबंधकत्वक
ल्पने गौरवं मन्मते तत्र शाब्दात्मकानुमितिस्वीकारेण तत्र तत्र प्रतिबंधकत्वात् एवं भिन्ने वि
षयेऽनुमितिसामग्र्याः शाब्दसामग्र्याश्च प्रतिबंधकताद्वयकल्पने गौरवं मन्मतेऽनुमितिसाम
ग्रीप्रतिबंधकतयैवोपपत्तेरित्यत आह प्रतिपन्ने चेति अननुमितमिति न च व्याप्तिज्ञानादिघ
टितसामग्रीजन्यानुमितित्वाभाव एव तद्विषय इति वाच्यं व्याप्याद्यप्रतिसंधानेपि तस्यानुभवसि
द्धत्वात् असाक्षात्कृतमिति यद्यपि नोपमितं इत्यपि वक्तुमुचितं न चाप्युपमितेः शक्तिमात्रवि
षयकतया घटादिविषयकज्ञानस्य ततोऽसंभवेन तन्निराकरणस्य निष्प्रयोजनत्वात् नोपर

121A

मितम्मितिविशेष इत्यपि कश्चित् तथाच शाब्दज्ञानजन्यज्ञानेऽनुमितित्वाद्यभावेन विलक्षण
प्रमित्यंतरस्वीकारस्यावश्यकत्वात्तत्करणस्य प्रमाणांतरत्वमावश्यकमिति भावः श्रुतार
मिति नैयायिकशब्दजन्यशाब्दबोधविषय इत्यर्थः श्रुधातोर्ज्ञानार्थत्वेन शाब्दत्वविशिष्टश्र
ुत्वात् आत्मावारे द्रष्टव्यः श्रोतव्यो मंतव्यो मंतव्य इत्यादिश्रुतिरप्युपपद्यते इदं घट
कर्मकमानयनादि नैयायिकेभ्य इति वैशेषिकस्य शब्दोच्चारयितृत्वे लिंगविधयैव तद्बोध
कत्वान्नैयायिकेभ्य इत्युक्तं नैयायिकानां शाब्दबोधेच्छयैवोच्चारणात् शाब्दतात्पर्यज्ञान
संभवाच्छाब्दबोध एव श्रोतुरिति भावः उत्तरमीमांसकास्तु लौकिकवाक्यस्थले शाब्दबोधा
त्पूर्वं प्रकृतवाक्यार्थगोचरयथार्थज्ञानवदुक्तत्वस्याप्तोक्तत्वानुमितिसामग्रीसत्वेऽप्या
प्तोक्तत्वानुमितिसंभवात् वाक्यार्थज्ञानस्यावश्यकत्वात् तदुत्तरं च वेदस्थले स्वरूप शाब्दसा
मग्रीतः शाब्दोत्पत्तेर्लौकिकशब्दोऽनुवादकः अनुवादकत्वस्य गृहीतग्राह्यनुभंजनकत्वा वमाच२
रूपत्वात् स्वसमानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयवि

षयकतद्विषयकतत्प्रकारकानुभवमात्रजनकत्वरूपत्वादिति यावत् स्वपरमनुभवा
परं वेदस्यतद्वोरुषेयत्वे नाप्तोक्तत्वानुमानासंभवादननुवादकत्वात्प्रामाण्यं अनधि
गतार्थानुभवकरणत्वस्यैव प्रामाण्यरूपत्वात् तच्चागृहीतग्राहीतरानुभवकरणत्वं स्वस
मानाधिकरणस्वाव्यवहितपूर्ववर्त्तिस्वसमानाकारनिश्चयविषयविषयकेतरतद्विशे
ष्यकतत्प्रकारकानुभवकरणत्वमेवेति यावत् स्वसमानाकारत्वं च स्वस्मिन् यादृशय
द्विशेष्यकत्वावच्छिन्नयत्प्रकारिकतातादृशतद्विशेष्यकत्वावच्छिन्नतत्प्रकारता
शालित्वमित्यन्तु स्तदसत् व्याप्तिस्मृतिविलम्बे नाप्तोक्तत्वानुमितिसामग्र्यभावेन प्रथ
मत एव शाब्दबोधादननुवादकत्वेन प्रमाणत्वात् ननु लौकिकवाक्ये इदमाप्तोक्तं न वेति
संशये शाब्दबोधानुदयात् यत्संशयव्यतिरेकनिश्चयो यत्र प्रतिबंधको तन्निश्चयस्तत्र
हेतुरनुमितौ व्याप्तेरिवेति नियमेनाप्तोक्तत्वनिश्चयस्य हेतुत्वात् शाब्दबोधपूर्वं तस्याव
श्यकतेति चेन्न तत्कार्यतावच्छेदकं हि शाब्दत्वं वा लौकिकवाक्यजन्यशाब्दत्वं वा लौकि १२२

122A

कत्वेन ज्ञातवाक्यजन्यशाब्दत्वं वा नाद्यः वेदे तदभावात् न द्वितीयः आप्तोक्तत्वानिश्च
येऽपि वेदानुकारेणाधीयमानमन्वादिवाक्येऽपौरुषेयत्वाभिमानिनो गौडमीमांसकस्य शाब्द
बोधोदयेन व्यभिचारात् नापि तृतीयः लौकिकत्वेनाज्ञातलौकिकवाक्यस्थलेऽन्तर
शाब्दसामान्यसामग्रीत एव लौकिकत्वेन ज्ञातवाक्यादपि शाब्दोत्पत्तिसंभवेन तस्याकार
णत्वात् न च यत्संशयेऽन्यादि नियमेन न तद्धेतुत्वमिति वाच्यं तत्संशयेऽपि वाक्यार्थबोधोत्प
त्त्या तत्संशयस्याप्रतिबंधकत्वात् अव्यभिचारसंशयव्यतिरेकनिश्चयप्रतिबध्ये व्याप्
तिज्ञाने व्यभिचारेणाप्रयोजकत्वेन च तादृशनियमाभावाच्च एतेन शाब्दसामान्येऽप्ता
प्तोक्तत्वशंकाविरहो हेतुः स च लोके आप्तोक्तत्वानुमानात् न च पौरुषेयत्वनिश्चयदशाया
मेव वेदस्यानुभावकत्वे दोष एव तु रूपाप्रतीतपदस्यादितत्वरूपहेतुज्ञानसत्वेन पदार्थसं
सर्गिक विच्छित्ति संभवात् वेदस्याप्यनुवादकतापत्तिरिति वाच्यं व्याप्तिस्मृतिविलंबेन तद्वि

त.प्र. त्वेवादितिपरास्तं अवान्तिकसंशयस्याप्रतिबंधकत्वात् योग्यतासंशयवदितिदिक् प्रा
१२२ भाकरास्तु क्वचिच्छाब्दभ्रमः क्वचिच्चप्रमेतिनियमनिर्वाहाय शाब्दप्रमात्वावच्छिन्नं प्रति
123 किंचित्कारणमुपेयं तच्चनयोग्यता अन्वयप्रयोजकरूपवत्त्वरूपयोग्यतायाः करका
भिप्रायप्रयुक्तपयसासिंचतीत्ययोग्यवाक्येपिसत्वात् अथदोषाभावएवतथास्तु दोषा
श्चभ्रमप्रमादविप्रलिप्साकरणापाटवरूपावक्तृनिष्ठाः भ्रमश्चोच्चारणीयवाक्या
र्थगोचरोभ्रमः प्रमादोऽनवधानता साचवाक्यार्थज्ञानस्वरूपयोग्यस्यवक्तुरुच्चा
रणीयवाक्यार्थनिश्चयव्यतिरेकः स्वकीयवाक्यार्थनिश्चयव्यतिरेकवारणायपदसं
तनिवेशः अन्यथाप्रतीतस्यार्थस्यान्यथाप्रतिपिपादयिषाप्रतारणा सैवचविप्रलि
प्सा इच्छाविषयीभूतवर्णानुकूलकंठताल्वाद्यभिघातानुत्पादकालीनापरवर्णानु
कूलकंठताल्वाद्यभिघातः करणापाटवं करणं कंठताल्वाद्यभिघातस्तस्यापाटव १२५

123A

मसामर्थ्यं इच्छाविषयीभूतवर्णानुकूलत्वमिति यावत् इति चेन्न भ्रांतप्रतारकवाक्ये सं
वादेन प्रमाणेऽप्रतारणास्य स्वदोषसत्वेन व्यभिचारात् अन्यथाप्रतीतस्याविद्यमानार्थ
स्य प्रतिपिपादयिषायाः एवं प्रतारणात्वेनोक्तदोषेऽप्युक्तेरपि सर्वसाधारणदोषत्वस्यैका
भावेन तत्तदभावस्य प्रत्येकं कारणत्वे भ्रमसत्वेपि अन्यदोषाभावसत्वात्प्रमात्वापत्तिः
अभावकूटस्य च कारणत्वे गौरवात् विसंवादिशुकवाक्यादपि प्रमापत्तेश्च तस्मा
द्यथार्थतात्पर्यकत्वमेव लोकवेदसाधारणं शब्दप्रमाप्रयोजकं यथार्थतात्पर्यक
त्वं च यथार्थवाक्यार्थप्रतीतीच्छयोच्चरितत्वम् एकपदार्थवदपरपदार्थप्रतीतीच्छयो
च्चरितत्वमिति यावत् उच्चरितत्वं चानुसंधीयमानत्वे तेन तत्तद्वर्णानां नित्यैकत्वेपि
रूपत्वेपि नासंभवः न वाप्तो निःश्लोकादाव व्याप्तिः वेदे तु एवं पूर्वाध्यापकेच्छामादा
य संगतिः मूर्खपठ्यमानमेदस्तु पंडितपठ्यमानवेदादभिन्न एव वेदस्य नित्यत्वा

त॰प्र॰ त्र नित्यानुमेयवेदे तु तदर्थज्ञापकत्वेन ज्ञानमन्येव सामग्रीति न व्यभिचारः शुकवाक्येपि
१२५ शिक्षकवाक्यमादायोपपत्तिः वर्णानां तन्मते नित्यैकरूपत्वात् न चैवं वेदवदाप्तासंपन्नशुकवा-
लादिवाक्येप्याप्त्यभाव इति वाच्यं तस्याप्रमाणत्वात् व्यवहारस्तु प्रत्ययत्वादसंसर्गाग्रहादिति
124 केचित्तु शुकबालादिभिन्नलौकिकवाक्ये यथार्थवाक्यार्थधीरनीतोच्छ्रयोच्चरितत्वं वेदे वेदत्वा-
दि शुकबालादिवाक्येऽबाधितत्वार्थकत्वं मानैव शाब्दप्रमाप्रयोजकं एकशक्तिमत्वेन चैते-
षां कारणत्वमिति नाननुगमः न च सर्वत्राबाधितार्थकत्वमेव प्रयोजकमस्त्विति वाच्यं यत्रा-
न्यघटाभिप्रायेण गेहे घटोस्तीत्युक्ते घटोत्तरं ध्यातमानयति तत्रान्यपरत्वेनाप्रमाणे विप्रा-
माण्यापत्तेः तदुक्तं यत्परः शब्दः स शब्दार्थीयत इत्याहुरिति दिक् तच्च ज्ञातमुपयुज्यते
ज्ञायमानकरणज्ञानोपयोगित्वे सति व्यभिचारित्वे लक्षणयात् व्याप्तिवच्छब्दशक्तिवच्चे-
ति तज्ज्ञानं हेतुः ज्ञातमुपयुज्यते शाब्दबोधनिरूपितज्ञाननिष्ठकारणतायां विषयतासंबं-
धेनावच्छेदकं शाब्दबोधनिरूपितज्ञानावच्छिन्नकारणताश्रयस्य शाब्दबोधे जननीयेत १२५

124A

पयोगित्वे सति सहकारित्वे सति व्यभिचारिवैलक्षण्यादिति तदर्थः सामान्यमुखी च व्याप्तिः
यद्यज्ज्ञानविनिरूपितज्ञानावच्छिन्नकरणताश्रयस्य यज्ज्ञाने जननीये उपयोगित्वे सति सह
कारित्वे सति व्यभिचारवैलक्षण्यं संभवति तज्ज्ञाननिरूपितज्ञाननिष्ठकारणतायां विष
यतासंबंधेनावच्छेदकं भवति यथा व्याप्तिः शब्दशक्तिश्चेति अत्र भग्नेऽवयवेंद्रियसन्निकर्षे
व्यभिचारवारणाय ज्ञायमानकरण इति शाब्दबोधं प्रति ज्ञायमानकरणस्य शब्दस्य स्वप्रत्यक्षे
जननीये उपयोगिनि शब्दनिष्ठश्रोत्रसमवाये व्यभिचार इति ज्ञानोपयोगीति तथा यज्ज्ञाने
ज्ञायमानकरणे तज्ज्ञाने जननीये सहकारीत्यर्थो न दोषः न च सल्लिंगपरामर्शे व्यभिचारः
ज्ञायमान इत्यस्य ज्ञानविशिष्टेत्यर्थात् सल्लिंगपरामर्शस्य ज्ञायमानासहकारित्वात् यस्मि
न्सति यदभावात् कार्याभावस्तस्यैव तत्सहकारित्वेन स्वविशिष्टस्वस्यासहकारित्वात् तथा च तत्
ज्ञाननिरूपितकारणतावच्छेदकं ज्ञानविशिष्टकरणस्य ज्ञायमानत्वघटितधर्मावच्छिन्न
कारणताकज्ञाने जननीये सहकारित्वमर्थः पर्वतस्यापि परामृश्यमाणलिंगत्वेनैवानुमि
तिकरणतया परामर्शविशिष्टकरणसत्त्वे परामर्शाभावासंभवान्न व्यभिचारः ह्रदो वह्निमा

तप्र०
१२५
125

न्नहृदत्वादित्यादौपरामृश्यमाणलिंगसत्वेपिव्याप्त्यभावेनप्रमानुमित्यभावाद्व्याप्तिवदितिदृ
ष्टांतसंगतिः व्याप्तिपक्षधर्मतावल्लिंगत्वेनप्रमानुमितिकरणत्वात् ज्ञायमानशब्दसत्वेशब्दस
मवायाभावासंभवेनेतादृशसहकारित्वस्यशब्दसमवायेऽभावेपि ज्ञायमानेधूमत्वसामान्यल
क्षणजन्यपरामर्शविशिष्टधूमसत्वेपिधूमनिष्ठरूपाभावेनधूमचाक्षुषानुदयात् परामृश्य
माणधूमस्यप्रत्यक्षेजननीयेसहकारिभूतेधूमनिष्ठरूपादौव्यभिचारवारणायज्ञानोपयोगीत्व
ज्ञायमानत्वघटितधर्मावच्छिन्नकारणताकज्ञानपदस्यनिवेशः अत्रेदंचिंत्यं परामृश्य
माणलिंगसत्वेपिसत्परामर्शाभावसंभवात्कथंसल्लिंगपरामर्शेव्यभिचारनिरासः नचयत्
ज्ञानंप्रत्युपयोगितातज्ज्ञानकरणतावच्छेदकज्ञानविशिष्टकरणेसहकारित्वंविवक्षितं सत्प
रामृश्यमानलिंगत्वेनप्रमानुमितिहेतुत्वेनसल्लिंगपरामर्शस्यप्रमानुमितिंप्रत्येवोपयोगि
तयाप्रमानुमितिकरणतावच्छेदकसत्परामर्शविशिष्टसत्वेपिसत्परामर्शाभावासंभवइति
वाच्यं तथासति व्याप्तिवदितिदृष्टांतासंगतेः व्याप्तिपक्षधर्मतावल्लिंगत्वेनप्रमानुमितिंप्र
त्येवोपयोगितयासत्परामर्शविशिष्टलिंगसत्वेव्याप्त्यभावासंभवेनतादृशसहकारित्वस्यव्या १२५

125A

ज्ञाप्रभावादिति आत्ममनोयोगबाधाभावादिवारणाय व्यभिचारिवैलक्षण्यादि
ति तच्च प्रमित्यजनकत्वावच्छिन्नं प्रमित्यजनकज्ञानजनकसामग्र्यप्रविष्टत्वमिति या
वत् न च सर्वविशेषभ्रमाभावेन प्रमित्यजनकाज्ञानजनकासामग्र्येवाप्रसिद्धा प्रमितिप
देन भ्रमभिन्नत्वविवक्षणे च तन्मते भ्रमाप्रसिद्ध्याऽप्रसिद्धिरिति वाच्यं स्वव्यधिकरणप्र
कारत्वानवच्छिन्नविशेष्यताकानुभवत्वस्य प्रमितिपदेन विवक्षणात् तादृशी च स्मृति
सामग्र्येव प्रसिद्धा अथानुभवस्य स्मृतिकरणतया सल्लिङ्गपरामर्शस्याप्यनेनैव
वारणे ज्ञानविशिष्टकरणसहकारित्व इत्यत्र ज्ञानविशिष्टेत्यस्य वैयर्थ्यमिति चेन्न करण
तातिरिक्तज्ञानजनकताश्रयकारणकलापस्यैव ज्ञानजनकसामग्रीपदेन विवक्षितत्वात्
अन्यथा स्वात्मकहेतुलिङ्गकानुमितिस्थानाभिषिक्तसाध्यस्मृतिमादाय स्मृतिसामग्र्य
प्रविष्टत्वस्य व्याप्त्यावच्छेदकत्वेन दृष्टान्तासिद्ध्यापत्तेः अखण्डाभावघटकतया चासिद्धिवारक
त्वेपि कारणतातिरिक्तेत्यस्य न वैयर्थ्यं वस्तुमात्रस्यैव स्वात्मकलिङ्गकानुमितिस्थानाभि

त॰ प्र॰
१२६
126

विशिष्टसाध्यस्मृतिजनकतयाऽप्रसिद्धिवारकत्वाच्च जनकताकरणत्वोभयसाधारणस्यज
नकतात्वस्यैकस्याभावाद्विशिष्यैवनिवेशोकरणतात्मकजनकताव्यक्तेर्नप्रवेशः ननुका
रणतातिरिक्तजनकतात्वेनप्रवेशइतिव्यर्थत्वशंकायामनन्वयकापाच्च उद्बोधकव्यावृत्ता
वपिस्मृतिजनकतानिवेशनीया नातउद्बोधकत्वयाजनकतामादायासिद्धिः प्रागभा
वस्यतत्तद्व्यक्तित्वेनाहेतुत्वाच्च नप्रमानुमितिप्रागभावेव्यभिचारइतिदिक् केचित्तुइष्ट
प्रवृत्तिविषयत्वेशिष्ट्यावगाहिज्ञानमेवप्रकृतेप्रमितिशब्दार्थइत्याहुः अथयदाज्ञाय
मानकरणत्वमाधेयत्वसंबन्धार्थः तथाच यद्यज्ज्ञानीयज्ञायमानकरणनिष्ठत्वेस
तियज्ज्ञानोपयोगित्वेसतिव्यभिचारित्वंलक्षणंभवति नतुज्ज्ञाननिरूपितज्ञाननिष्ठक
रणतायांविषयतासंबंधेनावच्छेदकंभवतीतिव्याख्यार्थः सल्लिंगपरामर्शस्तुनज्ञा
यमानकरणधर्मनिष्ठः अथान्मलिंगकानुमितिंप्रतिज्ञायमानकरणत्वात्मनित
स्यवृत्तेस्तद्वारणमितिचेन्न तज्ज्ञानानधिकरणत्वस्यज्ञायमानकरणेनिवेशात् १२६

126A

अतएवचप्रागभावस्यतन्नव्यक्तित्वेनहेतुत्वेपिनप्रमानुमितिप्रागभावेव्यभिचारः
भ्रमनिष्ठानौपाधिकत्वादिवारणायज्ञानोपयोगित्वेसतीति वाधाभावादिवारणायव्य
भिचारिवैलक्षण्यत्वादिति तदर्थश्चाभासव्यावृत्तत्वं भ्रमजनकभिन्नत्वमितियावत्
वस्तुमात्रस्यैवलिंगविधयाभ्रमजनकतयाज्ञायमानलिंगत्वातिरिक्तरूपेणभ्रम
जनकभिन्नत्वंविवक्षणीयं नचतन्मतेनतदप्रसिद्धिः विसंवादिप्रवृत्त्यादिजनक
ज्ञानमात्रस्यैवतन्मतेतथात्वात् नचावाधितत्वादितया वाधस्यविपरीतनिश्चयपर
स्यसद्भावेज्ञानमात्राभावेनतदभावस्यज्ञानमात्रप्रयोजकत्वादिति तन्मतेऽ
गृहीतासंसर्गकग्रहणस्मरणात्मकज्ञानद्वयस्यैवभ्रमतयाविसंवादिप्रवृत्तिजनक
त्वेनतस्यनिर्द्धर्मितावच्छेदकतयावाधाभावस्यनतत्रहेतुत्वमितिकथमेतत् अत्रकेचि
त् विसंवादिप्रवृत्तिजनकत्वेननज्ञानस्यप्रवेशः अपिस्मृतित्वेन तथाचस्मृतिजनकता
वच्छेदकावच्छिन्नान्यत्वादितितदर्थः जनकतावोद्बोधकव्यावृत्तातेननासिद्धिरिति

त॰प्र॰ ऽसंसर्गाग्रहविशिष्टज्ञानद्वयेऽन्वयव्यतिरेकाभ्यां बाधस्य विरोधित्वमिष्यत एवेत्यपि केचित्
१२९ इतिदिक् तच्च तात्पर्यं सामान्यतः तत्तत्पदार्थत्वेन रूपेण तत्तत्पदार्थघटितं विशिष्य तत्तत्प
दार्थघटितं च तत्रैवेदं स्थले घटपदार्थविशिष्टान्यपदार्थविशेष्यकघटपदार्थप्रकारकप्रतीती
127 च्छयोच्चरितत्वरूपतात्पर्यज्ञानं हेतुः तत्तु विशिष्य लोके तु घटविशिष्टकर्मताविशेष्यकर
घटप्रकारकप्रतीतीच्छयोच्चरितत्वरूपतात्पर्यज्ञानमेव हेतुः तत्र सामान्यतो घटपदार्थत्वा
दिना तात्पर्यग्रहेपि पटादेरपि लक्षणादिना घटपदार्थत्वसंभवेन घटविशिष्टकर्मतावि
शेष्यकप्रतीतीच्छयोच्चरितेनैवेति विशिष्यसंदेहे पि शाब्दबोधापत्तेः वेदे तु लक्षणादिनान्या
र्थासंभवेन एकपदार्थत्वेन ज्ञानेपि विशिष्यसंदेहाभावात् यथा कपिंजलानालभेतेत्यादौ
प्रथमोपस्थितत्वरूपलाघवतर्केण निर्णीतत्रित्वविशिष्टकपिञ्जलपदार्थपरं बहुवचनान्तं कपिं
जलपदमिति सामान्यतः कपिञ्जलपदार्थत्वरूपेण तात्पर्यनिर्णयेपि विशिष्य कपिंजल
त्वादिरूपेण तात्पर्यसंशयासंभवात् लोके तु गुरुभक्तेत्यर्थे तात्पर्यसंभवेन लाघवतर्केन १२९

वत्वाभावात् विशिष्यसंदेहसंभवेन घटविशिष्टकर्मत्वविशेष्यकघटप्रकारकप्रतीतीच्छयोरुत्पत्ति
तमिदमिति तात्पर्यनिर्णयस्य शाब्दबोधात्पूर्वमेव संभवापत्तिरतस्तया लौकिकवाक्यमनुवादकं
तस्माल्लौकिकवाक्यं सर्वमेवानुवादकत्वादप्रमाणं वेदेतु तदभावात्प्रामाण्यमित्याहुस्तदस
त् एकपदार्थविशिष्टापरपदार्थविशेष्यकैकपदार्थप्रकारकप्रतीतीच्छयोश्चरितत्वरूपयथार
थार्थतात्पर्यनिश्चयत्वेन हेतुत्वे याथार्थ्यनिवेशे गौरवात् किंतु नानार्थानुरोधेन शाब्दसा
मान्ये एकपदार्थप्रकारकापरपदार्थविशेष्यकप्रतीतीच्छयोश्चरितत्वरूपतात्पर्यज्ञानस्यै
व नैवेवंकरकाभिप्रायप्रयुक्तपयसा सिंचतीत्यादावपि प्रमापत्तिरित्युक्तमिति वाच्यं एकप
दार्थः परपदार्थवत्त्वरूपयोग्यताप्रमाया एव संशयनिश्चयसाधारणरूपेण कारणत्वात् अ
पि च दृष्टं वाक्यं भ्रमादिविशिष्टज्ञानयोरन्यतरजन्यं वाक्यार्थज्ञानजन्यवाक्यत्वात् तत्र
भ्रमादेर्बाधे अयं वक्ता स्वप्रयुक्तवाक्यार्थगोचरयथार्थज्ञानवान् भ्रमाद्यजन्यवाक्या
र्थज्ञानजन्यवाक्यप्रयोक्तृत्वात् अहमिवेति वक्तृयथार्थवाक्यार्थज्ञानानुमानपूर्वक एव य

त॰प्र॰
१२८
128

यार्थवाक्यार्थप्रतीतिपरत्वनिश्चयोहेतुर्वीच्यस्तत्त्वनसंभवति भ्रांतेः पुरुषधर्मत्वेन भ्रमाद्य
जन्यत्वनिर्णयासंभवात् विसम्वादिप्रवृत्तिजनकत्वादेश्च तद्ग्राहकलिंगस्य शाब्दबोधोत्तर
कालीनत्वादित्याशंकां विस्तरः ननु शब्दस्यानुमानांतर्गतत्वेन घटमानयेतिशब्दाद्घटादि
पदे शक्तिमविदुषोपि शाब्दबोधापत्तिः समम् तु तत्र व्याप्तिज्ञानाभावादेव तत्र संभव इत्याशा
येनाशंकते नन्विति स्वातंत्र्येण शब्दत्वेन पामराणां घटादिपदेऽगृहीतशक्तिकानां स
हकारित्वादिति इतरकारणचक्रसमवहितकारणस्यैव फलोपधायकत्वेन केवलशब्दसत्त्वे
पि सशक्तिज्ञानरूपसहकारिविरहान्न तत्र फलोपधायकत्वमिति भावः उपोद्घातसंगत्याश
क्तिं निरूपयितुं शंकते अथेति इयं शब्दसहकारिग्रहविषया पदार्थांतरमिति तन्नस्मर
णीतावच्छेदकाभावकूटवदित्यर्थः तेन न सिद्धसिद्धिव्याघातः संकेतग्राह्ये वक्ष्यमाणसंके
तग्रहजन्यग्रहविषय इत्यर्थः अभावघपकत्वात् अभिधाज्ञाने भवतामवघपमपेक्षणी
यत्वात् संकेतं निरूपयति सचेति अस्मादिति एतत्पदजन्यत्वप्रकारतानिरूपितेनदर्थ १२८

विशेष्यतापन्नालीकेत्यर्थः इतैवमिति एवं इच्छामात्रस्यैवाभिधारूपत्वे पामरादीति ग
गरीत्यादिशब्दा इत्यर्थः अभिधायकाः स्युरिति तथा च नापभ्रंशितवैन म्लेच्छितवै इत्या
दिस्मृतिविरोधः शक्त्याप्रतिपादकत्वस्यापभ्रंशानपभ्रंशसाधारण्यात् अतिरिक्तशा
क्तिस्वीकारे तु तत्र संकेतस्य व्यतिरिक्ताभिधायास्तत्रानंगीकारात् न तादृशस्मृतिवि
रोध इति भावः संकेतमात्रं तादृशेच्छामात्रं अपभ्राषिते गगर्यादिशब्दे सोऽस्ति ईश्व
रसंकेतोऽस्ति मानाभावादिति शास्त्रनिर्णीतबुद्धीनां गगर्यादिशब्दात् शाब्दरूपफलाभ
भावेनापभ्रंशे न तादृशेश्वरसंकेत इत्यर्थः नापभ्रंशितवै इति स्मृतिविरोधस्य बाधको
वसेयः नन्वु शाब्दसामान्ये शक्तिज्ञानं हेतुस्तया ऽपभ्राषिते शक्त्यभावे कथं शाब्दबोध इ
ति तटस्थः शंकते कथं तर्हीति शक्तिभ्रमादिति भ्रमप्रमासाधारणशक्तिज्ञानत्वेन हेतु
त्वादिति भावः नन्वप्रमेयत्वादिना शक्तिज्ञानेपि शाब्दबोधानुदयाच्छक्तित्वेन तज्ज्ञानं हेतुः
शक्तित्वं च तादृशेश्वरसंकेतत्वं तथा च पामराणामीश्वराज्ञानात् संकेतस्येश्वरसंकेतत्वे

त॰प्र॰ १२९ नाज्ञानात्कथंशाब्दबोध इत्याशंकते कथं तर्हीति ईश्वरमविदुषामिति पामराणाम्
मीमांसकानां चेत्युभयत्रान्वेति तथेति संकेतत्वेनेत्यर्थः तेषामपि संकेतत्वप्रकार
129 कज्ञानसत्वादिति भावः चैत्रशब्दादयमर्थोबोद्धव्य इत्यस्माकीनेच्छाविषयानां चैत्रादि
शब्दानामशक्तत्वापत्तिः तत्रेश्वरसंकेताभावादित्याशंकते आधुनिकेति कागति
रिति तत्रेश्वरेच्छारूपसंकेतज्ञानाभावादिति भावः तस्यापि आधुनिकसंकेति
तचैत्रादिपदस्यापि ईश्वरेति द्वादशाहकालीनपितृच्चरितनामत्वादिनानामवाच्यः शिशुरि
त्याकारकेच्छयेश्वरेणतादृशशक्तिप्रणयनात् तत्रापीश्वरसंकेतोस्तीतिभावः ईश्वरीयज्ञान
स्येच्छायाः कृतेर्वा शक्तिरूपत्वमिति विनिगमनाविरहादतिरिक्तैव शक्तिरिति नव्याः संकेत
ग्राहकप्रमाणाभावेन संकेतग्रहासंभवात्कथंशक्तिज्ञानंहेतुरित्याशंकते स्यादेतदिति कथं
ग्राह्यः केनप्रमाणेनग्राह्यः शंकते उपमानादिनेति तस्यातिदेशवाक्यार्थज्ञानरूपोपमानस्य
वाक्यार्थज्ञानेति गोसदृशो गवयपदवाच्य इत्यतिदेशवाक्यार्थज्ञानं तावच्छादंतद्वमोसदृश १२९

इति खण्डवाक्यार्थज्ञाने सति स्यादित्यर्थः तस्य च गोसदृशो गवय इति वाक्यार्थज्ञानस्य शक्तिग्रहमू
लकत्वात् गोपदं गवि शक्तमिति शक्तिज्ञानमूलकत्वादित्यर्थः तथा च तच्छक्तेरप्युपमानं नतरा
हृदेऽनवस्थापत्तिरिति भावः व्यवहारादिति प्रयोज्यप्रयोजकवृद्धव्यवहारादित्यर्थः व्यवहारश्च
घटानयनादिक्रियारूपः केनचित् प्रयोजकवृद्धेन कथ्यमानः प्रयोज्यो वृद्धः तदर्थं प्रयोजक
वृद्धवाक्यार्थं घटमानयति घटानयनानुकूलचेष्टावान् तया क्रियया घटानयनक्रियया त
स्य प्रयोज्यवृद्धस्य प्रयत्नमिति इयं क्रिया प्रयत्नपूर्विका विलक्षणक्रियात्वात् मत्क्रियाव
दित्यनुमिनोतीत्यर्थः ज्ञानं घटानयनगोचरज्ञानं अयं घटानयनगोचरः प्रयत्नः घटान
यनज्ञानजन्यः घटानयनगोचरप्रयत्नत्वात् स्वीयस्तन्यपानगोचरप्रयत्नवत् यो यद्गोचरप्र
यत्नः स तज्ज्ञानजन्य इति सामान्यमुखी व्याप्तिरतो न दृष्टान्तासंगतिरिति दृष्टान्तमेवाह स्वप्र
यत्न इति स्वीयस्तन्यपानगोचरप्रयत्न इत्यर्थः तेन बालेन तथा निश्चयात् ज्ञानजन्यत्व
निश्चयात् तद्धेतुकाकांक्षायां घटानयनगोचरज्ञानहेतुकाकांक्षायां शब्दमेव घटमानयेति

१२२ शाब्दमेव आवापोद्वापाभ्यामिति आवापः संग्रहः उद्वापः त्यागः यथा घटमानय पटं नये
त्यादि लोके च तस्मिन्निति घटपदे घटधीजनकत्वे स्फुरणे चेत्यर्थः अतिप्रसंगभंगाय अगृही
130 तशक्तिकानामपि घटबोधातिप्रसंगभंगायेत्यर्थः तज्जननानुकूलं घटधीजननानुकूलं
किमनुपपन्नमिति तदर्थविषयकशाब्दत्वावच्छिन्नं प्रतिस्वाश्रयमाननतत्त्वप्रकारकत्वेन कारणत्वा
न्नातिप्रसंग इति भावः नन्वेवं व्यवहार एव शक्तिग्राहक इत्यायातं इत्थं च शक्तिग्रहं व्याकरणो
पमानकोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृ
द्धा इति प्राचीनगाथाविरोध इत्यत आह तदनंतरमिति आद्यशक्तिग्रहानंतरमित्यर्थः व्य
वहारात् गवानयनगोचरप्रयोज्यप्रयोजकवृद्धव्यवहारात् एवं तु घटानयनगोचरव्यवहा
रस्य कइति नाभेदः अनवस्थाभियापूर्वव्यवहार एव शक्तिग्राहकः ततश्च व्यवहारेणोपमाने
न वा शक्तिग्रहो जायते इत्यत्र नास्माकमाग्रह इति न प्राचीनगाथाविरोध इति भावः उपमाना
दिति गोसदृशो गवयपदवाच्य इत्युपमानाद्गवयो गवयपदवाच्य इति शक्तिग्रहोपायादित्यर्थः १२२

130A

शब्दादिति आप्तवाक्यादित्यर्थः कोकिलः पिकपदवाच्य इत्याप्तवाक्यात्पिकशब्दः कोकिले शक्ति-
ग्रहादिति भावः व्याकरणादिति प्रकृतिप्रत्ययादीनां शक्तिग्रहो व्याकरणादित्यर्थः कोशादेरि-
ति अप्येकदंतहेरम्बलम्बोदरगजाननादित्यत्र गणेशत्वविशिष्टे शक्तिग्रह इत्यर्थः नन्वत्र गणे-
शत्वविशिष्टस्य पदार्थतया पदार्थस्य पदार्थतावच्छेदकस्य वा भेदाभावात्कथं द्वन्द्व इति चेन्न कोश-
स्य शक्तिग्राहकतया इदं पदमत्र शक्तमिति शक्तिग्रहस्यैन तस्माद् इदं येन तत्र पदानामेव पदार्थतया-
नेद्धस्य सत्वात् आदिपदाद्वाक्यशेषविवरणप्रसिद्धपदसामानाधिकरण्यपरिग्रहः वाक्यशेषा-
द्यथा यवमयश्चरुर्भवतीत्यत्र यवशब्दो म्लेच्छप्रसिद्धिवशात्कंगोवीचक आर्यव्यवहारदर्शि-
नां दीर्घशूकविशिष्टस्य वाचको व्यवहारस्तो भयत्राविशेष्यादिति संदेहे वसंते सर्वसस्यानां जा-
यते पत्रशातनं मोदमानाश्च तिष्ठंते यवाः कणिशशालिन इति वाक्यशेषाद्दीर्घशूकविशिष्टे
शक्तिनिर्णयः न चैवं दीर्घशूकविशिष्टशक्तिबोधनेपि कंग्वादौ शक्तिसत्वे बाधकाभावः
नानार्थत्वेनापि वेदोपपत्तेरिति वाच्यं अन्याय्यश्चानेकार्थत्वमिति न्यायेन वेदस्य बलवत्वात्ते

त॰प्र॰ वैवशक्तिपरिच्छेदात् एवंयत्नदुःखेनसंभिन्नंनचग्रस्तमनंतरं अभिलाषोपनीतंचतत्सुखं
१३१ स्वःपदास्पदमित्यत्रवेदादेवस्वर्गपदशक्तिग्रहः ननुदुःखासंभिन्नत्वंनदुःखासमानाधिकरण
त्वं स्वावावंतेचदुःखसमत्वेनासंभवात् नापिदुःखासमानकालीनत्वं अस्मदादिसुखेनर
131 याप्तात् नचानंतरमित्यस्याविरलगलनप्रवाहीत्यर्थकतयाऽविरलगलनप्रवाहस्यदुःखा
संभिन्नत्वप्राप्त्यासातिव्याप्तिरितिवाच्यम् अस्मदादिसुखस्यापिकतिपयकालावच्छेदे
नतथात्वसंभवात् चक्रवर्तिसुखितथात्वसंभवेनाभिलाषोपनीतमित्यनेनापितन्निरासा
संभवात् अन्यथाविशेषणांतरवैयर्थ्यापत्तिरितिचेत् अत्रकेचित् एकजन्मावच्छेदे
नदुःखासंभिन्नत्वादिकंनानेवशक्यतावच्छेदकमित्याहुः तन्न नानार्थत्वकल्पनेगौर
वात् तथातात्पर्यग्राहकस्याभावाच्च केचित्तुयावन्तिनवैयर्थ्यंतदेवशक्यतावच्छेदकमि
त्याहुः अपरेतुदुःखासंभिन्नत्वादिकंनशक्यतावच्छेदकं किंतु अधर्माजन्यशरीरजन्यर
सुखत्वोपलक्षकमिदं योगिनांतुनाधर्माजन्यशरीरं तत्रदुःखोत्पत्तेरधर्मजन्यत्वात् सु १३१

131A

खमात्रावच्छेदकेतच्छरीरेमानाभावात् अथमरणस्यदुःखनियतत्वात्स्वर्गिशरीरेपिमरणाज्जर
न्यदुःखसंभवात्संभवः नचैनेतराः सुखमात्रवदत्यनेनविरोधः तस्यादुःखोस्यपरत्वादितिचेन्न
अनुकूलतर्काभावेनमरणस्यदुःखनियतत्वेमानाभावात् भावेवामरणदुःखजनकाधर्मान्या
धर्माजन्यशरीरजन्यसुखवत्स्वप्रवृत्तिनिमित्तत्वात् एतेनस्वर्गिपिपातभीतस्येतिश्रवणात्स्वर्गियो
निपुण्यक्षयशंकयास्वर्गेपिदुःखोत्पत्तेरसंभवइतिनिरस्तं तदन्यत्वेनाप्यधर्मस्यविशेषणीयत्वा
त् स्वर्गिशरीरस्यसुखमात्रावच्छेदकत्वेनतत्रदुःखधीभ्रांतिवत् अतएवतद्धर्ममात्रजन्यमेवेति त
द्विशेषणेपिसततिविरहाच्चेत्याहुः अविरलप्रवाहि विरस्यायीच्छामात्रयोनिदुःखासंभिन्नसु
खत्वंशाकतावच्छेदकं तत्प्रकारकबोधस्यानुभवसिद्धत्वादित्यप्याहुः नचाततत्वमिति आसत्वंवि
रस्थायित्वेप्रवाहस्येतितोध्यं विवरणाद्यथा पचतिपाकंकरोतीतियत्नार्थककरोतिनासर्वाख्यात
विवरणादाख्यातस्ययत्नत्वविशिष्टेशक्तिः यद्यपिपूर्वोच्चरितवाक्यस्यसमानार्थकोच्चरितवाक्येना
र्थकथनरूपविवरणस्यशक्तिग्राहकता नशब्दविधया इदमस्यस्मत्रशक्तमितिशक्तिबोधकपदा

१३२ भावात् तथापि आख्यातपदं यत्नत्वविशिष्टशक्तं यत्नत्वविशिष्टशक्तकरोतिधातुप्रतिपादितार्थ
कत्वात् पाकत्वविशिष्टशक्तपाकपदप्रतिपादितार्थपचधातुवत् यद्धर्मविशिष्टशक्तशक्तप्रतिपा
132 दितार्थकं भवति न तद्धर्मविशिष्टशक्तं भवतीति सामान्यमुखी व्याप्तिस्तत्राभिमता इह सहकारतरौ
मधुरं पिको रौतीत्यत्र सहकारतरुरूपप्रसिद्धपदसमभिव्याहारेण पिकपदं कोकिलशक्तमिति प्रसि
द्धपदसमभिव्याहारेण शक्तिग्रह इति ध्येयं ननु कोशस्य शक्तिग्राहकत्वं गुणे शुक्लादयः पुंसि गुणि
णि लिंगास्तु तद्वतीत्यनेन शुक्लादिपदानां गुणे गुणविशिष्टे च शक्तिप्रतिपादनाद्गुणविशिष्टेपि
शक्तिः स्यादिति चेन्न अनन्यलभ्यस्यैव शब्दार्थतया शुक्लादिपदानां गुणे गुणविशिष्टे लक्षणयै
वोपपन्नेन तत्र शक्तिः कल्प्यते असति बाधक एव कोशस्य शक्तिग्राहकत्वात् अतएव व्याकरणे
नाख्यातस्य कर्तरि शक्तिप्रतिपादनेपि लाघवात् कृतावेव शक्तिरिति वर्ण्यते इति दिक् तयोः प्रयोज
ज्यप्रयोजकवृद्धयोः पश्यता बालेन अन्ययोः स्वपूर्वकालीनप्रयोज्यप्रयोजकवृद्धयोः अनवस्थि
ति तयोर्व्यवहारो व्यवहारपूर्वक एवेत्यनवस्थापत्तेरित्यर्थः इयं अनवस्था बीजांकुरवदना १३२

132A

नाद्यन वक्ष्यानरोषाय प्रामाणिकत्वादितिभावः तदसंभवादिति तत्रासोत्पन्नकालस्यस्वपूर्व-
कालीनप्रयोज्यप्रयोजकवृद्धव्यवहारादर्शनाच्छक्तिग्रहासंभवादित्यर्थः ननुसंसारस्यानादित्वा
त्खंडप्रलयस्य चाभावेनसर्गाद्यकालाभावात्कथंतदसंभवइत्याशंकते प्रलयइति खंडप्रलयइत्य-
र्थः कार्यद्रव्येति सृष्टिकालवारणाय कार्यद्रव्यानधिकरणेति कालिकसंबंधेन चानधिकरणत्वं
बोध्यं कार्यानधिकरणत्वस्य त्वसंभवः खंडप्रलयेपिपरमाण्वादौ रूपक्रियादिसत्वादतः कार्यद्रव्ये
ति द्रव्यानधिकरणत्वं च तथापि परमाण्वादेः सत्वादतः कार्येति कार्यद्रव्यानधिकरणत्वं तु म
हाप्रलयेतिव्याप्तिरतः कार्याधिकरणेति कार्यत्वंचात्र ध्वंसप्रतियोगित्वं तेनमहाप्रलयेध्वंसरू
पकार्याधिकरणत्वेपि नातिव्याप्तिः अभावातिरिक्तकार्यपरंकार्यपदं सामान्यपदस्यविशेषपर
त्वादित्यपि कश्चित् महाप्रलयस्यचरमक्षणः स्वध्वंसरूपतया प्रतियोगितासंबंधेनकार्याधिकर
णत्वात्कालेति कालिकसंबंधेनाधिकरणत्वबोधकं भिन्नकालीनयोर्नाधाराधेयभावइतिभावः
वस्तुतस्तु शब्दादिरूपकार्याधिकरणत्वाद्गगनेतिव्याप्तिरतः कालेति आगमेति धातायथा

त.प्र. पूर्वमकल्पयदिति वेदस्य सिद्धत्वादित्यर्थः तथा च संसारस्य प्रवाहानादित्वं न तु नादित्वमेवेति भावः
१२५ कालकपालान्यावृत्ति घटप्रागभावः कार्यद्रव्यानधिकरणकार्याधिकरणवृत्तिः अभाववत्वात् ग
गनवृत्ति घटात्यंताभाववत् पक्षधर्मताबलाच्च प्रागभावे ईदृशकालवृत्तित्वे सिद्धे तत्वं च प्रलयवृ
133 त्तित्वमादाय पर्यवस्यतीत्यनुमानमपि तत्साधकं बोध्यं शरीरद्वयं प्रयोज्यप्रयोजकवृद्धशरीरद्व
यं तथा पूर्ववत् संकेतं घटपटादिपदसंकेतं नन्वेवं संभवतीश्वरे मानं सत्वे तदेव तु नेत्याशं
कते ईश्वर एवेति व्यवहारेति शक्तिग्राहकाभावाच्छक्तिग्रहे घटादिगोचरप्रवृत्त्यनुपपत्तिरेवे
श्वरे मानमित्यर्थः यद्यप्यर्थापत्तेर्नास्मन्मते प्रमाणांतरत्वं तथापि सर्गाद्यकालीन शक्तिग्रहः
प्रयोज्यप्रयोजकवृद्धप्रयोज्यः प्रयोज्यप्रयोजकवृद्धव्यवहारान्यात्प्रयोज्यत्वे सति प्रयोज्यत्वात्
यन्नैवं तन्नैवं यथा गगनादि इति व्यतिरेक्यनुमानमेव तदानीमन्यवृद्धासंभवादीश्वरसाधकं
मिति हृदयं मन्वादय इति तथा च नेश्वरसिद्धिरिति भावः यद्यप्येतावतापि न संकेतमहानुप
पत्तिस्तथापि प्रसंगादीश्वरोपि साध्यत इति भावः तेषामिति कपिलमन्वादीनां सर्वज्ञत्वे भवतु १२५

133A

व्यवहारहेतुत्वं परं तु तेषां तत्त्व एव विवाद इति भावः नन्वव्यवहारान्यथानुपपत्तिर्भवन्मते ईश्वर
इव मन्मतेपि तेषां सर्वज्ञत्वे प्रमाणं स्यात् धर्मिकल्पनातो धर्मकल्पनाया लघीयस्त्वं चेत्याह व्यव
हारेति एवमपि पूर्वसर्गसिद्धसर्वज्ञत्वकमन्वादिस्वीकारेपि अनुपपत्तेरिति पूर्वसर्गात्पूर्वसर्ग
सिद्धसर्वज्ञत्वकः कश्चिद्यदि स्यात्तदा तत एव तत्र व्यवहारप्रवर्त्तनास्यात् स एव तु नास्तीति भावः न
त्रापि पूर्वसर्गेपि अन्य एवेति स्वपूर्वसर्गसिद्धसर्वज्ञत्वकः अन्य एवेत्यर्थः तथाभावः व्यव
हारप्रवर्त्तकत्वं ननु सर्वदा सार्वज्ञ्यशाली एको मनुरेव सर्वमूलमित्याशंकते अस्त्वेक एवेति
स एवेति सार्वज्ञ्यादिशाली मनुत्वेन भवदभिमत इत्यर्थः तथा च नाममात्रे भेदो न तु नामवतीति
भावः दिगिति स्वोपादानगोचरजन्यापरोक्षज्ञानचिकीर्षाकृत्यजन्यानि सकर्तृकाणि कार्य्य
त्वात् घटवदित्यनुमानमपीश्वरसाधकमवसेयम् ननु शाब्दबोधे शक्तिज्ञानस्य हेतुत्वेपि घट
पदं घटे शक्तमिति शक्तिज्ञानकाले पद शाब्दबोधापत्तिः न च तदा घटशाब्दबोधोत्पत्त्या शाब्द

त॰प्र॰ त्वावच्छिन्नेऽज्ञायत एव पदशाब्दत्वावच्छिन्नस्य चापादकाभावादिति वाच्ये योग्यताज्ञानादेरे
१३४ वतदवच्छिन्नापादकत्वादित्याशंक्य ते स्यादेतदिति ननु तद्विशेष्यकशाब्दत्वावच्छिन्नं प्रति त
134 दुक्तपदज्ञानत्वेन हेतुत्वकल्पनान्योन्याश्रयापत्तिरित्याशंकते अथेति देशांतरस्थस्य पुंसः तस्या
एव काशीस्थगोरेव अप्रतीतेरिति असन्निकृष्टत्वादिति भावः गोः काशीवृत्तिरिति वाक्यज
न्यबोधे काशीस्थगोरेव विशेष्यता एवं च देशांतरीयपुंसस्तादृशगोरसन्निकृष्टत्वेन तत्र शक्तेर
ग्रहात् शाब्दबोधानुपपत्तिरिति तद्विशेष्यकशाब्दत्वावच्छिन्नं प्रति तद्विशेष्यकशक्तिग्रहत्वे
न कारणतास्त्वं चेति शाब्दत्वशक्तिज्ञानत्वाभ्यामेव कार्यकारणभावो वाच्यः योग्यतावलात्
च्चागृहीतशक्तिकव्यक्तेरपि भानमुपेयम् एवं च घटपदात् घटशाब्दबोधवत्त्रिगुणात्मकेत्यनु
पपत्त्या शाब्दानुमितिप्रमितित्वेतरगतेव एवं च घटपदात् पटशाब्दबोधापत्तिः तन्निरूपितशक्तिज्ञा
नादेरभावादित्याख्यातुल भावार्थावसेयः अत्र शाब्दत्वशक्तिज्ञानत्वाभ्यां कार्यकारणभाव १३४

134A

विचारे गोत्वएवेति गोत्वविशिष्टे शक्तिस्वीकारे आवश्यकत्वान्नागृहीतविशेषणान्यायेन गोत्व
एव शक्तिः विशिष्टे शक्तिस्वीकारमपेक्ष्य विशेषणे शक्तिस्वीकारे लाघवात् तदिदमुक्तं विशेष्यं ना
भिधा गच्छेत् क्षीणशक्तिर्विशेषणे इति कथं तर्हीति व्यक्तेरशक्यत्वे इत्यर्थः लाभः बोधविषयता अश
क्यस्यापि शाब्दबोधविषयत्वोपगमे पटपदाद्घटादेरपि बोधापत्तेरिति भावः ननु आक्षेपो नुमानं
तच्च न संभवति साध्यहेतुप्रयोगासंभवात् तथाहि अयं गौः गोत्वादिति तावदनुमानमसंभवि
शब्दात्तदाज्ञानात् नापि गोत्वं गवाश्रितं गोत्वत्वादिति पक्षतावच्छेदकहेत्वोरैक्येन सिद्धसाध
नात् अथ गोत्वं व्यक्त्याश्रितं जातित्वादित्यनुमानेन पक्षधर्मताबलाज्ज्ञातात्र व्यक्तिसिद्धिरिति
चेन्न जातित्वादेर्लिंगस्य पक्षानुपस्थितेः व्याप्त्यादिप्रतिसंधानमंतरापि व्यक्तिबोधस्यानुभवसिद्ध
त्वाच्चेति कथमाक्षेपाद्व्यक्तिलाभ इत्याशयेनाशंकते ननु कोयमिति समाधत्ते तस्येति ग
वादिधर्मिण इत्यर्थः अर्थापत्तिमेवाह गोत्वंहीति अनुपपन्नमिति आनयनाद्यन्वयेऽनुप

पन्नमित्यर्थः तं स्वाश्रयं आदिपतीति अनुपपत्तिज्ञानजन्यार्थापत्त्यात्मकज्ञाने व्याप्त्यादिज्ञा
नस्यानपेक्षितत्वात् अतएव शतवर्षजीविनो गृहेऽभावो बहिस्सत्वं विनानुपपन्न इत्यनुपपत्ति
ज्ञानाद्यधिकरणेनापि शतवर्षजीविगृहाभावेन बहिः सत्वसिद्धिरिति भावः तथा च गोशब्दा(
द्गोत्वस्य शाब्दबोधः व्यक्तेस्त्वनुमितिविषयत्वमर्थापत्तिविषयत्वं वा ननु शाब्दबोधे तस्याः प्रवेशः
भट्टमते पदोपस्थापिता एव शाब्दबोधे भासंते यथा गामानयेत्यादौ पदानुपस्थापिता एव वा यथा
पश्यतः श्वेतिमारूपं हेषाशब्दं च शृण्वतः खुरविक्षेपशब्दं च श्वेतोश्वो धावतीति धीरित्यत्र पदा
नुपस्थापितानामेव शाब्दबोधविषयता तत्र शाब्दयामीत्यनुभवान्नतु केचित्पदोपस्थापिताः केचि
त्त्वपदानुपस्थापिता इत्यर्द्धजरतीयन्यायस्य भट्टैरनंगीकारात् न च गौरिति पदाद्युगपदेव जातिव्य
क्त्योः प्रतीतिर्व्याहन्येत एवं गोपदाद्गोत्वधीः ततोऽनुपपत्तिज्ञानं ततश्च व्यक्तिधीरिति ज्ञानधाराक
ल्पनं चेति गौरवमिति वाच्यं गोपदस्य जातिमात्रवाचकत्वसिद्धे युगपत्प्रतीतेरसिद्धेः ज्ञानधाराक

135A

कल्पनस्य च फलमुख्यत्वेनादोषत्वात् यथा पचतीत्यत्राकृतिमात्रशक्त्याख्यातेन कृतिमात्रप्रतीतिः
कर्त्तुर्लाभस्तु आक्षेपादेव अन्यथा सकर्त्तृकक्रियाया अवगतेस्तत्रापि कर्त्तरि शक्तिः प्रसज्येत अन्यल
भ्यत्वात्तत्र न शक्तिरिति चेदत्रापि तुल्यत्वादिति ध्येयम् अनुपपत्तीति गामानयेत्यादौ गोत्वस्यानयनेना
न्वयानुपपत्त्या व्यक्तेराक्षेपसंभवेपि गौरस्तीत्यत्र गोत्वस्यास्तित्वेन्वयसंभवेनानुपपत्तिज्ञानस्यैवासं
भवितया नं तेन व्यक्तेर्लाभसंभव इत्यर्थः ननु अनुपपत्तिज्ञानं विनापि व्यक्तिबोधस्यानुभाविकत्व
या तदनुपपत्तेरित्यर्थः तथा सति पचतीत्यत्राप्याख्यातस्य कर्त्तरि शक्त्यापत्तेः अनुभवस्य तुल्यत्
वात् अत एव गामानयेति विहाय गौरस्तीत्येवोक्तमिति चिंतामणिकृतस्तु व्यक्तेरपदार्थत्वे सुवर्थसं
ख्यादीनां तत्रान्वयासंभवः सुब्विभक्तीनां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमात् लिङ्गार्थसंख्यादी
नां कर्त्तर्य्येवान्वयात्सुघनिवेशः जातावेव शक्तिस्वीकारेपि पश्वादिपदे उपाधिविशिष्टव्यक्तौ नेव
पि शक्तिस्वीकारेण तत्रैव तन्नियमावधारणात् न च प्रकृतिपरतात्पर्यविषय एव तदन्वय इति नि
यम इति वाच्यं लक्षणोच्छेदापत्तेः गौरवाच्च न च पचतीत्यत्र यथाऽऽक्षेपलभ्येनैव कर्त्रा संख्या

न.प्र.
१३६
136

न्वयस्तथाऽऽऽतेपलभ्यव्यञ्जन्यापितरन्वयः स्यात्तादृशनियमस्य च तत्रैवात्रापि संकोचादिति वाच्यं न
त्रापि चैत्र इतिपदमध्याहृत्यैवान्वयबोधस्वीकारात् तदिदमुक्तं अयमेव हि न्यायो यत्प्रथमोत
पदोपस्थाप्यत्वं नामेति असंकोचेनैवोपपत्तौ व्युत्पत्तिसंकोचे मानाभावाच्च नह्येकत्र संकोच इत्यन्य
त्रापि सः व्युत्पत्तिमात्रोच्छेदापत्तेरिति यत्तु गोपदस्य गोत्वे शक्तिर्व्यक्तौ लक्षणेति मण्डनमिश्राः तदु
क्तं जातावस्तित्वनास्तित्वे न हि कश्चिद्विवक्षति नित्यत्वाल्लक्ष्यमाणाया व्यक्तेस्ते हि विशेषणे इति
अस्तित्वनास्तित्वे उत्पत्तिविनाशौ गौरुत्पन्नो गौर्नष्ट इत्यादौ गोत्वस्य नित्यत्वेनोत्पादविनाशयोर
संभवाद्व्यक्तौ लक्षणा तात्पर्यज्ञानसत्वे गंगायां घोषमत्स्यौ स्त इत्यत्रेव युगपद्वृत्तिद्वयविरोधे माना
भावादिति तन्न शक्यादन्येन रूपेण ज्ञाते भवति लक्षणा यथा गंगायां घोष इत्यत्र तीरत्वेन ज्ञाने
न तथात्र व्यक्तिर्गोत्वादतिरिक्तेन रूपेण ज्ञाता व्यक्तित्वेन सास्नादिमत्वेन ज्ञाने चैतेनैव शाब्दबोधा
पत्तिः लक्ष्यतावच्छेदकरूपेणैव लक्ष्यस्य भाननियमात् किंच जातिमात्रे शक्तिर्व्यक्तौ लक्षणे
ति तदा स्यात् यदि जातिमात्रे मुख्यप्रयोगः नचैवं किंच गोपदस्य गोरस्तीत्यादौ मुख्यार्थान्वया १३६

नुपपत्त्यभावेन लक्षणायां मानाभावात् व्यक्तिबोधानुपपत्तिश्चेति ध्येयम् तस्मादिति अन्यविर
धात्वेपस्य दुर्वचत्वादित्यर्थः समानेति एकज्ञानविषयत्वमेवेत्यर्थः इदमेवविशदयति याव
तीहीति व्यक्तिप्रत्यक्षं विना जातिप्रत्यक्षस्यासंभवेन तत्रैव तन्नियमावधारणादित्यर्थः ननुप्र
त्यक्षस्थले संयुक्तसमवायादिरूपजातिप्रत्यक्षसामग्रीसत्त्वे संयोगादिरूपं व्यक्तिभासकस्य सत्त्वा पद
दस्तु तथा शाब्दे तु कथमेवमित्याशंकते इदमेवेति समानवित्तिवेद्यत्वमेवेत्यर्थः जातिभानेति
जातिविषयकशाब्दबोधे जातिशक्तिज्ञानस्य हेतुतया तद्बलाज्जातिशाब्दबोधे जायमाने व्यक्तिर
पि भासते तत्पदशक्यविषयकशाब्दबोधे तत्पदनिरूपितजातिशक्तिज्ञानस्य हेतुत्वादित्यर्थः
इदं तु गुरुमते कुक्षशक्तिस्वीकारे बोध्यं तथाहि तन्मते जातौ व्यक्तौ च शक्तिः परं तु जातिविषय
कशक्तिज्ञानमेव जातिविशिष्टव्यक्तिविषयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपसत्युपयु
ज्यते न च जातिविशिष्टव्यक्तिशाब्दबोधे व्यक्तिशक्तिज्ञानमेव कारणं जातिशक्तिस्तु स्वरूपसत्यु
पयुज्यते इत्येव किं न स्यादिति वाच्यं तथा सति देशान्तरस्थगोविशेष्यकशक्तिज्ञानाभावेन त

त.प्र. ह्रोधानापत्तेः एवं च घटादिबोधापत्तिरपि न तत्पदशक्यविषयकशाब्दबोधं प्रति तत्पदनिरूपित
१३७ तजातिशक्तिज्ञानत्वेन कारणत्वादिति कृत्स्नशक्तिवादनिष्कर्षः ननु कृत्स्नशक्तिवादिमते व्यक्तिश
क्तिज्ञानस्याहेतुतया तत्स्वीकारे प्रयोजनाभावः नच तथा सति जातिविषयकशाब्दत्वमेव जातिश
137 क्तिज्ञानकार्यतावच्छेदकं योग्यताबलाद्व्यक्तिरपि भासत इत्येवोपेयं तथा च घटादेरपि भानाप
त्तिः अशक्यत्वाविशेषात् मन्मते च तत्पदशक्यविषयकशाब्दत्वस्यैव कार्यतावच्छेदकत्वेऽनुपप
त्त्यभावादिति वाच्यं जातिप्रकारकव्यक्तिविशेष्यकशाब्दबोधं प्रति जातिविषयकशक्तिज्ञानत्वेन
कारणत्वे सति विरहादित्यलं कृत्स्नशक्तिवादमतेनेत्यत आह यद्वेति तथा च घटापत्तिरिति भावः
कृत्स्नशक्तिवाद स्वैकदेशिमतेनेति तत्स्वीकारे नेष्टासिद्धान्तविरोध इति भावः जातिशक्तिरेवा
स्त्येवकारेण व्यक्तौ कृत्स्नशक्तेः स्वरूपसदुपयोगित्वव्यवच्छेदः अन्यथा तथा जातिशक्त्या अन्य
बोधने तत्पदाशक्यव्यक्तिबोधने अतिप्रसंगः घटादिबोधनातिप्रसंगः तत्पदाशक्यत्वावि
शेषात् मन्मते च व्यक्तेरपि तत्पदशक्यतया तव्यक्तिबोधने कापि क्षतिरिति भावः उत्तरयति गो १३७

137A

त्वशक्तमिति गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वशक्तिज्ञानत्वेनैव हेतुतया घटत्वघ
टादिबोधापत्तिरित्यर्थः ननु गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रत्येव गोत्वशक्तिज्ञानस्य का
रणत्वमुपेयते घटत्वप्रकारकघटविशेष्यकशाब्दबोधं प्रति तु नैतत्र विनिगमकाभावोऽशक्य
त्वाविशेषादित्यत आह अन्यथानुपपत्त्येति गोपदाद्गोत्वविशिष्टस्यैव बोधो न तु घटत्वादिवि
शिष्टस्येति कल्पनानुपपत्त्येत्यर्थः तथैव गोत्वविशिष्टशाब्दबोधं प्रत्येव कल्पनात् गोत्ववि
शिष्टज्ञानस्यैव हेतुत्वकल्पनात् एवकारेण घटादिशाब्दबोधं प्रति तु न तथा हेतुत्वकल्पने फला
भावादिति सूचितम् अथवा पूर्वोक्तकुक्तशक्तिवादिमतेऽस्वरसं प्रकाशयति अन्यथेति अ
न्यथा कुक्तशक्तिं स्वीकृत्य व्यक्तिबोधोपपादने अनुपपत्त्या उपपत्त्यभावेन व्यक्तौ कुक्तशक्ति
स्वीकारप्रयोजनविरहेण तन्मते प्रमाणाभावेनेति यावत् तथैव गोत्वविशिष्टबोधं प्रत्येव कल्पर
नात् गोत्वशक्तिज्ञानस्य हेतुत्वकल्पनादित्यर्थ इति वस्तुतस्तु जातिभासकसामग्र्या एव व्यक्ति
भासकत्वादिति आगमे च जातिशक्तेरेव व्यक्तिबोधकेति संप्रपर्यालोचनया कुक्तशक्तिवादमादा

त॰प्र॰
१३८
138

य यद्वा सर्वांशे घसंशयमते गोत्वपदस्य व्यक्तौ शक्त्यभावेन तथासतीत्यग्रिमदूषणादानस्य यद्वा
पूर्वकल्पेऽसंभवितया चैनेवं व्याख्येयं नच यद्वेति निष्कृष्टमते एवं तथासतीति दूषणादानमिति
वाच्यं संदर्भा[illegible]स्वरसपरिहारात् किंत्वन्यथैव तथाहि जातिभानेति जातिशाब्दत्वमेवर
जातिशक्तिज्ञानकार्यतावच्छेदकं जातिभाने च जायमाने व्यक्त्यविषयकस्य तस्याभावात् व्य
क्तेरपि भासते यद्विषयेन विना न भासते तद्बोधकस्य तद्बोधकत्वनियमात् जातिभासकसामर
ग्र्या एव तद्बोधोपधायकत्वादित्यर्थः ननु जातिविषयतां विनापि व्यक्तिप्रत्ययोदयाज्जातिभास
कसामग्र्यतिरिक्ता व्यक्तिभासकसामग्र्येव एषमुपेया नच शाब्दस्थले तथा नियमः तथापि जा
तिभासकसामग्र्या व्यक्तिबोधोपधायकत्वेन तेन घटादेरपि कुतो न बोधः नच व्यक्तिबोधे समान
वित्तिवेद्यत्वमेव नियामकमिति वाच्यं नहि व्यक्तिबोधे समानवित्तिवेद्यत्वेन कारणता तथा च व्यक्ति
विषयतायाः कारणनियम्यत्वावच्छेदकत्वे व्यक्तिशक्तिज्ञानमेव कारणं स्यादित्यस्वरसादाह यद्वेति
जातिशक्तिरेवेत्येवकारेण व्यक्तिशक्तिव्यवच्छेदः तथा च व्यक्तिविषयताया जातिशक्तिज्ञानर १३८

138A

कार्यतावच्छेदककोटौ निवेशान्न तस्याः कारणनियम्यत्वमिति भावः गोत्वशक्तिज्ञानस्य घटबो
धं प्रत्येव हेतुत्वमास्तामित्यत आह अन्यथेति गोपदाद्घटबोधो न तु घटादेरतो गोशब्दं प्रत्येव
हेतुत्वकल्पनादित्यर्थः यद्वा ननु व्यक्तिशक्तिरेव जातिविशिष्टबोधिकेत्येव किं न स्यात् भवन्मते
तन्मते शक्याव्यक्तेरिव मन्मतेऽपि जातेर्भाने बाधकाभावादित्यत आह अन्यथेति अथवा न
नु तन्मते शक्यबोधे इति प्रसंगाज्जातिविशिष्टव्यक्तेरेव बोधिकेयमास्तामित्यत आह अन्यथेति
व्यक्तिशक्तिज्ञानकारणत्वे देशांतरस्य गोबोधानुपपत्त्या जातिशक्तिज्ञानत्वेनैव हेतुत्वकल्पनादित्य
र्थ इति ध्येयं तथा सतीति जातावेव शक्तिस्वीकारे गोत्वविशिष्टविषयकशाब्दं प्रति गोत्वविषय
कशक्तिज्ञानत्वेन हेतुत्वस्वीकारे इत्यर्थः गोत्वपदस्यापि गोत्वशक्तत्वेन गोपदगोत्वपदयोरविशेषा
त् गोत्वविशिष्टशाब्दबोधापत्तेरित्यर्थः न च गोत्वं गोपदशक्यमिति निर्धर्मितावच्छेदककं गोपद
शक्तिज्ञानं गोत्वविशिष्टशाब्दबोधहेतुः गोत्वत्वधर्मितावच्छेदककगोत्वपदशक्तिज्ञानं गोत्वत्व
रूपेण गोत्वशाब्दबोधहेतुरिति नातिप्रसंग इति वाच्यं गोत्वं न गोपदशक्यमिति बाधकालेऽपि निर्धर्
मितावच्छेदककशक्तिज्ञानसंभवेन गोत्वविशिष्टशाब्दबोधापत्तिरिति गोत्वत्वधर्मितावच्छेदक

कशक्तिज्ञानहेतुतायाआवश्यकत्वात् एवं च गोत्वत्वस्य शक्यतावच्छेदकत्वावश्यकतया तदपे
क्ष्य गोत्वजातेरेव तथात्वमुचितमित्यपि लाघवमवसेयम् अथ गोत्वे निरवच्छिन्नैव शक्तिः गोपदं गो
रित्याकारकं शक्तिसंबंधेन स्वरूपतो गोत्वप्रकारकगोपदावच्छिन्नविशेष्यकशक्तिज्ञानं हेतुः गोत्व
विशिष्टशाब्दबोधहेतुरिति न बाधकाले शाब्दबोधापत्तिः गोत्वपदं गोत्ववदिति गोत्वत्वेन गोत्वप्रका
रकशक्तिज्ञानं च गोत्वशाब्दबोधे हेतुरिति न गोत्वमस्तीत्यतो गोत्वविशिष्टबोधापत्तिरिति चेत् न
तथापि गोपदात्कदाचित्समवायेन गोत्वविशिष्टबोधः कदाचिच्च कालादिसम्बंधेन तद्विशिष्टबो
धापत्तिनियमानुपपत्तिः गोत्वविषयकशक्तिज्ञानस्याविशिष्टत्वात् अस्मन्मते तु समवायेन
गोत्वविशिष्टबोधं प्रति समवायेन गोत्वविशिष्टशक्तिज्ञानस्य हेतुत्वे नानुपपत्त्यभावात् न च ता
त्पर्यज्ञाननियमान्नायं नियमः तथा सति ज्ञातावपि शक्तिस्वीकारे प्रयोजनविरहात् एवं गो
त्वे गोपदं शक्तमित्याकारकस्यैव शक्तिज्ञानस्य तैर्हेतुत्वोपगमेन न तत्सिद्धान्तभंगश्चेति एवमुपा
धिप्रवृत्तिनिमित्तस्थलेऽपि तैरप्युपाधिविशिष्टे शक्तिस्वीकारात् यथा पशुपदस्य लोमवल्लांगूल
विशिष्टे शक्तिः तथा सति विशिष्टेप्यनुभवस्य तुल्यत्वात् न च जातेर्व्यक्तिवित्तिवेद्यत्वनियम

139A

मायक्तेर्भानम् उपाधौ तु तादृशनियमाभावाद्व्यक्तिबोधार्थमुपाधिविशिष्टे शक्तिरितिवा
च्यं नहि विषयमर्यादया व्यक्तेर्भानं कारणनियम्यत्वात्कार्यस्य तथा च जातिविशिष्टबोधे जा
तिशक्तिज्ञानस्य कारणत्ववदुपाधिविशिष्टबोधे उपाधिशक्तिज्ञानस्यापि कारणत्वस्यावश्यक
त्वादिति दिक् कुत्र शक्तिवादिनस्तु जातौ व्यक्तौ च शक्तिः परन्तु जातिविषयकत्वेनैव ज्ञानाशक्ति
व्यक्तिविषयकशाब्दबोधे कारणं व्यक्तिशक्तिस्तु स्वरूपसत्युपयुज्यते नचैवं व्यक्तिशक्तिस्वी
कारवैयर्थ्यमिति वाच्यं तस्यदाशक्यस्यापि भाने घटादेरपि भानप्रसंगेन व्यक्तिशक्तिस्वीका
रस्यावश्यकत्वात् तथा च गोत्वप्रकारकगोविशेष्यकशाब्दबोधं प्रति गोत्वविषयकगोपदशक्ति
मती गौरित्याकारकं शक्तिज्ञानं हेतुः ननु गोत्वविशिष्टविषयकगोपदशक्तिमती गौरित्याकार
कं गोत्वमस्तीत्यादौ तु तादृशगोत्वप्रकारकशक्तिज्ञानाभावान्न गोत्वविशिष्टबोधापत्तिरि
त्याद्रू स्तरसत् गोत्वविषयकगोपदशक्तिमती गौरित्याकारकस्य गोत्वविषयकत्वेन शक्ति
ज्ञानस्य हेतुत्वे गोत्वविषयकत्वस्य कारणतावच्छेदककोटौ निवेशगौरवात् अथ मास्तु गोत्व
विषयकत्वनिवेशस्तथापि गोपदशक्तिमती गौरिति गोत्वप्रकारकशक्तिज्ञानत्वेनैव गोत्ववि

त॰प्र॰ शिष्टशाब्दबोधं प्रति हेतुता नचैवमविवादइतिवाच्यं व्यक्तिविषयताया: कारणतावच्छेदक
१४० कोटौ निवेशात्तस्यैव तन्मते निष्कर्षात् देशान्तरस्थगोविशेष्यकबोधानुपपत्त्या समानविशेष्य
140 कत्वेन कार्यकारणभावासंभवेन लाघवेन च समानप्रकारकत्वेनैव कार्य्यकारणभावोपगम
मादिति चेन्न व्यक्तिविषयताया: कारणतावच्छेदककोटावनिवेशे व्यक्तौ शक्तिस्वीकारवैय
र्थ्यात् नचैतदस्वीकारे गोत्वप्रकारकशक्तिज्ञानत्वेन हेतुत्वासंभव: व्यक्तौ शक्त्यभावेन शक्ति
ज्ञानस्य भ्रमत्वापत्तेरिति वाच्यं शक्तिर्हि न स्वरूपसती शाब्दहेतुरपभ्रंशादपि शाब्दोदयात् किं
तु ज्ञाता तथा च यद्देशे शक्तिज्ञानं हेतुस्तदेव शक्यमिति जातिवद्व्यक्तिवैशिष्ट्यं च शक्यमेव अन्य
था व्यक्तावेव शक्ति: शक्तिज्ञाने च जातेरपि प्रकारत्वात् समानप्रकारकत्वेनैव कार्य्यकारणभाव
इति जातावपि शक्तिरुच्छिद्येत नच यद्विषयकत्वेन शक्तिज्ञाने हेतुत्वं तद्धर्म्यंशे शक्यमिति नियमा
ज्जातावपि शक्तिरिति वाच्यं तर्हि यद्विषयकत्वेन शक्तिज्ञानस्य हेतुता तदेव शक्यमिति नियमेन
व्यक्तिविषयकत्वेन शक्तिज्ञानस्य हेतुत्व एव व्यक्तिशक्तिस्वीकारौचित्यादिति दिक् नैयायिक
मतं दर्शयति तस्मादिति गोत्वविशिष्ट इति जातौ व्यक्तौ वैशिष्ट्ये च शक्तिरित्यर्थ: तृतीया १४०

140A

ननु जातिविशिष्टशक्तिस्वीकारेण शाब्दव्यक्तिभानोपपन्नावपि वाक्यार्थरूपान्वयस्यापि शा
ब्दविषयतया न चापि शक्तिरास्तां नचेष्टापत्तिः जात्याकृतिव्यक्तयः पदार्थ इत्यक्षपादीयसू
त्रविरोधादिति संप्रदायमतेन शंकते स्यादेतदिति नन्वभेदोपि शक्यताऽऽवित्यत आह तस्येति
जातिविशिष्ट एव शक्तिस्वीकारादिति भावः ननु योग्यतादिबलात्सोपि भासत इत्याह नचेति
ति अतिप्रसंगात् घटादेरपि बोधप्रसंगात् गोशक्तमिति इतरपदसमभिव्याहृतं गोपदमि
त्यर्थः गवान्वयमिति नच गौः शुक्ल इत्यत्राभेदः गामानयेत्यत्र चान्यविधः संसर्गो भास
त इत्यत्र किं नियामकमिति वाच्यं अभेदान्वयबोधे समानविभक्तिकतत्पदसमभिव्याहाररू
पानुपूर्वीज्ञानस्यान्यत्र च तत्तदानुपूर्वीज्ञानस्य हेतुत्वादिति भावः पदानां ज्ञातावभिधारूपा
शक्तिराक्षेपेण च व्यक्तेर्लाभोऽन्वयस्य चाक्षेपेण लाभासंभवादशक्यबोधने चातिप्रसंगादन्व
येपि शक्तिः इत्येवं जातावन्वितेवाभिधारूपा शक्तिरिति भट्टमतं दर्शयति भट्टास्त्विति अ
न्वयविशिष्टशक्तिग्रहात् अभिधारूपशक्तिग्रहात् अन्वयेपीति वाक्यार्थरूपे शक्ति

त०प्र० रेव अभिधारूपशक्तिरेव अन्वयस्येति गोः शुक्ल इत्यत्र वाक्यार्थरूपान्वयस्येत्यर्थः अन्य
१४२ लभ्यत्वात् अन्वयविषयकशाब्दबोधे तत्तदानुपूर्वीज्ञानत्वेन हेतुतया तद्बलादेवान्वयभानोप
पत्तिरित्यर्थः अन्वयविशेषभानार्थं तत्तदानुपूर्वीज्ञानहेतुताया आवश्यकत्वादिति भा
141 वः नन्वन्यलभ्यत्वेपि तत्र शक्तौ बाधकाभाव इत्यत आह अनन्येति शाब्दार्थत्वात् शक्यता
दित्यर्थः ननु शक्यस्यैव शाब्दविषयत्वमिति नियमादन्यलभ्यत्वेपि तत्र शक्तिरावश्यकीत्यत आ
ह अन्यथेति अन्यथा शक्यस्यैव शाब्दविषयत्वमिति नियमात्तत्र शक्तिकल्पने लक्षणेति ल
क्षणयातीरबोधोपपत्तिरित्यन्यलभ्यत्वात्तत्र न शक्तिः शक्यस्यैव शाब्दविषयत्वमिति नियमे तु ती
रेपि गंगापदशक्तिप्रसंगेन लक्षणोच्छेदापत्तेरित्यर्थः इदमुपलक्षणं अन्विते शक्तिस्वीकारे ऽ
न्विते न पदार्थोपस्थितिरन्वयप्रकारकशाब्दबोधस्य स्यान्नत्वेन तदनुभवसिद्धं नन्वन्विते शक्तिः
स्वरूपसत्युपयुज्यते न तु ज्ञाता ज्ञातो न्तु ज्ञाने वोपयुज्यते इति तन्मतनिष्कर्ष इति चेन्न यद्विषय
कत्वेनैव ज्ञाना शक्तिरनुभवहेतुस्तत्रैव शक्तिरित्यन्विते शक्तिस्वीकारवैयर्थ्याच्छक्यस्यैव शाब्दवि १४२

141A

षयत्वमिति नियमस्य चलस्ये व्यभिचारादिति रहस्यमनुसंधेयं केचित्तु भट्टमते ज्ञाताव्वेवाभि
धारूपा शक्तिः अन्वितविषयकशाब्दत्वावच्छिन्नंप्रति घटपदशक्तिज्ञानत्वेन कारणत्वेनेति घट
पदादावन्विते अनुभाविकी शक्तिः नैयायिकमते आनुपूर्वीज्ञानस्येवान्वितशाब्दत्वं कार्य्य
तावच्छेदकं भट्टमते च घटपदशक्तिज्ञानस्येति मतभेदः अन्वयविशिष्टे शक्तिग्रहात् बालेन
घटपदे आनुभाविकशक्तिग्रहात् शक्तिरेव आनुभाविकशक्तिरेव अन्वितविषयकशाब्दत्वं
घटपदशक्तिज्ञानकार्य्यतावच्छेदकमित्यर्थः अन्यलभ्यत्वात् अन्वितशाब्दत्वस्यानुपूर्वीज्ञा
नकार्य्यतावच्छेदकतयातत्कोटिप्रविष्टत्वादित्यर्थः अनन्यलभ्यस्य च आनुपूर्वीरूपप्रका
रांतरालभ्यस्य च शब्दार्थत्वात् घटपदशक्तिज्ञानकार्य्यतावच्छेदककोटिप्रविष्टत्वादित्यर्थः त
थाचान्वयविशेषशाब्दत्वस्यानुपूर्वीज्ञानकार्य्यतावच्छेदकतावच्छेदकत्वेऽन्वयविषयकशाब्दत्व
स्य घटपदशक्तिज्ञानकार्य्यतावच्छेदकत्वे मानाभाव इति भावः ननु शक्तिज्ञानकार्य्यतावच्छेद
ककोटिप्रविष्टस्यैव शाब्दविषयत्वमिति नियमात्तत्यत आह अन्वयेति ताद्दशनियमस

त॰प्र॰
१४१

142

भ्युपेत्य तथाकल्पने लक्षणेति तात्पर्यानियमाभ्युपगमे तीरविषयतायाः प्रयोगापरशक्तिज्ञा
नकार्य्यतावच्छेदककोटिनिवेशनतएव तीरभानोपपत्तेस्तत्र लक्षणास्वीकारो व्यर्थः वृत्तिर्हिन
स्वरूपसत्युपयुज्यते किंतु ज्ञातैवेति व्याचख्युः तत्र संदर्भविरोधाद्युपेक्षणीयं प्राभाकरास्त्विति
कार्य्यान्विते कृतिसाध्यानयनाद्यन्वितइत्यर्थः तत्प्रयोजकतया प्रवृत्तिप्रयोजकतया कार्य्य
ताविशिष्टज्ञानमिति कार्यता कृतिसाध्यता तद्विशिष्टविषयकं ज्ञानमित्यर्थः अनुमिनोति
प्रयोज्यस्येति शेषः अयं घटानयनगोचरकार्य्यताविशिष्टज्ञानवान् घटानयनगोचरप्रवृत्ति
मत्वात् स्तन्यपानगोचरप्रवृत्तिविशिष्टमद्वदित्यनुमानाकारो बोध्यः अप्रयोजकत्वमाशंक्याह
स्वप्रवृत्ताविति स्वप्रवृत्तौ स्वीयस्तन्यपानगोचरप्रवृत्तौ तेन बालेन कार्य्यत्वविशिष्टज्ञानस्य
कृतिसाध्यत्वविशिष्टज्ञानस्येत्यर्थः हेतुत्वावधारणादिति तथा च कार्य्यकारणभावग्रहानु
कूलतर्क इति भावः तद्धेतुत्वाकांक्षायां कार्य्यताविशिष्टज्ञानकारणजिज्ञासायां शब्दमेव
घटानयनादिशब्दसामान्यमेव तथा कार्यत्वविशिष्टज्ञानहेतुत्वेन तन्निर्वाहिकां शब्दे १४१

पस्याप्यकरणत्वैकत्वयोरिवजातौव्यक्तौ च विशकलितत्वयाशक्तौ गोत्वं व्यक्तिश्चेति बोधप्रसं-
गाच्च तु गौरिति तथा च वैशिष्ट्ये विशक्तिः एवमवयवसंयोगरूपाकृतौ तद्वैशिष्ट्ये च गोपदश-
क्तिः गोपदाज्जात्याकृतिविशिष्टस्यैव प्रतीतेः तदुक्तं जात्याकृतिव्यक्तयः पदार्थ इत्येकशश-
क्तिसूचनाय पदार्थ इत्येकवचनं ननु तत्प्रकारकतद्विशेष्यकशाब्दबोधं प्रति तत्प्रकारकतद्विशे
ष्यकशक्तिज्ञानत्वेन हेतुत्वमित्यायाते न च श्यामा शीघ्रा यां गवि शक्तिग्रहात्तद्बोधानापत्तिरूपबा
धकमस्त्विमित्याशंकते न चेति उक्तदोषः शक्तिग्रहाविषयीभूतव्यक्तिबोधानापत्तिरूपदो
षः समाधत्ते गोत्वेति तथा च सर्वत्रापि शक्तिग्रहा च शक्तिग्रहाविषयव्यक्तेरलीकतया न त-
द्बोधानुपपत्तिरिति भावः सामान्यलक्षणानंगीकारे त्वाह गोत्वेति एकत्रैव लौकिकसा-
क्षात्कारविषयत्वावच्छिन्नगवीति शक्तिग्रहाविषयगवीत्यर्थः ननु योग्यतावशाच्छक्तिग्र
हविषयव्यक्तेरपि भानेबाधकाभावइत्यत आह तेति प्रसंगः गोपदाद्घटादेरपि बोधाप
त्तिः शक्तिग्रहाविषयत्वस्याविशेषादितिभावः प्रत्यायकइति गोत्वप्रकारकगोविशेष्यक

त॰प्र॰ शाब्दत्वावच्छिन्नं प्रतिगोत्वप्रकारकगोविशेष्यकशक्तिज्ञानत्वेन हेतुतयानघटादिबोधाप
१४१ त्तिः एवं तत्र शक्तित्वेन गोर्निवेशः हेतुगोत्वेनैवेति द्रष्टव्यं नन्वेकस्य प्रवाहसंबंधस्यातीर
त्वतीरयोरभावाच्छेदकसंबंधरूपाया लक्षणाया एकस्यान्त्यतावच्छेदकत्वयोरसंभवि
1.43 तयान्त्यतावच्छेदकविशिष्टे लक्षणाया अनंगीकारेण गंगायां घोष इत्यादौ स्वरूपत्यानुपप
स्थितस्यापि तीरत्वस्य शाब्दबोधे भानवच्छक्यतावच्छेदकेऽशक्यभावे पि तादृशकार्यकार
णभावबलादेव गोत्वभाननिर्वाहः स्वेतत्र शक्तिकल्पनेनेति संप्रदायमतेः स्वरसं प्रकाशयन्न
व्यमतमाह गव्येवेति गौरवात् केवलव्यक्तौ शक्तिस्वीकारेणापयत्नो जातिविशिष्टव्यक्तौ श
क्तिकल्पने गौरवादित्यर्थः नचैवमिति एवं गोत्वशक्यत्वस्वीकारे घटादेरपि बोधापत्त्याऽशर
क्यस्य शाब्दाविषयतया गोत्वबोधानापत्तिरित्यर्थः गोत्वेति गोत्वविशिष्टशाब्दबोधं प्रति
गोत्वधर्मितावच्छेदककशक्तिग्रहस्य हेतुत्वेनातिप्रसंगादित्यर्थः गोत्वएव शक्तिस्वीका
रे च गोत्वत्वधर्मितावच्छेदककशक्तिग्रहस्य हेतुतया गौरवाद्व्यक्तावेव शक्तिरिति ध्येयम् । १४२

143A

कार्यत्वविशिष्टविषयकज्ञानोपधायकत्वनिर्वाहिकां कार्य्यान्वितइति यद्यपिघटानयन
गोचरप्रवृत्तौघटानयनगोचरकार्यताविशिष्टज्ञानत्वेनहेतुत्वंनतुकार्यान्वितज्ञानत्वेनेति २
कार्यान्वितेशक्तौवीजाभावः तथापिनकेवलंकार्यमितिज्ञानात्प्रवृत्तिः किंतुघटानयनकार्य्य
मितिज्ञानात् तच्चकार्य्यताविशिष्टज्ञानंकार्यान्वितज्ञानमेवेतितत्रशक्तिः एवमनाकलितप
दविभागस्यघटमानयेतिवाक्यस्यकार्यताविशिष्टज्ञानजनकत्वंकार्यान्वितशक्तैवनिर्वहति
अन्यथैकपदस्यैवकार्यत्वविशिष्टेशक्तावितरपदस्यवैयर्थ्यात् कार्यान्वितेशक्तौसर्वेषामपि २
कार्यताविशिष्टज्ञानजनकत्वंसंभवति कार्यताविशिष्टज्ञानस्यजनकत्वेचकार्यान्वितज्ञान
स्यापिप्रवृत्तिप्रयोजकत्वानपायात्कार्यान्वितएवशक्तिः नचकार्यतावाचकलिङादीनांकार्या
न्वितशक्तत्वासंभवइतिवाच्यं सर्वपदानांकार्यान्वयशाब्दगोचरज्ञानजनकत्वात् नच्चकार्या
न्वितस्वार्थप्रतिपादकतयाइतरान्वितस्वार्थप्रतिपादकतयावेति तथाचकार्यान्वयशालित्वं
कार्यतद्भिन्नेचावशिष्टमितिसर्वत्रकार्यान्वितएवशक्तिरित्याहएडलाघेः आवापोद्वापाभ्यां

त०प्र० संगमहत्यागाभ्यां प्रथमेति शाब्दसामान्यकार्यान्वितज्ञानजननिर्वाहकशक्तिकल्पनानुरोधादि
१४४ त्यर्थः ननु लाघवात्तथास्त्वित्यत आह आद्येति शाब्दसामान्यकार्यान्वितशक्तिकल्पनाया विरोधा
पत्तेरित्यर्थः शाब्दसामान्यस्य कार्यान्वित एव शक्तेरवधृते विधेरेव प्रामाण्यं न त्वर्थवादस्येति दर्श
144 यति इष्टं चेति शाब्दसामान्यस्य कार्यान्वितशक्तत्वे चेत्यर्थः यत्र भूतले घटोस्तीत्यादौ कार्य्यता
वाचकेति कार्यतावाचकं पदं लिङ्लोट्तव्यः पंचमलकारः कृत्याश्चेति विविधप्रत्ययास्तैः समभि
व्याहारो नास्तीत्यर्थः विध्यसमभिव्याहृते वैदिकवाक्यमर्थवादः मूकमेव शाब्दबोधानुपधाय
कमेव ननु तर्हि प्रवर्तकज्ञानाभावात्स्वरस्यानुपपत्तिरित्यत आह व्यवहारस्त्विति प्रवृत्तिस्त्वित्यर्थः
असंसर्गेति असंसर्गग्रहाभावात् बाधाभाववलादिति यावत् तन्मते सर्वत्र प्रवृत्तिं प्रति विशिष्टज्ञा
नस्य हेतुत्वानभ्युपगमात् इति भावः ननु शब्दसामान्यस्यैव शाब्दबोधहेतुतया विधेरिव शब्दसामान्यस्यै
व कार्य्यतावाचकपदत्वात्कथं सिद्धार्थकार्थवादानामप्रामाण्यमित्याशंकते नन्विति कार्यान्वितेति का
र्य्यताविशिष्टान्वितेत्यर्थः कार्यतान्वितवाचकत्वादिति यावत् तद्वाचकेति कार्य्यतावाचकपदेत्यर्थः वि १४४

145A

पसत्प्रतिबंधकं किंतु ज्ञानं यदि शाक्यं स्यात्तर्हि अन्यलभ्यत्वं न स्यादिति तर्कस्यतेनोत्थापनात् तथा
च यत्र तल्लोपस्थापितं तत्र कार्यान्विते शक्तिग्रहे बाधकाभाव इत्याशंकते प्रथममिति प्रथमं लि
ङादिपदस्य कार्ये शक्तिग्रहात् सर्वं कार्यान्विते शक्तिग्रहोस्तु घटपदज्ञानस्य कार्यान्वितविषयक
शाब्दत्वं कार्यतावच्छेदकमस्त्वित्यर्थः सो कार्यान्विते ~~शक्तिकल्पना बाध्यतो अप्रामाण्य~~ नन्
अन्यलभ्यत्वं घटमात्र इति घटविषयकशाब्दत्वं कार्यतावच्छेदकमस्त्वित्यर्थः सा कार्यान्वि
ते शक्तिकल्पना बाध्यतो अप्रामाण्यग्रहविषयीक्रियते गौरवात् घटमात्रशक्तिकल्पना
पेक्षया गौरवात् ननु सामान्यतः प्रथमप्रवृत्तकल्पनाया बलवत्त्वेन कथं तद्बाध इत्यत आह अथैव
मिति ननु प्रथमप्रवृत्तत्वस्य बलवत्त्वप्रयोजकत्वया कथं न बलवत्त्वमत आह नहीति प्राशस्त्यादि
ति शतयोजनश्च्वं इति परिमाणबोधका ज्योतिःशास्त्रादित्यर्थः तथा च चक्षुरादिना ज्ञानस्वल्प ।
तायाम प्रामाण्यम प्रामाण्यज्ञानवदत्रापि घटपदादेः कार्यान्वित घटादौ शक्तिज्ञानेऽप्रामाण्यक ।
ल्प्यत इति भावः ननु चंद्रादौ शास्त्रजन्यमहत्परिमाणज्ञानेन बाधात्तत्र स्वल्पपरिमाणज्ञानेऽप्रामा

त॰प्र॰ १४६ ण्यं कल्प्यते कृते च प्रथमं कार्यान्वितघटादिशक्तिकल्पने बाधकाभावान्न तद्बाधः अस
तिबाधके प्रथमप्रवृत्तत्वस्यैव बलवत्त्वे तेन तत्त्वादित्यत आह चरमकल्पनाया इति लाघवेति कार्या
146 न्वितघटादौ शक्तेरबाधेपि कार्यान्वितत्वविशिष्टघटत्वस्य घटत्वापेक्षया गुरुतया शक्यतावच्छे
दकत्वासंभवेन कार्यान्वितघटत्वावच्छेदेन शक्त्यभावेन तेन रूपेण तत्र शक्तिकल्पने बाधः स्या
देव तद्धर्मावच्छिन्नाभाववति तद्धर्मावच्छिन्नप्रकारकज्ञानत्वमेव हि भ्रमत्वमिति भावः ननु
कंबुग्रीवादिमत्त्वं घटत्वापेक्षया गुर्विति गौरवज्ञानसत्त्वेपि कंबुग्रीवादिमान्नास्तीति प्रतीत्यु
दयात् यथा गुरुधर्मस्य प्रतियोगितावच्छेदकत्वमुपेयते तथा गौरवेपि प्रथमप्रवृत्तत्वात्कार्या
न्वितघटादौ शक्तिः स्यादेवेत्यतस्तु यतदुक्तं न इति न्यायेनाह किंचेदमिति एवं कार्यान्वितघ
टादौ शक्तिकल्पने शक्तिज्ञानेन च शाब्दसामान्ये जननीये कार्यतावाचकपदजन्योपस्थितेः
सहकारित्वे चेत्यर्थः अनुभवसिद्ध इत्यनेन दूरपह्नवत्वं सूचितं न स्यादिति लिङादिपदस्य
प्रकारणाभावादिति भावः नचेति पदार्थोपस्थितिबाधाभावमात्रादेव व्यवहारादिति भावः १४६

146A

घेटविषयपदसामान्यस्यैवकार्य्यतावाचकपदत्वादितिभावः असङ्गतंचेति सर्वस्यापिकार्य्यतावाचकप
दत्वात्कार्य्यतावाचकपदासमभिव्याहारप्रयुक्तमप्रामाण्यंकथमर्थवादस्येत्यर्थः अत्रयद्यपिवेदानांका
र्य्यान्वितेऽभिधारूपैवशक्तिः घटादिपदात्कार्य्यान्वितघटत्वादिनैवपदार्थोपस्थितिः घटादिपदेनकार्य्यान्वि
तविषयकशाब्दबोधेजननीयेइतराविशेषणतयाकार्य्यत्वोपस्थापकलिङादिपदस्यसहकारित्वात्तेन
सिद्धार्थकार्यवादस्यप्रामाण्यमितिकार्य्यान्वितेऽभिधारूपशक्तिमादायाप्रामाण्यमुपपादयितुंशक्य
ते नचापिकार्य्यत्वोपस्थित्यर्थं हि घटादिपदानांकार्य्यान्वितेशक्तिः साचावश्यमपेक्षणीयलिङादिपदा
देवज्ञातेतिव्यर्थं घटादिपदानांकार्य्यान्वितेऽभिधारूपशक्तिकल्पनेन एवंकार्य्यान्वितत्वेनशाब्दबोधे
ऽनुभवबाधश्चेत्यतोऽभिधारूपशक्तिमुपेक्ष्यानुभाविकशक्तिमादायसमाधत्ते अत्रोच्यतइति आनु
भाविकाइति शाब्दानुभवजनका स्मारिका पदार्थस्मृतिजनका तत्रेति कार्य्यत्वान्वितविषयकशा
ब्दत्वावच्छिन्नंप्रतिघटपदज्ञानत्वेनकारणतेत्यर्थः स्मारकाचेति जातिशक्तिज्ञानबलात्केवलंघ
टत्वजातिस्मृतिः शक्तिज्ञानस्योद्बोधकविधयापदार्थस्मृतिहेतुत्वादितिभावः ननुकार्य्यान्वित

न॰प्र॰ १४७ बोधे घटादिपदज्ञानस्य हेतुतया तत्सत्वेकर्यं नानुभवजनकत्वमतस्माह कार्य्यतान्वयबोध इति
घटादिपदेन कार्य्यान्वितविषयकशाब्दबोधे जननीये कार्य्यतावाचकलिङ्गादिपदजन्योपस्थितेः
सहकारित्वादित्यर्थः नार्थवादस्येति विशेषसामग्रीसहकृताया एव सामान्यसामग्र्याः फलोप
147 धानेतंत्र तयाकार्य्यत्वोपस्थापकलिङ्गादिपदाभावेन तज्जन्यकार्य्यत्वोपस्थितेः सहकारिण्या अभा
वात् शाब्दानुभवजनकत्वरूपं प्रामाण्यं नार्थवादानामित्यर्थः लाघवात् कार्यान्वितघटविषय
कशाब्दत्वापेक्षया लाघवात् घटादिमात्रेति घटविषयकशाब्दत्वावच्छिन्नंप्रत्येव घटपदज्ञानत्वे
न कारणत्वमतह इत्यर्थः नन्विति ननु घटपदादेः कार्यान्वितघटविषयकशाब्दत्वे कार्यतावच्छेदक
मित्यर्थः अन्यलभ्यत्वादिति कार्य्यतावाचकपदजन्यबोधविषयत्वादित्यर्थः घटविषयकशाब्द
त्वावच्छिन्नं प्रति घटपदज्ञानत्वेन कार्यत्वविषयकशाब्दत्वावच्छिन्नं प्रति च लिङ्गादिपदज्ञानत्वेन हे
तुता यत्र च लिङ्गादिपदसमभिव्याहारस्तत्र तादृशसमभिव्याहाराद्वेव कार्यान्वयबोधः यत्र तु न तत्स
मभिव्याहारस्तत्र केवलं घटादेर्बोध इत्यर्थवादस्यापि प्रामाण्यमिति भावः नन्वन्यलभ्यत्वं न स्वरू १४७

147A

बोधस्तद्रूढं यथा गोपदं यत्रावयवार्थ एव बुध्यते तद्यौगिकं यथा पाचकादिपदं यत्र यौगिक॰
रूढ्यर्थयोः स्वातंत्र्येण बोधस्तद्यौगिकरूढं यथोद्भिदादिपदं यौगिकं खनित्रे रूढं यागविशेषे यो
गरूढं पंकजादिपदं तत्र पंकजसमुदायः पद्मत्वविशिष्टे रूढो न वेति योगरूढौ विप्रतिपत्तिः पं
कजपदात्पद्मत्वविशिष्टप्रतीतये पद्मत्वविशिष्टे पंकजसमुदायस्य शक्तिरावश्यकी पदान्निय
तोपस्थितेर्वृत्तिसाध्यत्वात् पंकजपदाद्योगेन कुमुदस्यापि बोधप्रसंगाच्च मन्मते कदाचित्कुमुद
बोधस्तु लक्षणयैव ननु रूढिस्वीकारेप्युद्भित्पदेन खनित्रमिव पंकजपदात्कुमुदमपि बोध्येत यो
गसत्वात् अत्र प्राञ्चः यत्र योगरूढिभ्यामेकार्थबोधस्तत्र केवलयौगिकार्थबोधे रूढेः प्रतिबंधक
त्वान्न कुमुदबोध इति तन्न मणिकृतः रूढ्यानियमतः स्मृतं पद्ममेव कर्तृरूपव्यक्तिवाचकडप्र
त्ययेन पंकजनिकर्तृतयानुविभाव्यते बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वनिय
मात् व्यक्तिवचनो किंचिद्व्यक्तितात्पर्यकाणां सन्निहितः प्रथममुपस्थितद्रव्यार्थः यथा च प॰
द्मतात्पर्यसत्वेन तत्रैव पंकजनिकर्तृतया तदेव योगेनापि प्रतीयते न कुमुदमिति रूढेर्न प्रति

बंधकत्वं ग्राह्याभावानवगाहित्वाज्ज्ञानकत्वानाविरोधित्वाच्च सिद्धेरनुमितिप्रतिबंधकत्वस्याना
यत्या स्वीकारेपि अन्यत्र ज्ञानस्य मणिमंत्रादिन्यायेन प्रतिबंधकत्वेमानाभावात् इत्थं च पक्षानु
भवसामग्रीसत्वात्पद्मस्यैव बोधो न कुमुदस्य सामग्र्यां सत्यां हि फलाभावेन प्रतिबंधकत्वकल्पना
दिति वदंति अत्रेदं चिंत्यते पंकजं कुमुदमानयेत्यादौ यत्र पंकजपदस्य पक्षतात्पर्यग्रहः कुमुदे
च तात्पर्यग्रहस्तत्र लक्षणां विनापि कुमुदबोधापत्तेः पक्षानुभवसामग्रीविरहात् पक्षतात्पर्या
भावनिश्चयस्यैव तत्र बाधकत्वेन बाधकं विना व्यक्तिवचनानां सन्निहितविशेषपरत्वमिति न्या
यस्य तत्रानवकाशात् घटेन जलमाहरेत्यत्र सच्छिद्रघटस्य प्रथमोपस्थितत्वादन्वयबाधस्य बाध
कं विनेत्यस्यावश्यकत्वात् तथा च गृहीतपक्षप्रयोगस्य पक्षान्वयानुपपत्तिपुरस्कारेणैव कुमुदधी
रिति न स्यात् कुमुदं पंकजमित्यत्र कुमुदस्यैव प्रथमं सन्निहितत्वसंभवाच्च कुमुदस्य भिन्नपदो
पस्थाप्यत्वेपि प्रथमोपस्थितिमात्रस्यैवापेक्षणीयत्वात् अवयवापेक्षया समुदायस्य भिन्नत्वेन पद्म
स्यापि भिन्नपदोपस्थाप्यत्वाच्च अथ कुमुदबोधस्तत्र शक्त्यैवास्तां पंकजपदस्य कुमुदे लक्षणेति

148A

न्यथेति शापत्तेः असंसर्गाग्रहापत्तेः काव्यादावनुभवसिद्धस्यापि संसर्गानुभवस्यापलापे लि
ङ्समभिव्याहारेपि चापलाप एव स्यादिति भावः नन्विष्टापत्तिरत आह तथाचेति ननु प्रथमं
कार्यान्वित एव शक्त्यवधारणात्तत्सहकारि कार्यतावाचकपदरूपकारणाभावाद्विध्यसमभि
व्याहारस्थले ऽसंसर्गाग्रह एवोपेयते कारणाभावे कार्याभावस्यावश्यकत्वात् विधिसमभिव्या
हारस्थले तु बाधकाभावेन शाब्दानुभव एवोपेयते अत एव शाब्दप्रामाण्यमपीत्यत आह किं चै
वमिति एवं कार्यतावाचकपदसमभिव्याहारस्थल एव शाब्दानुभवस्वीकारे स्यादिति ताद्दृ
शपदसमभिव्याहारादिति भावः ननु केषांचिदप्रामाण्येपि लिङ्समभिव्याहृतपदमात्रस्यैव
शाब्दप्रामाण्यं स्यादेवेति तेषामप्रामाण्ये इष्टापत्तिरित्यत आह तथाचेति पुराणादीनामप्रमाण
त्वांगीकारे चेत्यर्थः मिश्रैः वाचस्पतिमिश्रैः बुद्धं वंधुरिति बुद्धेनैकस्यापि शाब्दस्य प्रामाण्य
मुपेयते प्राभाकरैस्तु कस्यचिच्छब्दस्याप्रमाणत्वांगीकारान्न तदंतर्भूतत्वमित्यत उक्तं वंधुरिति
यथा तैरनुभवसिद्धोनुभवोप्यपलप्यते इति वेदस्याप्रामाण्यमुपेयते तथा पुराणादेरप्रामाण्यं

न॰प्र॰
१४७
149

तवैवेतिसामर्थ्यबोध्यं एवंवदन् अनुभवसिद्धेप्यसंसर्गाग्रहमात्रं वदन् वर्णव्युत्पत्यासः रक
इत्यत्र करइतिलिपिसादृश्यं तकारभकारयोर्गौडलिप्यासादृश्येन ताभा अनयोःसादृश्यं
बोध्यं युक्तमुत्पश्यामइति अनुभवानुरोधेनैवसर्वकल्पना तथाचलिङ्गादिसमभिव्याहृत
स्थलेप्यनुभवस्यापलापानर्हत्वेनलाघवेनघटत्वविशिष्टएवशक्तिस्वीकरणमुचितमितिभा
वः वस्तुतस्तु अतिप्रसक्तधर्ममादायान्वयव्यतिरेकग्रहासंभवात् प्रत्यक्षस्थलेकार्यत्वकारण
तावच्छेदकधर्मग्रहमंतराकारणत्वग्रहासंभवेपिशाब्दे तिप्रसक्तधर्मसामानाधिकरण्येनापि
तद्ग्रहः यथास्वर्गकामोयजेतेत्यादौगंगास्नानादितोस्वर्गोदयात् स्वर्गत्वावच्छेदेनयागजन्य
त्वासंभवेनवैजात्यस्यचप्रथममनुपस्थितेः स्वर्गत्वयागत्वसामानाधिकरण्येनकार्यकारण
भावग्रहः तथाप्रकृतेपिशाब्देकार्यान्वितज्ञानजनकत्वंगृहीतं नतुकार्यान्विता ज्ञानत्वाव
च्छिन्नंप्रति नचैतत्पदसङ्कारादेवोपपन्नमितिनकार्यान्वितेशक्तिरिति पदंतावच्चतुर्विधं
रूढंयौगिकं योगिकरूढंयोगरूढंच यत्रावयवशक्तिनैरपेक्ष्येणसमुदायशक्तिमात्रेण १४७

149A

ज्ञत्वविशिष्टेवापंकजपदस्यलक्षणा यदि चानुगतप्रतीत्यानत्रापिपद्मत्वजातिस्तथापिस्वतंत्रो
पस्थितयेतत्रलक्षणा अथायोग्यतयायोगार्थानन्वयेपि योग्यतयारूढ्यर्थःपद्ममेवबुद्ध्यतइ
तिचेन्न योगार्थगतत्वेनपद्मत्वस्योपस्थित्यानिराकांक्षत्वात् स्वतंत्रोपस्थितयेनदावश्यकत्वात्
यद्यपिशक्यादन्येनरूपेणज्ञातिभवतिलक्षणेतिन्यायात्समुदायस्यपद्मत्वेनलक्षणानयुक्ता
तथापिकर्तृवाचकपदएवसावोध्या अत्रेदंचिंत्यं स्थलेपंकजमित्यत्रपंकजनिकर्तृत्वस्यपदे
तात्पर्याभावसंदेहे तदानन्वितपद्मत्वस्यसाकांक्षत्वमेव यत्रवाप्रथममन्वयस्तत्रापिस्थलपद्म
तात्पर्यामहानंतरंपुनःस्थलपंकजपदात्स्वतंत्रोपस्थितिर्लक्षणोपेया एवंचशक्त्यैवतदान
दुपस्थितिरस्तामयोग्यत्वेनयोगार्थस्यानन्वयादिति अपिचश्येनेनाभिचरन्यजेतेत्यत्र वल
वदनिष्टाननुबंधीष्टसाधनत्वरूपविध्यर्थविशेषणांशमपहाययथाविशेष्यान्वयस्तथाप्र
कृतेप्ययोग्यतयाविशेषणानन्वयेविशेष्यान्वयेवाधकाभावः योगार्थस्यैवविशेष्यत्वेचपंकजे
कुमुदमित्यत्रतस्यसाकांक्षतयालक्षणानुपपत्तेरितिदिक् इदंतुवोध्यम् आकाशपदेलि

न॰प्र॰ रवच्छिन्नैव शक्तिर्व्यक्तीनामानंत्येऽभावेनानुगमकधर्मानपेक्षणात् न च वृत्त्युपस्थापित
१५२ स्यैव शाब्दबोधविषयत्वाच्छब्दाश्रयत्वेन ततः कथं भासत इति वाच्यं नियमतो यद्धर्मवत्त्वेनोपस्थि
150 ते यत्र शक्तिग्रहस्तत्स्मरणजनकसंस्कारजनकस्य तद्धर्मविषयतानियमेन तद्बोधकादे
वतद्विशेष्यबोधनियमेनाकाशपदाद् शब्दाश्रयस्यापितस्य भानात् न चाहि शक्तिर्ह्येकसंबंधि
ज्ञानमपरसंबंधिस्मारकमिति रीत्या पदार्थस्मारिका येन रूपेणोपस्थितयोः पदपदार्थयोः सं
बंधज्ञानं तद्रूपावच्छिन्नज्ञानात् संबंधाशेउद्बुद्धसंस्कारसहकृतात्तद्रूपावच्छिन्नस्मरणं न
त्र च संबंधितावच्छेदकस्यापि जन्यतावच्छेदकतावच्छेदककोटिनिवेशस्यावश्यकः अन्यथा
हस्तियके चैत्रत्वेनोपस्थिते भद्रत्वेन चोपस्थिते हस्तिनि संबंधग्रहे मनुष्यत्वेन हस्तियकस्या
ज्ञानाद्भद्रत्वेन हस्तिस्मरणापत्तेः तथा च यद्धर्मविशिष्टे शक्तिज्ञानं तद्धर्मविशिष्टमेव तत्स्मारक
मितीति आकाशमात्रेण शक्तावपि शब्दाश्रयत्वस्य स्मृतिसंभवः वृत्त्युपस्थाप्यत्वस्यैव शाब्दवि
षयत्वे तेन रूपेण तु स्ववृत्त्युपस्थाप्यत्वस्येति लक्ष्यतावच्छेदकवत् शाब्दबोधविषयत्वमपि अ १५२

150A

विवेत् अत्राहुः अपभ्रंशादपि शाब्दबोधोदयेनास्माच्छब्दादयमर्थो बोद्धव्य इत्याकारकेश्वरे
च्छायास्तत्रापि सत्वान्नतादृशाकारकेश्वरेच्छामात्रं शक्तिः किंतु पदपदार्थसंबंधविशेषितास्या
तथा च तस्या नानातीरादिसंबंधत्वकल्पने गौरवात् इच्छायाः संबंधत्वमतादृशकस्य भूरिप्रयोगस्या
भावाच्च न गंगापदतीरयोः संबंधत्वं किंतु प्रवाहसामीप्यस्यैवेति तीरे लक्षणैव शक्तिरिति किंच
विधेहीत्यत्र द्वारोपस्थापकपदानामनंततया विशिष्यानुपस्थितेर्यथेतरपदमेवानुभावकं न
त्वध्याहृतेपदं न यथा घोषपदादेव तीरान्वयबोधोपपन्ने न गंगापदं तीरानुभावकमिति तथा च गं
गापदात्तीरबोधो जायतामित्याकारकत्वमप्रसिद्धमेवेति दिक् लक्षणां निरूपयितुं पृच्छति अ
थ केयमिति शक्यात् गंगापदशक्यात्प्रवाहात् अशक्यस्य गंगापदाशक्यस्य तीरस्य उपा
स्थितिर्लक्षणेत्यर्थः गंगापदेन शक्त्या प्रवाहोपस्थितौ तत्र चान्वयानुपपत्तिप्रतिसंधानानंतरं गं
गापदात्पुनः स्मृतेन प्रवाहे साक्षात्संबंधिज्ञानस्यापरसंबंधिस्मारकतया स्वसंबंधितीरमुप
स्थाप्यते तथा च संबंधोपस्थितिर्लक्षणेति भावः पदज्ञानस्य पदार्थस्मारकता साक्षात्संबंधिर

त॰प्र॰ ज्ञानमपरसंबंधिस्मारकमिति रीत्या सचसंबंधो वृत्तिरेव ननु तस्या उपस्थितिरूपवत्वमि
१५५ त्यर्थः सैवेति उपस्थितिरेवेत्यर्थः अशक्येइति गंगायांघोषइत्यत्रगंगापदशक्येतीरे तात्प
र्य्ये गंगापदतात्पर्य्ये गंगापदात्तीरशाब्दबोधोजायतामितीच्छाविषयत्वंयत्तीरेतदेवलक्षणेत्यर्थः
151 शक्यतात्पर्य्यस्यलक्षणात्ववारणायाशक्येइति अन्वयेइति घटमानयेत्यादौघटकर्मत्वयोराधे
यत्वरूपसंसर्गेतात्पर्य्यसत्वात्तात्पर्य्यस्यलक्षणात्वंस्यादित्यर्थः नचेष्टापत्तिः अन्वयेनशक्ति
र्नवालक्षणेतिसिद्धांतव्याघातात् नचशक्यसंबंधस्यलक्षणात्वस्वीकारेप्ययंदोषइतिवाच्यं अ
न्वयेशक्यसंबंधस्यसत्वेपितस्यनशाब्दबोधानुपयोगितयातच्छाब्दबोधानुकूललक्षणायास्तत्र
त्राभावात् अन्यथा गंगापदस्यमुख्यपरत्वेपि शक्यसंबंधस्यतीरेसत्वाल्लाक्षणिकत्वापत्तिरि
तिलक्षणायास्तत्रमूककत्वमेवोपेयमिति तात्पर्य्यस्यलक्षणात्वेचान्वयतात्पर्य्यस्यशाब्दबोधानुकू
लत्वेनतत्रतच्छाब्दबोधोपयोगिलक्षणायाउर्वीरत्वादितिध्येयम् ननुशक्येपदार्थेतात्पर्यलक्षणा
पदार्थत्वेचपदजन्यप्रतीतिविषयत्वं विषयताचप्रकारताविशेष्यतान्यतररूपा इत्थं चसंसर्ग १५५

151A

नीयेशक्तिग्रहः सहकारी पामराणां च तदभावान्न शाब्दबोध इति विवेचितं नचेदं संभवति
गंगायां घोष इत्यादौ गंगापदस्य तीरे शक्त्यभावेपि शाब्दबोधोदयादित्याशंक्यते नन्विति तीरे
ति तीरे गंगापदस्य शक्त्यभावादिति भावः तत्वेन शक्तित्वेन प्रयोजकता ज्ञाता सती शाब्दबो
धोपयोगिनी किंतु वृत्तित्वेनेति प्रयोजकेति पूर्वेणान्वितं वृत्तित्वं च शक्तिलक्षणान्यतरत्वं
लक्षणैवेति शाब्दसामान्ये वृत्तिज्ञानत्वेन हेतुतया गंगापदस्य तीरे लक्षणारूपवृत्तिज्ञानस
त्वात्तीरशाब्दबोधो नानुपपन्न इति भावः ननु गंगायां घोषः प्रतिवसतीति व्यवहारदर्शनात्
गंगापदस्य तीरे कथं न शक्तिरिति चेन्न लक्षणीयपदार्थानामनंततया सर्वत्र शक्तिकल्पने
गौरवात् शक्यसंबंधरूपा लक्षणा तु क्लृप्तैव एवमेकसंबंधिज्ञानस्यापरसंबंधिस्मारकत
या गंगापदजन्योपस्थितेः शक्यसंबंधरूपलक्षणाजन्यत्वमपि क्लृप्तमेव लक्षणाजन्यो
पस्थितेः शाब्दबोधानुकूलत्वमात्रं कल्प्यते शक्तिस्वीकारेऽतिरिक्तधर्मिकल्पनमिति ध
र्मिकल्पनातो धर्मकल्पना लघीयसीति न्यायेन तीरे लक्षणैव रूपशक्तिर्नास्तीति दिक् किं

न॰प्र॰ नीयत्वेच्छारूपा सा तु लक्षणैव एवंच शक्तेरपि लक्षणतया तज्ज्ञान्योपस्थितेः शाब्दबोधानुकू
१५२ लत्वमात्रं मयापि कल्प्यत इति न धर्मिकल्पनायाइति न्यायावतारः नचास्माच्छब्दादयमर्थो बो
द्धव्य इत्याकारकेश्वरेच्छा लक्षणैवेति वाच्यं गंगापदात्तीरबोधोदयेनेश्वरेच्छायास्साद्यशाकारत्वा
152 वश्यकत्वात् तस्याः सर्वविषयकत्वात् नचलाक्षणिकं पदं नानुभावकमिति गंगापदात्तीरबो
धानुदयात्तादृशाकारत्वमलक्षणैवेति वाच्यं तथा सति गंगापदस्याननुभावकत्वेन तादृशाका
रकशक्त्यभावः शक्त्यभावे चाननुभावकत्वमित्यन्योन्याश्रयादिति अथ यत्तादृशेच्छायेश्व
रोच्चरितत्वं शक्तिः सा च न तीर इति तत्र लक्षणैव अत एवापभ्रंशेपि शक्तिभ्रम इति चेन्न ईश्व
रोच्चरितत्वं न तज्जन्यत्वं अपभ्रंशादिसाधारण्यात् न तत्कंठताल्वाद्युच्चरितत्वं आधुनिक
चैत्रादिपदेऽभावात् द्वादशेऽहनि पिता नाम कुर्यादित्यादिना सामान्यतो नामत्वेन तदुच्चार
णोपपादने नापभ्रंशानि वैदत्तादिनाऽपभ्रंशत्वेन तदुच्चारणस्यापभ्रंशेपि सत्त्वात् वैदि
कपदस्यापि लाक्षणिकतया तादृशेच्छायेश्वरोच्चरितत्वसत्त्वात् लक्ष्येपि शक्तत्वापत्तेश्चा १५२

152A

यैवं गोत्वमपि शक्यं तस्मात् यदि च विशेष्यत्वस्यैव संस्कारविशेषाद्विशेषणस्मरणोल्लेख्यताव
च्छेदकवन्नियतस्मृतेरनुपपत्तिस्तूपं जेरणशक्तिगतेहसंस्कारविषयत्वाभावात् किंचान्यसंबं
धेनाप्यन्यत्र संस्कारोद्बोधे पदान्तरमुष्टतज्ञानकस्मरणानुपपत्तिः अनुभवविषयतत्तायाअपि नि
यमेन भानसंभवात् घटत्वशक्तेरेवतद्देशेऽप्युद्बोधकत्वसंभवादुद्बोधकान्तरानुसरणे चोल्ले
ख्यतावच्छेदकवन्नियतस्मरणानापत्तेः तस्मात्पदान्नियतोपस्थितिः स्वसंवेद्यसाध्या स्वसं
वेद्यः परिशेषाद्वा वृत्तिरेव पर्यवस्यतीति पदान्नियतोपस्थितिर्वृत्तिसाध्येति नियमाद्धोत्वेशक्य
मिति विभाव्यते न दाशब्दाश्रयत्वेपि तुल्यमिति चेदास्तां तदपि शक्यं यदि नियमेन तदुपस्थि
तिः आकाशः शब्दाश्रय इत्यस्य चाकाशपदवाच्य इत्यर्थेनेवोपपन्नत्वात् पर्यायत्वेपि सहप्र
योगानुपपत्तिः वस्तुतस्तु कदाचिच्छब्दाश्रयत्वेन कदाचिच्चाष्टद्रव्यातिरिक्तद्रव्यत्वेनाप्युप
स्थितेर्न नियततादृशोपस्थितिरिति न तच्छक्यं धर्म्यंशोद्बोधकादेवतदंशेप्युद्बोधसंभवात्तत्स्मर
तेः शब्दबोधस्य चोपपन्नत्वात् यदि च संस्कारस्य कदाचित्तदंशेनोद्बोधस्तदा अस्तु वा

न॰प्र॰ पदादपि निर्विकल्पकमाकाशपदान्निष्प्रकारकमेव स्मरणं शाब्दबोधश्च पदार्थान्तरमादाय स
१५३ विकल्पकमेव आकाशो द्रव्यमित्यत्र भिन्नविभक्त्युपनीतसंख्यामादाय भिन्नप्रकारकोपस्थिति
सत्वात् अभेदान्वयो नोपपन्न इति द्रष्टव्यम् अत्राहुः नियतानुपस्थितावपि विनिगमकाभावा
153 न्नञ्जकं अत्रादिपदवन्नानार्थत्वेनाप्युपपत्तेः एकत्र धर्मिण्यपि निमित्तद्वयेबाधकाभावाम्
वस्तु नञ्जुपदस्याश्रयत्वमेव शक्यतावच्छेदकं लाघवाद्घटत्ववद्रूपान्तरेण बोधस्तु शक्तिभ्रमा
त् कम्बुग्रीवादिमत्त्वेनेव घटस्य अत एव नियतोपस्थितिरपि शक्तिभ्रमात् कम्बुग्रीवादिम
त्त्वोपस्थितिवदुपपन्नेति न नानार्थत्वमपीति केचित्तु व्यक्तिभेदानुगतानतिप्रसक्ततयाश्रयोऽनना
भावेन धर्मिणि न शक्तिकल्पनमित्याहुः निर्विकल्पकोपस्थिताकाशशब्दादिर्ज्ञानासम्भवे
न शाब्दबोधानुपपत्तिः एकस्यैवैकत्वस्योभयार्थत्वात्तद्विवक्षायां विभक्त्यर्थसंख्यामादाय
भिन्नप्रकारकोपस्थित्यभावेनाकाशो द्रव्यमित्यत्राभेदान्वयानुपपत्तिश्चेति पदान्निर्विकल्प
कस्मृतिस्वीकारोऽनुचित इत्यन्ये इति दिक् नन्वियता प्रबन्धेन पदज्ञानेन शाब्दसामान्यजन १५३

153A

स्वपदार्थत्वाभावादिव नैराश्य इत्यत आह किंचेति तात्पर्य्येति इत्या पदार्थोपस्थितौ सत्यां शाब्द
बोधे जाते तत्प्रतीतीच्छया चरितत्वरूपतात्पर्यनिर्वाहो भवती ति तात्पर्य्यातिरिक्तावृत्तिरवश्यमुपे
या नहि स्वयमेव स्वनिर्वाहकमिति भावः ननु वृत्तेः शाब्दबोधनिर्वाहकत्वमेवोपेयते न तु तात्पर्य्य
निर्वाहकत्वमत आह शक्तिरपीति तथात्वापत्तेः तात्पर्यात्मकत्वापत्तेरित्यर्थः तथा सति श
क्तिलक्षणयोरभेदापत्तिः यदि च तात्पर्य्याद्भिन्नैरिति प्रवादात् तत्र च पदस्य धीत्वयानुपपत्त्या
तन्निर्वाहकतया शक्तिस्तदतिरिक्ता न दोषस्तल्लक्षणायामपि तुल्यमिति भावः अत्र यद्यपीश्वरेच्छा
रूपशक्तेस्तात्पर्य्यात्मकत्वेऽस्यापत्तिरेव तथापि वक्तृसामान्यतात्पर्य्यात्मकत्वापत्तिरिति बोध्यं स्व
शक्येति स्वलाक्षणिकपदं तच्छक्यं तत्संबंधो लक्षणेत्यर्थः इदमेवोपपादयति जलस्थितीति गं
गायां घोष इत्यादौ स्वं गंगापदं तच्छक्यः प्रवाहस्तत्संबंधः संयोगादिरूपस्तीरेऽस्तीति गंगापदस्य
तीरे लक्षणेत्यर्थः गौण्याश्च तत्त्वादिमत्त्वावच्छेदाय लक्षणायामेवान्तर्भावं दर्शयितुं लक्ष
णां विभजते साचेति शक्यसंबंधरूपलक्षणा चेत्यर्थः तत्र गौणीं लक्षयति साधर्म्येति

त०प्र० तद्भिन्नत्वेसतितद्वृत्त्यन्वयबोधमेवतत्साध्यं तदात्मकः शक्यसंबंधोगौणीत्यर्थः गौणीमु
१५६ दाहरति यथेति वाहीकः वाहीकदेशोद्भवः गौः बलीवर्द इत्यर्थः अत्रवाहीकेगवाभेदस्याबा
धाद्गोपदेनगोसादृश्यंलक्ष्यते गोसादृश्यंचगोगतजाड्यमांद्यादिकमेव तथाचजडोमंदश्चवा
154 हीकइति शाब्दबोधः एवंचलक्षणायैवोपपन्नोगौण्याव्यतिरिक्तावृत्तिर्नेतिपेया लक्षणायामेव
तदंतर्भावादित्याशयः एवंसिंहोमाणवकइत्यत्रापिगौणीलक्षणयासिंहसदृशोपस्थितौसिं
हसदृशाभिन्नोमाणवकइत्यन्वयबोधोबोध्यः शुद्धांलक्षयति तदन्येति तदन्या सादृश्या
न्यशक्यसंबंधरूपेत्यर्थः शुद्धामुदाहरति यथाऽऽयुरिति आयुःपदस्यायुर्जनकेलक्षणा
तत्रायुःपदशक्यसंबंधोजनकत्वरूपोबोध्यः तथाचायुर्जनकाभिन्नंघृतमित्यन्वयबोधः
ननुशक्यादशक्योपस्थितिर्लक्षणेतिप्राचीनमतेलाक्षणिकंपदंनानुभावकमितिप्रवादः संग
च्छते स्वजन्योपस्थितिसंबंधेनपदस्यानुभावकतयागंगापदजन्यतीरोपस्थितेरभावाद्गंगाप
दस्यतीराननुभावकत्वात् किंतुघोषपदस्यैवतच्छाब्दंप्रतितदन्वयप्रतियोग्युपस्थापकपद १५६

154A

त्वेन कारणत्वात् नचैतच्छाब्दं प्रतिवृत्त्यात्मपदजन्यपदार्थोपस्थितेर्हेतुत्वात्कथमेतदिति वा
च्यं तदर्थवाचकतत्पदनिरूपितशक्तिज्ञानजन्यतच्छाब्दबोधं प्रति तत्पदनिरूपितशक्तिज्ञानत्
त्वेन हेतुत्वं ताद्दशलक्षणाजन्यशाब्दबोधं प्रति च ताद्दशस्वरूपसमपदार्थोपस्थितित्वेनैव हेतुत्वेन
रूक्तरूपेण हेतुहेतुमद्भावः शक्यसंबंधस्य लक्षणात्वे तीरोपस्थितेर्गंगापदजन्यत्वात् तत्
न्वयप्रतियोग्युपस्थापकतयानुभावकत्वसंभवात्येवेति ताद्दशशाब्दबोधे विरोधः अथ मन्मते
गंगापदात् स्वशक्यसंबंधेन प्रथममेव तीरोपस्थितिः नवमते तु पुनः शक्यस्मरणात् तत्स्मृतौ
गौरवमिति चेन्न पदस्य स्वशक्यसंबंधेनान्वयप्रतियोगिस्मारकत्वस्यालक्षणत्वेन तत्कल्पने गौ
रवात् स्मृतेन प्रवाहेणात्वसंबंधितीरस्मृतेरेवौचित्यादिति चेन्मैवं गंगापदात्तीरानुपस्थितौ प्र
त्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वव्युत्पत्तिभंगापत्तेः प्रकृत्यर्थोपस्थाप्यविभक्त्यर्थान्व
येऽतिप्रसंगादननुभवाच्च प्रकृतिपदतात्पर्यविषयेण स्वार्थान्वयबोधकत्वेपि तथा धूमो
स्तीति वाक्यतात्पर्यविषयेण वह्निना धूमपदोत्तरविभक्त्यर्थान्वयापत्तेः तस्माद्गंगापदस्या

न॰प्र॰ १५५ पितीरस्मारकत्वेन कल्प्यते न तु शक्तिस्तां विनाप्युपपत्तेः तथा चान्वयप्रतियोग्युपस्थापक
त्वाल्लाक्षणिकस्याप्यनुभावकत्वापत्तिरवशिष्यते साऽपि पदानां स्वशक्यानुभवं प्रत्येव कारणत्वा
155 वधारणात् इतरपदार्थेन सह स्वशक्यानुभावकत्वेन लक्षणाहीनपदादेव तीरानुभवसंभवात्
लाक्षणिकपदस्य नानुभावकत्वमिति रीत्या वारणीयेति वस्तुतस्तूद्देश्यविधेयभावेन लाक्षणि
कं पदं नानुभावकमित्येव तदर्थः उद्देश्यविधेयभावेनान्वये शक्तिमत्त्वस्यैव प्रयोजकत्वात् ल
क्षणावलस्यार्थस्य विधेयतयाऽभानात् विध्यर्थस्य च विधेयतयैव भानान्न विधौ परः शब्दार्थ
इति संगच्छते किञ्च तंतुसंयोगस्य पटसंयोगहेतुत्वतात्पर्यके तंतुः पटं करोतीति सर्वला
क्षणिकस्थलेऽन्वयानुभवापत्त्या यापत्ते लाक्षणिकं पदमप्यनुभावकमिति नाद्यशङ्कावकाशः किं
चित्करः यत्तु शक्याद् शक्योपस्थितिर्लक्षणेति मते लक्ष्यतावच्छेदके लक्षणा नास्तीति प्रवाद
व्याघातः शक्यसंबंधस्य लक्षणात्वमते तु शक्यसंबंधस्य लक्ष्यलक्ष्यतावच्छेदकोभयसाधार
णस्यैकस्याभावात्तदुपपत्तेरिति तन्न भवन्मतेऽपि यत्र लक्ष्यतावच्छेदकलक्ष्योभयसाधार १५५

णः शक्यसंबंधस्तत्रागतेः तत्र लक्ष्यमात्रवृत्तितानियामकसंबंधेन तस्य लक्षणत्वोपगमे
ममापि लक्ष्यमात्रवृत्तिविषयतासंबंधेन तस्योपस्थितेर्लक्षणत्वोपगमादिति एतेन लक्ष्यता
वच्छेदके लक्षणा नास्तीत्यस्य लक्ष्यतावच्छेदकग्रहे शक्यसंबंधरूपलक्षणाग्रहो नापेक्षित
इत्यर्थः यत्र चोभयसाधारणः शक्यसंबंधस्तत्र लक्ष्यवृत्तित्वेनैव तत्संबंधग्रहापेक्षा न तु ल
क्ष्यतावच्छेदकवृत्तित्वेनापि शक्यतावच्छेदकविशिष्टशक्तिग्रहात् शक्यतावच्छेदकेपि वि
शेषणज्ञानविधया शक्तिज्ञानमपेक्षितमिति परास्तम् लक्ष्यमात्रवृत्तिविषयतासंबंधेनोप
स्थितेर्विशिष्टबोधप्रयोजकत्वस्यापि ममापि सुवचत्वादिति इदं चावबोध्यं शक्तिलक्षणज्ञा
नयोरेक एव कार्यकारणभावः तथाहि शक्तित्वावच्छिन्नसांसर्गिकविषयतानिरूपितपदनि
ष्ठप्रकारतानिरूपितार्थनिष्ठविशेष्यताज्ञानत्वेन शाब्दबोधं प्रति कारणत्वं शक्तिसंबंधेन श
क्यसंबंधेन वा पदप्रकारकज्ञाने शक्तेः संसर्गत्वात् शक्तित्वनिष्ठावच्छेदकतायां पर्याप्तिः प
रं न निवेश्यते तेन शक्यसंबंधेन पदप्रकारकज्ञानस्यापि संग्रहः परन्तु पदप्रकारतानिरू

त.प्र.
१५६
156

पिताशक्तिनिष्ठासांसर्गिकविषयतासानार्थविशेष्यतानिरूपिता तेनशक्तिसंबंधेनपदार्
भावप्रकारकबाधबुद्धिप्रतिबध्यत्वेनलक्षणाज्ञानस्येतिबोध्यं शाक्यसंबंधस्याविनाभावएवे
तिप्रांच स्तन्न मंचाः क्रोशंतीत्यत्राभावात् तत्रापि तत्तत्संमयमादायाविनाभावोपपादनेपि
किमनेन शाक्यसंबंधमात्रस्यैवलक्षणात्वौचित्यात् विनाभूतबोधस्यतात्पर्यज्ञानाभावेनै
ववारणीयः अनेकाविनाभूतसत्त्वेप्येकतरभानेतात्पर्यज्ञानबलादेवेतिभवतोवाच्यत्वात्
मण्डपंभोजयेत्यादौ रूढिपूर्विकालक्षणेतिमीमांसकाः मण्डपपदस्यगृहविशेषेरूढिर्मंड
मानकर्त्तरिचयोगः रूढिः समुदायशक्तिः योगोऽवयवशक्तिः तत्ररूढेर्योगापहारितेतिप्र
वादादवयवशक्त्यामण्डपानकर्तृबोधासंभवेनमण्डपपदस्यमण्डपानकर्त्तरिलक्षणा इ
त्यंचरूढ्यर्थगृहसंबंधितावच्छेदकतयागृहीतत्वेनकर्तृबोधोनतुमण्डपानकर्त्तृ
त्वेनेति पंकजमित्यादौ पंकजस्यरूढ्यर्थस्यपंकजनिकर्तृत्वयोगार्थस्याविरोधादवयवशा
क्त्यैव पंकजनिकर्तृबोधः ननुशाक्यार्थपरत्वेसंभवतिलक्षणाकल्पनमन्याय्यं नचरूढेर्यो १५६

156A

गापहारान्न तथेति वाच्यं कोयमपहारः न तावद्यौगिकार्थास्मृतिः रूढ्यर्थस्येव यौगिकेपि
स्मारकसंबंधस्य शक्तेस्तुल्यत्वात् न च योगार्थस्यान्वयमस्मृतिः सेति वाच्यं मण्डपस्य
मुद्दायेन पदा स्वार्थस्मरणे तदावयवार्थस्मरणे बाधकाभावात् अथ मण्डपपदस्य
सत्यपि योगे प्रयोगप्राचुर्य्याभावादवयवशक्तेः कुण्ठनं कल्प्यते अन्यथानेकार्थत्वादिपदा
दिव मण्डपानकर्तुरवगमोपि कदाचित्स्यादिति चेन्न तथैव पयसि दध्यानयति सा वैश्वदेव्यामि
क्षा वाजिभ्यो वाजिनमित्यत्र वाजमन्नमामिक्षात्मकं येषामिति योगाद्वाजिपदेन विश्वेदेवा उ
च्यंते न रूढ्या ऽश्वा इति सिद्धान्तस्तत्र न स्यात् न ह्यत्र विश्वेदेवेषु वाजिपदस्य प्रयोगप्राचुर्य्य
मस्ति मण्डपानकर्तरि कदाचिदपि मण्डपपदस्य योगेन प्रयोगो नास्तीति किंतु तत्रैवाभिमान इ
ति मैवं मण्डपपदाद्यदा गृहविशेषस्मृतिस्तदैव मण्डपकर्त्र्युपस्थितिस्तदुत्तरं पिवत्यर्थस्य
तदनंतरं प्रत्ययार्थस्य ततो मण्डपानकर्तृत्वेनक्ता न स्मृति यौगिकार्थस्मृतिर्विलम्बात् तदेवं
रूढयौगिकयोर्बलाबलेशीघ्रविलंबितधीकृतमेव तथा च रूढ्यर्थस्य शीघ्रमुपस्थितेः

न॰प्र॰
१५७
157

त्वाद्बलवत्त्वमौत्सर्गिकं यत्र तु यौगिकार्थस्य प्रकरणवशात्प्रथममुपस्थितिस्तत्र रूढेर्योग
एव बलीयान् यथाऽग्निर्वसुभिः सोमो रुद्रैरिन्द्रो मरुद्भिर्वरुण आदित्यैर्बृहस्पतिर्विश्वैर्दे
वैरित्यत्र प्रकरणवशाद्विश्वेदेवपदेन वसुरुद्रमरुदादित्यरूपसर्वदेवानामेव योगेनस्म
तिर्न तु रूढ्या पुरूरवोमाद्रवःप्रभृतिगणानामुपस्थितिः एवं तप्ते पयसि दध्यानयति
सा वैश्वदेव्यामिक्षा वाजिभ्यो वाजिनमित्यत्र वाजमन्नमामिक्षारूपं येषां ते वाजिन इति
योगाद्वाजिनोपि विश्वेदेवदेवताकत्वं प्रकरणेनोपस्थापितत्वान्न तु वाजिपदेन रू
ढ्याऽश्वानामुपस्थितिरिति नामिक्षाधिकरणसिद्धान्तविरोधः न च रूढेर्योगाद्बलीयस्त्वेन
रूढ्यर्थधीरेव स्यादिति वाच्यं रूढ्यर्थयोगार्थयोर्द्वयोरुपस्थितावनुपस्थितौ वा रूढेर्ब
लीयस्त्वं प्रकृते तु प्रकरणवशेन योगार्थस्यैव स्मरणान्न तु रूढ्यर्थस्य प्रकरणेनोद्बुद्ध
संस्कारस्यैव शाब्दादय्युद्बोध इति प्रावेदन प्रकरणसम्वलितेन योगार्थस्मृतिर्जन्यते न तु रू
ढ्यर्थस्मृतिरिति न चैवं मण्डपपदादपि योगार्थस्यैव प्रथमं स्मृति संभवेन न लक्षणेति १५८

157A

वाच्यं अत्रप्रकरणादेरभावात् रूढ्यर्थस्यैव प्रथमं स्फूर्त्तिस्मृतिर्द्विकालक्षणा यत्र च
योगार्थप्रकरणाद्यवतारस्तत्र योगार्थस्यैव बलवत्त्वान्नलक्षणा यद्यपि पदस्मानमेवोद्बोध
कं न प्रकरणादिकं तथाप्येकसर प्रकरणमपरस्मृतौ प्रतिबंधकमवसेयमिति वदन्ति
तन्न रूढ्यर्थान्वयबोधो वा तन्स्मृतिर्वा यौगिकार्थान्वयबोधे प्रतिबंधका नतावदाद्यः
रूढ्यर्थस्य प्रथममुपस्थितत्वेपि तस्या योग्यतया यौगिकार्थान्वयबोधे बाधकाभावात् न
द्वितीयः प्रकरणादिना यत्र यौगिकार्थान्वयबोधस्तत्र रूढ्यर्थस्मृतेरभावात्तस्याः प्रतिबंध
कत्वोपपत्तावपि तस्या यौगिकार्थस्मृतौ तदन्वयबोधे वा प्रतिबंधकत्वेमानाभावात् सा
नादविरोधिनो ज्ञानस्य जनकज्ञानविषयकत्वेनैव प्रतिबंधकत्वात् अनुमितौ तु सिद्धेर
गत्या फलबलेन तथात्वकल्पनात् तस्माद्यत्र मण्डपपदस्य गृहपरत्वं तत्र मण्डपानक
र्तृत्वरूपयोगार्थस्यायोग्यतया नान्वयबोधो न तु रूढ्यर्थस्मृतिस्तत्र प्रतिबंधकाया

न.प्र. ग्यतारूपलक्षणकारणाविरहेणैवतदबोधोपपत्तेः यत्रतुरूढ्यर्थस्यायोग्यतातत्रयोग्यत
१५८ यायोगेनयौगिकार्थबोधोभवत्येव रूढेर्योगापहारप्रवादस्तुयोग्यतायांरूढ्यर्थस्यान्वयबो
158 धोनतुयौगिकार्थस्य अयोग्यत्वादित्येतत्परोनतुयोग्यतादिमत्त्वेपियौगिकार्थस्यनान्वयबो
धइत्येतत्परः यत्रचरूढ्यर्थस्यसहसंबंधिचैत्रचैत्रत्वादिनातात्पर्यंप्रमाणांतरावधार्य्य
तेतत्ररूढिरूढिकालक्षणानतुसर्वत्रेत्यवधेयं लक्षितलक्षणापिवक्ष्यंतरमितिप्राञ्चः द्वि
रेफपदेनद्वौरेफौयत्रेतिव्युत्पत्त्याभ्रमरपदंलक्ष्यते भ्रमरपदेनस्वशक्यसंबंधीभ्रमररूपो
र्थोलक्ष्यतइतिद्विरेफपदस्यभ्रमरेलक्षितलक्षणा नचद्विरेफपदलक्ष्यभ्रमरपदशक्त्यैव
निर्वाहेऽलंभ्रमरेलक्षणयेतिवाच्यं प्रत्ययानांप्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेनभ्रम
रस्यद्विरेफपदार्थत्वाभावेतत्रविभक्त्यर्थानन्वयापत्तेः मन्मतेचलक्षितलक्षणयाद्विरेफ
पदस्यैववृत्तितयाभ्रमरस्यद्विरेफपदार्थत्वादिति नचशक्यादन्येनरूपेणज्ञातेभवति १५८

प्रवादस्तु क्वाचित्काभिप्रायेण यत्र यो गच्छति भ्यां पद्मानुभवस्तदनंतरं कुमुदे तात्पर्यज्ञानं तत्र स्वतं
त्रोपस्थितये कुमुदे लक्षणा इत्यानुपूर्वं विशेषो यत्तु प्रदायमते सर्वत्र लक्षणा मणिकृन्मते क्वाचित्की
ति चेन्न तत्रापि पंकजनिकर्तृत्वस्य कुमुदे तात्पर्यग्रहकाले पुनः स्मृत पंकजपदेन शक्त्यैव कुमुदो
पस्थापनसंभवात् तस्य पद्मे तात्पर्याभावनिश्चयेन कुमुदे तात्पर्यनिश्चयसत्वेन च पद्मेऽन्वय
यासंभवात् अन्यथा लक्षणा नापद्येतेति यत्तु शक्त्या पुनर्नानापदतदर्थानुसंधानपदे वाक्यार्थ
विधया गुरूपस्थितिकत्वे लक्षणया पंकजनिकर्तृत्वस्य पदार्थतया लघूपस्थितिकत्वमिति तन्न
पंकजन्मकर्तरि मानयेत्यादौ वाक्यमात्र एव लक्षणापत्तेः ननु प्रत्येकशक्त्यैव तद्योग्यतादिवलाद्वि
शिष्टबोधात् लक्षणेति चेत् प्रकृतेपि समानं तस्मात् रूढिज्ञानप्रतिबंधकत्वकल्प एव लक्षणासं
भवः विरोध्यविषयत्वेपि सिद्धेरनुमित्याविवरूढिज्ञाने प्रतिबंधकमिति स्मृत पद्मान्वयानुप
पत्त्यनंतरं कुमुदधीरिति लक्षणाव्यवहारो मुख्यवस्तुतो मुख्यतये वेति तु मणिकृन्मतगतिरिति
ननु पंकजपदस्य पद्मे लक्षणैवास्तां वाक्ये शक्त्यभावेपि न हृष्टके तत्संभवात् न च शक्त्यलक्ष्यसा

धारणोकस्तूपाभावेनाऽजहत्स्वार्थायास्तस्या अभावाद्युगपद्वृत्तिद्वयविरोध इति वाच्यं सतितात्पर्ये र
गंगायां घोषमत्स्यौ स्त इत्यत्रैव मणिकृन्मतेन स्यादोषस्तावादिति चेन्नैवं प्राकेपबाधके सत्येव लक्षणेति म
ते बाधकाभावेन लक्षणोपनीतानपेक्षणे कुमुदसाधारणबोधापत्तेः तात्पर्यानुपपत्त्या पद्मोः प्रवे
शायेतिवल्लक्षणापदादेनेपि पद्मकुमुदयोस्तुल्यत्वापत्तेः तदुपत्वादिविशेषात्तु तथा च पद्मान्वया
न्वयानुपपत्तिप्रतिसंधानानंतरं कुमुदधीरिति सिद्धांतव्याकोपः एवं चेन्नुपदमपि योगरूढमेवे
ति ननु पद्मत्वमेव प्रयोगोपाधिरस्तु इति चेन्न पद्मत्वज्ञानेन प्रतिबंधकं अगृहीतनियतपद्म
प्रयोगस्य कुमुदसाधारणबोधदर्शनाद्रूढिज्ञानमेव स्वर्थभाववत्त्वसंबंधेन प्रतिबंधकं मन्तिकोम
नन्वयोगपत्रयापद्मत्वमपहाय केवलावयववृत्त्या कुमुदबोधोस्तु किं लक्षणया रूढेर्योगप्रति
बंधकत्वमते तथात्वसंभवेपि मणिकृन्मतेस्तु हेरप्रतिबंधकत्वादिति चेन्न पद्मान्वितत्वेनोप
स्थितस्यापंकजनिकर्तुस्तस्याश्रयनिराकांक्षतया स्वतंत्रोपस्थितवैलक्षण्योपगीकारात् एवं पंक
जपदात्स्थलपद्मबोधो लक्षणयैव स्थलपद्मं विजातीयमेवेति पद्माकृतिसादृश्यात्तु स्थलप

1594

लक्षणेति भ्रमरपदशक्यतावच्छेदक भ्रमरत्वस्य कथं लक्ष्यतावच्छेदकत्वं शक्यैव तद्बो
धसंभवादिति वाच्यं शक्येन रूपेण लक्षणांगीकारे शक्यैव तद्बोधसंभवे लक्षणाकल्पनम
फलमित्यस्यैव बीजनया प्रकृते च शक्यता भ्रमरत्वविशिष्टबोधस्वीकारे भ्रमरस्य द्विरेफप
दार्थत्वाभावेन विभक्त्यर्थान्वयानुपपत्त्या शक्यस्यापि लक्षणयैव भानमपेयते एतन्मते
लक्षितस्य पदस्य लक्षणा लक्षितलक्षणा सा च द्विरेफपदस्य वृत्तिरिति तन्न शक्यसंबं
धो हि लक्षणा न तु शक्यस्य साक्षात्संबंधो गौरवात् एवं च परंपरासंबंधेन लक्षणैव ल
क्षितलक्षणा स्वलक्ष्यपदघटितलक्षणा सेत्ति तु यावत् तथा च परंपरासंबंधेन लक्षणाया
एव तथात्वेन द्विरेफपदस्य स्वलक्ष्य भ्रमरपदघटितपरंपरासंबंधेन भ्रमररूपार्थोप
स्थापकत्वसंभवात् द्विरेफपदलक्षणायैवोपपत्तेर्नातिरिक्तवृत्तिकल्पनमिति दिक् ॥ सा
च लक्षणा क्वचिज्जहत्स्वार्था क्वचिदजहत्स्वार्था च आद्या गंगायां घोष इत्यादौ गंगाशब्दार्थस्य
प्रवाहस्य त्यागात् तीरे घोष इत्येव बोधात् यदि च गंगासंबंधितीरत्वेन बोधस्तदा त्वजह

न.प्र. त्स्वार्थैव अन्या च काकेभ्यो दधि रक्ष्यतां छत्रिणो यांतीत्यादौ दध्युपघातकत्वेन काककु
१५८ कुक्कुरादीनां एकसार्थवाहित्वेन छत्र्यछत्रिणां बोधात् एवं मञ्चाः क्रोशंति यष्टीः प्रवेशयेत्या
159b दौ मञ्चपदस्य मञ्चस्थपुरुषे यष्टिपदस्य यष्टिधरे लक्षणा जहत्स्वार्थैव स्वार्थपरित्यागे
न परार्थलक्षणा जहत्स्वार्था स्वार्थापरित्यागेन परार्थलक्षणा अजहत्स्वार्थेति न लक्षणात्
ननु छत्रिणो यांतीत्यादौ छत्रिशब्दस्य वाक्यत्वात् तत्र न लक्षणा नापि छत्रपदे छत्रपरार्थ
त्यागेनाजहत्स्वार्थत्वायोगात् किंचात्र लक्ष्यतावच्छेदकं नैकसार्थगंतृत्वं यांतीत्यस्या
नन्वयापत्तेः गंतृत्वेनोपस्थितस्य गमनकर्तृतावच्छेदकादिति अत्राहुः छत्रपद एव एक
सार्थलक्षणा मतुवर्थश्च संबंधी तथा चैकसार्थवंतो यांतीति वाक्यार्थबोधः छत्रिवाक्य
लक्षणाभिप्रायेण वाजहत्स्वार्थतोक्तिः अर्थपदस्य प्रतिपाद्यपरत्वाभिप्रायेण वा केचित्तु
एकसार्थवत्वेन छत्रस्याप्यन्वयात् तथात्वं अत एव शक्यलक्ष्यसाधारणमप्युपपद्यत इ
त्याहुः अपरे तु प्रकृतावेव एकसार्थवति लक्षणा प्रत्ययश्च तात्पर्यग्राहकः अथवा सं १५८

वंधिसामान्यशक्तमनुपपत्त्यपेएकसार्थसंबंधिनैवलक्षणा छत्रपदं तात्पर्यग्राहकमित्याहुः
अन्ये च लक्षकसंबंधस्यैव लक्ष्यतावच्छेदकत्वे यष्ट्यादध्युपघातकत्वेकसार्थवाहित्वादीनि बो
ध्यम् एवं पदानां स्वपरत्वे लक्षणैव न शक्तिरन्यलभ्यत्वात् केचित्तु पदानामौत्सर्गिकार्थप
रत्वे तदभावे स्वपरत्वे न चाच प्रत्ययेन पदजन्योपस्थितिसत्त्वाच्छाब्दतज्ज्ञानमित्याहुः तन्न
प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमेन तत्र विभक्त्यर्थान्वयानुपपत्तेः इति टीका
वस्यावश्यकत्वात् अत एव पदस्य स्वबोधकत्वे वृत्तिं विनैव स्वभावात् अन्येन स्वान्यबोधनेऽ
तिप्रसंगात् वृत्तिः कल्प्या। स्वबोधकत्वे तु नैवमित्यादिपदस्य स्वार्थान्वयानुपपत्तेः सहका
रित्वाच्च न सर्वत्र स्वबोधप्रसंगः एवं स्वबोधिते स्वस्मिन् विभक्त्यर्थान्वयोपीति परास्तं प्रत्यय
यानामिति नियमस्य तिभंगप्रसंगात् न चैवं निरर्थकेऽन्ववगडदशामाहेत्यादौ स्वशक्याभावात्
लक्षणानुपपत्तिरिति वाच्यं प्रत्येकवर्णोच्चारणे हृष्टोऽनरस्थ्यमाणक्रियापदार्थान्वयात् समुदा
यस्योच्चारणासम्भवेन तत्र तदनन्वयात् तेषां च शक्तत्वेन तत्रैव लक्षणोपगमादिति ।

न॰प्र॰
६
160

गुणेशुक्लादयः पुंसि गुणिलिंगास्तु तद्वतीतिकोशस्योभयत्र शक्तिबोधकत्वेपि नीलादिप
दानां धर्मे शक्तिर्धर्मिणि लक्षणा मत्सरशब्दे तु मात्सर्य्ये धर्म्मिणि च शक्तिरिति सम्प्रदा
यः नीलादिवन्मात्सर्य्ये शक्तिर्धर्म्मिणि लक्षणा न च मत्सरशब्दस्य धर्मे धर्मिणि च तुल्य
वत्प्रयोगादुभयत्र शक्तिरितिवाच्यं नीलादिपदस्यापि गुणिनि प्रयोगप्राचुर्य्यात् ध
र्मिणि लक्षणयैवोपपत्तौ न तत्र शक्तिरितिवन्मत्सरशब्देपि तुल्यमिति मत्सरशब्देपि ध
र्मे शक्तिर्धर्मिणि लक्षणेत्यन्ये ॥ वस्तु विभक्तौ न लक्षणा सर्वनाम्नि न लक्षणा वादिवा
क्ये न लक्षणा विधौ न लक्षणा विधेयार्थे न लक्षणा विधेयताशालिशाब्दबोधत्वं शक्तिर
ज्ञानकार्य्यतावच्छेदकं लक्षणया शाब्दबोधस्तु न विधेयताशालीति न व्यभिचार इति वि
धेयतया लक्ष्यार्थबोधो नास्तीति प्रवादबीजं लाक्षणिकं पदं नानुभावकमिति प्रवादस्यो
द्देश्यविधेयभावेनान्वयो नास्तीत्यर्थः एवं विशिष्टवाचकानां पदानां विशेष्यमात्रपरत्वे
न लक्षणा वाक्यादन्येन रूपेण ज्ञाने भवति लक्षणा लक्ष्यतावच्छेदकेन लक्षणेति प्रवादा ६

160A

ऽनुसंधेयाः केचित्तु लक्ष्यतावच्छेदके लक्षणाया अकल्पनेन गोत्वेपि शक्तिविलोपप्रसंगः
इत्युपस्थाप्यस्यैव शाब्दबोधविषयत्वात् गोत्वेपि शक्तिकल्पनेन लक्ष्यतावच्छेदकेपि तथा ऽभ
घतीरत्वत्वेनोपस्थितिं विना तीरत्वं गंगाया इति संबंधग्रहाभावात्तत्र न लक्षणेति चेन्न घ
टोनेत्यादौ यथा प्रतियोगितावच्छेदकत्वसंसर्गमर्यादया भासते तथा गंगायास्तीरमित्य
त्रतीरत्वेपि सामीप्यावच्छेदकत्वसंबंधो भासते संबंधग्रहे च याद्दशं यस्य भानं तथैव तस्य
स्मरणं तथा च लक्ष्यतावच्छेदकेपि परंपरासंबंधात्मिका लक्षणैवेति प्राहुः राजपुरुष
इत्यादौ शक्त्या लक्षणया वा राजसंबंधिपुरुषबोधानुपपत्तिरतिरिक्तावृत्तिस्वीकार्यमपे
या तथा च कथं शक्तिलक्षणे एव वृत्ती इत्युक्तमित्यभिप्रायवान् शंकते नन्विति एतएव
शक्तिलक्षणएव एवकारेण वृत्त्यन्तरव्यवच्छेदः षष्ठ्यर्थेति तत्र षष्ठ्या लुप्तत्वेन राजपदादे
स्वसंबंधे शक्त्याद्यसंभवात् कथं संबंधबोध इत्यर्थः तदेवाह नहीति ननु प्रकारतया वि
शेष्यतया वा बोधे वृत्तेरपेक्षा न तु संसर्गमर्यादया भाने तथा च घटमानयेत्यादौ घटकर्म

न.प्र. मित्वयोराधाराधेयतारूपसंसर्गाबद्धाराजपुरुष इत्यत्रापि स्वस्वामिभावरूपसंबंधभानं
१६१ वृत्तिं विनैवस्यादित्याशंकते अथेति नील इति नीलपदस्य निरूढलक्षणया नीलवि
शिष्टमर्थस्तस्य चाभेदसंसर्गेण घटेऽन्वय इत्यर्थः तथा च यथा नीलघटयोरभेदः संसर्ग
161 मर्यादया भासते तथा षष्ठीतत्पुरुषेपि सेव्यसेवकभावलक्षणः संबंधः संबंधविधयैव भा
सत इति भावः तथापत्तेरिति षष्ठ्यर्थसंबंधभानापत्तेरित्यर्थः राजपुरुष इत्यत्रेवात्रापि
संसर्गस्य संबंधविधया भानापत्त्या राजसंबंधी पुरुष इत्यन्वयबोधापत्तेरिति भावः ननु घ
टः कर्मत्वमानयनं कृतिरित्यत्र घटमानयेत्यत्रेवाधेयतासंबंधेन कर्मत्वे घटान्वयबोधा
पत्त्या घटकर्मकानयनानुकूलकृतिमानित्यन्वयबोधापत्तेर्नामार्थयोरभेदातिरिक्तसंबं
धेनान्वयबोधो न स्वीक्रियते इति व्युत्पत्तिरवश्यमुपेया एवं च राजपुरुष इत्यत्र कथमभे
दातिरिक्तसंबंधेनान्वयबोधमापादयसीत्याशंकते अथेति अभेदेनैवेत्येवकारेणाभेदा
तिरिक्तसंबंधव्यवच्छेदः एवकारार्थं स्पष्टयति नत्वन्यथेति नत्वन्यथा नत्वभेदाति १६१

161A

तिरिक्तसंबंधेनेत्यर्थः नन्वेवं नियमे मानाभाव इत्यत आह तथैवेति अन्यथा घटः क
र्मत्वमानयनेकृतिरित्यत्राप्याधेयतासंबंधेन घटीयाकर्मत्वेत्यन्वयबोधापत्तेरिति भावः
ननु राज्ञः पुरुष इत्यत्र राजपुरुषयोरभेदातिरिक्तसंबंधेनैवान्वयबोधोदयान्न तादृश
नियम इत्यत आह राज्ञ इति नामार्थयोरेव न तथान्वयः राज्ञः पुरुष इत्यत्र तु षष्ठ्यर्थस्य
नामार्थत्वाभावेनाभेदातिरिक्तेनापि संबंधेनान्वयो नानुपपन्न इत्यर्थः विभक्त्यर्थेति
षष्ठ्यर्थसंबंधनामार्थपुरुषार्थयोरित्यर्थः षष्ठ्यास्तु न नामत्वं स्वाद्यंतमिह नामेष्टमि
त्यभियुक्तविरुद्धत्वादिति भावः ननु राज्ञः पुरुष इत्यत्र सेव्यसेवकभावलक्षणसंबंधप्र
कारकस्वसेव्यसेवकभावलक्षणसंबंधेन राजप्रकारकपुरुषविशेष्यकोप्यन्वयबोधो
भवति यथा घटमानयेत्यत्र कर्मतासंबंधेनानयनोपरि घटोप्यन्वेतीति सिद्धांतात् न
याचैतन्नियमभंग इति चेन्न तस्यैकदेशिमतत्वात् तन्मते तु नामार्थयोरभेदातिरिक्तसं

न॰प्र॰ वंधेनसाक्षादन्वयवोधोनस्वीक्रियतइतिनियमात् विभक्त्यर्थमद्वारीकृत्याभेदातिरिक्त
१६२ संवंधेनतन्नान्वयइतियावत् प्रकृतेचसंवंधस्यविभक्त्यर्थत्वात्तद्द्वारान्वयवोधोपगमेपि
तातिविरहादितिध्येयं नहीति ताद्दशनियममभ्युपेत्यराजपुरुषइत्यत्रतथान्वयवो
162 धोपीत्यर्थः तयोः राजपुरुषयोः तथान्वयः अभेदातिरिक्तसंवंधेनान्वयः वि
भावयेति ताद्दशनियमानभ्युपगमेराजपुरुषइत्यत्रैवतथान्वयवोधापत्तिः अभ्यु
पगमेतत्रापिनतथास्यादित्यर्थः ननुराजपदस्यराजसंवंधेलक्षणैवास्तां राजपुरुष
इत्यत्राप्यभेदेनैवतात्पर्य्येणानसंवंधेलक्षणेत्याशंकते अथेति तथापीति राजपदस्य
राजसंवंधलक्षकत्वेपीत्यर्थः इतिवदिति इतिवाक्यवदित्यर्थः नामार्थयोरभेदातिरि
क्तसंवंधेनान्वयस्याव्युत्पन्नतयाराजपदार्थस्यराजसंवंधस्याश्रयाश्रयिभावसंवंधेन
पुरुषेऽन्वयासंभवइतिभावः तद्दोषेति राजसंवंधीपुरुषइत्यन्वयानुपपत्तिरूप १६२

162A

रोधनादरवस्यादित्यर्थः ननु राजपदस्य राजसंबंधलक्षकत्वासंभवेपि राजपुरुष इति वा
क्यमेव राजसंबंधिलक्षकमस्त्वित्याशंकते अथेति समुदाय एव राजपुरुष इति वाक्य एव
शक्तिविरहे वाक्ये कुत्रापि शक्तिविरहे लक्षणायाः वाक्ये लक्षणाया अयोगादित्यर्थः ननु गं
गापदस्य तीरे शक्त्यभावेपि गंगापदशक्यसंबंधसत्त्वात्तत्र लक्षणोपपत्तिः यथा तीरे लक्षणात
था वाक्ये कुत्र चित्स्यर्थे शक्त्यभावेपि लक्षणा स्यादत आह शक्येति तथा च लक्षणायाः श
क्तिघटितत्वात्तदभावे तदनुपपत्तिः तीरे गंगापदशक्यभावेपि गंगापदशक्यसंबंधसत्त्वात्तत्र
लक्षणोपपत्तिः अत्र तु वाक्ये कुत्राप्यर्थे शक्तेरसत्त्वाल्लक्षणानुपपन्नेति भावः संबंधीति
राजसंबंधिलक्षकमित्यर्थः क्वचित्तथैव पाठः ननु नामार्थयोरन्वयबोधो न स्वीक्रियत इति
कथं पुरुषपदार्थेनान्वय इत्यत आह तथा चेति राजपदस्य राजसंबंधिलक्षकत्वे चेत्यर्थः ।
अभेदेनैवेति अन्वयः राजसंबंधिपुरुषयोरन्वयबोधः नामार्थयोरभेदातिरिक्तसंबंधे
नान्वयबोधः स्वीक्रियते न त्वभेदेनापि तदस्वीकार इति भावः न चैवमिति षष्ठीतत्पुरुष

त०प्र० पिविशेषणविशेष्यवाचकपदार्थयोरभेदान्वयस्वीकार इत्यर्थः अभेदे कर्मधारय इत्य
१६३ नेनाभेदबोधस्थले कर्मधारयविधानादिति भावः समाधत्ते समासेति लक्षणाहि वा
क्यार्थानुपपत्त्याक्षिप्यते समासपूर्वं तु न राजपदादौ लक्षणा अनुपपत्तेरभावात् तथा च
163 समासपूर्वं विशेषणविशेष्यवाचकपदयोः समानार्थकयोर्यत्राभेदान्वयबोधकत्वं तत्रैव
कर्मधारय इति भावः पदयोः राजपदपुरुषपदयोः तुल्येति एकविशेष्यकबोधजनक
त्वाभावादित्यर्थः पदे तुल्याधिकरणे विक्षेपः कर्मधारय इत्यनुशासनादिति भावः न
नु राज्ञः पुरुष इत्यत्र संबंधप्रकारको बोधः राजपुरुष इत्यत्र संबंधिप्रकारक इति विग्रहवा
क्यसमासवाक्ययोः समानार्थकत्वभङ्गापत्तिः समानार्थकसमासारम्भकवाक्यस्यैव वि
ग्रहवाक्यत्वादिति राजसंबंधी पुरुष इति विग्रहवाक्यं वाच्यमिति कर्मधारयत्वापत्तेस्त
त्पुरुषोच्छेदः न च शक्त्याऽभेदप्रतियोगित्वप्रतिपादनेन कर्मधारय इति वाच्यं नीलोत्पलमि
त्यादौ नीलपदस्य नीलविशिष्टे शक्तिविरहेण शक्तिविरहेण कर्मधारयत्वाभावापत्तेः त १६३

163A

स्यात्राजपदस्यराजसंबंधएवलक्षणास्वीकर्त्तुमुचिता नचराजसंबंधःपुरुषइतिवदन
न्वयापत्तिरुक्तैवनामार्थयोरितिव्युत्पत्तेरितिवाच्यं घटोनेत्यादौनामार्थयोरप्यन्वयस्यदृष्ट
त्वात् निपातातिरिक्तस्थलएवेतादृशनियमाभ्युपगमेच समासातिरिक्तस्थलएवमप्या
पितादृशनियमाभ्युपगमात् नचैवंराजसंबंधेलक्षणावैयर्थ्यमितिवाच्यं व्याससमासयोः
समानप्रकारकबोधजनकत्वरूपसमानार्थकत्वरक्षणायैवसंबंधेलक्षणाभ्युपगमा
त् संबंधप्रकारकबोधस्यानुभवसिद्धत्वाच्चेति मैवं समानविषयकबोधजनकत्वमिष्ये
वहिसमानार्थकत्वं नतुसमानप्रकारकबोधजनकत्वंतत् आरूढवानरोवृक्षइत्यत्र।
आरूढोवानरोयमितिविग्रहात् यत्कर्मकारोहणकर्त्तावानरइतिबोधेनसमासाच्च
वानरकर्तृकारोहणकर्मवृक्षइतिबोधेनभिन्नप्रकारकबोधस्यैवोदयेनव्यभिचारात्
एवंप्राप्तोदकोग्रामइत्यादावपि नत्रप्राप्तमुदकंयमितिविग्रहात् अथबहुव्रीहेरविग्र

ना॰प्र॰ हतयानास्य विग्रहवाक्यत्वं चित्रगुरित्यत्र चित्रा गावो यस्येति हि समासार्थकथनं न तु विग्रहः
१६४ समस्यमानपदैरेवार्थकथनस्य विग्रहत्वादिति चेन्न नहि तत्र विग्रह एव नास्तीति समासा
164 रम्भकवाक्यस्यैव विग्रहत्वात् किंतु बहुव्रीहौ तस्यासाधुत्वं समस्यमानपदैरेव विग्रहस्यसा
धुत्वात् अत एव बहुव्रीहौ विग्रहस्यासाधुत्वज्ञापनाय तत्र नित्यसमासत्वाभिधानं अत
एव चाविग्रहो ऽस्वपदविग्रहो वा नित्यसमास इति तल्लक्षणं अथ समस्यमानपदैरेवार्थ
कथनरूपविग्रहस्य साधुविग्रहस्य वा व्याससमासयोः समानार्थकत्वनियमप्रवेशान्नोक्त
स्थले व्यभिचार इति चेन्न अप्रयोजकत्वात् वस्तुतस्तु नामार्थयोरभेदेनैवेति व्युत्पत्तेः सं
कोचे मानाभावात् संबंधिनि लक्षणया आवश्यकत्वे समानविषयकबोधजनकत्वमित्यपव
कल्पनान्न समानप्रकारकबोधजनकत्वरूपं समानार्थकत्वमिति दिक् बहुष्वेवेति सत्ता
सतीति शेषः एवं च षष्ठ्या एव संबंधो र्थः आश्रयाश्रयिभावेन पुरुषे भासते नामार्थयोरेव १६४

164A

घोभेदातिरिक्तसंबंधेनान्वयबोधनिषेधादितिभावः ननुयस्यमतेषष्ठीलोपस्तन्मतेतस्यलक्ष
षष्ठीस्मरणसंभवेनान्वयबोधानुपपत्तिरित्यतआह षष्ठीलोपमिति अजानन्तस्तु अननुभ
वितुस्तु शक्तिभ्रमात् राजपुरुष इतिसमुदायस्यराजसंबंधिनिपुरुषेशक्तिभ्रमात् ननुरा
जपदस्यशक्तिभ्रमादित्यर्थः तथासतिराजपदलक्षणयावेतिराजपदस्यलक्षणयैवसहान्व
यकथनानुपपत्तिरितिध्येयम् नन्वेवंतत्रशक्तिभ्रमाच्छाब्दबोधस्वीकारेतत्रदोषादीनामन
नुगतानांनियामकत्वकल्पनेनियमतस्ताद्दृशदोषकल्पनेगौरवमतआह राजपदेति।
पूर्वकल्पेतुराजपदस्यराजसंबंधिनिरूढलक्षणा एतन्मतेतुषष्ठीलोपस्मरणसंभव
स्थलेराजपदेस्वार्थमात्रिकीलक्षणा इतिमेवचलाघवमितिभेदः नचऋद्धस्यराजमातंगाइ
त्यादावेतन्मतेलुप्तषष्ठीस्मरणस्यावश्यकतया समानविभक्तिकत्वेनाभेदेनान्वयबोधो
पपत्तिरितिवाच्यं नहिसमानविभक्तिकत्वाभावनिबंधनमभेदेनान्वयाननुभावकत्वं
किंतुसमासाघटकपदसापेक्षतया सविशेषणानांवृत्तिर्नवृत्तस्यविशेषणयोगोनेति नि

त॰ प्र॰
१६५
165

यमात् नचैवंषष्ठीशरीरः शक्तितपत्रः चैत्रस्यदासभार्येत्यादौशारकरणकत्वचैत्रनिरूपित
त्वयोः समासविशेषणीभूतशक्तिनदासत्वयोः कथमन्वयइतिवाच्यं अभेदेनान्वयेतथा
नियमात् स्तोकंपचतीत्यादावभेदान्वयानुरोधेनसमानविभक्तिकत्वमित्यस्यविरुद्धविभ
क्तिराहित्यमित्यर्थकत्वावश्यकतयाभवन्मतेप्यगतेश्च स्तोचकुरित्यस्वरसोद्भावनं तद्बी
जंतुक्वचित्समासपूर्वविग्रहश्रवणस्यसमासार्थकथनपरतयाविग्रहश्रवणस्यसर्वत्रा
नावश्यकत्वात्मालुप्तषष्ठीस्मरणकल्पनेगौरवात् क्वचित्तुराजसंबंधिनिस्वारसिकल
क्षणाग्रहस्यलाघवानुरोधेनराजसंबंधिप्रकारकबोधेतादृशसमभिहारज्ञानस्यकारणत्वक
ल्पनायाआवश्यकतयातत्रनिरूढलक्षणायाएवन्याय्यत्वात् नचसंबंधिनितात्पर्यस्या
नादित्वकल्पनमेवनिरूढलक्षणाकल्पनेगुरुः अनादितात्पर्यविषयीभूतार्थेनिरूढलक्ष
णायाएवन्याय्यत्वात् नचसंबंधिनितात्पर्यस्यानादित्वेनिरूढलक्षणात्वादितिवाच्यम्
नियमेनोलुप्तषष्ठीस्मरणकल्पनापेक्षयातात्पर्यानादित्वकल्पनायाएवयुक्तत्वात् नचैवं १६५

165A

दधिपश्यतीत्यादावपि दधिपदस्य दधिकर्मके लक्षणापत्त्या तत्रापि लुप्तविभक्त्यनुसंधानं वि
नापि बोधापत्तिरिति बोध्यं तत्र दधिपदस्य द्वितीयेतरविभक्त्यंतत्वभ्रमदशायां दधिकर्मकः
पश्यतीति दधिकर्मकं न पश्यतीत्यत्रैवान्वयबोधेन कर्मत्वार्थकविभक्तिं विना निराकांक्षत्वेन
तदनुसंधानस्यावश्यकत्वात् समासस्थले गत्यैव व्युत्पत्तिः अत एवाग्निनौदनं पचेते
त्यत्र नान्यवपदानि समर्थानि न तु तदर्थकाक्षा अग्निकरणकौदनकर्मकपाककृतिरिष्टसा
धनमिति तु वाक्यं न पदमित्युक्तमिति समासस्येति घटमानयेति शब्दसमुदायवारणा
य समासस्येति राजपुरुष इत्यादिसमासवाक्यस्येत्यर्थः विशिष्टार्थे राजसंबंधिपुरुषा
दिरूपे विशिष्टार्थे शक्तिरेवेति तथा च समासे शक्त्यैव विशिष्टार्थबोधोपपत्तेर्नातिरिक्तश
क्तिकल्पनमिति भावः एवं समासे शक्तिस्वीकारे राजपदेति राजपुरुष इत्यत्र राजपदं रा
ज्ञि शक्तमिति शक्तिज्ञानशून्यकालेपि राजपुरुषपदं राजसंबंधिपुरुषे शक्तमिति शक्तिप

त॰प्र॰ ज्ञानसंभवेनतात्पर्यशाब्दबोधापत्तिरित्यर्थः समस्तेति समासस्यविशिष्टार्थेशक्तिग्रहइ
१६६ त्यर्थः नचेति नहीत्यर्थः अवयवशक्तिग्रहे राजपदादिशक्तिग्रहे अनुशासनग्रहः
166 अनुशासनजन्योविशिष्टार्थेशक्तिग्रहः शक्तिग्रहः तच्छक्तिग्रहस्य अवयवशक्तिग्र
समुदायग्रहे ४ हस्य समुदायशक्तिग्रहे हेतुत्वादिति व्यवहारादिनात्रशक्तिग्रहः किंतुव्याकरणादि
तः व्याकरणेनहिप्रत्येकशक्तराजपदादिसमुदायोविशिष्टार्थेशक्तइतिबोधनीयं तत्तुप्र
त्येकशक्तिग्रहेनसंभवतीतितज्जन्यसमस्तशक्तिग्रहेऽवयवशक्तिग्रहस्यहेतुत्वात् रा
जपदादिशक्तिग्रहाभावेसमुदायशक्तिग्रहस्याप्यभावान्नतेनान्वयबोध इतिभावः अ
वयवेति राजपदस्यराजसंबंधिनिलक्षणयैवेत्यर्थः समुदायेशक्तौ समुदायस्यवाक्यवि
शिष्टार्थेशक्तौ मानाभावादिति अनन्यलभ्योहिशब्दार्थ इतिन्यायादिति भावः ननुगौर
गांघोषइत्यत्रेवअजहत्स्वार्थैवा वलक्षणोपेयासातुनसंभवति राजपदस्यराजसंबंधिनि १६६

166A

लक्षणायां स्वार्थपरित्यागाभावादित्यत आह तदुक्तमिति यत्र रूढिः शक्तिर्विरोधिनी र
स्वार्थविषयकविशिष्टार्थबोधस्वरूपायोग्यात् तत्रैव जहत्स्वार्था न त्वत्र अन्यत्र त्वजहत्स्वा
र्था यथा गंगायां घोष इत्यत्र तीराधिकरणको घोष इत्येवान्वयबोध उपेयस्तत्र च प्रवाहस्य र
ताद्दशबोधविषयत्वाभावेन ताद्दशबोधस्वरूपायोग्यत्वमस्त्येवेति गंगापदस्येति गंगापदे जह
त्स्वार्था लक्षणा मञ्चाः क्रोशंतीत्यत्र तु मञ्चपदस्य मञ्चस्थपुरुषे लक्षणायां स्वस्वरूप र
स्वार्थस्यापि ताद्दशबोधविषयत्वादजहत्स्वार्थैव लक्षणा एवं च न केवलं जहत्स्वार्थैव लक्षणा
येन राजपदस्य राजसंबंधिनि लक्षणाकल्पने न स्यात् किं त्वजहत्स्वार्थापीति साप्यंगीकार्येति
तिभावः वस्तुतस्तु नन्वेवं पंकजमित्यादावपि समुदाये शक्तिर्न स्यात् अवयवलक्षणयैव र
पद्मत्वविशिष्टबोधोपपत्तेरित्यत आह तदुक्तमिति यत्र रूढिः प्रसिद्धिर्योगविरोधिनी तत्रै
व जहत्स्वार्था लक्षणा यथा कर्मणि कुशल इत्यादौ दक्षे रूढिः प्रसिद्धिः कुशान् लातीति कुश

त.प्र. शान्तत्वादानकर्तृयोगार्थस्य विरोधिनी इत्तेकुशादानकर्तृत्वबाधादिति कुशलपदस्य
१६७ विवेचकत्वरूपशक्यसंबंधसत्वादत्र लक्षणा बाधेन शक्त्या वयवार्थबोधाभावात् नचात्र
167 विवेचकत्वेन लक्षणायामजहत्स्वार्थत्वमितिवाच्यं यत्र स्वार्थस्य विशेष्यतया क्रियान्वये प्र
वेशः साऽजहत्स्वार्था यथा छत्रिणो यान्तीत्यादौ एवं च यष्टीः प्रवेशयेत्यत्रापि जहत्स्वार्थैव
प्रकृते च राजपुरुष इति समुदाय राजसंबंधिपुरुषे रूढिः प्रसिद्धिः राजाभिन्नपुरुषस्य यो
गार्थस्य विरोधिनीति तत्र जहत्स्वार्था लक्षणा स्वार्थस्य राज्ञो विशेष्यतया क्रियान्वयप्रवेशा
भावात् पंकजमित्यादौ तु पद्मस्य रूढ्यर्थस्य पंकजनिकर्तृत्वयोगार्थस्याविरोधात् अवय
वशक्त्यैव पंकजनिकर्तृबोधः पद्मत्वविशिष्टबोधार्थं च पंकजपदस्य पद्मत्वविशिष्टलक्षणाक
ल्पने तु शक्त्या पंकजनिकर्तृयोगार्थस्य लक्षणया पद्मत्वविशिष्टस्य बोधो वाच्यः तस्य च युग
पद्वृत्तिद्वयविरोधेनासंभवात् पंकजपदस्य पद्मत्वविशिष्टे शक्तिरावश्यकी तस्माद्युगपद्वृ १६७

167A

त्तिद्वयविरोधेन शक्त्यालक्षणया चबोधानुपपत्तेः पंकजपदे समुदायशक्तिरावश्यकी समा
सेतु नैवमिति अथवा पंकजमित्यत्रापि लक्षणयैवोपपत्तेः समुदायशक्तिर्न स्यादत आह न
इष्टमिति यत्र रूढिः समुदायशक्तिः योगविरोधिनी योगोवयवशक्तिस्तद्विरोधिनी तत्रै
वजहत्स्वार्था लक्षणा यथा मण्डपं भोजयेत्यत्र हि मंडपपदस्य गृहविशेषे रूढिः योगा
विरोधिनी रूढार्थगृहे मण्डपानकर्तृत्वासंभवात् तत्र च रूढेर्योगापहारिणीतिप्रवादात्
अवयवशक्त्या मण्डपानकर्तुर्बोधासंभवात् मण्डपपदस्य मण्डपानकर्तरि लक्षणा इत्थं
च रूढार्थगृहसंबंधितावच्छेदकतया गृहीतचैत्रत्वादिनान्वयबोधो न तु मण्डपानकर्तृत्वे
न पंकजमित्यादौ तु रूढार्थस्य पंकजनिकर्तुश्च योगार्थस्याविरोधादवयवशक्त्यैव बोधः पद्म
त्वविशिष्टस्य लक्षणयावबोधोपगमे युगपद्वृत्तिद्वयविरोधात् पंकजपदे समुदायशक्तिरावश्य
की राजपुरुष इत्यत्र तु राजसंबंधिपुरुषे राजाभिन्नपुरुषस्यावयवार्थस्य विरोधादवयवश

त.प्र. ज्ञानद्वैधाभावेन युगपद्वृत्तिद्वयविरोधाभावाल्लक्षणयैव स्वार्थस्यावयवार्थस्य त्यागाज्ज
१६८ हत्स्वार्थत्वोक्तिरिति सारं स्वोक्तसमासेऽवयवजातलक्षणाकल्पे उपष्टंभकमाह तदुक्तमिति य
थेति यथानुमानसमुदायार्थोऽवयवार्थविरुद्धस्तत्र पदे जहत्स्वार्था लक्षणेति समुदायार्थ इत्य
168 पि कश्चित् एतन्मते त्वजहत्स्वार्थत्वेनान्वयविनाऽगतिरिति ध्येयं अजहत्स्वार्थामत्रैवयवरू
ढिविरोधिनी निकाचित्याव: यत्र लक्षणा रूढिविरोधिनी शक्तिविरोधिनी तत्राजहत्स्वार्था लक्ष
णायामंगीकृतायां शक्यासहान्वयबोधस्तत्र न अजहत्स्वार्थलक्षणेति यावत् यथा पंकजमि
त्यत्र पद्मत्वेन लक्षणायां पंकजनिकर्तृत्वेन शक्यबोधे युगपद्वृत्तिद्वयविरोधप्रसंगात् न तत्र
लक्षणा किंतु समुदाये शक्तिः राजपुरुषादन्यत्र तु संबंधिलक्षणायां न तथेति तत्र समासे
शक्तिरिति ध्येयं उपसंहरति तस्मादिति अन्यथेति अवयवलक्षणयैवोपपन्नावित्यर्थः
अनन्यलभ्यस्यैव शब्दार्थत्वात् अन्यथा गंगापदस्यापि तीरे शक्त्यापत्त्या लक्षणोच्छेदापत्ते १६८

168A

रितिभावः ननु चित्रगुरित्यादौ चित्रगोस्वामीत्यन्वयोऽनुभवसिद्धस्तस्य चावयवशक्त्या लक्
षणया चोपपन्नभावाद्वाक्यशक्तिरावश्यकीति कथं न समासे शक्तिरावश्यकी आशंकते स्यादेत
तदिति बहुव्रीहौ तु चित्रगुरित्यादिबहुव्रीहौ तु नन्वत्राप्यवयवलक्षणयैवोपपत्तौ न शक्तिः
कल्पनीयेत्यत आह नहीति लक्षणया- अवयवलक्षणया निर्वाहः विशिष्टार्थबोधः अ
निर्वाहमेवोपपादयति तथाहीति नहीति गोपदस्य गोस्वामिलक्षकत्वे चित्रपदार्थस्य गव्य
न्वयो वाच्यः स च न संभवति पदार्थैकदेशत्वादिति भावः चित्रस्य चित्रपदार्थस्य चित्रत्व
विशिष्टस्य गवान्वयः गवि अन्वयः गवेति तृतीयान्तेन वा गवा सहेत्यर्थः संभवतीति चित्र
पदार्थस्य चित्रस्याभेदेनान्वयो गवि अन्वयो न संभवतीत्यर्थः तस्य गोः न च तच्छब्दस्या
व्यवहितपूर्वोपस्थितमुख्यविशेष्यपरामर्शकतया गवान्वयोपसर्जनतया कल्पिततच्छब्देन
गोः परामर्श इति वाच्यं तच्छब्दस्याव्यवहितपूर्वोपस्थितमात्रपरामर्शकतया तात्पर्यबलाद्

त॰प्र॰ न्वयोपसर्ज्जनस्यापि गोर्वोधने बाधकाभावात् गवेति तृतीयांतत्वे दोषासंस्पर्शाच्च पदार्थैकदे
१६८ शत्वात् गोस्वामिरूपपदार्थैकदेशत्वात् गोर्नित्यत्वन्यग्गोत्वे नित्यत्वान्वयवारणाय पदार्थः ए
पदार्थेनान्वेति न तु पदार्थैकदेशेनेति व्युत्पत्त्यंशे गोकारस्यावश्यकत्वादिति भावः केचित्तु चि
169 त्रविशेषणतयोपस्थितस्य चित्रत्वस्येत्यर्थः चित्रपदस्योभयत्रप्रयोगात् तस्य चित्रत्वस्य
पदार्थैकदेशत्वात् चित्रपदार्थैकदेशत्वात् एकविशेषणतयोपस्थितस्यान्यत्र विशेषणत्वे
नान्वये निराकांक्षत्वादिति भावः (पदद्वयेति चित्रपदे गोपदे चेत्यर्थः ननूभयत्र लक्षणा
यां गौरव(ं) इत्याह तत्र एवमपि चित्रस्य गवि अभेदान्वये बाधकानुक्तेः अत एवेति चि
त्रस्य गवान्वयासंभवादेवेत्यर्थः गवान्वयेति चित्रपदस्य चित्रस्वाम्यर्थकत्वे पदार्थैकदे
शतया चित्रेन गोरन्वयः नापि चित्रस्वामिनि नामार्थयोरभेदेनैव व्युत्पत्तेरिति भावः
पदद्वयइति चित्रपदे गोपदे चेत्यर्थः ननूभयत्र लक्षणायां गौरवात्तदपेक्षया समुदाय १६८

169A

शक्तिरेवास्तामित्यत आह नत्विति अन्येति अनन्यलभ्यस्यैव शब्दार्थत्वेनोभयत्र लक्षणा
यां गौरवस्याप्रामाणिकत्वादिति भावः पदद्वये लक्षणाकल्पनेन्यतरपदवैयर्थ्याद्वाक्य एव ल
क्षणा वादिमीमांसकमतमाह मीमांसकास्त्विति समुदाय एव चित्रगुरित्यादिवाक्य ए
व लक्षणा चित्रगोस्वामिनि लक्षणा समुदायस्य वाक्यस्य शक्त्यभावादिति वाक्यस्य कु
त्रचिदंशे शक्त्यभावात् स्वशक्यसंबंधरूपलक्षणा दुर्वचेत्यर्थः स्वबोध्यस्येति गंगाप
दबोध्यस्य प्रवाहस्य संबंधस्तीरेस्तीति तत्र तत्संभवमुपपन्नं परंतु शक्यत्वेन न तत्संबंधः
किंतु बोध्यत्वेनेति भेदः अत्र चित्रगुरित्यत्र बहुव्रीहावित्यर्थः वाक्यस्यापि चित्रगुरिति
वाक्यस्यापि विशिष्टबोध्यमिति एकदेशविकृतमनन्यवद्भवतीति न्यायेन चित्रगुरि
त्यत्र चित्रा गौरिति वाक्यसत्त्वात् तस्य च बोध्यं चित्रा गौस्तत्संबंधश्चित्रगोस्वामिन्यस्तीति
भावः शक्यसंबंधस्य लक्षणात्वे दूषणं दर्शयन् स्वबोध्यसंबंधस्यैव लक्षणात्वमुपप

त॰प्र॰ वपादयति अन्वयेति वाक्ये लक्षणाया अङ्गीकारे ऽयमर्थः कागतिः कथमन्वयबोधः
१७० तस्यैवोपपादयति नहीति गभीरायामिति नदीपदस्य तीरलक्षकत्वे गभीरायामित्यस्य
तीरेऽन्वयो वाच्यः स च न संभवतीत्यर्थः अनन्वयमेवाह नहितीरमिति नदीपदस्य नदी
170 तीरत्वेन तीरत्वेन वा लक्षणायां गभीरस्य पदार्थैकदेशतया नद्यामन्वयासंभवात् तीरे च
विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्थले ऽभेदान्वयस्यैव व्युत्पन्नतया
भेदेनान्वयासंभवादभेदेनैवान्वयो वाच्यः स तु न संभवति बाधादिति भावः नद्यामित्य
स्येति गभीरपदस्य गभीरसंबंधितीरत्वेन तीरत्वेन वा लक्षणायां नद्याः पदार्थैकदेशत
या गभीरेऽन्वयासंभवात्तीरे च समानविभक्तिकस्थले भेदेनान्वयस्याव्युत्पन्नतयाऽभेदेनै
वान्वयो वाच्यः स तु न संभवति बाधादिति भावः अनन्वयमेवाह नहितीरं नदीति उपसंह
रति तस्मादिति अनन्वयेति शक्त्या लक्षणया वा विशिष्टार्थबोधस्यानुपपत्त्या वाक्यमेव ग १७०

170A

गभीरायां नद्यामिति वाक्यमेव लक्षकमिति पंकजपदेऽनायत्त्या वाक्ये शक्तिस्वीकारे व्य-
न्यलभ्यत्वादत्र लक्षणैव एकत्र वाक्ये शक्तिकल्पनादन्यत्रापि तत्कल्पने च गंगापदस्य प्रवाहे
शक्तेः लक्षणात्वेन तीरेपि शक्तिकल्पनापत्त्या लक्षणोच्छेदापत्तेरतः स्वबोध्यसंबंधस्य लक्षणात्वमु-
पगम्यैवारीतिः वाक्यमिति चित्रगुरित्यादिवाक्यमित्यर्थः न विशिष्टार्थेति चित्राभिन्नागोर-
रित्यादिविशिष्टार्थबोधकमेवेत्यर्थः तद्बोधकतेति विशिष्टार्थबोधकतावच्छेदकेत्यर्थः तत्स-
त्त्वे च किं लक्षणयेति भावः अतद्दति शक्तेरभावात् दिति अर्थस्मृत्यंव च इत्यर्थः अपभ्रं-
शेपि शक्तिभ्रमेण स्वबोध्यसत्त्वात्तत्रापि लक्षणापत्तिः तथा च वदन्ति मतस्यैव पदसाधुत्वस्तपत्वेन
यत्नेपि प्रयोगापत्तिः साधुत्वेव प्रयुंजीतेत्यनेन विरोधादतः स्वबोध्यसंबंधो लक्षणेत्यवाच्यं
नैवेत ह्यकेस्संभवतीति भावः ननु वाक्ये समुदायत्वेन शक्त्यभावेपि प्रत्येकपदशक्त्या स्वबोध्य-
त्वमस्त्येव गभीरपदसमभिव्याहृतनदीशक्तत्वमेव विशिष्टबोधकतावच्छेदकं अपभ्रंशे

त०प्र० नुनैवमित्यस्वरसादाह किंचेति स्वबोध्येत्यत्र स्वबोधकमात्रविवक्षणे गंगायां घोष इत्य
१७१ त्र गंगायामिति समुदायस्यापि लाक्षणिकत्वापत्तिरत स्तत्वेन बोधकत्वं विवक्षणीयं तथा सर
171 त्याह गभीरायामिति तीरे गभीरनदीतीरे तदाधारतेति तीराधारतेत्यर्थः विभक्तेः प्रत्या
यिकायाः अभावेनाधारत्वबोधाभावादिति भावः विभक्तिशून्यभागस्यापि न लक्षणेत्याह नापीति
सप्तमीशून्यभागस्येत्यर्थः इदं तु सप्तम्या एव बोधकत्वान्नाधारताप्रत्ययानुपपत्तिरिति भावः तस्य
गभीरायां नदीति भागस्य त्वबोधकत्वादिति समानविभक्तिकपदस्यैवाभेदान्वयबोधकतया विभ
क्तिशून्यभागस्याभेदान्वयबोधकत्वाभावादिति भावः तथा च स्वबोध्यसंबंधरूपा लक्षणापि नात्र
संभवतीति ध्येयं यद्यपि पदानां स्वस्वान्वयबोधकत्वेन समूहत्वेन नैवेतरपदावच्छिन्नेतरपदत्वेन
स्वरूपयोग्यतेति विभक्त्यन्तभागस्य लक्षकत्वेऽप्यदोषः तथापीतरपदावच्छिन्नेतरपदे फलोपर
धानरूपं बोधकत्वं संभवत्येव गभीराभिन्ना नदीति शाब्दबोधे समानविभक्तिकगभीरपदस्य १७१

171A

मभिव्याप्तनदीपदस्यानन्वेनानुपूर्वीस्थानस्य कारणत्वादिति सर्वं अनार्ये दोषइतिध्येयं नन्वभेदा
न्वयेन समानविभक्तिकत्वेनं त्रैस्तोकं पचतीत्यत्र व्यभिचारात् किंतु विरुद्धविभक्तिराहित्यमेव तच्च
विभक्तिमत्त्वभोगप्यस्तीत्यत आह वोधकत्वेवेति लक्ष्ये नीरूपलस्यार्थे विभक्त्यर्थेति आधार
त्वान न्वयापत्तेरित्यर्थः अनन्वयमेवाह प्रथयानामिति यथा घटमित्यत्र घटीया कर्मेतेतिघट
रूपप्रकृत्यर्थान्वितकर्मत्वरूपस्वार्थप्रतिपादकत्वमस्ति भक्तेः नचधववदिरोहिं धीत्यादौ द्वितीया
र्थकर्मत्वस्या प्रकृत्यर्थधवान्वितत्वात्कथमेतदिति वाच्यं याध शासमुदायोत्त रं विभक्तिस्तस्यैव प्रकृति
त्वे नथवस्यापि प्रकृत्यर्थत्वात् समागाः गभीरायां नदीतिविशिष्टवाक्यात्मकभागाः प्रकृतिरिति नदी
पदोत्तरविभक्तेः श्रूयमाणतया नदीपदमेव प्रकृतिस्तदर्थस्य भवत्यनेन विशिष्ट नदीती रं विशिष्टवाक्यो
त्तरं चाक्यापि विभक्तेरधष्टत्वेन न वाक्यस्य प्रकृतित्वमिति भावः ननु डित्यकपित्यसमुदाय वत् गभीरा
यां नदीति वाक्योत्तरमेव विभक्तिरितितस्यापि प्रकृतित्वमास्तामित्यत आह गभीरायामितीति गभी
रायां नदीति वाक्योत्तरमेव यदि विभक्तिस्तदा सुपो धातुप्रातिपदिकयोः एतयोरवयवस्य सुपो लुक्स्या

त॰ प्र॰ दित्यनेन गभीरायामिति सप्तम्या लुक् स्यादिति गभीरायां नद्यामिति न स्यात् किंतु गभीरनद्यामिति स्या
१७२ दित्यर्थः वस्तुतस्तु ननु नीलं घटमानयेत्यत्र विशिष्टैकार्थत्वान्वयो न स्यान्नीलस्याप्रकृत्यर्थत्वादित्यत
आह गभीरायामितीति विशेषणवाचकपदस्य विशेष्यवाचकपदसमानवचनत्वानुरोधेन गभीराया
172 मिति सप्तमी भवन्मते च नदीपदस्य विशेष्यवाचकपदत्वाभावाद्गभीरायामित्यस्य विशेषणवाचक
पदत्वाभावाच्च गभीरायामिति सप्तमी न स्यादित्यर्थ इति सारं नदीपदोत्तरसप्तमी न एवं लब्ध्यर्थिन्याधा
रत्वान्वयसम्भवे गभीरायामित्यत्र विभक्त्यर्थान्वयासंभवादिति भाव इत्यपि केचित् तन्न वक्ष्यमाण
त्वमतेपि तद्द्वैयर्थ्यसत्त्वात् अर्थेति गभीरायां नद्यामिति विभक्त्यंतभागद्वैयर्थ्येत्यर्थः विभक्त्यंतस्य ना
मत्वाभावेन नामार्थयोरित्युत्पत्त्यनवकाशाद्भेदेनैव बोधितद्यर्थान्वय इति भावः अशक्तत्वादिति
गंगायामिति समुदायस्यापि लाक्षणिकत्वापत्त्या तत्त्वेन बोधकत्वं वाच्यम् एवमपभ्रंशवारणाय शक्ते
र्यावश्यकं इत्थं च शक्त्यवच्छिन्नायानत्वावच्छिन्नबोधकता तस्या एव निवेशात् वाक्यत्वेन बोध
कतायां च शक्तेरनवच्छेदकता न्नवाक्ये लक्षणासंभवः वस्तुतस्तु अपभ्रंशवारणाय शक्त्यास्व १७२

172A

बोध्यत्वस्यावश्यकतया वाक्येनशक्तिरित्याह वाक्यमित्यादि नन्वपभ्रंशस्यापि लक्षकत्वे इष्टापत्तिः इ
ष्टापत्तिमत्त्वमेवपदसाधुत्वमित्यत्र च शक्यसंबंधरूपलक्षणाया एव इष्टापत्तिमत्त्वघटकतया तत्त्वेष्टापत्तिमत्त्वरूपसा
धुत्वाभावात् प्रमाधीनस्वबोध्यस्यसंबंधो लक्षणेत्यस्य वा न लक्षणात्वेनापभ्रंशस्य प्रमाधीनबोध्यता
भावात्तानुपपत्तिरित्यस्वरसात्तत्वेन बोधकत्वावश्यकत्वमित्यभिप्रेत्य दोषमाह किंचेति अशक्यत्वा
दिति स्वबोध्यत्वं हि न स्वजन्यबोधविषयत्वं समवायेन घटपदस्यापि गगनादेः संबंधसत्त्वात्तदुपा
स्थितस्य शाब्दबोधापत्तेः तेन गंगापदेन प्रवाहशाब्दबोधाजननात् तस्माच्छक्त्या स्वजन्यबोधविष
यत्वमेव तत्त्वं वाच्यं तच्च शक्यसंबंधस्य लक्षणात्वापेक्षया गुरुतरं वाच्ये शक्त्यभावात् प्रकृते चासम्भवीति
भावः उपसंहरति तस्मादिति वाक्ये लक्षणाया असंभवादित्यर्थः पदद्वयएव गभीरपदे नदीपदे
च विनिगमकेति एकपदत्वाति नीयुक्तिर्हि विनिगमनातस्या अभावादित्यर्थः विशिष्टेति वि
शिष्टा गभीरायानदीस्तस्यास्तीर इत्यर्थः नन्वेकस्यैव लक्षणाया विशिष्टार्थबोधसम्भवे ऽपरपदव्य
र्थमित्याह नचेति एकपदवैयर्थ्यं न चेत्यन्वयः परस्परेति नदीपदेन गभीरनदीतीरबोधजन

न॰प्र॰ नीये गभीरपदस्य समभिव्याहारो नियामकः गभीरपदे न वा तात्पर्यबोधजननीये नदीपदसमभिव्या-
१७२ हारो नियामक इत्यर्थः तत्पार्थबोधेतात्पर्यज्ञानस्य हेतुतया नदीपदं गभीरनदीतीरप्रतीतीच्छ-
योच्चरितमिति तात्पर्यज्ञानं गभीरपदसमभिव्याहारादेव भवति अन्यथा केवलेन नद्यामित्युक्तौ गभीर
173 नदीतीरबोधापत्तिरिति भावः एकत्रैव पदे यदा लक्षणाप्रतिसंधानं तदा तत्पदस्यैव लक्षणा यदा तूभ-
यपदे लक्षणाप्रतिसंधानं तदोभयपदलक्षणैव शाब्दबोधप्रयोजिका संभेदेनान्यतरवैयर्थ्यमिति न्या-
येन चैकमेव विशिष्टतीरं बुद्ध्यत इति द्रष्टव्यम् अत्रेदं बोध्यं गभीरनद्योरन्वयबोधोत्तरं गभीरनदीसं-
बंधस्य महान्नदीपदेन विशिष्टं तीरं लक्ष्यते अन्यथा नदीसंबंधमात्रस्य हि विशिष्टतीरबोधानापत्तेः इत्थं च
स्वशक्तिज्ञाप्यसंबंधो लक्षणा सा च पदस्यैव न वाक्ये ऽक्लृप्तत्वात् वाक्ये लक्षणावादिमते पि प्रत्येकं पद-
द्वये विनिगमकाभावात् लक्षणायागुरुत्वाच्च नचैवं नीलं द्विरेफमानयेत्यत्र विशिष्टसंबंधिनि
लक्षणानुपपत्तिः पदद्वयस्यापि लाक्षणिकतया ऽननुभावकत्वेन स्वज्ञाप्याप्रसिद्धेरिति वाक्यलक्ष-
णावादिना सह तुल्यत्वमिति वाच्यं लाक्षणिकस्याप्यनुभावकत्वांगीकारात् वस्तुतस्तु शक्यसंबंध १७२

173A

एवलक्षणा नदीपदस्य नद्याद्यगभीरनद्यामपि शक्यत्वात् गभीरपदस्य तात्पर्यग्राहकतया च
गभीराभिन्ना नदीति ज्ञानस्य वाक्यार्थबोधं विनापि गभीरनदीतीरलाभसम्भवइति दिक् संप्रदाय
इत्यनेनास्वरसः सूचितः सच गभीरपदस्य गभीरत्वशक्ततया तस्य स्वाश्रयाभिन्ननदीसंबंध एव
तीरे वाच्यइति परम्परासंबंधे गौरवात् साक्षात्संबन्धसंभवान्नदीपद एवलक्षणा युक्ता यदि च श्वे
तादिपदवद्गुणिन्यपि शक्तिः नीलादिपदवत् केवलं गुणमात्रे गभीरपदाप्रयोगादिति विभाव्यते
तथापि शुक्लादिपदानां गुणमात्रवाचकत्वेन शुक्लायां नद्यां घोष इत्यादौ साक्षात्संबंधसम्भवाद्वि
शेष्यवाचकपद एव लक्षणायाः क्लृप्तत्वेनासर्वत्रोत्तरपद एव लक्षणा एवं चित्रगुरित्यत्रापि गोपद ए
व सा तथा च सर्वत्रोत्तरपद एव सा न तथा च सर्वत्र पूर्वपद एवक्कुत्रैलक्षणेति केचित्तु गभीरपदे ल
क्षणायां नदीपदोत्तरसप्तम्या अन्वयो न स्यात् विशेषणविभक्तेः प्रयोगसाधुत्वादिति विशेष्यवा
चकपद एव लक्षणा न च विशेष्यवाचकपदोत्तरविभक्तेरेवाशब्दसाधुत्वमास्तामिति वाच्यं विशे
षणविभक्तित्वेन सामान्यतः प्रयोगसाधुत्वकल्पनादित्याहुः तदसत् लाक्षणिकार्थानुभा

न·प्र· वकगभीरपदस्य विशेषणपदत्वाभावेन गभीरपदोत्तरसप्तम्या एवान्वयसंभवादिति अपरे तु
१७४ प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमुत्सर्गेऽनंतरपदस्यैव लक्षणा अव्यवहितपूर्ववर्त्तिन एव
174 प्रकृतित्वात् अन्यथा राजपुरुषमानयेत्यत्र राजानमानयेत्यपि बोधापत्तेः न चैवं सर्वप्रधाने द्वं
द्वे पूर्वप्रधानेऽव्ययीभावेऽघटं भूतलमित्यत्र बहुव्रीहौ नञ्समासे द्वेऽपि पचतीत्यादि तत्पुरुषे च
विभक्त्यर्थान्वयानुपपत्तिरिति वाच्यं तदतिरिक्तस्थल एव तन्नियमादित्याहुः ननु चित्रगुरित्यत्र
चित्रपदं चित्रगोसम्बन्धिपरं गोपदं च स्वामिपरं चित्रगोसंबंधिनश्च तादात्म्येन गोपदार्थे स्वामि
न्यन्वय इति सर्वपदानामेव सार्थक्ये किमिति परस्य तात्पर्यग्राहकत्वं एवमारूढवानर इत्य
त्र धातोर्वानरारोहणे क्तप्रत्ययस्य कर्मत्वे वानरपदस्याश्रये लक्षणा वानरारोहणकर्मत्वाश्रय
इति बोधः चैत्रदत्तधन इत्यत्र चैत्रपदस्य चैत्रके दाधातोर्धनदाने क्तप्रत्ययस्य सम्प्रदानत्वे ध
नपदस्याश्रये लक्षणा चैत्रकर्तृकसम्प्रदानत्वाश्रय इति बोधः अथवा वानरपदस्य वानरकर्तृ
कमर्थः तस्य च धात्वर्थे आरोहणेऽभेदेनान्वयः क्तप्रत्ययः कर्मपरः एवं धनपदस्य धनकर्मक

174A

मर्थः तस्यचचैत्रकर्तृकदानेऽन्वयः ऊप्रत्ययस्यसम्प्रदानमर्थः एवंगभीरायांनद्यामित्यत्रगभी
रपदंगभीरनदीसंबंधिपरंनदीपदंचतीरपरमित्यतआह विस्तरस्त्विति चित्रगुपदाच्चित्रगोस्वा
मीत्येवानुभवान्नायंप्रकारःसाधुः एवंशोभनचित्रगुरितित्रिपदबहुव्रीहौचित्रपदस्यचित्रगो
संबंधिपरतायांपदार्थैकदेशतयागविशोभनान्वयानुपपत्तेरगत्याचित्रपदस्यशोभनचित्रगो
संबंधिपरता शोभनपदंचतात्पर्यग्राहकमितिरीतिंविनानवाप्यगतेश्चेति केचित्तु चित्रपद
स्यचित्रस्वामीगोपदस्यगोस्वामीत्यर्थः व्यक्तिवचनानांसन्निहितविशेषपरत्वमितिन्यायेनच
चित्रत्वेनगोत्वेनचैकव्यक्तिर्बुध्यते आरूढवानरइत्यत्रक्तप्रत्ययस्यकर्तृसंबंधिवानरपदस्यवान
रसंबंधीत्यर्थः एकदेशेपिकृतावारोहणस्यान्वयःपक्षेत्यत्रेवेत्याहुः तदपिचित्रगोस्वामीत्यनु
भवापलापादुपेक्षणीयं अन्येतुगोपदंगोस्वामिलक्षकंगविचचित्रस्याभेदेनान्वयएकदेशिविधु
त्यत्तिविधिविशेषणान्वयस्वीकारादित्याहुः परेतुगोपदेनप्राक्तनगोःलक्षणयाचस्वामीबोध्यते युग

पद्वृत्तिद्वयविरोधस्यानंगीकारात् पंकजपदस्यपद्मत्वविशिष्टे लक्षणानंगीकारस्तु समुदायेशक्त
त्वव्यवहारस्याप्रामाणिकत्वात् अन्यथातत्रापीष्टापत्तिरितिवदन्ति अत्रेदंबोध्यं गोपदस्यचित्रगोर
स्वामिपरतायांसम्बंधितावच्छेदकतयागृहीतचैत्रत्वादिनाचित्रगोसंबंधित्वेनैवभानं तीरत्वव
त् गंगासंबंधितीरत्ववत्त्वा आरूढवानरोवृक्षइत्यत्र आरूढोवानरोयमितिवाक्ये आङ्पूर्वकरुह
धातोरूर्द्धदेशावच्छिन्नसंयोगानुकूलक्रिया क्तप्रत्ययस्याश्रयः द्वितीयायाआधेयत्वमर्थः वृ
त्तऊर्द्धदेशावच्छिन्नसंयोगानुकूलक्रियाश्रयोवानरइत्यन्वयबोधः समासेत्वारोहणकर्तृवा
नरसंबंधीवृक्षइत्यन्वयधीः संबंधःस्वकर्तृकारोहणकर्मत्वं एवंचैत्रदत्तधनइत्यत्रचैत्रेणदत्तंधनं
यस्मैइति वाक्येचैत्रकर्तृकयत्संप्रदानकदानकर्मधनमित्यन्वयबोधः समासेतुचैत्रकर्तृकदानर
कर्मधनसंबंधीत्यन्वयबोधः संबंधःस्वकर्मकदानसंप्रदानत्वमिति अत्रचसमानाधिकरणब
हुव्रीहिः चक्रपाणिरित्यादौतुव्यधिकरणबहुव्रीहिः चक्रंपाणौयस्येति विग्रहवाक्येयत्संबंधिपार

175A

णिवृत्तिचक्रमित्यन्वयधीः समासे तु चक्रयुक्तपाणिसंबंधीति बोधः सच तद्गुणसंविज्ञानबहुव्री
हिः अतद्गुणसंविज्ञानबहुव्रीहिश्चेति द्वेधा भूवादयो धातवः चैत्रादीन् भोजय लम्बकर्णमानयेत्या
दावाद्यः अन्यस्तु चित्रगुरित्यादौ तथाहि भूवादय इत्यादौ क्रियावाचित्वेन निमंत्रितत्वेन लम्बक
र्णविषयविनोर्यः संबंधस्तदवच्छिन्नत्वेन न चान्वयबोधः लक्षकसंबंधस्यैव लक्ष्यतावच्छेदकत्वात्ते
नैव रूपेण बोधात् विशेषणस्यापि भूवादेः क्रियान्वयात् अजहत्स्वार्था लक्षणा तस्य समस्यमान
पदार्थस्य गुणीभूतस्यापि सम्यग्विशेष्यविधया ज्ञानं यस्मादिति व्युत्पत्तेरिति सम्प्रदायः नव्यास्त्वा
हुः यदि लम्बकर्णेत्यादौ अजहत्स्वार्था लक्षणा तदा लम्बकर्णस्यापि विशेष्यत्वेनैवान्वयेऽनुभवबा
धः तस्मादत्रापि जहत्स्वार्थैव विशेष्यत्वेन विधेयान्वये स्वार्थत्यागात् यत्र विशेषणतया स्वार्थ
स्य विधेयान्वयः स तद्गुणसंविज्ञानबहुव्रीहिः उपलक्षणतया यत्र स्वार्थस्य विधेयान्वयः स अतद्गु
णसंविज्ञानबहुव्रीहिः विशेष्यान्वयिनान्वयित्वमेव विशेषणत्वं यद्यपि लम्बकर्णेत्यादौ लम्बक

त॰ प्र॰ णीसंबंधित्वेनोपस्थितिः चित्रगुरित्यादौ चित्रगोसंबंधित्वेनोपस्थितिस्तुल्यैव तथापि लम्बकर्णा
१७६ देर्विशेष्यान्वयिनाऽन्वयात् विशेषणतयाविधेयान्वयः चित्रगोस्तूपलक्षणतयातथेति सं
176 त्रप्राकृतस्याभाव्यमेवतंत्रमिति केचित्तु भूतादिःप्रथमःपठितोयेषामितिविग्रहवाक्याद्भूताभिन्नः
प्रथमपठितोयत्संबंधीतिबोधः समासात्तुभूताभिन्नप्रथमपठितसंबंधीतिबोधः एवंचैत्राद्यादिः
प्रधानोयेषामितिविग्रहवाक्याच्चैत्राभिन्नःप्रधानोयत्संबंधीतिबोधः समासात्तुचैत्राभिन्नप्र
धानसंबंधीत्यन्वयबोधः संबंधश्चस्वपाठप्राथम्यावधित्वं स्वनिष्ठप्राधान्यावधित्वंच अत्र
भूताभिन्नप्रथमपठितसंबंधित्वचैत्राभिन्नप्रधानसंबंधित्वादिनादिशब्दस्यलक्षणा लक्ष्यताव
च्छेदकस्यापिभूतादेर्विशेष्यान्वयिधानुभवादिनान्वयानुपपत्तेर्लक्षणायाश्चजहत्स्वार्थत्वंचेर
त्याहुः अपरेतुलम्बकर्णेत्यादौविशेष्यतयाऽन्वयाननुभवादस्तुजहत्स्वार्था भूतादयइत्यत्र
नुगणपठितत्वनिमंत्रितत्वादिनैवबोधः शकलस्ययोर्विधेयान्वयानुभवात् काकेभ्योदधि १७६

176A

रथ्यन्तामित्यत्रैव शक्यलक्ष्ययोर्विशेष्यान्वयस्यान्वयमात्रादिवलम्बकर्णीभूतादिसाधारणं तद्गुणत्वा
दिकमित्याहुः आदिशब्देन गणपतितत्वनिमन्त्रितत्वादिना लक्षणाभू चैत्रादिपदं तात्पर्यग्राहकमित्य
न्ये भूतत्ववान्त्वादिना चैत्रत्वमैत्रत्वादिनानानारूपेण शक्यलक्षणायाः स्वीकारान्नदोष इत्यपरे चैत्रश
ब्देन शक्यतावच्छेदकेनादिशब्देन च लक्षणया मैत्रत्वादिना बोधः चैत्रपदार्थादिपदार्थयोरभेदेनान्व
यबोधस्याप्रितात्पर्यविषयत्वात् द्वन्द्वे चाभेदान्वयाभावान्न द्वन्द्वानापत्तिरित्यपि केचिदिति हृतंय
त्नवितेन अव्ययीभावसमासेपि शक्त्यभावमुपपादयति उपकुम्भमिति उपकुम्भमित्यव्ययीभा
वः अर्द्धपिप्पलीति तत्पुरुषः उपशब्दे निपातेष्वंशे तस्य साकाङ्क्षत्वाभावात् कुम्भस्योपेति नात्र
विग्रहः किन्तु कुम्भस्य समीपमिति उपकुम्भमिति द्रष्टव्यं उत्तरपदेति कुम्भपदस्य कुम्भसंबं
धिनि पिप्पलीपदस्य पिप्पलीसंबंधिनि लक्षणा तस्य चोपपदार्थे समीपादावभेदेनान्वयः व
स्तुतस्तु उपपदार्थः सामीप्यं न तु समीपः तथा चोपपदस्यापि समीपाद्यर्थे लक्षणा एकदेशे

न.प्र.
१७७
177

च सामीप्ये कुम्भादिसंबंधिनस्तादात्म्येनान्वय इति पदद्वयलक्षणापेक्षया कुम्भपदस्यैव कुम्भस
मीपपरता उपपदं च तात्पर्यग्राहकमिति केचित्तु चंद्र इव मुखमित्यादौ इवार्थसादृश्यस्याभेदेन मु
खेन्वयेनायनिपातातिरिक्तस्य लक्षणा नामार्थयोर्भेदेनान्वयबोधानंगीकारात् उपपदार्थसामी
प्ये कुम्भस्यान्वयबोधसम्भवात् संबंधप्रकारकानुभवानुरोधेन परं कुम्भपदस्य कुम्भसंबं
धे लक्षणा अनुभवानुरोधेन त्वत्राप्युत्तरपदे न लक्षणेत्याहुः अन्येति उत्तरपदलक्षणादिनाऽ
लभ्यत्वादित्यर्थः अनन्यलभ्यस्यैव शब्दार्थत्वादिति भावः एवं निर्मक्षिकमित्यव्ययीभावेऽप्युत्त
रपदे मक्षिकाभावे लक्षणा पूर्वपदं तात्पर्यग्राहकमिति ध्येयम् समाहारद्वन्द्वेतरेतरद्वन्द्वभेदे
न द्वन्द्वो द्विधा तत्र समाहारद्वन्द्वः पाणिपादमित्यादौ पाणिपदस्य पाणिपादप्रतियोगिकसमाहारे
शक्तिरिति मतं दूषयति समाहारेति पाणिपदस्य पाणिप्रतियोगिके पादपदस्य च पादप्रति
योगिकसमाहारे पदद्वय एव लक्षणा पाणिप्रतियोगिकाभिन्नपादप्रतियोगिकसमाहारं वाद १७७

177A

वैयक्त्यस्वप्रबोधः समाहारेचविभक्त्यर्थैकत्वान्वयः अतएवसमाहारस्यैकत्वादेकवचनमे
वेति उत्तरपदएव पाणिपादइतियौगिकसमाहारेलक्षणा पूर्वपदंतात्पर्यग्राहकमित्यप्याहुः
ननुसमाहारेशक्तिरनैन्यलभ्यत्वादित्याह नपाणीति समाहारंलक्षयति समाहारश्चेति क्रिया
धारूपवीतफलानुकूलसजातीयविजातीयव्यापारप्रचयस्तस्यैकरूपस्तुल्यसंबंधः समाहारः
यथापाणिपादंवादयेत्यत्रवादनक्रियायांतुल्यवदेवपाणिपादयोरन्वयः एवंधवखदिरौछिंधी
त्यत्रछिदानुकूलोयावान्व्यापारः सधवखदिरयोस्तुल्यएवभासते नन्वेकक्रियान्वयित्वस्य
वादनादिरूपैकक्रियान्वयरूपतयातस्यचसंबंधिभेदाद्भेदेनाननुगमइत्यतआह सेनेति यथा
सेनात्वंनाम नत्तदश्वादिविषयकज्ञानविषयत्वं एवंतत्तद्वृक्षादिविषयकज्ञानविषयत्वंवनत्वं न
यापेक्षाबुद्धिविशेषविषयत्वमेवसमाहारः अपेक्षाबुद्धेरव्यासज्यवृत्तेरपिविषयतयाव्यासज्यवृ
त्तित्वोपगमान्नाननुगमइतिभावः ननुसमाहारस्यसंबंधिभिन्नत्वेक्रियाजन्यफलशालित्वरूपक

त॰प्र॰ १७८ र्म्मत्वस्य क्रियायामसम्भवेन कथं पाणिपादमित्यत्र कर्मत्वविभक्तिरित्याशंकते नन्वेवमिति एवं

समाहारस्य तुल्यवदेकक्रियान्वयित्वस्वमते वस्तुतस्तु एवमित्यस्य पाणिपादसमाहारस्य कर्म

178 त्व इत्यर्थः अनन्वयः द्वितीयार्थकर्मत्वादेरनन्वयः अनन्वयमेवाह समाहारेति तु

ल्यवदेकक्रियान्वयित्वरूपे इत्यर्थः वादनेति वादनरूपक्रियाजन्यफलशालित्वरूपकर्मत्वस्य वादन ४

तत्राभावादित्यर्थः तथा च वादनकर्मत्वं पाणिपादयोरेव न तु समाहारे इति भावः परम्परयेति

स्वाश्रयप्रतियोगिकत्वपरम्परयेत्यर्थः तत्र समाहारे एकदेशेन साक्षात्संबंधेनानुभूयमान

कर्मत्वबोधस्य परम्परयोपपादनमेवास्वरसः सूचितः समाहार एवेति समाहारवाचकपदोत्तर

विभक्तीत्यर्थः समाहृयमाण एव समाहारप्रतियोगिन्येव एवकारेण न तु समाहारे साक्षात्संबं

धाभावादिति पूर्वं चास्वरसो दर्शितः ननु प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वनियमभङ्गप्रस

ङ्ग इत्यत आह व्युत्पत्तीति व्युत्पत्तिराकांक्षा तद्वैचित्र्यात् कार्यकारणभेदेन कार्यकारणभावस्य १७८

178A

भिन्नत्वाभ्युपगमे भिन्नएव कार्यकारणभावः कल्प्यते अनुभवानुरोधात् तादृशानुसन्धेश्चात्र संको
च इति भावः अत्र समाह्रियमाणयोर्द्वित्वाद्द्विवचनापत्तिः अन्ययानामिति व्युत्पत्ति संकोचश्चान्य
इत्यनेनास्वरसः सूचितः पाणिपादमित्यत्र पाणिपादसमाहारस्यानुभवसिद्धत्वाद्वा पाणिपादा
विति द्विवचनापत्तिर्भियावादितरेतरसमाहारसंज्ञानुरोधाद्वा पाणिपादसमाहारे लक्षणाकल्पनमि
ति तत्र दूषणत्रयमुद्धरन्नसमन्तमुपपादयति पाणिपादं वादयेत्यत्रेति पाणिपादमात्रेति मात्रप
दात्समाहारव्यवच्छेदः अनुभवसिद्धत्वात्समाहारे वृत्तिकल्पनं तदेवनानुभवस्यैवाभावादिति भावः
वैयाकरणप्राचीननैयायिकभेदेन शक्तिलक्षणयोरुपादानं ननुपाणिपादमित्यत्रसमाहारे वृत्त्यक
ल्पने पाणिपादयोर्द्वित्वात् पाणिपादावितिद्विवचनापत्तिः ममतु समाहारस्यैकत्वात्तत्र द्वित्वान्वया
संभवेन न तदापत्तिरित्यभिप्रेत्याह नचैवमिति एवं पाणिपादयोरेव प्रतीतावित्यर्थः असाधुत्वादि
ति व्याकरणव्युत्पन्नत्वादित्यर्थः प्राणितूर्यसेनाङ्गानामेकवद्भावो वक्तव्य इत्यादिसूत्रेण तत्रैक

ता॰प्र॰ वचनमेव विहितं यथा दाराणां बहुत्वाभावेपि बहुवचनमिति भावः ननु समाहारसंज्ञानुपपन्ना समाहारबोध
१७९ स्य न नञो नुद्देयेनान्वयार्थे संज्ञाया अभावात् समाहरणं समाहारोनेकस्यैकीकरणं एको धर्म्म
179 इति यावत् तद्बोधको द्वन्द्वः समाहारद्वन्द्व इति निर्दिशेत्यत आह इतरेतरसंज्ञा समाहारसंज्ञापि
त्यर्थः नदीति नदीसंज्ञावद्द्विसंज्ञा यथा पारमार्षिकीनया समाहारसंज्ञापीत्यन्वर्थसंज्ञाभा
वेपि न क्षतिरिति भावः स्वरूपेति धवखदिरस्वरूपद्वयप्रतीतेरित्यर्थः नलक्षणेति यद्य
पि शक्ते मुख्येनान्यशक्तिर्नवा लक्षणोप्येव लेखनमुचितं तथापि प्राचीननैयायिकमते स
माहारद्वन्द्वे लक्षणायाः प्रक्रान्तत्वेन सैवादौ निराकृतेति अत्रापीति इतरेतरयोगेपीत्यर्थः
अपि नासमाहारद्वन्द्वे समुच्चयः समाहारे साहित्ये लक्षणा अत्र तु साहित्याश्रय इति परं भेदः ध
वेति धवपदस्य खदिरपदस्य वा धवखदिरसाहित्याश्रये लक्षणा इतरपदं च तात्पर्यग्राहकं मी
मांसकमतन्याद्या कापि एव वा लक्षणा धवखदिरसाहित्याश्रयौ छिंधीत्यन्वयबोधः ननु कृतं साहित्य १७९

179A

लक्षणयेत्यत आहु तदाहुरिति एतत्सूत्रार्थो हि सर्वं वाक्यं सावधारणमिति न्यायेन साहित्येन गम्य-
मान एव द्विवचनबहुवचने भवतः द्वंद्वसमासोऽपि वाकारस्यार्थे द्वंद्वसमासस्य साहित्येन गम्यमान
एव भवतीत्यर्थः धवत्वेन खदिरत्वेन चोपस्थिते संख्यान्वये धवद्वयधीः खदिरद्वयधीश्च स्यात्
अन्वयितावच्छेदकव्याप्यसंख्याबोधकत्वाद्विभक्तीनां अन्यथा घटपटवृत्तिद्वित्वमादायैकस्मि
न्नपि घटे घटावित्यस्य प्रसंगः साहित्येलक्षणायां तु सहितत्वेनोपस्थिते द्वित्वान्वयः एवं चार्थे द्वं
द्व इति सूत्रे समुच्चयान्वाचययोः साहित्याननुगमात् द्विवचनबहुवचनापत्तिः न वा द्वंद्वसमा-
स इति द्वंद्वे साहित्यलक्षणां विना द्विवचनबहुवचनानुपपत्तिर्द्वंद्वसमासानुपपत्तिश्चेति तत्र लक्ष
णावश्यकीति भावः ननु समुच्चयान्वाचययोः कथं साहित्यबोध इत्यत आह साहित्यं चेति
एतेन साहित्यलक्षणायाः पुनर्वर्णितमसंगतमिति शंका निराकृता समुच्चयादिवारकत्वेन तत्संग
तेस्तुल्यवदित्यस्य व्यावृत्तिमाह अत एवेति तुल्यवदेकक्रियान्वयित्वस्य साहित्यरूपत्वादेवेत्यर्थः

त.प्र. ननु यजमानस्येव पत्न्या अपि यागादावन्वयात्साहित्यं दंपती रमत आह यागादाविति अनुमितेरि
१८० ति एवं कर्तृत्वाद्याहारे त्वर्थः तथा च यथा यजमानस्य क्रियायां कर्तृत्वेनान्वयो न तथा पत्न्याः अ
180 त्र पत्न्याः साहित्येन कर्तृत्वेन साहित्यं न विवक्षितं व्यापारसंबंधाभावात् यदा च प्रयोजकत्वमात्रेण त
योः संबंधो विवक्षितस्तदा भवत्येव साहित्यं यथा दंपत्योरित्यादि तथा च द्वंद्वे सहितत्वेन क्रियान्वयात्
यत्रान्योन्यसाहित्यान्वयपूर्वकमितरेतरं पदार्थान्वयस्तत्र समासः इतरेतरसमाहारयोस्तथान्वर
यात् समासः साधुः समुच्चये तु असंबद्धयोरेव एकैकशः क्रियान्वयो न तु साहित्याश्रयतया यथा
धवं छिंधि खदिरं च छिंधीति समुच्चये तुल्यवदसंबद्धयोः क्रियान्वयधीः एकरूपसजातीयविजाती
यव्यापारयोगित्वरूपं वा मिथः साहित्यं चादीनां द्योतकतया पदान्तरेणावगम्यते चादीनां वा
चकत्वेपि तुल्यवत्साहित्यान्वयाभावात् द्विवचनबहुवचनयोरेव साहित्यव्यञ्जकत्वादिति क्रिया
भेदे त्वन्वाचयः यथैधानाहर्त्तुं वनं व्रज गां कमप्यानेष्यसीति ननु धवं छिंधि खदिरमपि छिंधीत्य १८०

180A

त्रान्वाचयेऽव्याप्तिः क्रियाभेदाभावात् किंच घटं पश्य पटं चानयेत्यत्र समुच्चयेतिव्याप्तिः उभ
यत्रैव प्राधान्येन क्रियान्वये तात्पर्य्येण तस्य समुच्चयत्वात् एवमाहरणानयनयोः क्रिययोरभे
दादेधानाहर्तुमित्याद्यन्वाचयेऽव्याप्तिश्च निरूपकभेदेन क्रियाभेदोपपादने समुच्चयेऽति
व्याप्तिरिति चेन्न प्राधान्येन यत्र क्रियान्वये तात्पर्य्यं स समुच्चयः प्रधानगुणभावेन यत्र क्रियान्व
ये तात्पर्य्यं सोन्वाचयः सपुत्रको गच्छतीत्यादौ पुत्रस्यैकक्रियान्वयित्वेपि विशेषणत्वेनैवा
न्वयान्नातिव्याप्तिरिति यत्र युगपत्क्रियान्वये तात्पर्य्यं तत्र समासः समुच्चये च क्रमेण क्रिया
न्वयो न तु युगपत् क्रिया च व्यापारमात्रं इयं च तुल्यवदेकविधेयान्वयित्वं साहित्यं तेन धवख
दिरावित्ति क्रियारहितेधात्पनीतफलानुकूलव्यापारवत्वाप्रतीतौ कथं साहित्यबोध इति निर
स्तं चैत्रमैत्रौ स्थितिगतिमन्ताविति यथासंख्यस्थले तु भवत इति क्रियाध्याहारादेव द्वंद्वः यद्यपि
एतावता द्वित्वान्वयार्थमान्वयितावच्छेदकतया साहित्यभानमित्यायातं न च घटेन जलमाहरे

त॰प्र॰
१८१
181

त्यत्रच्छिद्रेतरत्वस्यैवयोग्यतावच्छेदकत्वेपैवभानोपपत्तौमीमांसकमतेलक्षणायांनबीजं न
यापिपदार्थान्तरस्योपस्थितस्यशाब्देनभानमितिमतमंगीकृत्येदं त्रयाद्धुरित्यस्वरसोद्भावनं तद्बीजं
तु प्रत्येकमुपस्थितयोर्धवखदिरयोर्द्वित्वबोधसम्भवेसाहित्यलक्षणाकल्पनमनर्थकं अन्वयिता
वच्छेदकसमानाधिकरणसंख्याबोधकत्वंविभक्तीनां ननुव्याप्यत्वांतर्भावोपि गौरवात् घटो
ऽऽनयपटंचेत्यत्रपटमादायघटेनद्वित्वान्वयः पटस्याप्रकृत्यर्थत्वात् प्रकृत्यर्थमात्रवृत्तिसं
ख्यावाचकत्वाद्विभक्तीनां याद्दशसमुदायोत्तरंविभक्तिस्तस्यैवप्रकृतित्वेनधवस्यापिप्रकृत्यर्थ
त्वात्प्रकृतेनदोषः किंचधवादिपदात्साहित्येनैवयदिबोधस्तदाचैत्रमैत्रौगच्छत इत्यत्रागमन
स्याप्यासज्यवृत्तितयातत्रान्वयप्रसङ्गः एवंचद्वित्वबोधार्थंसहितत्वेनलक्षणा गमनबोधार्थं
चधवत्वेनबोध इतियुगपद्वृत्तिद्वयविरोधः सहितावस्थगमनकर्तृत्वासंभवश्च इत्थंचक्रि
यान्वयात्पूर्वंसाहित्यबोधोनभवत्येव उत्तरंतुभवत्येव यत्रयुगपदुपस्थितेहपियुगपत्क्रियान्वर

१८१

181A

यान्वयेनान्वय्यीति तत्र समासः समुच्चये तु क्रमेणोपस्थिते क्रमेण क्रियान्वयबोधे नान्वय्यीन्न स
मासः एवं प्रधानगुणभावविवक्षया विशेषणत्वविवक्षया वा तत्र समासाभाव इति दिक् घटाविति
सरूपैकशेषः विरूपैकशेषस्तु पितराविन्यत्र जनकशरीरत्वेन लक्षणया मातापित्रोरवगमः
विभक्त्युपनीतं पुंस्त्वं तु पितर्य्येवान्वेति योग्यत्वात् शक्त्या पितृलक्षणया स्वाधीनिरूप्यत्वेन शक्य
संबंधेन जनकस्त्रीत्वेन रूपेण मातृबोधकं एकस्यैव लक्षणया वा पितृत्वमातृत्वाभ्यां बोधकमि
ति तु नव्याः श्वशुराविन्यत्र पत्नीजनकशरीरत्वेन प्रातिस्विकरूपेण वा बोधः दम्पती पूजाप्रक
रणे ब्राह्मणो वानेयमत्र पुमान् स्त्रिये ति विरूपैकशेषत्वात् ब्राह्मणपदे स्त्रीपुंसलक्षणैव विभ
क्त्यर्थपुंस्त्वस्य च स्त्रिया मनन्वयोऽयोग्यत्वात् विभक्तिरेव शक्या पुंस्त्वस्य लक्षणया च स्त्रीत्वस्य
बोधिका ननु ब्राह्मणत्वेन शक्तैव ब्राह्मणीबोधसंभवे ब्राह्मणपदे लक्षणा व्यर्थेति चेन्न लाघवेन
स्त्रीत्वरूपब्राह्मणीत्वेन बोधार्थं तदादरात् केचित्तु विशुद्धमानापितृयोनिजपुंस्त्वस्य ब्राह्मण
त्वव्यञ्जकतया ब्राह्मण्यां ब्राह्मणत्वाभावेन ब्राह्मणीत्वेन शक्त्या तद्बाधाभावाल्लक्षणैव अन्ये

शि॰प्र॰ १८२ 182 वब्राह्मणीवधेप्रायश्चित्तह्रासइत्याहुः तन्न पुंस्त्वघटितस्यतद्बोधकत्वेगौरवात् अपकृष्ट
ब्राह्मणवधइवप्रायश्चित्तह्रासस्यान्यथाप्युपपत्तेरिति शिवोनमस्कुर्य्यादित्यत्रशिवपदंशिव
दुर्गान्यतरत्वेनबोधकं शक्त्याशिवत्वेनलक्षणयाचशिवायाबोधकमितितुनव्याः भ्रातरौपुत्रा
वित्यत्रभ्रातृपुत्रौ स्वसृदुहितृभ्यामितिविरूपैकशेषत्वात् भ्रातृपदेनभ्रातृस्वसारौसोदरत्वे
नपुत्रपदेनचापत्यत्वेनपुत्रदुहितरौलक्ष्येते हरीनमस्यावित्यत्रशक्त्यैवविष्णुत्वादिनाबोधकं
युगपद्वृत्तिद्वयविरोधानुपगमात् एकयैवलक्षणयाविष्णुत्वादिनाबोधकमित्यप्याहुः उपपद
समासेकुंभकारः क्षीरपायी खट्वाशायीत्यादौधात्वर्थनामार्थयोर्भेदेनान्वयस्याव्युत्पन्नत्वाल्लक्ष
णयाकुंभादिपदानिकुंभविषयकक्षीरकर्मकखट्वाधिकरणकादिपराणि व्युत्पत्तिसंकोचेतु
शक्त्याकुंभादेर्विषयकत्वादिसंबंधेनान्वयबोधइति कर्मधारयेनीलोत्पलमित्यादौनीला
भिन्नमुत्पलमित्यभेदप्रकारकबोधोनुभवसिद्धः तत्रवैयाकरणमतेकर्मधारयशक्तिकल्
पनात् समासत्वेनैवसाकल्प्यते ननुविशेषणतः कर्मधारयत्वेनेति सर्वत्रसमासेशक्तिः १८२

182A

अन्यमतेन नीलपदस्यैव नीलाभिन्ने तिमनह्यमपि निराचिकीर्षुराह नीलोत्पलमित्या
दाविति अन्वयविधयैवेति संसर्गमर्यादयैवेत्यर्थः एवकारेण प्रकारतयाव्यवच्छेदः येन त
त्प्रकारकबोधोपपत्त्यर्थं अभेदे वृत्तिरपि कल्प्यत इति भावः ननु नीलमुत्पलमित्यत्र संभवद
र्थसाधुत्वे शब्दसाधुत्वमन्याय्यमिति न्यायेन न विशेषणविभक्तिः प्रयोगसाधुत्वाय किं
त्वभेदार्थिका युक्तं चैतत् नीलमुत्पलमिति शाब्दसामग्रीकाले नीलाभेदाभाववदुत्पल
मिति मानसप्रत्यक्षादिवारणाय तत्र शाब्दसामग्र्याः प्रतिबंधकताया अवश्यवाच्य
त्वात् मन्मते च नीलाभेदप्रकारकज्ञानस्य तत्र योग्यताज्ञानविधया आवश्यकत्वेन विप
रीतज्ञाने तन्नरप्रत्यक्षनिर्णयं प्रति विशेषदर्शनस्यैव हेतुतया तदभावादेव मानसवारणात्
विशेषदर्शनसत्वे च तदभावव्याप्यवत्तानिर्णयरूपप्रतिबंधकसत्वेन शाब्दबोधस्यैवानु
दयान्नतादृशशाब्दसामग्र्याः प्रतिबंधकताधिक्यं नच मन्मतेपि नीलस्याभेदसंबंधे
नान्वयस्वीकारे तादृशशाब्दसामग्रीकाले भेदसंबंधावच्छिन्नप्रतियोगिताकनी

न०प्र०
१८३

183

नीलाभावत्वंतु सत्वमिति प्रत्यक्षादेरनुत्पादस्यविशेषदर्शनाभावादेवनिर्वाहइतिवाच्यं तथाप्यभेदप्र
कारकबोधस्वीकारेऽभेदेनीलस्यनिरूपितत्वसंबंधेननीलमुत्पलत्वमिति शाब्दबोधसामग्रीकालेनिरूपि
तत्वसंबंधेननीलाभाववानभेदइत्यादिप्रत्यक्षेप्रतिबंधकत्वान्तरस्यकल्पनादितिविशेषणविभक्तेरभे
दोर्थः एवंचनीलोत्पलमित्यत्राप्यभेदेलक्षणाऽऽवश्यकी व्याससमासयोः समानप्रकारकज्ञानजनक
त्वनियमात् समानार्थकसमासारंभकवाक्यस्यैवविग्रहत्वात् नचैवंनीलाभेदस्यकथमुत्पलेऽन्वयः ना
मार्थयोर्भेदेनान्वयाभावादितिवाच्यं समासातिरिक्तस्थलएवतन्नियमादित्यतआह अतएवेति यतएव
कर्मधारयेनसमासत्वेनशक्तिर्नवालक्षणा अतएवेत्यर्थः बलीयानिति कर्मधारयेयदिसमासत्वेनशक्ति
स्तर्हितत्पुरुषेपिशक्तिरेवेति तत्पुरुषाद्बलीयस्त्वव्याघातः यदिचकर्मधारयेलक्षणातर्हितत्पुरुषेसेतिउभ
यथापिबलीयस्त्वव्याघातइतिकर्मधारयेवृत्तिःकल्प्या नचविशेषणविभक्तेरभेदोर्थकत्वमतेव्याससमा
सयोःसमानार्थकत्वानुरोधादभेदेलक्षणावश्यकीत्युक्तमितिवाच्यं आरूढवानरइत्यत्रव्यभिचारेणता
दृशनियमाभावात् तदिदमुक्तमभेदस्यान्वयविधयैवभानोपपत्तेरिति ननुराजपुरुषइत्यत्रापिसंबंध १८३

183A

लक्षणानुपपत्तिः व्याससमासयोः समानार्थकत्वनियमानुरोधेनैव तत्कल्पनात् नामार्थयोरिति व्युत्पत्ति
स्त्वसमासातिरिक्तस्थल एव अन्यथा संबंधलक्षणायाः निर्वाहादित्यत आह नत्वहीति तत्पुरुषे हीत्यर्थः पू
र्वपदे राजपदे तादृशानियमाभावेपि संबंधप्रकारकबोधस्यानुभवसिद्धत्वात् संबंधे लक्षणा कर्मधारये तु नैवा
मिति भावः ननु संबंधप्रकारकानुभवश्चेदुभयत्रापि तुल्यः नास्ति चेदुभयत्रापि मास्त्वित्यनुभवे विवाद
इत्यत आह संबंधिलक्षणेत्युक्तमिति व्युत्पत्तिसंकोचे मानाभावात् समासासमासयोः सर्वत्रापि नामार्थयोर्भे
देनान्वयाद्राजपदस्य राजसंबंधिनि लक्षणा नीलपदस्य चाभेदेनैवोत्पलेऽन्वय इत्युत्पत्तिविरोध इति कर्म
र्मधारये लक्षणाकल्पनमिति भावः न च तत्पुरुषात्कर्मधारयस्य बलीयस्त्वमेवासिद्धमिति वाच्यं निषादस्थ
पत्यधिकरणविरोधापत्तेः तथाहि एतयैव निषादस्थपतिं याजयेदित्यत्र निषादः स्थपतिर्यस्येति बहुव्रीहि
स्वीकारे उभयपदलाक्षणिकत्वगौरवात् तस्यान्तरपदलाक्षणिकत्वमतेपि गुरुः सकृत्तिकप्रथमपदलाक्षणि
कत्वात्तत्पुरुषस्यैव लघुत्वादिति निषादानां स्थपतिर्वा निषादश्चासौ स्थपतिश्चेति वा समासः तत्र षष्ठी
तत्पुरुषस्वीकारे नामार्थयोर्भेदेनान्वयाभावेन निषादपदस्य निषादसंबंधिनि लक्षणावश्यकत्वयोगौर
वं कर्मधारये तु न तदिति तदपेक्षया लघुत्वात् कर्मधारय इति सिद्धांतः तस्य च कर्मधारयेपि लक्षणाकल्प

न॰प्र॰
१८४
184

व्याघातः ननु निषादस्य संकरजातीयत्वेन तस्य यागोपयुक्तापूर्वविद्याप्रयुक्तिकल्पने गौरवं एवं स्त्रीशूद्रौ ना
धीयातामित्यत्र संकोचकल्पनं चेति न दपेत्यत तत्पुरुष एव साधुः न चात्र शूद्रपदस्य निषादेतरशूद्रपरतया संको
चे निषादस्य वेदाध्ययनप्रसंगः अध्ययनपदस्य यागोपयुक्ताध्ययनेतरपरत्वे च शूद्रान्तरस्यापि यागोपयुक्ताध्य
यनप्रसंग इति वाच्यं विशेषतः प्राप्तेतराध्ययनपरत्वादध्ययनपदस्य तेन निषादस्य यागोपयुक्तवेदेतरवेद
निषेधः शूद्रान्तरस्य तु यावद्वेदस्यैव तस्य विशेषतः प्राप्त्यभावादिति चेन्नैवं लाघवात्कर्मधारये प्रवृत्ते तत्र
रमपूर्वविद्याप्रयुक्तेः कल्पनस्य फलमुखत्वेनान्याय्यत्वात् तर्कितगौरवस्य चाप्रतिबंधकत्वात् कर्मधारयेपि ल
क्षणाकल्पनेन तु तत्पुरुषापेक्षया लघुत्वाभावेनापूर्वविद्याप्रयुक्तिकल्पनगौरवग्रस्तत्वेन च तत्र कर्मधारयस्वी
कारेणैकत्वस्यादिति नन्वलक्षणाङ्गीकार एव साधुः ननु लक्षणायामभावेपि कर्मधारय एव स्वीक्रियतां
न तत्पुरुष इत्यत्र बीजाभावः शक्तिलक्षणाज्ञानयोः शब्दबोधहेतुतायां विशेषाभावात् न च मुख्यार्थपरत्वे
संभवति लक्ष्यार्थपरतायाः अन्याय्यत्वादिति न्याय एव शरणमिति वाच्यं असति विशेषतो बाधके कर्मधा
रयविधुर्येव वेदानां प्रामाण्यं न तु तत्पुरुषविधयापीति मन्मतेपि स्ववचत्वात् तस्मात्कर्मधारये समासेत
न्माके लक्षणाया वा स्वीकारेपि बलीयस्त्वमुपपादयितुं शक्यत एवेति चेन्न शक्यसंबंधरूपलक्षणाज्ञा १८४

184A

नस्य विनाशक्तिज्ञानमसंभवितया शक्तिज्ञानादेव शाब्दबोधोपपत्तौ लक्षणाज्ञानकल्पने गौरवादिति वैदि
कशाब्दबोधस्य शक्तिज्ञानमूलकत्वे लाघवस्यैव सिद्धांतबीजत्वादित्यलं पल्लवितेन ननु तथापि चित्रगुध
न भिन्नश्च बहुव्रीहिगर्भतत्पुरुषस्थले बहुव्रीहौ लक्षणोत्तरं तत्पुरुषे लक्षणास्वीकारे लक्षितलक्षणास्वीकाराप
त्तिः बहुव्रीहेरन्यपदार्थसंबंधिनि ऽनुशासनाभावात् परंपरासंबंधेनैकलक्षणयाऽनिर्वाहाद्बहुव्रीहौ शक्तिर
स्वीकारस्यावश्यकतया समासत्वेनैव सर्वत्रैव शक्तिः समासे तत्कल्पनमिति चेन्न चित्रगुपदस्य बहुव्रीहिलक्ष
णसामान्यपदार्थपरत्वे तत्संबंधिनि परंपरासंबंधेन तत्पुरुषलक्षणायाश्च लक्षणाद्वयादेव युगपदन्वयबोधो
पपत्तिर्युगपद्वृत्तिद्वयविरोधस्य च मणिकृन्मतेऽनंगीकारादिति ऽघटः पट इति नञ्तत्पुरुषे घटभिन्नः पट इ
त्यन्वयबोधस्यानुभाविकत्वात् नञश्च संसर्गाभावमात्रवाचकत्वे न ततोऽन्योन्याभावत्वप्रकारकबोधस्यासंभवि
तया समासशक्तिरिति मतं दूषयति नञ्तत्पुरुषेपीति घटसंबंधिपरमिति घटसंबंधिनि लाक्षणिकमित्यर्थः सं
बंधश्चात्र प्रतियोगिकत्वं ऽनन्यलभ्यस्यैव पदार्थत्वान्न तत्र शक्तिरिति भावः कथं तर्हि ऽन्योन्याभावत्वप्रका
रकबोध इत्यत आह नञ्पदं चेति ननु संसर्गाभावोऽन्योन्याभावश्च नञोऽर्थ इति संसर्गाभावत्वमन्योन्याभाव
त्वं च शक्यतावच्छेदकमिति नञ्पदस्य नानार्थत्वकल्पनापेक्षयाऽन्योन्याभावे लक्षणैवोचिता ऽनन्यलभ्य

स्यैव शाब्दार्थत्वात् इत्यभिप्रायेणाह संसर्गेति अत्यन्ताभावमात्रवाचकत्वे घटप्रागभावदशायां ध्वंसदशायां
च कपाले घटो नास्तीति बुद्धेरनुदयप्रसंगः ध्वंसप्रागभावप्रतियोगिभिन्नैस्त्रिभिः सहात्यन्ताभावस्य प्राचां मते वि
रोधादत्यन्ताभावविषयकत्वाभावात् अतो ध्वंसादिविषयकत्वमेवोपेयं तथा च तत्साधारण्याय संसर्गाभावे
ति संसर्गाभावत्वं च संसर्गारोपजन्यप्रतीतिविषयीभूताभावत्वं ध्वंसप्रागभावदशायां कपाले घटो नास्ती
ति धीर्ध्वंसादिविषयिणी नञ् चोत्तरकालीनत्वविशिष्टसमवायः प्रागभावस्य पूर्वकालीनत्वविशिष्टसमवा
यश्च ध्वंसस्य प्रतियोगितावच्छेदकः संबंधः प्रसक्तं हि प्रतिषिध्यत इति न्यायादुत्पत्तिपूर्वं उत्तरकालीनत्ववि
शिष्टसमवायेन घटस्याभावात् तेन संबंधेन कपाले घटोस्तीति संसर्गारोपानंतरं घटो नास्तीति बुद्धिः एवं
ध्वंसदशायां पूर्वकालीनत्वविशिष्टसमवायेन घटस्याभावात्तेन संबंधेन कपाले घटोस्तीति संसर्गारोपानंतरं
घटो नास्तीति बुद्धिः अत्यन्ताभावस्तु संयोगमात्रेणैव घटवत्तारोपादत्यन्ताभावधीः नचान्योन्याभावप्रत्य
ये तादात्म्यारोपस्य हेतुतया तादात्म्यस्यापि संसर्गत्वेनान्योन्याभावेऽतिव्याप्तिरिति वाच्यं संयोगादिसंबंध
एव भूरिप्रयोगात् संयोगादिष्वेव संसर्गव्यवहारात् तादात्म्यातिरिक्तत्वेन संसर्गस्य प्रवेशाद्वा नच तथा
पि नैत्याकारिकाभावप्रत्यक्षवारणायाभावलौकिकप्रत्यक्षे प्रतियोगिज्ञानहेतुताया आवश्यकत्वे प्रतियो

185A

गिसंसर्गारोपहेतुत्वेमानाभावइतिवाच्यं एकदानानासंबंधावच्छिन्नाभावप्रत्यक्षवारणायतत्तत्संबंधाव
च्छिन्नाभावप्रत्यक्षेतत्तत्संसर्गारोपस्यापिहेतुत्वात् नचध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधेमा
नाभावेनकथंतत्प्रत्यक्षेप्रतियोगिसंसर्गारोपः कारणमितिवाच्यं अनुभवबलेप्रतिबध्यप्रतिबंधकभावानुरो
धेनचात्यंताभावस्येवतयोरपिप्रतियोगितावच्छेदकसंबंधत्वांगीकारात् तथाहि अत्यंताभावस्येवध्वं
सप्रागभावयोरपिसत्तानदृष्यांतत्कालावच्छेदेनप्रतियोगिमत्ताज्ञानानुदयात् समवायेनतद्घटवत्ताज्ञा
नेप्रतितद्घटत्वावच्छिन्नप्रतियोगिताकात्यंताभावप्रागभावादिमत्ताज्ञानत्वादिनाप्रतिबंधकत्वत्रयमपेक्ष्य स
मवायेनतद्घटत्वावच्छिन्नप्रतियोगिताकाभाववत्ताज्ञानत्वेनैवप्रतिबंधकतयाऽत्यंताभावस्येवतयोरपि
संबंधावच्छिन्नविशेषधर्मावच्छिन्नप्रतियोगिताकत्वस्वीकारात् तथा च संसर्गाभावत्वेन अशक्यतावच्छे
दकं नचान्योन्याभावत्वमेवतथास्त्वमितिवाच्यं सामान्येपक्षपातइतिन्यायेनध्वंसप्रागभावादिसाधा
रणतयासंसर्गाभावत्वस्येवतथात्वात् नघटःपटइत्यादौसामानाधिकरण्यानुरोधादन्योन्याभाव
वतिलक्षणयाऽन्योन्याभावेशक्त्यानत्रः प्रयोगाभावाच्च चैत्रोनपचतिनेदंचैत्रस्य भूतलेनघटइ
त्यादौमन्मते नत्रोमुख्यार्थेनासंभवादित्याशयः लाघवेनेति संसर्गाभावत्वं संसर्गारोपजन्यप्रतीति

न०प्र०
१८६
186

तिविषयाभावत्वमिति तदपेक्षया तत्प्रविष्टत्वेनाभावत्वस्यैव लघुत्वेनोभयत्रैव शक्तिरिति भावः
ननु संसर्गाभावत्वेन संसर्गारोपजन्यप्रतीतिविषयाभावत्वं संसर्गारोपस्य ह्यनाहार्यस्य हेतुत्वेऽना
हार्यबाधबुद्धेः प्रतिबंधकतयाऽभावप्रत्यक्षानुपपत्तिः आहार्यस्य च तस्य तदानीं बाधाभावेनासंभ
वः बाधकालीनेच्छाजन्यस्यानस्यैवाहार्यत्वात् यदि च बाधसामग्रीकालीनस्याहार्यत्वमिति मन्येत
तथाप्यभावलौकिकप्रत्यक्षत्वप्रतियोगिसंसर्गारोपस्य हेतुतयाऽतींद्रियाभावेऽव्याप्तिः नच संसर्गा
वच्छिन्नप्रतियोगिताकाभावत्वं तत् संयोगेनान्योन्याभावेऽतिव्याप्तेः संयोगितादात्म्यस्य संयोगरूपत
या तस्यापि संसर्गावच्छिन्नप्रतियोगिताकत्वात् संसर्गतया तादात्म्यतयाच्चावच्छेदकतावैलक्षण्यं दुर्व
चं एवं तादात्म्यावच्छिन्नप्रतियोगिताकाभावत्वमन्योन्याभावत्वं संयोगसंबंधावच्छिन्नप्रतियोगिता
कसंयोगस्य तेनाभावेऽतिव्याप्तेः संयोगितादात्म्यस्य संयोगरूपतया तादात्म्यावच्छिन्नप्रतियोगिताकत्वा
त् तादात्म्यत्वेन तादात्म्यावच्छिन्नो कोच तादात्म्यत्वस्यातिरिक्तत्व एव निस्तार इति संसर्गाभावत्वान्यो
न्याभावत्वादिकमखंडमेवेति किं तदपेक्षयाभावत्वे लाघवं न च सामान्यत्वाद्भावत्वे लघुत्वमिति वाच्यं सा
मान्यधर्मस्य स्वावच्छेदकत्वेन रूपदर्शनाभावे तथाप्यभावबोधोपपत्तौ लक्षणांतरेणैवोपपत्तिरित्यस्यैव बीजतया १८६

186A

संसर्गाभावत्वादीनामखण्डत्वेन नञ्पदाद्यत्र संसर्गाभावत्वप्रकारकबोधस्तत्राभावत्वप्रकारकबोधस्य
कत्वदृगस्तत्वेन नप्रकृते मदसंभवादित्यत आह विनिगमनेति संसर्गाभावत्वस्यातिरिक्तत्वेऽभावत्वस्याप्यति
रिक्तत्वेन तदपि शक्यतावच्छेदकमित्यर्थः अभावमात्रएव संसर्गाभावेऽन्योन्याभावे चेत्यर्थः न च्छक्तत्वेनेति
नञ्शक्यत्वावधारणादित्यर्थः इति संप्रदायानुसारिणां व्याख्या वस्तुतस्तु नञ्भावत्वस्य नञ्शक्यतावच्छेद
कत्वे घटो नास्तीत्यत्र संसर्गाभावत्वप्रकारको बोधः घटो नेत्यादौ चान्योन्याभावत्वप्रकारको बोधः कथं स्यात्
यदि च संसर्गावच्छिन्नप्रतियोगिताकसंसर्गाभावविषयकत्वादित्यादेः कार्य्यतावच्छेदकतया तादृशानुभवो
पपत्तिरिति विभाव्यते तथापि अभाव इति प्रतीतेरवश्यस्वीकारे तु नाभावत्वं सत्तादिविषयकत्वेनैवोपपन्नमाव
तिरिक्ताभावत्वे मानाभावः इति नाभावत्वं शक्यतावच्छेदकमत आह विनिगमनेति संसर्गाभावत्वमिवा
न्योन्याभावत्वमपि शक्यतावच्छेदकं विनिगमनाविरहादिति भावः भूदिप्रयोगस्य संसर्गाभाव इवान्योन्या
भावेपि सत्वात् नियमतः प्रतीयमानप्रत्ययस्य स्वीकारे नानाख्याच्छेदापत्तेः चैत्रो न पचतीत्यादौ वैयाकरण
मते कर्तृत्वं विव्यत यास्माकमपि यदाख्याते कर्तृत्वमिलक्षणन दाधान्यैवान्योन्याभावस्य नञा प्रत्यायनसंभवादिति
नव्यानुसारिणां व्याख्येति विभावनीयं यदि च घटो नास्तीत्यत्राभावत्वप्रकारकएव बोधः ... तु भाविकाध्यं

न॰प्र॰
१८७

187

सप्रागभावयोरत्यन्ताभावविरोधित्वेमानाभावेन ध्वंसप्रागभावकाले घटो नास्तीति बुद्धेरत्यन्ताभावविष
यकत्वेनैवोपपत्तेरिति विभाव्यते तदात्यन्ताभावत्वमन्योन्याभावत्वं च प्रकारतावच्छेदकमिति मंतव्यम् अ
त्र घटवति भूतले यत्किंचिद्धटप्रतियोगिकात्यन्ताभावसत्वात् भूतले घटो नास्तीति बुद्ध्यापत्तिवारणाया
न्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वं व्युत्पत्तिबललभ्यं तत्र घटत्वावच्छिन्नप्रतियोगिताकाभाव॰
विषयकशाब्दत्वावच्छिन्नं प्रति यत्किंचित्पदासमभिव्याहृतघटपदसमभिव्याहृतनञ्पदज्ञानत्वेन का
रणता तेन नीलो घटो नास्तीत्यत्र न घटत्वावच्छिन्नाभावधीः किंचित्पदं च नीलादिपदत्वेन विशिष्योपा
देयं तेन नीलादिपदसमभिव्याहारेपि न दोषः न च तथापि नीलो घटो नास्तीत्यत्रानुपपत्तिः अभेदेन नी
लादिसाकांक्षत्वविनाशादिति तदर्थात् कम्बुग्रीवादिमान्नास्तीत्यादौ तु संभवति लघौ गुरौ तदभावादिति॰
न्यायेन कम्बुग्रीवादिमत्वस्य घटत्वापेक्षया गुरुत्वेनानवच्छेदकतया कम्बुग्रीवादिमत्वावच्छिन्नप्र
तियोगिताकाभावबोधो भ्रमात्मक एव यद्यपि कम्बुग्रीवादिमत्वाद्यवच्छिन्नप्रतियोगिताकत्वस्याप्रसिद्ध्या॰
तेन संबंधेन कम्बुग्रीवादिमतो नाभावोपरि भ्रमस्तथापि सांसर्गिकविषयतायामपि प्रकारतात्वविशेष्य
तात्वोपगमे न प्रतियोगितायां कम्बुग्रीवादिमत्वाद्यवच्छिन्नत्वांशे भ्रम इति बोध्यं केचित्तु घटो नास्तीत्यादौ १८७

187A

प्रतियोगितयाघटस्य स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन घटत्वस्याभावो पर्यवसानं कंबुग्रीवादिमान्नास्ती
त्यत्र तु घटत्वावच्छिन्नप्रतियोगिताकत्वसंबंधेन कंबुग्रीवादिमत्वस्याभावो पर्यवसानं स्वावच्छिन्नप्रतियोगिता
कत्वस्यैव स्वस्य संबंधत्वादित्याहुः आशयमविद्वानाशंकते ननु न घट इति अभाव घटयोरिति प्रतियोगित
याघटस्याभावो परिबोधोपपत्तेरित्यर्थः घटपदे योति अपिना नञ्पदसमुच्चयः नामार्थयोरिति नीलो घट
इत्यत्र नीलघटयोरभेदेनान्वयदर्शनेनेति अभेदातिरिक्तसंबंधेनेत्यर्थः तथा च नञर्थाभावप्रतियोगितासं
बंधेन घटस्यान्वयो न संभवति तुल्यसंबंधेनत्वेन नञोपि नामत्वादिति भावः कथं तर्हीति नामार्थयोरितिव्युत्प
त्तिस्वीकारे हीत्यर्थः न घट इति प्रथमायाः साधुत्वात् प्रतियोगितासंबंधेनैव नञर्थान्योन्याभावे घटस्या
न्वय इति भावः अर्थसाधुत्वं संभवति शब्दसाधुत्वस्यान्याय्यतयात्र प्रथमायामेव लक्षणमाह प्रथमायां वेति ष
ष्ठ्यर्थे प्रतियोगित्वे ननु सुब्विभक्तौ लक्षणा न संभवति कर्तृकर्मणोः कृतीति व्याख्यानुशासनवैयर्थ्यापत्तेः
कर्तृत्वकर्मत्वप्रकारकबोधस्य षष्ठ्यास्तद्धर्मविशिष्टलक्षणयैवोपपादयितुं शक्यत्वादित्यभिप्रायेणाशंक
ते नन्विति नहि सुब्विभक्तौ लक्षणानंगीकारे हि षष्ठीतः भारतस्य श्रवणं व्यासस्य कृतिरिति कर्तृक
र्मकृद्योगविहितषष्ठीतः कर्मतेति कर्तृत्वेत्यपि बोधः शेषषष्ठीत्यनेन संबंधमात्रप्राक्तषष्ठीतः संबंध

न.प्र. त्वेन बोधसंभवेपि कर्तृत्वत्वेन कर्मत्वत्वेन बोधो न संभवतीति तथा बोधोपपत्तये लक्षणास्वीकारस्यावश्यकः न
१८८ चानुशासनस्य शक्तिनियामकतया कर्तृकर्मणोर्योगविहितषष्ठीत्वेन कर्तृत्वादिना शक्तिरेवास्तामिति वाच्यं अन
188 न्यलभ्यस्य शब्दार्थत्वादिति भावः असंदिग्धस्थलमुदाहरति कथंचेति एकस्यां स्त्रीव्यक्तौ दाराइतीति दाराः
पुंसि च भूम्न्येवेति बहुवचनान्त एव दाराशब्दः साधुरिति भावः यद्यपि बहुत्वस्यैव त्रित्वसंख्यावाचकत्वस्वपान
नुतन्मात्रवृत्तिसंख्यावाचकत्वमिति तेन द्वित्वेनादायबहुत्वान्वयः संभवत्येव तथापि एको घटाइत्यत्राप्यसाधुत्वा
न्वानाभावदशायां घटगतद्वित्वेनादायबहुत्वापत्तिः न च भवन्मतेपि बहुवचनेन लक्षणया एकत्वं बोध्यतामिति
वाच्यं एकद्विपदे नैकत्वबोधसंभवे घटाइति बहुवचनस्यैकत्वे तात्पर्यग्राहकेण लक्षणयैकत्वबोधवारणसंभवात्
प्रकृते च संभवत्यर्थे साधुत्वे शब्दसाधुत्वस्यान्याय्यत्वादिति अत्रानुशासनिकीति इयं लक्षणा प्रवृत्ताः कर्मत्वे ब
हुवचनस्यैकत्वे लक्षणेत्यर्थः इष्टैवेति कर्तृकर्मणोः कृतीतिसूत्रानुशासनवैयर्थ्यभिया षष्ठीविभक्तौ न लक्षणे
त्यस्यानुशासितविभक्त्यर्थे न लक्षणेत्येव तदर्थ इति भारतस्य श्रवणमित्यादौ विभक्तौ लक्षणोपपत्तावपि न घटः प
टइत्यत्र प्रथमायां कर्मत्वे लक्षणा तथानुशासनाभावादिति भावः प्रकृतेपि न त्वसमभिव्याहृतघटपदोत्तरप्रथमा
यां एवं प्रतियोगित्वे लक्षणोचितमप्यानुशासनिकीत्वं लक्षणा संभवतीति तुल्यमित्यर्थः अनुशासनमेवाह तदिदमाहु १८८

188A

रिति नियतेति नियतः प्रतियोगिवाचकपदेन नियतः प्रतियोगीये थांते केचिदव्ययाः नञादिरूपाः
प्रतियोगितावाचकपदार्थान्वितस्वार्थबोधकाः केचिदव्ययाइतियावत् नइतिहि नकदाचिदपिप्रयोगः किंतु
नघटः नपटइत्यादिरूपएव तथाच स्वार्थेप्रतियोगिवाचकपदार्थान्वितत्वं अभेदेन विभक्त्यर्थद्वारावा तत्र
चघटपदस्यघटप्रतियोगिकेलक्षणायां अभेदेन प्रथमायाः प्रतियोगित्वेलक्षणायांतु विभक्त्यर्थद्वाराऽन्वयः
घटपदेलक्षणायांप्रथमायाः शब्दसाधुत्वमात्रकल्पनापि तयाप्रथमायाएवप्रतियोगित्वेलक्षणोचितत्वात्रापिप्र
तियोगित्वेलक्षणाऽनुशासनिकीतिभावः यद्यपिप्रतियोगित्वरूपार्थेप्रथमेतिनव्याकरणेनप्रतिपादितं
तथापितादृशानुशासनतात्पर्य्यं तत्रैवेत्यनुशासितत्वमितिध्येयं शंकते तथापीति नञर्थेति नघटः
पटइत्यत्रघटान्योन्याभावस्यपटेकथमन्वयः नामार्थयोरभेदातिरिक्तसंबंधेनान्वयबोधासंभवादित्यर्थः
शंकते नञ्जतेरिति तथाचननामार्थयोरन्वयः किंतुविभक्त्यर्थनामार्थयोरितिभावः ततइति नघटः पट
इतिवाक्यादित्यर्थः शंकते नञ्पदमिति नञर्थस्याभाववतः पटेऽभेदेनैवान्वयइतिनैनद्युत्पत्तिविरोधइ
तिभावः घटस्येति नञोऽभावतिलक्षणयाघटस्यप्रतियोगितासंबंधेनाभावेऽन्वयोवाच्यः सचनसंभवतीऽ
तिभावः तदेवाह तस्येति अभावस्येत्यर्थः पदार्थैकेति नञोऽभाववदर्थकतयाऽभावस्यैकदेशत्वादित्य
र्थः गौर्नित्या पशुरपशुरित्यादौ सविशेषणेहिविधिनिषेधौविशेषणमुपसंक्रामतः सतिविशेष्यबाधेइ

त॰प्र॰
१८८
189

त्ति न्यायेन स्वर्गो ध्वस्त इति वन्हित्यत्वस्य गोत्वेऽन्वयापत्त्या पदार्थः पदार्थेनान्वेति ननु पदार्थैकदेशेनेति नि
यमस्यावश्यकतया नञर्थाभाववदेकदेशेऽभावे घटस्य प्रतियोगितयान्वयासंभव इति भावः नयापीति
शंकोपरि समाधत्ते मैवमिति स्वसंबंधिकेति नामार्थयोरिति व्युत्पत्त्या नञोऽभाववति लक्षणा वाभाववत्त्वस्याभे
देनैवमटेऽन्वय इति ननामार्थयोरिति व्युत्पत्तिविरोधः पदार्थः पदार्थेनैवान्वेति ननु पदार्थैकदेशेनेति व्यु
त्पत्तेश्च संकोचः संबंधिकपदार्थातिरिक्तस्थल एवाभ्युपगमात् नञर्थाभाववदेकदेशाभावे घटस्यान्वये बा
धकाभाव इति भावः ननु व्युत्पत्तेः संकोचे मानाभाव इत्यत आह यथेति जनकत्व इति जनकपुंस्त्वं हि पि
तृत्वं तत्रैकदेशे जनकत्वे यथा चैत्रस्य निरूपितत्वसंबंधेनान्वय इत्यर्थः तथा च व्युत्पत्तिसंकोचस्यावश्य
क इति भावः ननु चैत्रस्य पितेत्यादौ जनकपुंस्त्वरूपपितृत्वैकदेशे जनकत्वे चैत्रस्य नान्वयः किंतु स्वनिरू
पितजनकत्वसंबंधेन पितृपदार्थ एवेति न पदार्थः पदार्थेनान्वेतीति व्युत्पत्तिसंकोचः एवं च प्रकृतेपि घटो
नेत्यादौ घटपदस्य घटप्रतियोगिके लक्षणया घटप्रतियोगिकस्य स्वाभिन्नाभावाश्रयता संबंधेन प्रथमायाः
प्रतियोगिकत्वे लक्षणायां तु घटस्य स्वप्रतियोगिताकाभावाश्रयता संबंधेन पटेऽन्वये बाधकाभाव इति मतं
दर्शयति अन्ये त्विति समुदाय एव अभाववत्येव एवकारेणाभावरूपपदार्थैकदेशव्युदासः उक्तपदार्थे
ति घटपदार्थो घन्वयः परंपरासंबंधेन स्वाभिन्नाभावाश्रयत्वसंबंधेन स्वप्रतियोगिकाभावाश्रयत्वसंबं १८८

189A

धेनेत्यर्थः नच नामार्थयोरिति व्युत्पत्तिभंग इति वाच्यं नामार्थयोरभेदाघटितसंबंधेन विभक्त्यर्थाघटितसंबं
धेन च नान्वय इत्येव व्युत्पत्तेरिति भावः एवं चैत्रस्य पितेत्यादौ चैत्रस्वत्वनिरूपितजनकत्वसंबंधेन पितर्यैवान्
न्वय इति बोध्यं आहुरित्यस्वरसोद्भावनं तद्बीजं तु घटीयअभाववान् पट इत्यन्वये कस्याभाव इत्याकांक्षाया
अनिवृत्तिरननुभवश्चेति नन्वभाववित्तिलक्षणा गौरी कोरपदार्थ इत्यादिर्भवन्मते संकोचः नञर्थाभावस्या
श्रयतासंबंधेन पटे अन्वये नामार्थयोरित्यस्य संकोच इति तुल्यत्वे किमित्यभाववत्तिलक्षणा घटपदस्य
घटप्रतियोगिकेन अभावस्याभाववत्तिलक्षणायां लक्षणाद्वयप्रसंग इत्यत आह युक्तं चेति व्युत्पत्तिसंकोचः
स्यावश्यकत्वेपीति शेषः लघुत्वकमेव नञ्पदस्येति शेषः अन्यथा नञोऽभाववत्तिलक्षणाऽकल्पनेऽघट
इति विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य वाऽभेदान्वयबोधहेतु
त्वेन भवन्मतेऽभावस्य वाऽश्रयतयाऽन्वयेनाभेदेनान्वयबोधाभावोद्धाभावेन प्रतियोग्यनुयोगिवाचकपद
योः समानविभक्तिकत्वमनुपपन्नं स्यादित्यर्थः निपातेति निपातादीत्यर्थः आदिनाऽव्ययपरिग्रहः अ
न्यैवेति अव्ययनिपातातिरिक्तनामार्थयोर्भेदान्वयबोधाभाव इत्यर्थः नामार्थप्रकारकशाब्दबोधेऽव्ययनिपा
तप्रत्ययाद्यन्यतमजन्योपस्थितेर्हेतुत्वादित्यर्थः नञ्स्थले च प्रत्ययजन्योपस्थितेरसत्त्वेपि निपातजन्योप
स्थितेः सत्त्वे न व्यभिचाराभाव इत्यपि कश्चित् तत्त्वन्यतमत्वनिवेशाच्चिंत्यं नन्वव्ययातिरिक्तत्वनिवेशे गौर

त॰प्र॰ १८. 190

मतमाह अत एवेति अव्ययातिरिक्तत्वनिवेशादेवेत्यर्थः भेदेनेति इवार्थसादृश्यस्य चंद्रस्य प्रतियो
तयाऽन्वय इत्यर्थः अत एवेति चंद्ररूपनामार्थस्य सादृश्यस्योपेवार्थे भेदातिरिक्तप्रतियोगितासंबंधेनाव
न्वयोपपादनाय व्युत्पत्तिसंकोचस्यावश्यकत्वादेव घटेति घटतदभावयोः प्रतियोग्यनुयोगिभावस्य संस
र्गमर्यादयैव भानाल्लक्षणाकल्पनमन्याय्यमिति भावः मानाभावात् नामार्थयोरित्यादिनियमेऽव्ययनिपा
तातिरिक्तस्थल इति संकोचे मानाभावादित्यर्थः नन्वेवं चंद्र इव मुखमित्यादौ चंद्र इवार्थयोः कथमन्व
यबोध इत्यत आह चंद्र इवेति तत्सदृशेति चंद्रसदृशेत्यर्थः नन्वेवमिवपदमनर्थकमत आह इवपदे चे
ति तात्पर्येति केवलं चंद्र इति पदान्न सादृश्यबोध इति चंद्रपदस्य चंद्रसदृशे लक्षणायामिवपदसमभि
व्याहारस्तंत्रमित्यर्थः नन्वनेन लक्षणाकल्पनमेवस्येव पदस्य नियतप्रतीयमाने सादृश्ये शक्तिरेवास्ता
मत आह अत एवेति चंद्रपदस्य चंद्रसदृशलक्षकत्वादेव अन्यथा लक्षणाऽकल्पने तदनुपपत्तेः
चंद्रमिवेति द्वितीयानुपपत्तेः चंद्रपदस्य चंद्रसदृशलक्षणायां तस्याऽभेदेनान्वयात् अभेदान्वये च विशेष
णविशेष्यवाचकपदयोः समानविभक्तिकतायास्तंत्रतया चंद्रमिति विशेषणवाचकपदोत्तरं द्वितीयाऽऽव
श्यकी भवन्मते त्विवार्थसादृश्यस्याश्रयतया मुखेऽन्वयेनाभेदान्वयाभावात् द्वितीयानुपपत्तेरेव चंद्र
इव मुखं पश्यामीत्यनेनापि तादृशबोधापत्तेरिति भावः ननु चंद्रपदस्य चंद्रप्रतियोगिकमर्थः सादृश्यश १८.

190A

क्तस्य चेवादेः साधर्म्याश्रये लक्षणा तस्याऽभेदेन मुखेऽन्वय इति रीत्या चंद्र इवमिवमुखमित्यत्र समानविभक्तिक
त्वोपपत्तिः संभवत्येव न घटः पट इत्यत्रेव अन्यथा तत्रापि घटपदस्य घटाभाववति लक्षणा न त्रपदं तात्पर्यग्रा
हकमिति प्रसज्येतेति चेन्न भूतले न घट इत्यत्राभावविशेष्यकबोधस्य नञा जननात् अभाववशक्तस्य नञो
ऽभाववति लक्षणोचिता केवले चंद्र इवेत्यप्रयोगात् शक्त्या इवपदात्साधर्म्यविशेष्यकबोधाभावादिवादेः
साधर्म्ये शक्तेरेवाकल्पनात्तेषां निरर्थकत्वमेवेत्याशयात् इवादीनां साधर्म्ये शक्त्यभ्युपगमेपि न व्युत्पत्तिसंको
च इत्याह अस्त्वेवेति ववस्यार्थे प्रतियोगित्वरूपे विभक्तौ चंद्रपदोत्तरप्रथमाविभक्तौ इवपदोत्तरं लुप्तवि
भक्तेरनुसंधाने तथा च नामार्थयोरिति व्युत्पत्तिसंकोच इति भावः ननु सुब्विभक्तौ न लक्षणेत्यत आह अनु
शासनेनेति नियतप्रयोगा हि केचिद्व्युत्पाद्यानुशासनबलादित्यर्थः अननुशासितविभक्त्यर्थातिरिक्तस्थले
सुब्विभक्तौ लक्षणा नास्तीति भावः तथेति घटो नास्तीत्यत्र घटपदोत्तरप्रथमाविभक्तेरपि प्रतियोगित्वे लक्षणेत्य
र्थः भूतले न घट इत्यत्रेव केवलं चंद्र इवेति न प्रयोगः चंद्र इव मुखमित्यत्र लुप्तविभक्त्यननुसंधानेपि बोधात्
चंद्रपदस्य चंद्रसदृशलक्षकत्वमेवोचितमिति कुत्रापि इवादिना शक्त्या साधर्म्यबोधनात्तेषां निरर्थकत्वमेवे
त्यस्वरसोऽस्त्वेवेत्यनेन सूचितः पृथिव्यां गंधो न जल इत्यत्र पृथिवीवृत्तिर्गंधो गंधाभाववज्जलवृत्तिरित्य

न॰प्र॰
१९१
191

न्वयबोधस्वीकारे समानविशेष्यकत्वानुपपत्तेः पृथिवीवृत्तिर्गन्धो जलवृत्त्यभावीयो गन्ध इत्यन्वयबोधस्वी
कारस्यावश्यकत्व इत्यभिप्रायिणां मतमाह अन्ये त्विति ननु पृथिव्यां गन्धो न जल इत्यादौ समानविशेष्यक
त्वानुरोधेन तथान्वयस्वीकारेऽपि भूतले घटो नास्तीत्यत्र भूतलवृत्तिर्घटाभाव इत्यन्वयबोधे बाधकाभाव इ
त्यत आह घटो नास्तीत्यत्रेति एकस्मादिति भावनान्वयिन्येव संख्यान्वये न घटो नास्तीत्यत्र घटाभावोऽ
स्तित्वाश्रय इत्यन्वयस्वीकारे भावनाविशेष्यघटाभावे द्वित्वादेरसंभवेन तथा घटौ न स्त इति न स्यात् तत्रैकत्व
सत्त्वेनैकत्वबोधे बाधकाभावात् घटो नास्तीति बोधः स्यात् भावनाविशेष्यवृत्तिसंख्याबोधकत्वादाख्यातस्येत्यर्थः
तर्हि कीदृशोऽन्वयबोध इत्यत आह किं त्विति भूतले घटो नास्तीत्यत्र सप्तम्या निरूपितत्वार्थकतयाऽस्तिधा
तोर्विद्यमानत्वार्थकतयाऽऽख्यातस्याश्रयत्वार्थकतया भूतलनिरूपितविद्यमानत्वाश्रयो घटाभाव इत्यन्व
यबोधस्वीकारे भावनान्वयिनि संख्यान्वयनियमाद् भवन्मते विद्यमानत्वाश्रयत्वरूपाख्यातार्थभावनायाऽ
ऽभाव एवान्वयेनाभावस्यैकत्वात् घटौ नास्तीति स्यात् मन्मते च सप्तम्याऽऽधेयत्वमर्थः तथा च भूतलवृत्त्य
भावीयो घटोऽस्तित्वाश्रय इति बोधोदयेन भावनाया घट एवान्वितत्वया घटद्वये एकत्वबोधासंभवात् घटौ
नास्तीत्यस्यानापत्तिरिति भावः केति भूतलवृत्त्यभावप्रतियोगी घटोऽस्तित्वाश्रय इत्यन्वयबोधस्वीकारे किं १९१

191A

निरूपितास्तित्वाश्रयो घट इत्याकांक्षायामुक्तनिरुक्तेर्नघटे भावनान्वय इति भावः कथंतर्हीति भूतलनिरूपिता
स्तित्वाश्रयो घटाभाव इत्यन्वयबोधस्वीकारे हीत्यर्थः इत्यादीति भावनान्वयिन्यभावे द्वित्वाभाववान्घटो न स्त इति न
स्यात् स्याच्च घटो नास्तीत्यर्थः भावेनेति भावनान्वय्यभावस्तत्प्रतियोगिनि संख्यान्वय इत्यर्थः तथाच भाव
नान्वय्येव संख्यान्वय इति नञ्समभिव्याहारे नियमः नञ्समभिव्याहारस्थले तु भावनान्वय्यभावप्रतियोगि
नि संख्यान्वय इति व्युत्पत्त्यंतरकल्पनेनैव घटो नस्त इत्यत्र घट एव द्वित्वान्वयात् नघटौ नस्त इत्यस्यानुपपत्तिः
नवा घटो नास्तीत्यस्यापत्तिरिति भावः कथमितीति अन्यत्र भावनान्वयिन्येव संख्यान्वयस्य व्युत्पन्नत्वात् कथम
त्र भावनान्वय्यभावप्रतियोगिनि संख्यान्वय इत्यर्थः तथैवेति अभावप्रतियोगिन्येव संख्यान्वयस्य स्वरसतः
प्रतीतेरित्यर्थः तथाच नञ्समभिव्याहृताख्यातार्थसंख्याप्रकारकबोधे नञर्थाभावप्रतियोग्युपस्थितित्वेन
हेतुत्वं कल्प्यत इति भावः नञ्समभिव्याहारे यद्विशेष्ययद्विशेषणप्रतीयते नञा तद्विशेष्ये तद्विशेषणाभावः
प्रत्याय्यते अन्यथा बहुचैकनियमानुपपत्तेः इत्यस्य च भूतलवृत्तित्वाभाववान् घट इत्येवान्वय इति नियम
वादिनो मतमाह परे त्विति इदं भूतले घटो नास्तीत्यादौ नञाख्यातार्थस्य निषेधेऽन्वयो न घटस्य चैत्र इत्यत
आह नपचतीति पाकानुकूलकृत्यभाववांश्चैत्र इतिवद् भूतलास्तित्वाभाववानेको घट इत्यन्वयबोधबाध

त॰प्र॰ १८२

काभाववदित्यर्थः नातइति घटस्यविशेष्यत्वादित्यर्थः द्विवचनेनेति घटौनस्तइतिद्विवचनानुपपत्तिरित्यर्थः
इदमुपलक्षणं घटौनास्तीत्येकवचनापत्तिरपिनेत्यपिद्रष्टव्यम् अभावस्यविशेष्यत्वेघटौनस्तइतिद्विवचना
दिकंनस्यात् विशेषणपदस्यविशेष्यपदसमानवचनत्वनियमात् परंत्वभावस्यैकत्वाद्घटौनास्तीत्येकवचन
192 मेवस्यात् घटस्यविशेष्यत्वेचक्षुत्वेनस्यद्वित्वबहुत्वयोःक्रियापदस्यापिद्विवचनादिकंसाध्वितिभावः घटौ
नास्तीत्यत्रघटावितिद्विवचनेनद्वित्वावच्छिन्नैकत्वान्वयासंभवादयोग्यत्वं घटौनस्तइत्यत्रचघटद्वयेऽन्वय
संभवाद्योग्यत्वमितिनातइत्यस्याभावार्थइत्यपिकश्चित् ननुभूतलेघटौनास्तीत्यत्रसप्तम्यानिरूपि
तत्वार्थकतयाऽस्त्यर्थाऽविद्यमानार्थकतयाऽऽख्यातस्याश्रयत्वार्थकतभूतलनिरूपितविद्यमानत्वा
श्रयत्वाभाववान्घटइत्येवबोधस्तत्रचाख्यातार्थाश्रयत्वस्याभावएवविशेष्योनतुघटइति आख्यातार्थभा
वनायाविशेष्यगतसंख्याबोधकत्वाभावात्कथंद्विवचनोपपत्तिरितिचेन्न साक्षात्परंपरयासाधारणभावना
विशेष्यसंख्यान्वयस्वीकारेणप्रकृतेपरंपरयाभावनाविशेष्यत्वस्यघटेसत्वादिति एवंपरंपरयाविशेषणस्या
पिविशेष्यसमानवचनत्वमवसेयं चैत्रोनपचतीत्यादौद्रष्टव्यादितिबोध्यं नचतथापिद्विवचनघटत्वा
च्छेदेनभूतलनिरूपितविद्यमानताश्रयताश्रयत्वाभावस्यान्वयेएकघटवतिभूतले भूतलेघटौनस्तइति १८२

192A

नस्यात् घटवृत्तित्वित्वसामानाधिकरण्येन नञर्थान्वये च घटद्वयवत्यपि घटेनेन स्त इति स्यात् अधिकरणतातरीयाव
च्छिन्ने घटे भूतलास्तित्वाभावादिति वाच्यं घटवृत्तित्वावच्छिन्नत्वावच्छेदेन नञर्थसामानाधिकरण्यान्वयात् अधिकरण
तरीयत्वेन नञर्थसामानाधिकरण्येपि एतद्भूतलवृत्तिघटवृत्तित्वे भूतलास्तित्वाभावसामानाधिकरण्याभावान्वय
घटद्वयवति घटेनेन स्त इत्यस्यापत्तिरिति ध्येयं नन्वेवमिति सर्वत्रैवानुयोगिवृत्तित्वाभावस्य प्रतियोगिन्यन्वयस्वी
कार इत्यर्थः जातौ न सत्तेत्यस्य जातिवृत्तित्वाभाववती सत्तेत्यर्थः तत्र च संबंधसामान्यावच्छिन्नजातिवृत्तित्वा
भावो वा बोध्यते तत्राद्य आह जातिवृत्तित्वाभावस्येति एकार्थसमवायेन सत्ताया जातौ सत्वेन तदभावबोध
नासंभवादित्यर्थः नचैककालीनत्वादिवदेकार्थसमवायस्यापि वृत्त्यनियामकतया तेन संबंधेन सत्तायां
सत्वेपि संबंधसामान्यावच्छिन्नवृत्तित्वाभावोस्त्येव जन्यमात्रस्य कालोपाधितया मूर्तमात्रस्य दिगुपाधि
तया कालिकदैशिकविशेषणतयोस्तत्रासंभवितया तन्नदादायापित्तानिविरहादिति वाच्यं जातिः सतीति प्र
तीतेस्तस्यापि वृत्तिनियामकत्वात् द्वितीये त्वाह जातिसमवेतत्वस्य चेति प्रतियोगत्वप्रसिद्धा न समवायसंबं
धावच्छिन्नजातिवृत्तित्वाभावः प्रत्येतुं शक्यत इति भावः यागतिरिति जातौ न सत्तेत्यत्र जातिवृत्तिः सत्ता
भावद्युपपन्ना वपि जातिर्न सत्तावृत्तिरित्यत्र संबंधसामान्यावच्छिन्नसत्तावृत्तित्वाभावस्य जातावसंभ

न॰प्र॰ वात् समवायसंबंधावच्छिन्नसत्तावृत्तित्वस्य चाप्रसिद्ध्या निषेधासंभवात् तुल्यत्वं तदापीत्यर्थः अयोग्यमे
१८२ वेति निश्चितानन्वयमपार्थकमितिभावः इदं वाक्यं जातिर्न सत्तावृत्तिरिति वाक्यं यथाकथंचिद्योग्यतयै
193 वोपपन्नमेव योग्यत्वमन्याय्यमतआह वृत्तिपदं वेति साक्षादिति जातिर्न सत्तावृत्तिरित्यत्र लक्षणया सत्तानिरू
पितसाक्षात्संबंधावच्छिन्नवृत्तिताभावः प्रतीयते सत्तानिरूपितसाक्षात्संबंधावच्छिन्नवृत्तित्वं च स्वरूपसं
बंधमादाय प्रमेयत्वादौ प्रसिद्धमिति नोक्तदोष इतिभावः तुल्यमिति जातौ न सत्तेत्यपि वाक्यमयोग्यमेव
योग्यत्वे वा जातिनिरूपितसाक्षात्संबंधावच्छिन्नवृत्तिताभावः प्रतीयत इतिभावः केचित्तु सत्तापदं स
त्तासमवायपरं सप्तम्यर्थश्चानुयोगित्वं तथा च जात्यनुयोगिकत्वाभाववान् समवाय इति बोध इत्याहुः
समवैतीतिपदाध्याहारेण तथा बोध इत्यन्ये शंकते तथापीति निषेधः भूतलास्तित्वनिषेधः कथ॰
मिति नामार्थयोरभेदेनैव व्युत्पत्तेरितिभावः निपातेतेति निपातातिरिक्तस्थल एव नामार्थयोरिति व्युत्प
न३ त्तेरितिभावः नामार्थमात्रस्य ननामार्थसामान्यस्य प्रतियन्तीत्यनेनास्वरसः सूचितः स च व्युत्प
त्तिसंकोचगौरवं एवं जातौ न सत्तेत्यत्र जातिवृत्तिसत्ताभाव इत्येतावतैवोपपत्तौ लक्षणादिकल्पनेऽपि
नहि जातिर्न सत्तावृत्तिरित्येकत्र लक्षणकल्पनास्यत्रापि तथेत्यत्र प्रमाणमस्ति भावनान्वय्यभावप्रतियो १८२

193A

गित्वान्निसंख्याबोधकत्वेनैवव्वचनैकनियमस्याप्युपपत्तिरिति न किंचिदेतत् किं नियामकमिति नञोऽभा
वमात्रशक्तत्वेन घटो नायमित्यत्रात्यन्ताभावः भूतलेन घट इत्यत्र चान्योन्याभावः प्रतीयत इत्यर्थः सामग्र्या
स्तुल्यत्वादिति भावः शङ्कते अधिकरणेति नञोऽन्यान्यन्ताभावविषयकशाब्दत्वावच्छिन्नं प्रति प्रत्यनुयो
गिवाचकपदसमभिव्याहृतसप्तमीपदज्ञानत्वेनान्योन्याभावविषयकशाब्दबोधेऽनुयोगिवाचकपदसमान
विभक्तिकप्रतियोगिवाचकपदजन्योपस्थितित्वेन च कारणत्वान्न पूर्वोक्तदोषापत्तिः सामग्र्या विलक्षणत्वा
दित्यर्थः न पचतीति पाकानुकूलकृत्यभाववांश्चैत्र इत्यत्रानुयोगिवाचकपदसमभिव्याहृतसप्तमीपदज्ञा
नस्याभावेन न तस्याः सामग्रीत्वमित्यर्थः ननु वैयाकरणमते आख्यातस्य कर्तृविशेषतया पाककर्तृभिन्नश्चै
त्र इत्येवबोधान्नेदमत्यन्ताभावबोधोदाहरणं घटत इत्यत आह चैत्रस्येति चैत्रस्वत्वाभाववद्धनमित्यर्थः ष
ष्ठ्याः स्वत्वमर्थो न तु स्वामित्वं वृत्त्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेन निरूपकतासंबंधाव
च्छिन्नप्रतियोगिता स्वामित्वाभावबोधाराश्रयतासंबंधावच्छिन्नप्रतियोगिताकस्वामित्वाभावबोधस्वीकारे
चैत्रीयेऽपि धने नेदं चैत्रस्येति प्रसङ्गात् स्वामित्वस्य चैत्रवृत्तित्वेन धने आश्रयतासंबंधेनासत्वात् यदि च
तादात्म्यवद्वृत्त्यनियामकसंबंधान्तरस्याभावप्रतियोगितावच्छेदकत्वस्वीकारे स्वामित्वमेव षष्ठ्यर्थः स्तस

त॰प्र॰ त्तिविनिगमनाविरहेणस्वत्वमप्यर्थोवसेयः अन्योन्याभावबोधेसमानविभक्तिकत्वस्यनियामकत्वेव्य
१८४ भिचारमाह अलद्धिति क्रियाविशेषणस्थलेकर्मविभक्तिः नपुंसकलिङ्गत्वं विशेषणविभक्तिश्च
साधुत्वार्था तथाचलघुभिन्नपाकानुकूलकृतिरित्यन्वयबोधेऽन्योन्याभावविषयकेविशेषणविशेष्य
194 वाचकपदयोःसमानविभक्तिकत्वाभावेनव्यभिचारइत्यर्थः मज्विनिर्मोके नञ्समभिव्याहारस्थले
तत्रेति यथाभूतलेघटइत्युक्तेऽभेदान्वयबोधेसमानविभक्तिकपदत्वेनकारणतयाभूतलघटयोरभे
दान्वयबोधेऽप्याकांक्षा अतोनञ्समभिव्याहारेभूतलंनघटइत्युक्तेभूतलेघटान्योन्याभावबोधः अ
न्यत्रेति नञ्समभिव्याहारेप्रतियोग्यनुयोगिपदयोरभेदान्वयेप्याकांक्षाशून्यस्थलइत्यर्थः अन्ये
ति अत्यन्ताभावबोधकत्वमित्यर्थः यथापचतीत्युक्तेपाकानुकूलकृतिचैत्रयोर्नाभेदेनाकांक्षा किंत्वा
श्रयतयैवेति नपचतीत्यत्रनान्योन्याभावबोधः किंत्वत्यन्ताभावस्येति तथाचप्रतियोग्यनुयोगिनो
रभेदान्वयबोधेयादृशसमभिव्याहारज्ञानंकारणं तयोरन्योन्याभावबोधेतादृशसमभिव्याहारज्ञानं
कारणं एवमत्यन्ताभावबोधेऽभेदान्वयेप्याकांक्षाशून्यप्रतियोग्यनुयोगिवाचकपदसमभिव्याहृत
नञ्पदज्ञानंकारणमित्यर्थः तदेवोपपादयति अस्तिचेति नञ्समभिव्याहारे घटपटयोरिति वि १८४

194A

शेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य विरुद्धविभक्तिराहित्यस्य वाऽभेदान्वयबोधे साकां-
क्षत्वादिति भावः । तत्र न घटः पट इत्यत्र नाभेदेति भूतले घट इत्यत्र भूतलवृत्तिर्घट इत्येवान्वयबोधात्
आधारत्वस्य सप्तम्यर्थतया नाभेदान्वयबोधकत्वमिति तत्र संसर्गाभावप्रत्यय एवेति भावः । अत्र चान्योन्याभा-
वबोधे विशेषणविशेष्यवाचकपदयोः समानविभक्तिकत्वस्य तन्त्रत्वे दधि न सुन्दरमित्यत्र लुप्तविभक्त्यनुसंधा-
नेन शाब्दबोधोपपादनेपि चैत्रो न पचतीत्याख्यातस्य कर्तरि लक्षणायां चैत्रे पाककर्तृभेदान्वयात् न स्तोकं
पचतीत्यादौ पाके स्तोकस्य भेदप्रतिपादनाच्च तत्र समानविभक्तिकत्वाभावाद्व्यभिचारः । विरुद्धविभक्ति-
राहित्यस्य तन्त्रत्वे च प्रतियोगिपदोत्तरविभक्तिविरुद्धविभक्तिशून्यानुयोगिविभक्तिपदसमभिव्याहृत-
नञ्पदत्वेनानुयोगिपदोत्तरविभक्तिविरुद्धविभक्तिशून्यप्रतियोगिपदसमभिव्याहृतनञ्पदत्वेन वा हेतु-
त्वे न पचतीत्यादौ प्रतियोगिपदोत्तरविभक्तेरप्रसिद्धेः । न स्तोकं पचतीत्यादावनुयोगिक्रियापदोत्तरसुब्वि-
भक्त्यप्रसिद्धेस्तयोर्नानुगतरूपेण हेतुत्वम् अन्ययोरन्यतरस्य हेतुत्वे चाननुगमः । किन्तु विशिष्यानुयो-
गिप्रतियोग्युपस्थापकनामपदयोः समानविभक्तिकघटपदसमभिव्याहृतनञ्पदत्वेन चैत्रो न पचती-
समभिव्याहृतसमानविभक्तिकत्वेन तच्च घटो न नील इत्यत्र घटपदार्थान्वितनीलपदार्थान्योन्याभावबो-

ना॰प्र॰ धेनीलपदसमानविभक्तिकघटपदसमभिव्याहृतनञ्पदत्वेन चैत्रो न पचतीत्यादौ धर्मिपराख्यातसमभिव्या
१९५ हृतनञ्पदत्वेन न स्तोकं पचतीत्यादौ क्रियाविशेषणस्तोकसमभिव्याहृतद्वितीयान्तस्तोकादिपदसमभिव्याहृतन
ञ्पदत्वेन न हेतुतेति विबोध्यं ननु पुरुषोत्तम इत्यत्र न तावत्कर्मधारयः कर्मधारये विशेषणवाचकपदस्य पूर्वभा
195 वनियमेनोत्तमपदस्य पूर्वनिपातापत्तेः न च विशेष्यविशेषणभावे कामचार इति वाच्यं जातिनिमित्तके गुण
निमित्तकं विशेषणमेवेति नियमात् अत एवोत्पलं नीलमिति न प्रयोगः नापि षष्ठीसमासः न निर्द्धारणे इ
त्यनेन निर्द्धारणे षष्ठीसमासनिषेधादित्यत आह संक्षेप इति पुरुषोत्तम इत्यादौ क्वचिद्विशेषणं परं स्यादि
त्यनेन परनिपातस्याप्यनुशासनसिद्धत्वात् कर्मधारयस्यैवोपगमात् अथ तथापि विशेषणं विशेष्येण बहुल
मिति सूत्रे उभयोपादानबलाद्विशेषणविशेष्यतावच्छेदकयोः परस्परव्यभिचारित्व एव कर्मधारय इति प्राप्ते
एवं चात्र द्रव्यत्ववत्त्वस्य घटादिसाधारण्येन पुरुषावधिकोत्तमत्वासंभवेन सार्वज्ञ्यादिमत्त्वरूपोत्तमत्वस्य
च पुरुषत्वव्यभिचारित्वाभावात्कथं कर्मधारय इति चेन्न उद्देश्यतावच्छेदकविधेयतावच्छेदकयोरन्यतरव्य
भिचारित्व एव कर्मधारयात् अत एव शिंशपा वृक्षस्येति संगच्छते एतेनोद्देश्यतावच्छेदके विधेयभिन्नवृत्ति
त्वमेव तंत्रमिति संप्रदायमतमपास्तं प्रमेयवह्निमानित्यादावगतेः न च तथापि गुणवद्द्रव्यस्येत्यादावगति

१९५

195A

रितिवाच्यं तत्रान्वायस्याऽभेदार्थकषष्ठीसमासोपगमात् अन्यथाभवन्मतेप्युगतेः अथवायषष्ठीसमासए
वाय नचातनिर्द्धारणइत्यनेननिषेधः समुदायापेक्षयाजातिगुणक्रियाद्यवच्छेदेनैकदेशस्यपृथक्क
रणंहिनिर्द्धारणं निर्द्धार्यत्वविशिष्टसामान्यधर्मावच्छिन्नापेक्षयाजातिगुणक्रियाद्यवच्छेदेनयत्किंचिद्धर्मि
णोभेदबोधनमितियावत् नचात्रतत्संभवति श्रीकृष्णत्वविशिष्टोपस्थापकपदाभावात् पुरुषोत्तमपदस्य
योगरूढतयातत्संभवेपिसमासवाक्यादन्यतरस्तदनुपस्थितेः यथानराणांक्षत्रियःशूरतमइति नतुनरक्ष
त्रियःशूरइति [illegible]निर्द्धारणरूपार्थेषष्ठीसमासनिषेधेपिशेषःइतिवदभेदार्थकषष्ठीसमासेबा
धकाभावः अत्रचनिर्द्धारणषष्ठ्याअभेदोभेदश्चार्थः निर्द्धार्यपदार्थविशेष्यतयाप्रकृत्यर्थेविशेषणतया
चभेदान्वयः नराभिन्नःक्षत्रियःक्षत्रियान्यनरान्यशूरतमाभिन्नइत्यन्वयबोधः शूरतमत्वावच्छेदेनक्षत्रि
यान्यनरान्यत्वान्वयः नातःक्षत्रियान्यनरस्यशूरतायांताद्यप्रयोगः घटानांक्षत्रियःशूरतमइतिविजा
तीयापेक्षयानिर्द्धारणापत्तेरभेदोप्यर्थः अभेदसंसर्गकबोधेविरुद्धविभक्तिराहित्यस्यतन्त्रतयासंसर्गम
र्यादयातद्ग्रहासंभवात् केचित्तुनिर्द्धारणषष्ठ्याअभेदएवार्थः नराभिन्नक्षत्रियस्यतादात्म्यनशूरतमत्वा
वच्छेदेनान्वयान्नराहोःशिरइत्यादिनाःविशेषः शूरतमत्वंचनरनिष्ठशूरतमताविशेषः तेनदेवानाम

विशूरत्वान्वितानाद्यशब्दप्रयोगानुपपत्तिरित्याहुस्तन्न क्षत्रियमुख्यविशेष्यकानुभवापलापापत्तेः नराणां प्रथम
याः शूर इत्यपिप्रयोगापत्तेश्च क्षत्रियनरः शूरत्ववान् क्षत्रियभिन्ननरः शूरत्वाभाववान् इति रघुमतमपि
प्रथमांतार्थमुख्यविशेष्यकबोधस्यानुभवापलापापत्तेरनादेयं क्षत्रियान्यपरत्वव्यापकभेदप्रतियोगितावर
च्छेदकत्वं विशिष्टतादात्म्यसंबंधेन नराभिन्नक्षत्रिये शूरत्वमत्वस्यान्वय इत्यभेदस्यैव निर्द्धारणषष्ठ्यार्थ इत्यस
परे अन्ये तु निर्द्धारणषष्ठ्यास्तादात्म्यं व्यवच्छेदश्चार्थः व्यवच्छेदश्च द्विरूपो त्यन्ताभावो न्योन्याभावश्च
षष्ठीसमभिव्याहृतप्रातिपदिकस्य स्वार्थीभूततदन्यस्मिन्लक्षणा षष्ठ्यर्थेभव च्छेदे चाधिकरणत्वेनलक्ष
णा कार्या; प्रतियोगित्वेन च विधेयपदार्थो भासते क्षत्रियाणां कर्णः प्रचुरं ददातीत्यादौ कर्णपदस्य कर्णः क
र्णान्यश्चार्थः क्षत्रियाभिन्नकर्णः प्रचुरदानकृतिमान् क्षत्रियाभिन्नाः कर्णान्याः प्रचुरदानकृत्यभाववानित्य
न्वयः गवां कृष्णा सम्पन्नक्षीरेत्यत्र कृष्णापदस्य कृष्णान्तरन्यार्थः गवाभिन्ना कृष्णा सम्पन्नक्षीरा गवाभि
न्नाः कृष्णान्याः सम्पन्नक्षीरत्वाभाववत्य इत्यन्वयबोध इत्याहुः पुरुषेषूत्तम इति सप्तमी स एव नच निर्द्धारणेष
ष्ठीसमासवत्सप्तमीसमासोपि निषिद्ध इति वाच्यं स्वरविशेषनिषेधस्यैव सूत्रप्रयोजनत्वात् षष्ठीसमा
से उत्तरपदस्यांतोदात्तत्वं सप्तमीसमासे तु पूर्वपदे प्रकृतिस्वरणावतिष्ठत इति सप्तमीसमासो निर्द्धा

196A

रणरूपेर्थेपि साधुरित्यपि केचिदिति कृतं पल्लवितेन ननु स्वायत्ते शब्दप्रयोगे किमित्यवाचकं प्रयुंज्महे
इति न्यायेन तटे घोष इति विहाय गंगायां घोष इति लक्षणामुखप्रयोगे बीजाकांक्षायां शैत्यपावनत्वादिप्रतीति
रेव प्रयोजनत्वेनावसीयते साच लक्षणं विना नोपपादयितुं शक्येति व्यंजना व्याप्त्यातिरिक्ता वृत्तिरूपेयेत्यत आ
ह व्यंजनांचेति नवृत्त्यंतरमपि शक्तिलक्षणातिरिक्तानवृत्तिरित्यर्थः तथाचेयं यदि शक्तिलक्षणात्मि
कातदा शक्तिलक्षणातिरिक्तत्वाभावः यदि च न शक्तिलक्षणात्मिका तदा न वृत्तिरित्यतिरिक्तत्वाभावः यदि च
न शक्तिलक्षणात्मिकातदा न वृत्तिरिति अतिरिक्तवृत्तित्वाभावत्वमव्याहतं ते मनसि [illegible] सिद्धिव्याघातः क
थं तर्हि शैत्यपावनत्वादिप्रतीतिरित्यत आह लक्षणयैवेति तदर्थेति व्यंग्यार्थप्रतीत्युपपत्तेरित्यर्थः प्र
त्यक्षानुमित्योरेव सामग्रीभेदाद्भेद इत्याशंकते नन्विति दूरं लक्षणयैव तदर्थसिद्धिरूपं मुख्यार्थ इति
गंगायां घोष इत्यत्र गंगापदमुख्यार्थे प्रवाहे इतरान्वयानुपपत्तिः घोषाधिकरणत्वानुपपत्तिर्लक्षणाबी
जमित्यर्थः ननु किमेतावतेत्यत आह नचेति नहीत्यर्थः वापीं स्नातुमितो गतासि न पुनस्तस्याधमस्यांति
कमित्यत्र गतामपि ह्रतीं भ्रमति मगतासीति मुख्यार्थान्वयानुपपत्तिरस्त्येवेति अधमपदे लक्षणासंभवत्येवे
त्यत आह सर्वत्रेति तदेवाह गच्छगच्छसीति गच्छगच्छसि चेत्कांत पन्थानः संतु ते शिवाः ममापि जन्म

त॰प्र॰ न्म तत्रैव भूयाद्घटगगनेनो भवानित्यत्र गत्वा ग्रामेनेमे मरणं भवितेत्यतस्त्वं मा गा इतिव्युत्पत्ते तत्र च मुख्यार्था
१८७ न्वयानुपपत्ते र्लक्षणाबीजस्याभावात्कलक्षणासंभव इति व्यंजनाख्यवृत्त्यंतरमावश्यकमिति भावः अन्व
197 यानुपपत्ति र्लक्षणाबीजमित्यत्र बीजशब्दार्थं विकल्प्य दूषयति किमिदमिति तज्जनकत्वं लक्षणाज
नकत्वं गंगेति शक्यसंबंधो हि लक्षणा सा च गंगायां घोष इत्यत्र गंगातीरयोः संयोगस्तत्र चान्वयानुपपत्तिः
ज्ञानं कारणमित्यर्थः तज्ज्ञापकत्वं लक्षणाज्ञापकत्वं चक्षुरादिनेति यत्र गंगापदस्य गंगातीरत्वेन
लक्षणा तत्र तत्संबंधविषयकशाब्दात्मकज्ञानस्यानुपपत्तिज्ञानव्यतिरेकेऽनुदयेपि चक्षुरादिना तल्लौकि
कप्रत्यक्षे जननीये तदनपेक्षणाद्व्यतिरेकव्यभिचारेणान्वयसामान्यतस्तज्ज्ञापकत्वसंभव इति भावः नच
लक्षणाविषयकशाब्दबोधजनकत्वमेव तत्त्वमिति वाच्यं यत्र गंगापदस्य तीरे जहत्स्वार्था लक्षणा तत्र
गंगातीरसंबंधस्य शाब्दबोधाविषयत्वेनान्वयव्यभिचारेण तथात्वसंभव इति एवमग्रेपीति ध्येयं नापी
ति तत्तात्पर्य्यग्राहकत्वं शक्यसंबंधरूपलक्षणा तात्पर्य्यग्राहकत्वं तात्पर्य्येति प्रकरणादिनापि तद्ग्र
हात् तात्पर्य्यग्रहात् इत्यर्थः तथा च मुख्यार्थान्वयानुपपत्तिज्ञानस्य व्यभिचारात्सामान्यतस्तात्पर्य्यग्र
हहेतुत्वं एवं च क्वचित्तदपेक्षणेपि सर्वत्रानपेक्षिततया प्रकारांतरेणैव तात्पर्य्यग्रहसंभवेन लक्षणाबी १८७

197A

बाधकाभावइतिभावः तत्र लक्षणाबीजत्वं यष्टीरिति यष्टीःप्रवेशयेत्यत्र यष्टिपदस्य यष्टिधरे लक्षणा
नचतत्र मुख्यार्थे यष्टीप्रवेशनान्वयानुपपत्तिरितिव्यभिचारादित्यर्थः ननुमुख्यार्थे इतरान्वयानुपपत्तिर्नल
क्षणाबीजमपितुतात्पर्यविषयानुपपत्तिरेवेतिनव्यभिचारइत्याशंकते तात्पर्येति तत्रापीति यष्टीःप्रवेश
येत्यत्रापीत्यर्थः अस्तीति भोजनप्रवेशप्रयोजनकप्रवेशनमेवात्र तात्पर्यविषयः तदनुपपत्तिर्मुख्यार्थेय
ष्टावस्त्येवेत्यर्थः सर्वत्रेति गंगायांघोषइत्यादावपीत्यर्थः अस्तुकोदोषइत्यतआह साचेहापीति साच
तात्पर्यानुपपत्तिश्च इहापि गच्छगच्छसीत्यादिव्यंजनास्थलेपि अस्तीति अत्रकांतगमनाभावएवता
त्पर्यविषयः तदन्वयानुपपत्त्यागमनबोधकपदस्यगमनाभावेलक्षणयैवोपपत्तौनातिरिक्तव्यंजनाकल्प
नंगौरवादितिभावः लक्षणाप्रयोजनं गंगापदस्यतीरेलक्षणाप्रयोजनं शैत्येति स्वापत्तेशब्दप्रयोगेकि
मित्यवाचकंप्रयुंज्महइतिस्यात् गंगातटेघोषइतिविहायगंगायांघोषइतिलक्षणयाप्रयोगस्ततस्तुशै
त्यपावनत्वादिप्रतीत्यर्थमेवेत्युन्नीयतेलक्षणयाः प्रयोजनवत्त्वनियमादितिभावः तत्प्रतीतिः शैत्य
पावनत्वादिप्रतीतिः लक्षणेति शैत्यपावनत्वादौलक्षणासाध्यइत्यर्थः प्रयोजनाभावात् प्रयोजनस्य
प्रयोजनांतराभावादित्यर्थः प्रयोजनाभावेपिलक्षणायांकोदोषइत्यतआह लक्षणायाश्चेति यथागंगाप

त॰प्र॰ इत्यतीरे लक्षणायां लक्ष्यप्रतीत्यतिरिक्तशैत्यपावनत्वादिप्रतीतिः प्रयोजनं तथा शैत्यपावनत्वे लक्षणायां तर
१८८ स्याप्रयोजनान्तराभावाल्लक्षणाया निर्वाहेण प्रकृतप्रयोजनप्रतिपत्तये व्यंजनाख्यवृत्तिराद्रणीयेति भावः
शैत्यपावनत्वादौ लक्षणैव न च तस्याः प्रयोजनाभावः शैत्यपावनत्वादिप्रतीतिरेव प्रयोजनत्वादिति समा
198 धत्ते लक्ष्यमिति तथापि प्रयोजन लक्ष्यप्रतीतिप्रयोजनकत्वेपि प्रयोजनान्तरं लक्ष्यप्रतीत्यतिरिक्तं प्रयोजन
नान्तरं ततः किं लक्ष्यप्रतीत्यतिरिक्तप्रयोजनाभावे किमनिष्टमित्यर्थः ननु लक्षणाया लक्ष्यप्रतीत्यति
रिक्तप्रयोजनवत्त्वनियमभंग एवानिष्टमित्यत आह लक्षणायाहीति ननु गौरवेप्यन्यत्रादृष्टत्वात्तथा कल्प
नीयं न ह्यत्र कार्यकारणभावे गौरवादीत्यत आह अप्रयोजकत्वाच्चेति न यत्र कुत्रचिद्दर्शनमात्रेणै
वतादृशनियमावधारणं मानाभावादिति भावः तथा च लक्षणायैव प्रयोजनप्रतीतिनिर्वाहेन व्यंजनान्तरक
ल्पनमिति प्रसिद्धतया लक्षणामूलव्यंजनां निरस्याभिधामूलां तां निरसितुं शंकते स्यादेतदिति ना
नार्थेति सैंधवमानयेत्यादौ अश्वविशेषेति अश्वादिरूपार्थप्रत्यये प्रकरणादि गमनप्रकरणा
दि निर्णायकमिति शक्ततावच्छेदकैक्ये सति शक्ततावच्छेदकनानात्वमेव नानार्थत्वं न त्वसैंधवमा
नयेत्यादौ भोजनप्रकरणे शक्यविशेषस्यात् लक्षणस्येवाश्वादेरपि प्रतीत्यापत्त्याऽभिधया नानार्थनिष्ठ १८८

198A

यकशाब्दबोधेजननीयप्रकरणादिकं सहकार्य्यविशेषवाच्यमिति भावः प्रकरणादिशून्येति गमनादिप्रक
रणशून्यायाश्वादिरूपार्थान्तरमित्यर्थः तत्र अर्थान्तरप्रत्यये अभिधा शक्तिः सहकारीति प्रकरणरूपस
हकार्य्यभावादित्यर्थः लक्षणा मूलमित्यनुषज्यते अयोगात् लक्षणाया अयोगात् मुख्यार्थान्वयानुपप॰
त्यादिलक्षणाकल्पनं प्रकृते च तदसंभवेन न लक्षणेति भावः अत अर्थान्तरप्रत्ययानुरोधेन तथा च तत्प्रती
त्यर्थं व्यंजनारूपवृत्त्यन्तरमावश्यकमिति भावः नानार्थस्थलेऽर्थान्तरप्रतीतिः शक्त्यैव नच प्रकरणाभावेस
हकार्य्यभावदिति वाच्यं तस्य सहकारित्वासंभवादिति न वृत्त्यन्तरमिति समाधत्ते प्रकरणादीनामिति स
हकारित्वेति नानार्थविषयकशाब्दत्वावच्छिन्नं प्रति प्रकरणादीनां न कारणताऽननुगमेन व्यभिचारादित्यर्थः
ननु प्रकरणादीनामननुगमेऽपि तात्पर्य्यग्राहकत्वेनानुगमात् न व्यभिचारादीत्याशंकते तात्पर्य्येति लाघवादि
ति नानार्थविषयकशाब्दत्वावच्छिन्नं प्रति तात्पर्य्यग्रहजनकत्वेन कारणतापेक्षया लाघवात्तात्पर्य्यग्रहत्वेने
व हेतुतास्त्विति न प्रकरणादीनां सहकारितेति भावः नन्वस्तु तात्पर्य्यग्रह एव सहकारी तथापि तत्स्वरूपस
हकार्य्यभावादेव कथमभिधयाऽपदार्थप्रतीतिरित्यत आह संचेति तात्पर्य्यग्रहश्चेत्यर्थः इहापीति प्रक
रणादिशून्यार्थान्तरस्थलेपीत्यर्थः अस्तीति नानार्थस्थले शक्त्याएकार्थप्रत्ययानंतरमपि रपदार्थप्रतीति

त॰प्र॰ स्तत्रापि तात्पर्यग्रहोऽस्त्येवेत्यर्थः तात्पर्यग्रह एवार्थप्रत्यायकः परं तु यत्र समस्तार्थप्रकरणं तत्र प्रथमत ए
१९९ व तात्पर्यग्रहाद्वाच्यवदर्थप्रतीतिरपरार्थे तु तात्पर्यग्रहानन्तरं तात्पर्यग्रहे सत्यपरार्थप्रतीतिरिति स्तत्र
स्यंतरस्वीकारोऽतोऽस्तीति हृदयं लक्षणायैव व्यंग्यत्वेनाभिमततत्तदर्थप्रतीतिनिर्वाहे लं व्यंजनेयत्युक्तं तत्र लक्षणा
199 तो भेदं साधयति स्यादेतदिति षट्वृत्तिः पदनिष्ठा इयं तु व्यंजनात्वेनाभिमता तु पदतदेकदेशेति पदे तदे
कदेशवर्णी क्वचिद्वाक्यरचनाविशेषे क्वचिदर्थभंगीविशेषे त्वाकारे क्वचिदाश्रितेति आश्रयभेदात् ल
क्षणाव्यंजनयोराश्रयभेदाद्भेदः लक्षणाव्यंजनयोर्भेद इत्यर्थः असिद्धेरिति व्यंजनात्वेनाभिमतवृत्तेः प
दैकदेशाद्याश्रितत्वासिद्धेरित्यर्थः कथं पदैकदेशादिवृत्तिविशेषप्रतीतिप्रसक्तिस्तत्राह तदेकेति पदैकदेशाद
बोहीत्यर्थः ननु तर्हि निपूरिकः ननु तत्तदर्थश्रुतिपादकाः येन तत्प्रतिपत्त्यनुकूलव्यंजनाव्यवहृत्तिस्तत्रस्वी
कर्तव्येति भावः लक्षणेति लक्षणाजन्यशाब्दबोधेकारणमित्यर्थः स्वोन्मेति स्वेन रचितेत्यर्थः यत्र स्वयम
न्यतात्पर्येण काव्यं रचितं श्रोतुश्चान्यपरार्थे शाब्दबोधस्तत्र एवं देवताप्रसादादिना रचिते काव्ये तस्या
पि ज्ञानाभावेन तदर्थे तात्पर्याभावेन च तात्पर्यग्रहासंभवादिति भावः चमत्कारादिति चमत्कारिबोधवि
षयत्वादित्यर्थः तथा च तात्पर्यज्ञानरूपसहकार्यभावेन लक्षणया तदर्थबोधस्योपपादयितुमशक्य १९९

199A

तयाव्यंजनाखीकार्य्यमितिभावः व्यंग्य इति गंगायां घोष इत्यादौ व्यंजनया हि शैत्यपावनत्वं प्रतीयत इति त्वदभि
मतं तत्र यदि न तात्पर्य्यग्रहापेक्षा तर्हि लक्षणायाः प्रयोजनवत्वनियमात् शैवालवालुकादिप्रतीतिरेव व्यंजनर
यास्यादिति तत्र तात्पर्यग्रहस्यावश्यापेक्षितत्वेन तेन व्यंजनेरणेति भावः शंकते वासनेति सहृदयानां कश्चिद्
वंसंस्कारविशेषः प्रतिभाव्यपदेश्यो येन शैत्यपावनत्वमेव प्रतीयते न तु शैवालवालुकादिकमित्यर्थः नि
यम इति शैत्यपावनत्वादेरेव भाननियमः स एव वासनाविशेषपरिपाक एव नियामकः तत्र इत्थं विशे
षबोधनियामकः ननु तात्पर्य्यग्रहस्य लक्ष्यार्थबोधे नियामकत्वे लक्षणायां मुख्यार्थान्वयानुपपत्त्युपयोगो
न स्यात् लक्ष्यतात्पर्य्यग्राहकत्वेनैव तस्या उपयोगादित्यत आह वस्तुत इति अस्याः स्त्रियः उन्नीयते अ
नुमीयते यत्र नानुमितिसामग्री तत्राह संभाव्यते वेति उत्कटकोटिकसंशयरूपसंभावनाविषयी क्रियते
वेत्यर्थः न त्विति तथा च मा गा इत्यर्थे गमनाभावप्रतीतौ वक्तुर्यच्चरितत्वरूपतात्पर्य्यमुन्नीयते संभाव्यते वा
न तु शब्दात्मकस्तन्निर्णयः येन व्यंजनं स्वीकरणीयमिति भावः एत एवेति प्रातिलक्षण एवेत्यर्थः नहीं
ति प्रजयतीत्यत्र प्रकर्षो जयो बुध्यते तत्र जिधातोर्जयोर्थः प्रकर्षश्च कस्यार्थः प्रादेरुपसर्गस्य शक्त्यनं
गीकाराद्व्यंजनाख्यवृत्तिः स्वीकरणीयेत्याखण्डलार्थः तस्य प्रादेरुपसर्गस्य द्योतकत्वात् व्यंजकत्वांगी

त.प्र. कारणत्वप्रसक्तत्वादिति उपसर्गाणां क्वचिदपि शक्त्यभावेन शक्यसंबंधरूपाया लक्षणाया असंभवादित्यर्थः
२०० तथाच प्रकर्षबोधार्थं व्यंजनास्वीकार आवश्यक इति भावः जयति। जिधातुः जिधातुनैव लक्षणया प्रकर्ष
बोधे प्रशब्दवैयर्थ्यमत आह प्रशब्दस्त्विति तात्पर्येति प्रकृष्टजयता त्पर्य्यग्राहक इत्यर्थः प्रशब्दसमभिव्या
200 हारेणैव हि जिधातुः प्रकृष्टजयप्रतीतीच्छयोच्चरित इति तात्पर्य्यग्रहात् अन्यथा जयतीत्यत्रापि प्रकर्षबोधाप
त्तेरितिभावः नन्वेवमुपसर्गाणां द्योतकत्वप्रवादव्याघात इत्यत आह तत्त्वमेवेति तात्पर्यग्राहकत्वमेवेत्यर्थः
तदस्याः शक्तेर्न चेति जयः शक्यएव जिधातोः शक्यएव तथाच शक्त्यैव तदर्थबोधसंभवे किमर्थं तदेशे ल
क्षणेति भावः प्रकर्ष इति तत्र शक्त्यभावादितिभावः शक्यं जिधातोः विशिष्टजय इति प्रकृष्टजय इत्यर्थः
तथाच जिधातोर्जयत्वं शक्यतावच्छेदकमितिप्रकृष्टजयत्वप्रकारकबोधो विनालक्षणां न संभवतीति तेन रू
पेण लक्षणा नच जयस्य शक्यप्रकर्षस्य च लक्षणया बोधे बाधकाभाव इतिवाच्यं युगपद्वृत्तिद्वयविरोधेन शा
क्तिलक्षणाभ्यामेकदा बोधासंभवादितिभावः ननु जयस्य शक्यत्वात्कथं तत्र लक्षणेत्यतः प्राचां संवादमाह
तदाहुरिति शक्यादिति शक्यतावच्छेदकविशिष्टे शक्तिस्वीकारेण शक्यतावच्छेदकस्यापि शक्यत्वात् शक्या
दित्यस्य शक्यतावच्छेदकत्वादित्यर्थो विसेयः ननु प्रादेरुपसर्गस्य प्रकर्षे शक्तिं जिधातुनाच जयबोध इत्यस्त्वि २००

200A

न्युपसर्गे शक्तिवादी शंकते नन्विति अन्यलभ्यत्वादिति धातोर्लक्षणादिनालभ्यत्वादित्यर्थः अन्यथागं
गापदस्यापि तीरे शक्त्यापत्तेरिति भावः ननु व्यतिसे इत्यत्रास धातोर्लोपात्कथं व्यत्ययप्रत्ययः धातोस्तत्र लुप्तत्वे
न लक्षणासंभवादनायत्योपसर्गे शक्तिरत आह व्यतिसे इति लुप्तो धातुरिति सत्कः सन्निति शेषः धातो
रप्रतिसंधाने व्यत्ययबोधाभावेऽप्यापत्तिमाह लातुलोपमिति नन्नूपसर्ग एव शक्तिर्धातोरेव तात्पर्यग्राह
कत्वमित्येव किं न स्यादित्यत आह संक्षेप इति उपसर्गं विनापि जयतीत्यत्र धातुप्रयोगात्तत्र शक्तिरावश्यक
की केवलस्योपसर्गस्य चाप्रयोगात्तत्तुल्यत्वं एवं धातोरशक्तत्वे प्रजयतीत्यादौ जये अभ्यासानार्थभावनान्व
यो न स्यात् प्रत्ययानां प्रकृत्यर्थान्वितस्वार्थबोधकत्वमिति व्युत्पत्तेरिति बोध्यं न च जि धातोर्जयवदुत्कर्षो
पि शक्य एवास्तु किं न अलक्षणया एकतिङ्पदस्य प्रकृतिवर्त्तमानत्वयोरिवैकपदार्थयोरपि प्रकर्षजययोः
परस्परमन्वयः धातूनामनेकार्थत्वस्य चल्कृप्तत्वादितिवाच्यं धातूनामनेकार्थत्वेऽपि न सर्वत्र सर्वार्थक
त्वं किंतु व्याकरणकोशाद्यभियुक्ततत्तदर्थकत्वं न तु लक्षणयापि प्रकर्षबोधोपपत्तेर्न शक्तिसाधकमिति अ
र्थैवं प्रत्ययमात्रस्यैव निरर्थकत्वप्रसंगः घटमित्यादावपि घटपदस्य घटकर्मत्वे लक्षणयैवोपपत्तेरिति चे
न्न घटमानयेत्यादौ घटपदस्य घटकर्मत्वे लक्षणोपगमे चैत्रः पचतीत्यत्र पच धातोरेव पाककर्तृलक्षण

न॰प्र॰ र्थांतयोरानयनचैत्रयोरनन्वयापत्तिः नामार्थयोरिव नामार्थधात्वर्थयोरप्यभेदातिरिक्तसंबंधेन साकांक्ष
२०१ न्वयबोधानुपगमात् नचैतथापि द्वितीयादेरेकत्वशक्तौ बीजाभावः घटपदस्यैकत्वविशिष्टघटे लक्षणाया
प्युपपत्तेः क्रमः कर्मत्वविशिष्टे शक्तिः एकत्वविशिष्टघटे लक्षणायां तात्पर्यग्राहकत्वाच्च एवं पचेतेत्या
201 दौ कार्यत्वेष्टसाधनत्वादेरपि विध्यर्थत्वविलोपः पचधातोरेव कार्यत्वेष्टसाधनत्वविशिष्टपाके लक्षण
याप्युपपत्तेः विधिःस्तु तौ शक्तौ विशिष्टार्थे तात्पर्यग्राहकत्वमिति वाच्यं घटपदादेर्वा विशिष्टे लक्षणा द्वि
तीयादेर्वैकत्वे इत्यत्र विनिगमनाविरहात् द्वितीयादेरेकत्वबोधकत्वबोधकत्वे सिद्धे कर्मत्वत्वं वा शक्यता
वच्छेदकमेकत्वादिकं वेत्यत्र विनिगमनाविरहाल्लाघवाच्च तत्र शक्तिः एवं पचेतेत्यत्र धातोर्वा
विशिष्टे लक्षणा विधेर्वा कार्यत्वेष्टसाधनत्वे इत्यत्र विनिगमनाद्विधेरपि कार्यत्वादिबोधकत्वे सिद्धे लाघ
वात्तत्र शक्तिरेवेति एवं चोपसर्गाणामव्ययस्योपसर्गस्य क्वचनाप्यर्थे शक्तिर्न प्रामाणिकी तस्य द्योतक
त्वमेव यथा प्रादेः यस्य च शक्तिः प्रामाणिकी तस्य बोधकत्वमेव यथा निरुपादेः अन्यथोपकुंभमित्यव्ययीभा
वसमासानुपपत्तेः तस्य निरर्थकत्वेन निराकांक्षत्वात् एवं वाव्ययीभावे यस्य सोऽव्ययीभावश्चेत्यनुशा
सनात् नच प्रादेरपि निरर्थकत्वेन तेन सह समासानुपपत्तिः नाम्नामिव समासविधानात् वस्तुवाचिन २१

20/A

एवं नामत्वादिति वाच्यं स्वार्थं नमिहनामेष्टमित्यनेन स्वार्थं तत्वेन तस्यापि नामत्वात् वस्तुवाचीति नामानीत्य
स्यैकदेशिमतत्वादिति केचित्तु प्राञ्चस्त्रिविधं प्रकृष्टजयेषशक्तिरिति उपसर्गाणां शक्ततावच्छेदकत्वमेतर
चद्योतकत्वं तथाचोपसर्गाणामोपसन्दिग्धानिकीशक्तिरित्याहुः भुक्त्वा व्रजतीत्यत्र भोजनेव्रजनपूर्वका
लीनत्वस्य नियमेन प्रतीतेः पूर्वकालत्वं क्त्वाप्रत्ययार्थः न च मासादिनाव्यवधानेपि न तत्प्रयोगापत्तिरि
ति वाच्यं तथाविवक्षायामिष्टत्वात् अन्येतु अव्यवहितपूर्वकालत्वं क्त्वावाच्यं अव्यवधानं च क्रियान्तरानु
कूलविलंबाभावत्वमेव तदनुकूलक्रियायास्तदव्यवधायकत्वादिंद्रियद्वव्यापाराणामित्याहुः अत्रेदं ते
णं विषयान्तरसंचारेपि भुक्त्वा व्रजतीति प्रयोगात् क्रियान्तरानुकूलविलंबाभावरूपस्याव्यवधानस्य दुर्व
चत्वात् तदुत्पत्तिक्षणोत्पत्तिकध्वंसप्रतियोगिकालत्वमेव तस्याव्यवहितपूर्वकालत्वं कालश्चात्र यावता कालेन
भोजनानंतरं व्रजनं तावान्स्थूलकालोपाधिविशिष्य निवेशनीयः तेन नासंभवः ननु दिवसादिरूपोपाधिने
न दिवसादिनाविलम्बे भुक्त्वा व्रजतीति प्रयोगापत्तिरिति केचित् न तु कालस्य तत्तदुपाधित्वेन निवेशनादननु
गतत्वाद्दुर्ज्ञेयं तस्मात्पूर्वकालत्वमेव वाच्यं ननु मुखं व्यादाय स्वपितीत्यादावोष्ठपुटविभागरूपव्यादानस्य
स्वापोत्तरकालीनत्वात् व्यादाने स्वापपूर्वकालत्वाभावेन कथं क्त्वानिर्देश इति चेन्न स्वापपूर्वकालेपि व्यादा

नसंभवेननतथाप्रयोगात् भुक्त्वा व्रजतीत्यत्रैव निरूढलक्षणया तथाप्रयोगादिति प्राभाकरास्तु समानक
र्तृत्वमेव क्त्वावाच्यं नियमतस्तेन रूपेणावबोधात् समानकर्तृकक्रियाद्वयस्यैकदाऽसंभवात् भोजनव्रज
नयोरेककर्तृकत्वेऽवगते एकस्यापरपूर्वकालत्वस्याक्षेपेणैव लाभान्न पूर्वकालत्वेपि शक्तिः विभिन्नक
र्तृकेपि पूर्वकालत्वसंभवे नैतेन समानकर्तृकत्वाक्षेपासंभवात् समानकर्तृकत्वे शक्तिरेव नचयत्रोप
वीतं वदनं पेयाममीलमालोऽधीयानो गच्छतीत्यादौ युगपदनेकक्रियाकर्तृत्वस्यैकस्मिन्नपि संभवान्नैते
न पूर्वकालत्वाक्षेपो युक्त इति वाच्यं तथाप्येककर्तृकप्रधानक्रियाद्वयस्य युगपदसंभवेन तयोः पूर्वोत्तर
भावनियमात् न चावज्ञानाक्षिमां यस्मात्त्वं तेन भविष्यति मत्प्रसूतिमनाराध्य प्रजेति त्वां शशाप से
त्यत्र मत्प्रसूतिमनाराध्येत प्रजा न भविष्यतीति भिन्नकर्तृकेपि क्त्वानिर्देशात्कथं समानकर्तृकत्वं क्त्वावा
च्यमिति वाच्यं तत्रानाराध्य स्थितस्येति क्रियान्तरमध्याहृत्य समाधानस्य सर्वसम्मतत्वादित्याहुः स्वदमत
समानकर्तृकत्वस्य क्त्वावाच्यत्वे तस्य प्रधानक्रियापेक्षयोत्तरकालत्वेनाप्युपपत्तेर्न भोजनेन नियमेन पूर्वका
लत्वाक्षेपसंभवः नच भोजनव्रजनक्रिययोरेकः कर्तेति नानुभवोऽपि तु भुजिक्रिया व्रजनक्रियैककर्तृके
ति तथाच भुजिक्रियायाः प्राधान्येनोपस्थितेस्तत्रैव पूर्वत्वान्वय इति वाच्यं प्राधान्येनोपस्थितेर्हि व्याकार

202A

त्वाप्रयोजकत्वेन शाब्दबोधे कथंचिन्नियामकत्वं स्यात् इदं हलाक्षेपो ऽनुमानं तत्र च व्याप्तिपक्षधर्मतयोरेव प्रयोज
कत्वेन पौर्वापर्याव्यवधारणसंभवे ऽपि पूर्वमात्राक्षेपकलिंगाभावेन पूर्वत्वाक्षेपासंभवात् न च परमते शाब्दानुपस्थि
तस्यापि शाब्दे भानमितिवाच्यं शाब्दीतिन्यायेन तन्मतस्य दुष्टत्वात् न च भुक्त्वा व्रजतीत्यत्र क्त्वार्थकालावरुद्ध
त्वेन व्रजनस्य कालान्वयनिराकांक्षतया तदनवरुद्धत्वात् भुजिक्रियायामेव पूर्वत्वान्वयः द्वयं च कालांतरसंबं
धित्वेनानुपस्थितिरेव प्राधान्येनोपस्थितिः सैव नियामिकेति वाच्यं पदानुपस्थितस्य शाब्दबोधाविषयतया
कालांतरसंबंधित्वेनोपस्थितेरकिंचित्करत्वात् किंच समानकर्तृकत्वेन न पूर्वत्वाक्षेपः किंतु समानकर्तृकप्र
धानक्रियाद्वयस्यैकदाऽसंभवात् प्रधानक्रियासमानाकर्तृकत्वे न पूर्वत्वाक्षेप इति वाच्यं तत्र प्रधानत्वेन ना
वन्मुख्यत उद्देश्यत्वं सत्यं तच्च उद्देश्यवत्तमावाद ईश्वर स्यादेवेत्यनास्थाविरहरूपं क्रिययोस्तुल्यवदुद्देश्यत्वे ऽपि एकदा
संभवेन व्यभिचारात् तथोद्देश्यतायाश्च विनिगंतुमशक्यत्वात् किंच समानकर्तृकत्व एव परेणाशक्तिरूपे प्रयोजने न
तु प्रधानत्वे ऽपीति कथं तेन पूर्वत्वाक्षेपः तदंशे ऽपि शक्त्यवगमे तु किमपराद्धं पूर्वकालत्वेनेति न किंचिदेतत् न च समान
कर्तृकत्वस्य नियमेन प्रतीतेस्तत्रापि शक्तिरिति वाच्यं अभिन्नकर्तृकत्वस्यैव समानकर्तृकत्वे ऽभेदांशे शक्त्यभावे ऽपि क्त्वा
लकाराभ्यां भोजनकर्तृर्व्रजनकर्तुरभेदान्वयबोधसंभवात्तयोः कृतिमात्रवाचकत्वे ऽपि व्रजनपूर्वकालीनभोजनकृ

त॰प्र॰ २२ तिमानित्यन्वये भोजनव्रजनरूपयोरेककाधिकरण्यस्याप्यभिधानसंभवात् नच समानकर्तृकत्वस्याशक्यत्वे चैत्रो
गच्छति मैत्रो भुंक्त इति प्रयोगवत् चैत्रो भुक्त्वा मैत्रो गच्छतीति भिन्नकर्तृकेपि क्त्वाप्रयोगप्रसंग इति वाच्यं वस्तु
203 तः समानकर्तृकक्रियायामेव क्त्वः साधुत्वात् भोक्तुं व्रजति पश्यन् व्रजतीत्यत्र तुमुन्शत्रोरपि समानकर्तृकत्वशंके:
केनाप्यनंगीकारात् मणिकृतस्त्वानंतर्यमेव क्त्वावाच्यं पूर्वकालत्वस्य शक्यत्वे व्रजनपूर्वकालीनं भोजनमिति
भोजनविशेष्यकानुभवः स्यात् जायते तु भोजनानंतरं व्रजनमिति व्रजनविशेष्यकानुभवः तथाचानुभव
स्यात्रविनिगमकत्वेनानंतर्यमेव क्त्वावाच्यं नच पूर्वकालत्वस्य शक्यत्वेपि तस्य निरूपकतासंबंधेन व्रजनेन्व
योपगमे व्रजनविशेष्यकोनुभव उपपद्यत एवेति वाच्यं नभुक्त्वा व्रजतीत्यत्र व्रजने स्वरूपसंबंधेन पूर्वकालत्व
स्याभावबोधेन भुक्त्वा व्रजत्यपि न भुक्त्वा व्रजतीति प्रयोगप्रसंगात् भोजननिष्ठपूर्वकालत्वस्य व्रजनेऽसत्वात्
वृत्त्यनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकतया निरूपकतया तदभावबोधासंभवादित्याहुः केचित्तु
सत्यपि कदाचिदध्ययने अधीत्य तिष्ठतीत्यप्रयोगात् निरंतराध्ययनशालिन्येव तत्प्रयोगाच्च क्वचित्सामानाधि
करण्यविशिष्टव्याप्यत्वमपि क्त्वाप्रत्ययार्थः व्याप्तिश्च कालिकी तथाचाध्ययनसामानाधिकरण्यविशिष्टाध्य
यनव्याप्यस्थितिमानित्यन्वयधीः निरंतराध्ययनविरहिण्यन्यदीयतत्त्वाध्ययनमादायातिप्रसंगवारणाय २३

203A

सामानाधिकरण्यनिवेशः न च स्वीयाध्ययनसामानाधिकरण्यविशिष्टपरकीयाध्ययनव्याप्यस्थिति
मादाय तद्व्याप्त्यतिप्रसंगो दुर्वार इति वाच्यं प्रधानक्रियायां प्रकृत्यर्थीभूतैकव्यक्तिनिरूपितयोरेव सामा
नाधिकरण्यव्याप्यत्वयोः क्त्वाप्रत्ययेन बोध्यत्वस्य व्युत्पत्तिविशेषबलेन कल्पनात् एतेन पूर्वकालत्वस्यैव क्
त्वार्थत्वे व्यादानशून्यकालेपि मुखं व्यादाय स्वपितीत्यपि प्रयोगापत्तिरिति निरस्तं अत्रापि व्याप्यत्वस्यैव क्त्वा
बोध्यत्वात् तत्स्वापे व्यादाननिरूपितव्याप्तेरभावादेव तथा प्रयोगापत्त्यसंभवात् भुक्त्वैवाहं तृप्तो न तु पी
त्वेत्यादौ भोजनपानयोः सत्त्वेपि पूर्वकालत्वस्य तृप्तौ तदानीन्तनत्वस्य वाऽविशेषेपि तथाप्रयोगान्नान्यत्वमपि क्वचि
त्क्त्वाप्रत्ययार्थः एवं च भुक्त्वा व्रजतीत्यादौ पूर्वकालत्वमात्रमर्थो वा उक्तस्थले च सामानाधिकरण्यविशिष्ट
व्याप्यत्वं जन्यत्वं चार्थ इति क्त्वाप्रत्ययो नानार्थ एवेत्याहुः अपरे तु क्त्वाप्रत्ययस्य कृदन्तर्गतत्वात् सामान्यपा
त्राऽऽश्रयोपस्थितेः कृत्प्रत्ययेन संभवात् व्यादानाश्रये स्वापाश्रयत्वस्य विशिष्टे वैशिष्ट्यमिति न्यायेन बोधः
विशिष्टे वैशिष्ट्यमिति न्यायेन शाब्दबोधे चोद्देश्यतावच्छेदकविधेययोः समानकालीनत्वभानं व्युत्पत्तिसि
द्धं अन्यथा तिलकी कर्म कुर्वीतेत्यादौ तिलकविशिष्टे कर्मकरणे वैशिष्ट्यलाभेपि तिलके सत्येव कर्मकरण
मित्यस्याप्राप्त्या तिलकशून्यकालेपि कृतस्य कर्मणो नैष्फल्यानापत्तेः तद्विधायकेन वाक्यस्यानर्थक्यापा

ताच्च तथा चैतादृशव्युत्पत्त्या कर्मकरणे तिलकसमानकालीनत्वस्य भाने तच्छून्यकाले च तत्समानका
लीनत्वस्याभावान्नैष्फल्यापपत्तिरिति प्रकृतेपि मुखंव्यादाय स्वपितीत्यादौ व्यादानविशिष्टस्वापाश्रय
त्ववैशिष्ट्यभाने व्यादानसमानकालीनत्वस्य भानात् व्यादानशून्यकाले तथाप्रयोगापत्त्यसंभवः एव
मधीत्य तिष्ठतीत्यादावपीत्याहुरिति दिक् एवमेवकारस्यान्ययोगव्यवच्छेदोऽयोगव्यवच्छेदोऽत्यंतायो
गव्यवच्छेदश्चार्थः तत्र विशेष्यसंगतैवकारस्थले पार्थ एव धनुर्द्धर इत्यादौ पार्थान्यतादात्म्यव्यवच्छेदो
बुध्यते पार्थान्यतादात्म्याभाववद्धनुर्द्धराभिन्नः पार्थ इति बोधः पृथिव्यामेव गंध इत्यत्र पृथिव्यन्यसमवेत
त्वाभाववान् पृथिवीसमवेतश्च गंध इति बोधात् प्रथमेतरविशेषणविभक्तिसमभिव्याहृतत्वमपि निया
मकं अत्र च भावान्वयबोधानुपगमे पृथिव्यामेवाकाशमित्यपि प्रयोगः स्यात् तथा चान्ययोगव्यवच्छेद
बोधे विशेष्यवाचकपदस्य प्रथमेतरविशेषणविभक्त्यन्यतरसमभिव्याहृतैवकारो हेतुः विशेषणसंगतैव
कारस्थलेऽयोगव्यवच्छेदबोधः यथा शंखः पाण्डुर एवेत्यादौ शंखत्वावच्छेदेन पाण्डुरत्वायोगव्यवच्छेदबो
धात् नीलं सरोजं भवत्येवेत्यादौ क्रियासंगतैवकारस्थलेऽत्यंतायोगव्यवच्छेदः अयोगे चात्यंतिकत्व
स्यान्वयितावच्छेदकव्यापकत्वरूपस्य व्यवच्छेद इत्यर्थः इत्थं चान्वयितावच्छेदकसामानाधिकरण्येना

204A

नायोगव्यवच्छेदः अत्रत्यं तायोगव्यवच्छेदः अन्वयितावच्छेदकव्यवच्छेदे नायोगव्यवच्छेदोऽयोगव्यव-
च्छेद इति परिभाषेध्येयम् आख्यातस्येति आख्यातत्वेन जातिः तिप्त्वादिना सांकर्यात् नापि दशलकारसा-
धारणं लत्वं तेन तत् तन्मात्रसाधारणस्यैकस्य लत्वस्याभावात् किंतु रूढिसंबंधेनाख्यातपदवत्त्वं तेन यदि चलका-
रेष्वेवाभियुक्तानामाख्यातपदरूढिः तथा च पचन्तीत्यादि लादेशस्य लेप्याख्यातार्थकृतिबोधापत्तिरिति वि-
भाव्यते तदाविष्ट तस्वादिकमेव विशिष्यशक्ततावच्छेदकं बोध्यं नचैवं केवलात्तिप्यदादपि कृते र्बोधापत्तिः आ-
नुपूर्वीज्ञानस्यापि सहकारित्वात् पाको यत्नश्चेति निराकांक्षवाक्यात् पचतीत्यत्रैव पाकानुकूलयत्नबोधा-
पत्तिवारणाया ख्यातपदजन्यपाकानुकूलयत्नविषयकशाब्दबोधं प्रति तिवादिपदनिष्ठपचत्यादि धात्वव्यवहि-
तोत्तरत्वरूपानुपूर्वीज्ञानस्य हेतुत्वकल्पनाया आवश्यकत्वात् यत्नएवेति यत्नत्वं शक्यतावच्छेदकमित्यर्थः
नच पाकगोचरनिवृत्तिकालेपि पचतीति प्रयोगापत्तिरिति वाच्यं प्रवृत्त्यभावातिरिक्त निवृत्त्याख्ययत्ने मानाभा-
वात् विलक्षणविषयतासंबंधेनानुकूलतासंबंधेन वा पाकस्य कृत्यावन्वयेनादोषाच्च करोतीति पूर्वोक्त-
रीत्या वाक्यस्यान्तरवाक्येनार्थकथनं हि विवरणं तथा च यत्नत्वविशिष्टप्राक्कृधातुनाऽऽख्यातस्य विवर-
णादाख्यातस्य यत्नवाचकत्वमिति भावः कृञश्च यत्नाभिधायकत्वं सिद्धमेव अन्यथा तस्य व्यापारवा

त॰प्र॰ चकत्वे व्यापारजन्यत्वप्रतिसंधानाविशेषेपि यत्नजन्यत्वप्रतिसंधानाप्रतिसंधानाभ्यां पटांकुरयोः कृताकृ
२॰५ तत्वव्यवहारानुपपत्तेः ज्ञातेत्यत्रैकैकत्वेत्यत्रापि कृत्याश्रयबोधाच्च तथा चाख्यातपदं यत्नत्वावच्छिन्नेशक्तं यत्न
त्वावच्छिन्नशक्तं करोतिधातुप्रतिपादितार्थकत्वात् यद्यद्धर्मावच्छिन्नशक्तप्रतिपादितार्थकं भवति तत्तद्ध
205 र्मावच्छिन्नेशक्तं भवति पाकत्वविशिष्टशक्तपाकपदप्रतिपादितार्थकपचधातुवदिति सामान्यतोदृष्टानुमा
नेन विवरणस्य शक्तिग्राहकत्वात् ननु विवरणस्य शक्तिग्राहकत्वे किंमानमत आह व्यवहारवदिति तथा
सतितुल्ययुक्त्या व्यवहारस्यापि शक्तिग्राहकत्वानुपपत्तिरिति भावः तथा चोक्तं शक्तिग्रहं व्याकरणोपमान
कोशाप्तवाक्याद्व्यवहारतश्च वाक्यस्य शेषाद्विवृतेर्वदंति सान्निध्यतः सिद्धपदस्य वृद्धा इति न च विवरणस्य शक्ति
ग्राहकत्वे पचतीत्यत्र कर्त्तुरपि विवरणात्तत्रापि शक्तिः स्यादिति वाच्यं असति बाधक इत्यनेन विशेषणात् ध
र्मिण्यन्यलभ्यत्वस्यैव च बाधकत्वात् एवमाख्यातस्य व्यापारवाचकत्वे किं करोतीति यत्नप्रश्ने पचतीत्यस्योत्तरत्वानु
पपत्तिरपि तथाहि यद्धर्मविशिष्टे यद्धर्मावच्छिन्नस्य संबंधो यत्प्रश्नवाक्यात्प्रतीयते तदुत्तरवाक्यात्तद्धर्मविशि
ष्टएव तद्धर्मव्याप्यधर्मावच्छिन्नसंबंधस्य प्रतीतो भवति तदेव प्रश्नोत्तरभावनिर्वाहः यथा कस्माद्घट इति प्रश्ने
दण्डाद्घट इत्युत्तरं न तु दण्डात् द्रव्यमिति एवं च कृञो यत्नार्थकत्वात् किं करोतीति यत्नत्वविशिष्टे प्रश्ने। २॰५

पचतीत्यनेनव्यापारत्वविशिष्टेकेपाकसंबंधबोधेजातेपिनोत्तरत्वनिर्वाह इत्याख्यातस्यापि यत्नत्वविशिष्टवाच
कत्वमवश्यमितिनिगर्वः तथाचेति आख्यातस्य यत्नवाचकत्वेचेत्यर्थः नमुख्येति नाख्यातस्य शक्त्या
प्रयोगइत्यर्थः मुख्यार्थबाधमेवाह रथादीनामिति नापीति लक्षणा गमनानुकूलव्यापारे लक्षणा अन्
न्ययेति विभक्तौलक्षणांगीकारइत्यर्थः अन्त्ययेति व्यासस्यकृतिः भारतस्यश्रवणमित्यादौकर्तृकर्मकृ
द्योगषष्ठीतः कर्तृत्वकर्मत्वबोधोनुभवसिद्धः तथाचकर्मणिद्वितीयाकर्तृकरणयोस्तृतीयेत्यनेनक
र्मत्वकर्तृत्वार्थकत्वेनद्वितीयातृतीयेविहिते शेषेषष्ठीत्यनेन चसंबंधसामान्येषष्ठीविहितेतिषष्ठीतः
कर्मकृद्योगेकर्तृत्वकर्मत्वबोधः कथमतः कर्तृकर्मणोः कृतीति व्युत्पत्त्यानुशासनं तेन षष्ठ्याअपिकर्म
त्वाद्यर्थकत्वमभिमतं यदिविभक्तौलक्षणांगीकारएव तदा तत्सूत्रं विनैवलक्षणयाकर्मत्वादिबोधस्यो
पपादयितुंशक्यतयातत्सूत्रानर्थक्यंस्यादित्यर्थः अतइति रथोगच्छतीत्यादौ गमनानुकूलव्यापारबो
धस्यशक्तिलक्षणाभ्यामुपपादयितुमशक्यत्वादित्यर्थः व्युत्पत्त्येति कर्तृकर्मणोः कृतीति व्युत्पत्त्यानुशा
सनवलादित्यर्थः विभक्त्यर्थेन्यस्मिन्निति अनुशासितविभक्त्यर्थातिरिक्तविभक्त्यर्थइत्यर्थः नत्वन्य
त्रापीति अनुशासितविभक्त्यर्थातिरिक्तविभक्त्यर्थेपिनलक्षणेतिनत्वित्यर्थः इहचेति रथोगच्छ(

त०प्र० नीत्यादावाख्यातस्थले चेत्यर्थः। किंतु व्यापार इति व्यापारजनकस्याऽपि विभक्तेरर्थ इत्यर्थः। तथा चाविभ
२०६ क्तौ लक्षणास्वीकारे व्युत्पत्त्यानुशासनभियाविभक्तौ लक्षणा नास्तीति प्रवादस्तु एकविभक्तेरन्यद्विभक्त्यर्थे लक्ष
णा नास्तीत्यभिप्रायकः। अन्यविभक्त्यर्थोऽनुशासितविभक्त्यर्थातिरिक्तो ग्राह्यः। एवं च रथो गच्छतीत्यादावा
206 ख्यातस्यानुकूलव्यापारे लक्षणायां बाधकाभावान्नरथ्येतरकल्पनमिति भावः। अनुशासितविभक्त्यर्थेति रि
क्तविभक्त्यर्थेन लक्षणेत्यत्रान्यस्मिन्नित्यस्य व्यावृत्तिं प्रदर्शयितुमाऽनुशासनिकलक्षणास्थलं दर्शयति ध
ध्यते चेति कृद्योगे कृदन्तयोगे कर्मत्वे लक्षणेति पूर्वेणान्वयि यथा भारतस्य श्रवणमाम्रस्य गन्तेत्यादौ
भारतकर्मकश्रवणाम्रकर्मकगमनबोधः। ननु शेषे षष्ठीत्यनेन संबंधमात्रे षष्ठीविधानात्कर्मत्वमपि षष्ठ्यै
व षष्ठ्या बोध्यतां किं तत्र लक्षणयेत्याशंकते नचेति स च संबंधश्च शाक्य एव षष्ठ्याः शक्य एव न लक्ष
णा न कर्मत्वे लक्षणा न कर्मत्व इति संबंधस्यैव षष्ठीशक्यतावच्छेदकतया तत्कर्मत्वप्रकारकबोधस्य विना
लक्षणामुपपादनासंभवादित्यर्थः। तया लक्षणया तत्प्रकारकेति कर्मत्वप्रकारिकेत्यर्थः। किं त्विति स च श
क्यैवेति भावः। अनुशासनेनेति कर्तृकर्मणोः कृतीति व्युत्पत्त्यानुशासनेनेत्यर्थः। षष्ठीतः कर्मत्वबोधार्थमिति
त। तत्र शेषे षष्ठीत्यनेनैव संबंधत्वेन कर्मत्वबोधोपपत्तौ निरर्थकं स्यादिति भावः। शंकते द्वितीयाया इति। २०६

206A

तृतीयायाइत्यपिबोध्यं असाधुत्वं व्याकरणानिष्पन्नत्वं ननु अनुशासनं भारतस्य श्रवणमित्यत्रक
र्मणिद्वितीयेतिसूत्रेण भारतं श्रवणमितिप्राप्तमितितन्निषिध्यते कर्तृकर्मणोः कृतीत्यनेन कर्तृकर्मबोधा
र्थषष्ठ्येवसाधुः ननुद्वितीयातृतीयाचेतिद्वितीयाया असाधुत्वप्रतिपादकत्वेयेवतत्सार्थकं षष्ठीतुशे
षेषष्ठीत्यनेनैवेतिभावः निष्ठादीति कर्तृकर्मणोः कृतीत्यनेनयदिकर्तृकर्मकृद्योगेकर्मत्वबोधार्थष
ष्ठीविहितास्यात्तदानिष्ठादियोगेपितस्याः प्रसक्तौ नलोकाव्ययनिष्ठाखलर्थतृनामित्यनेननिष्ठादियो
गेषष्ठ्यानिषेधोयुक्तः स्यात् तच्चनभवत्यतइतिभावः एतत्सूत्रार्थोहि नलोकेति एषांयोगेषष्ठीनस्यात्
कर्तृकर्मणोः कृतीत्यनेनप्राप्तापष्ठीनिषिध्यते लाः लादेशाः यथाओदनंपचन् पचमानइति उः क
टंचिकीर्षुः कन्यामलंकरिष्णुः उकः वाराणसींगामुकः लक्ष्म्याः कामुकइतिप्रयोगात्कमेर्भाषाया
मनिषेधः अव्ययं कटंकृत्वा निष्ठा क्तक्तवतू निष्ठा यथाओदनंभुक्तवान् देवदत्तेनकृतमिति खलर्थः
त्वयासुकरं तृनितिप्रत्याहारः तेनशानन्प्रभृतीनांग्रहणं यथासोमंपवमानइति तत्रेति निष्ठादि
योगइत्यर्थः साधुत्वेति कर्तृकर्मकृद्योगेद्वितीयानसाधुः किंतुषष्ठ्येवेति कर्तृकर्मणोः कृतीत्यनेनविहितत्व
त्वेचनिष्ठादियोगेपिद्वितीयायाअसाधुत्वप्राप्तौ अन्नंपक्वमित्यादावन्नस्यपक्वमित्यपिप्रसज्येतेतिनलोके

२०७ त्यादिनानिष्ठादिवर्ज्जनं तथाच निष्ठादियोगे द्वितीयैव साधुः ननु षष्ठीति न निष्ठावर्ज्जनवैफल्यमित्यर्थः
कृत्ययोगः इति तव्यतव्यानीयरः इति कृत्यप्रत्ययाः तद्योगे कर्तृकर्मणोः कृतीत्यनेन नित्यं षष्ठीप्राप्तौ कृत्यानां
207 कर्त्तरि वा षष्ठी स्यादित्यनेन कर्त्तरि वा बोध्ये तृतीया वा भवति षष्ठी वा भवतीति षष्ठी विकल्प्यते यथा देवदत्तेन कर्त्त
व्यः कटः देवदत्तस्य कर्त्तव्यः कटः इति इदं तु तदा संगच्छते यदि कर्तृकर्मणोः कृतीति सूत्रं षष्ठीविधायकं त
दा विशेषविधिनिषेधयोः शेषनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन द्वितीयातृतीययोर्निषेधमुखेनैव
नित्यं षष्ठीप्राप्तौ कृत्यानां कर्त्तरि वेत्यनेन तृतीया वा भवतीति षष्ठीनिषेधेनैव तृतीयायां विहितायां षष्ठीप्रा
प्त्यर्थं विकल्पेन षष्ठीविधानमिति भवन्मते च कर्तृकर्मणोः कृतीति सूत्रं द्वितीयातृतीययोरसाधुत्वज्ञाप
कं न लोकाव्ययनिष्ठाखलर्थतृनामिति च तयोः साधुत्वज्ञापकं तदा कृत्ययोगे तृतीयोपपत्त्यर्थं कृत्यानां कर्त्त
रीत्येव सूत्रप्रणयनं स्यात् नेत्यस्य चानुवृत्तिः तथा च कृत्यानां योगे षष्ठी नेत्यस्य तृतीया साधुरित्यर्थे त
दावसामंजस्ये कृत्यानां कर्त्तरीति सूत्रस्य विधायकत्वाभावात् षष्ठ्याः प्रतिषेधमुखेनैव तृतीयोपपत्त्या
विकल्पेन षष्ठीविधानमनर्थकमापद्येतेत्याखण्डलार्थः ननु कर्तृकर्मणोः कृतीत्यनेन तृतीयायाः अ
साधुत्वबोधनात् कथं तृतीया स्यादतस्तृतीयाविधानमावश्यकं तृतीयाविधाने च विधिनिषेधयोः शे २०७

207A

षनिषेधाभ्यनुज्ञाफलकत्वमिति न्यायेन षष्ठीनिषेधमुखेनैव तृतीयायाः प्रकृत्या षष्ठीप्राप्त्यर्थं विक
ल्पेन षष्ठीविधानमावश्यकं मतम् आह अनिषेधेनैवेति षष्ठ्या अनिषेधमुखेनैवेत्यर्थः तृतीयोपपत्तिः
कर्तृकरणयोस्तृतीयेत्यनेन तृतीयोपपत्तेः कृत्यानां कर्तरि वेति सूत्रस्य नेत्यस्यानुवृत्त्या न लोकेत्यादिना तृ
तीयायाः साधुत्वज्ञापकत्वं न तु तृतीयाविधायकत्वेन षष्ठीनिषेधकत्वमिति षष्ठ्या अनिषेधमुखेनैव
तृतीयाया उपपत्तौ षष्ठीविधानमफलमिति भावः षष्ठीप्राप्त्यर्थमेव विकल्पविधानमित्याशंकते पाक्षि
केति कृत्ययोगे षष्ठ्या निषेधमुखेनैव तृतीयोपपत्तावपि कृत्ययोगे पक्षे षष्ठ्यपि साधुरिति बोधनाय विक
ल्पविधानमित्यर्थः संबंधेऽपीति कर्तृत्वबोधार्थं हि तृतीया षष्ठी वा कृत्ययोगे विधीयते सा तु शेषे षष्ठीत्य
नेन संबंधत्वेन कर्तृत्वबोधो भविष्यत्येवेति विकल्पविधानं व्यर्थं स्यादिति मन्मते तु कर्तृत्वप्रकारकबोधस्य शे
षषष्ठ्या अनिर्वाहाद्विकल्पविधानं सार्थकमिति भावः शेषवचनादिति ननु शेषे षष्ठीत्यत्र उक्तादन्यः
शेषः उक्तात् कर्तृत्वकरणत्वादन्यः शेष इत्यर्थः तथा च कथं कर्तृत्वादेर्बोधः षष्ठ्येति चेन्न कर्तृत्वकर्मत्वाति
रिक्तरूपेण संबंधबोधे षष्ठीत्यस्य तदर्थत्वात् शंकते निष्ठादीति नदिति विकल्पविधायकानुशासनमि
त्यर्थः कृत्यानां कर्तरीति सूत्रस्य नेत्यनुवृत्त्या तृतीयायाः साधुत्वज्ञापकता षष्ठी तु शेषे षष्ठीत्यनेनेति

न.प्र. २०८
208

पालिकषष्ठ्युपपन्नेति विकल्पविधानं व्यर्थमित्युच्यत इति चेत् तदा नलोकेत्यस्यापि साधुत्वज्ञापकतया
कृत्ययोगे एव निष्ठादियोगेपि षष्ठ्या आपत्तिरिति विकल्पविधानं तेन षष्ठ्यपि कृत्ययोगे साधुः ननु
निष्ठादियोगेऽप्यसाधुत्वज्ञापकतया विकल्पविधानं सार्थकमिति भावः तदुक्तं नलोकेति[illegible]कषष्ठ्याः
प्रतिषेधः शेषषष्ठी तु स्यादेव ब्राह्मणस्य कुर्वन् सत्यान्तरज्ञानरकस्य जिह्मवः छात्रस्य हसितमित्यादि
इत्वा कृतांडुरापेर्थे त्वदधीनाहि सिद्धयः अपि वागधिपस्य दुर्वचं वचनं तद्विदधीत विस्मयमित्यादि च
केचित्तु इत्वा कृतां सिद्धय इत्यर्थः न त्विस्त्वा कृतांडुराप इत्यनेनान्वयः एवं वागधिपस्य विस्मयमित्यन्व
यः ननु वागधिपस्य दुर्वचमित्यनेनान्वयीति समाधुः तस्मात्कर्तृकर्मकृद्योगे षष्ठी नः कर्तृत्वकर्मत्व
त्वप्रकारकबोधार्थोपेयः एवं च कर्तृकर्मणोः कृतीत्यनेन कर्मत्वत्वप्रकारकबोधजनिकायाः षष्ठ्या निर
ष्ठादियोगेपि प्रसक्तौ न निष्ठादिष्वित्यनेन षष्ठीनिषेधे कृते कृत्यानां कर्तरि वेत्यस्य सूत्रस्य नित्यानुवृत्त्या कृत्य
योगेपि षष्ठीनिषेधे कृते निष्ठादिष्विव कृत्ययोगेपि षष्ठीनिषेधप्राप्तिः निष्ठादिष्विव कृत्ययोगेपि षष्ठी न
स्यादिति कृत्यानां कर्तरि वेति तत्र षष्ठ्या विधानं सार्थकमिति तत्र शेषषष्ठ्यास्तु प्रसक्तिरेव न तस्याः कर्म
त्वत्वादिप्रकारकबोधजनने सामर्थ्यादिति षष्ठ्याः कर्मत्वत्वादिप्रकारकबोधजनकत्वे कर्तृकर्मकृद्यो २०८

गत्यावश्यकं तच्चनशक्त्या अनन्यलभ्यस्यैव शब्दार्थत्वादिति कर्मत्वत्वप्रकारकबोधे लक्षणैवेति वि
भक्त्यावानुशासनिकी लक्षणेति बोध्यं कर्मकर्तृप्रयोगे षष्ठीतः कर्मत्वत्वप्रकारकबोधस्य विवादेपि विभक्तौ
लक्षणा स्थलांतरमाह किंचेति कर्मत्वे क्रियाजन्यफलशालित्वरूपे कर्मत्वे शक्ता द्वितीया कथं विष
यतायामित्यन्वयः विषयतायामिति विषयसप्तमी विषयता च व्यापारानुबंधिनी तथा च विषयता
बोधिका कथमित्यर्थः तथा च शक्त्या विषयताया बोधासंभवात्तत्र द्वितीयायां लक्षणावश्यकीति विभक्ताव
पि लक्षणास्वीकार इति भावः विद्यमानघटस्थले ज्ञानेन ज्ञाततोत्पादनमंगीकृत्य क्रियाजन्यफलशालि
त्वरूपकर्मत्वमपि कदाचित्संभवतीति भाविनमित्युक्तं तत्र पूर्वं घटस्याभावेन ज्ञाततायाजननासंभवादिति
भावः प्रोक्ते विषयतैवेति द्वितीयार्थः द्वितीयायाः शक्यार्थः तथा च शक्त्यैव तद्बोधसंभवान्न तत्र लक्ष
णेति भावः अत्र विनिगमकमाह क्रियेति ग्राममिति ग्रामविषयकत्वस्य गमनेऽभावेन क्रियाजन्यफ
लशालित्वरूपं कर्मत्वं लक्षणयैव वक्तव्यमतो बोधनीयमिति भावः आयुष्मतेति तथा च विभक्तौ लक्षणावश्यकी
ति भावः क्रियाजन्यफलशालित्वस्य विषयत्वापेक्षया गुरुत्वेपि तत्र भूरिप्रयोगात्तत्रैव शक्तिरुचितेत्यत उक्तं
विभावनीयमिति ननु द्वितीयायाः क्रियाजन्यफलशालित्वरूपे कर्मत्व एव शक्तिः भाविनं घटं जानाती

न.प्र. २०८

209

त्यंशोऽपीत्यर्थः लक्षणे नि लक्षणयैवेत्यर्थः विभक्तौ न लक्षणेति प्रवादस्तु न युक्त इति भावः वस्तुतस्तु वि
भक्तौ लक्षणा नास्तीत्यस्य सुब्विभक्तौ लक्षणा नास्तीत्यर्थो तिङ्विभक्तौ लक्षणास्वीकारात् अत एव विद्यते
व्योम विद्यते घटः सन्नास्ति घटो जानातीति प्रयोगा इति हृदयं रथो गच्छतीत्यनुरोधाद्आख्यातस्य व्यापारमात्रमर्थ इति
विभक्तौ लक्षणानंगीकारेऽपि न क्षतिरिति मीमांसकमतमाह मीमांसकास्त्विति व्यापारमात्रं व्यापार
सामान्यं न तु यत्न एवेति भावः मुख्य इति शक्त्या प्रयोग इत्यर्थः व्यापारत्वस्यैवाख्यातशक्यतावच्छेदक
त्वेन यत्नबाधेऽपि व्यापारबोधे बाधकाभावादिति भावः तस्यैव यत्नत्वस्यैव नत्विति नन्वनुकूलव्यापा
रत्वस्य शक्यतावच्छेदकत्वमिति विभक्तिपरिणतेनान्वयः अनुकूलत्वं जनकत्वं तदुत्कीर्तनं च प्रकारतया
भानमभ्युपेत्य गुरुत्वात् यत्नत्वापेक्षया गुरुत्वात् व्यापारत्वस्य नियतो हरवर्त्तित्वरूपजन्यत्वरूपत्वादि
तिभावः नन्वनुकूलयत्नत्वस्याख्यातशक्यतावच्छेदकत्वेऽनुकूलत्वांशे शक्तेरावश्यकतया यत्नत्वांशे वि
हाय अनुकूलमात्रावच्छिन्ने शक्तिरस्ताम् एवं रथो गच्छतीत्यत्र मुख्यः प्रयोग इत्यतोऽनुकूलत्वांशे लाघवाद्य
त्नत्वमेव शक्यतावच्छेदकमित्येवोपेयं तथा च कथमनुकूलत्वं प्रतीयेतेत्यभिप्रायेण शंकते कथं नहीति
यत्नत्वस्यैवाख्यातशक्यतावच्छेदकत्वे हीत्यर्थः पचतीत्यत्र पाकानुकूलयत्नो भासते तत्रानुकूलबोधः कथ २०८

209A

माख्यातार्थत्वादित्यर्थः संसर्गेति पाकयत्नयोः संसर्गो विधेय इत्यर्थः अशक्तस्यापि संसर्गस्य भानोपगमात्
तत्प्रकारकबोधस्तु नानुभवसिद्ध इति भावः कथं तर्हीति व्यापारमात्रस्याख्यातवाच्यत्वे हीत्यर्थः यतते करोती
ति यतीप्रयत्ने डुकृञ्करणे इति धातुभेदेन प्रयोगभेदः ननु जानातीत्यादौ ज्ञानानुकूलयत्नवानिति बोधे
बाधकाभाव इत्यत आह नहीति ज्ञानादीति आदिना इच्छादिपरिग्रहः ननु ज्ञानानुकूलो यत्नोस्त्येव
मनःसंयोगस्य ज्ञानासमवायिकारणत्वात्तस्य मनःक्रियाजन्यत्वात्तस्याश्च प्रयत्नवदात्मसंयोगजन्यत्वादत
आह प्रतीयते चेति जानातीत्यादौ ज्ञाना श्रयत्वमात्रं प्रतीयते न तु ज्ञानानुकूलयत्नवानितीत्यर्थः आश्र
यत्वेति जानातीत्यत्राख्यातस्याश्रयत्वे लाक्षणिकत्वादित्यर्थः घटो नश्यतीत्यत्रापि नष्टस्यापि प्रतियोगि
तासंबंधेन नाशाश्रयत्वसंभवेपि प्रतियोगितासंबंधावच्छिन्नाश्रयतायां लक्षणायां गौरवात् प्रतियोगि
त्वमेव तत्राख्यातार्थो विषयः धात्वर्थ एव ज्ञानरूपो धात्वर्थ एव साक्षात् विभक्त्यर्थमद्वारीकृत्य तथा चा
श्रयतासंबंधेन ज्ञानं चैत्रेऽन्वेतीति नाख्यातत्वेनाख्यातस्य कोप्यर्थ इति भावः तर्ह्याख्यातं निरर्थकमत आ
ह आख्यातेति प्रतिपाद्यः लट्त्वेनैकवचनत्वादिना च प्रतिपाद्यः कालः वर्तमानत्वादिः संख्या ए
कत्वादिरूपा न तु यत्नोपि आख्यातत्वेनाख्यातप्रतिपाद्यः अयोग्यत्वादिति तथा च जानातीत्यादौ ना

210

ऽप्रयत्वेलक्षणेतिभावः नामार्थेति साक्षात् विभक्त्यर्थमद्वारीकृत्य भेदेति अभेदातिरिक्तसंबंधेनान्वयबोधस्याव्युत्पन्नत्वा
दित्यर्थः स्तोकं पचतीत्यादिक्रियाविशेषणस्थले स्तोकस्य पाकेऽभेदेनान्वयात् भेदेति नचतत्र विशेषणविभक्तेरभे
दोर्थइतिवाच्यं विशेषणविभक्तेः साधुत्वार्थकत्वात् स्तोकपाकइत्यादावगतेश्च विभक्त्यर्थस्य प्रकारतया संसर्गतया
च भानमिति मते घटमानयेत्यत्र घटस्य कर्मतासंबंधेनानयनेन्वयात्साक्षादिति नंकलंजंभक्षयेदित्यत्र कलंजभक्ष च४
णंवलवदनिष्टाननुबंधीष्टसाधनत्वाभाववदिति बोधाद् लक्षणे धात्वर्थेनञर्थाभावान्वयाद्युत्पत्तिभंगइतिवाच्यं निपातातिः
रिक्तनामार्थधात्वर्थयोरन्वयस्याव्युत्पन्नेरित्यर्थात् नञोभाववत्त्वलाक्षणिकत्वाद्वा अन्यथेति नामार्थधात्वर्थयोर्विभक्त्य
र्थमद्वारीकृत्यापि अभेदातिरिक्तसंबंधेनान्वयस्वीकारइत्यर्थः ओदनइति ओदनं पचतीत्यत्र विभक्त्यर्थकर्मत्वादेः प्रका
रतया संसर्गतया वा भानोपगमात् यथौदनपाकयोः कर्मतासंसर्गेणान्वयस्तथौदनः पचतीत्यत्रापि कर्मतासंसर्गेणौदन(स्)
स्यपाकेऽन्वयबोधापत्तेरित्यर्थः ननुनिपातातिरिक्तत्वमिव सविषयवाचकधात्वतिरिक्तत्वमपि देयमत आह वस्तुतइतीति काञ्चि
न्नञ् नाश्यतीत्यादावगतेः आस्तांतत्र प्रतियोगित्वे लक्षणेति चेत्किमपराद्धं तद्धि जानातीत्यत्राश्रयत्वे लक्षणया व्युत्पत्तिसंको
चेनापत्तिर्विहेतस्संकोचस्यैवन्याय्यत्वात् वस्तुतस्तु ननुनामार्थधात्वर्थयोः साक्षाद्भेदेनान्वयबोधो नस्वीक्रियतइति निय
मवलात् नामार्थनिष्ठाभेदातिरिक्तसंबंधावच्छिन्नप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नंप्र
ति विभक्तिपदनिरूपित वृत्तिज्ञानजन्योपस्थितित्वेनहेतुत्वं एवं धात्वर्थनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासं
बंधेनशाब्दबुद्धिं प्रत्यपीतिलब्धं तत्र चैत्रस्तंडुलं पचति मैत्रेण पच्यते तंडुलइत्यत्र चैत्रः पचतितंडुलः मैत्रः पच्यतेतंडुल

इत्यत्रापि तण्डुलस्य कर्मतासंबंधेन मैत्रस्य च कर्तृतासंबंधेन पाकेऽन्वयवारणाय ५४

210A

नामार्थप्रकारकधात्वर्थविशेष्यकान्वयबोधानुपगमेपि धात्वर्थप्रकारकनामार्थविशेष्यका
न्वयबोधोपगमे क्षतिविरहात् द्वितीयकार्यकारणभावे मानाभावात् चैत्रो जानातीत्यादावा
श्रयतासंबंधेन ज्ञानरूपधात्वर्थस्य चैत्रेन्वये बाधकाभावः नच तथा सति ज्ञानं चैत्र इत्यत्रा
पि ज्ञानाश्रयतासंबंधेनान्वयापत्तिरिति वाच्यं नामार्थयोरभेदातिरिक्तसंबंधेनान्वयाभा
वादिति व्युत्पत्त्यंतरेणैव तदापादनासंभवात् किंचानुपूर्वी ज्ञानस्य शाब्दबोधहेतुतया ज्ञान
प्रकारकाश्रयतासंसर्गकचैत्रविशेष्यकबोधं प्रति ज्ञाधातुसमभिव्याहृतत्वात् तत्समभि
व्याहृतचैत्रपदज्ञानत्वेन हेतुत्वादेव तद्वारणसंभवात् भवन्मतेपि आश्रयत्वप्रकारकशाब्द
बोधे तादृशसमभिज्ञानस्य हेतुताया आवश्यकत्वात् अन्यथा ज्ञानमाश्रयत्वे चेत्यतो
पि तदापत्तेः अथैवं पचतीत्यत्रापि स्वानुकूलकृतिमत्त्वसंबंधेन पाकस्य चैत्रेऽन्वयोपपत्तेः
कृतेराख्यातार्थविलोपप्रसंगः इति चेन्न न पचति चैत्र इत्यत्र नियामकसंबंधस्या

भावप्रतियोगितानवच्छेदकतया अनुकूलाकृतिमत्वसंबंधावच्छिन्नप्रतियोगिताकपा
काभावस्यबोधाभावात् आश्रयतासंबंधावच्छिन्नप्रतियोगिताकपाकाभावबोधोपगमे
पचत्यपिनपचतीतिप्रसंगात् नचपचतीत्यत्रकृतिमाश्चैत्र इत्याख्यातार्थप्रकारकशाब्दोद
येनाख्यातजन्यकृत्युपस्थितेः कारणत्वकल्पनेतत्तदर्थनिवेशात्मानि ह प्रत्यासत्त्या ऽऽख्यात
जन्योपस्थितेर्हेतुत्वकल्पनेगौरवेण लाघवाद्धात्वर्थप्रकारकशाब्दबोधंप्रतिप्रत्ययजन्योप
स्थितेः समानविशेष्यताप्रत्यासत्त्या हेतुत्वकल्पनादाख्यातस्यजानातीत्यादावाश्रयत्वार्थ
कत्वमावश्यकमितिवाच्यं सामान्यतोधातुत्वस्यप्रत्ययत्वस्यचैकस्याभावेनसामान्यतस्तथा
हेतुत्वासंभवात् विशिष्यहेतुत्वेच जानातीत्यादौतदकल्पनात् यत्तुजानातीत्यत्रघटादौ
स्वारसिकलक्षणाग्रहकालेज्ञानीयोघटइतिशाब्दबोधोत्पत्त्या ज्ञानप्रकारकघटादिविशे
ष्यकशाब्दबुद्धित्वावच्छिन्नंप्रति धातुसमभिव्याहृताख्यातजन्यघटोपस्थितित्वादिनाहेतु

त्वकल्पने घटत्वप्रकारत्वादिनिवेशे गौरवात् ज्ञाननिष्ठप्रकारतानिरूपितविशेष्यताऽ
वच्छेदकतासंबंधेन शाब्दबुद्धित्वावच्छिन्नं प्रति आख्यातपदनिरूपितवृत्तिज्ञानजन्योप
स्थितेः प्रकारतासंबंधेन हेतुत्वकल्पना आश्रयत्वे लक्षणावश्यकी आख्यातपदजन्यघटा ११३
द्युपस्थितिकालेपि ज्ञानीयो घट इति शाब्दबोधस्यात्मनि समवायेनापत्तिः समवायेन तादृ
शशाब्दबोधहेतोः ज्ञानीयो घट इति योग्यताज्ञानस्य समवायेन सत्त्वादिति विषयं निवे
श्य पदजन्यपदार्थोपस्थितेर्हेतुत्वमावश्यकं न च योग्यताज्ञानस्यापि विशेष्यतावच्छेद
कताप्रत्यासत्त्यैव हेतुत्वमिति वाच्यं तथापि भिन्नविषयकानुमितिसामग्र्यभावरूपका
रणबलादात्मनि तथाविधशाब्दबोधापत्तेर्दुर्वारत्वात् इति चेन्न पदजन्यपदार्थोपस्थिते
स्तत्तद्विषयं निवेश्यात्मनिष्ठप्रत्यासत्त्या हेतुत्वे तत्तद्विषयकत्वैः सह विनिगमनाविरहेण
गौरवात् विशेष्यतावच्छेदकताप्रत्यासत्त्यैव हेतुत्वे घटत्वादिवृत्तिविषयतासंबंधेन ज्ञान

त.प्र.
२१२
212

त्वावच्छिन्नप्रतिघटत्वादिवृत्तिविषयतासंबंधेनज्ञानत्वेनहेतुत्वांतरकल्पनेनचदर्शितापर
त्तिवारणासंभवात् तादात्म्यसमभिव्याहृतानपदजन्योपस्थितिविशिष्टघटत्वज्ञानस्यविरो
धिसामग्र्यभावेनज्ञानीयोघटइतिशाब्दबोधजननीयसहकारित्वात् प्रकारतासंबंधेनस्वा
धिकरणविषयतासंबंधेनवृत्तित्वरूपसामानाधिकरण्यसंबंधेनचतत्पदोपस्थितिविशिष्ट
घटत्वज्ञानेवसेयं इत्थंचाख्यातपदजन्यपदोपस्थितिकालेभिन्नविषयकानुमितिसामग्र
ग्र्यभावरूपकारणबलात्तात्मनिज्ञानीयोघटइतिशाब्दबोधापत्तिः आख्यातपदजन्योप
स्थितिविशिष्टघटत्वज्ञानरूपसहकार्यभावात् नचपुरुषांतरस्याख्यातपदजन्यघटो
पस्थितिकालेतथाविधसहकारिसत्वाद्यापत्तिरितिवाच्यं एकात्मसमवेतस्यान्यात्मन्याप
त्तिवारणायतत्तादात्म्यसमवेतत्वावच्छिन्नप्रतितादात्म्यप्रत्यासत्त्यातदात्मत्वेनापिहेतुतया
तत्पुरुषीयाख्यातपदजन्योपस्थितिविशिष्टतत्पुरुषीयघटत्वज्ञानविशिष्टतत्तादात्म्यविशि २१२

212A

513

ष्टविरोधिसामग्र्यभावस्य तत्तदात्मनि ज्ञानीयो घट इति शाब्दबोधसामग्रीत्वात् तत्तदात्म
निघटत्वज्ञानवैशिष्ट्यमेककालीनत्वसंबंधेन संबंधिसामग्र्यभावेन तत्तदात्मवैशिष्ट्यं च ज्ञा
दात्म्यविशेषणतोभयघटितसामानाधिकरण्यसंबंधेनेति इत्थं च ज्ञाननिष्ठप्रकारता
निरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबुद्धिं प्रति ज्ञाधातुसमभिव्याहृताख्यातज
न्योपस्थितेः प्रकारतासंबंधेन हेतुत्वात् चैत्रो जानातीत्यादावाश्रयत्वे लक्षणावश्यकीति तद
सत् तदादिपदेनापि ज्ञानीयो घट इति शाब्दबोधजननात् तत्र तथाविधाख्यातपदजन्योप
स्थितेरभावेन व्यभिचारात् तथोपस्थितिविशेषशाब्दत्वमेव तथोपस्थितेः कार्यतावच्छेदक
मुपेयं एवं च तथोपस्थितिविरहे तथोपस्थितिविशिष्टशाब्दबोधानुपपन्नावपि तदनुत्तरशा
ब्दबोधस्य जानातीत्यादावुत्पन्नो बाधकाभावः ज्ञाधातुसमभिव्याहृताख्यातसमभिव्याहार
ज्ञानरूपकारणताबलादाश्रयतासंसर्गकबोधोपगमात् न चाश्रयतासंबंधेन ज्ञानप्रकार

त.प्र. कशाब्दबोधे ज्ञानप्रकारकयोग्यताज्ञानस्य कारणत्वकल्पनेनैतन्मते गौरवमिति वाच्यं भ
२१२ वन्मतेपि ज्ञानाश्रयत्वप्रकारकचैत्रविशेष्यकशाब्दबोधे तथाविधयोग्यताज्ञानहेतुताया
आवश्यकत्वात् आश्रयत्वस्यापि संबंधं निवेश्य योग्यताज्ञानस्य हेतुत्वस्य कल्पनेन भवन्म
213 त एव गौरवाच्च मन्मते चाश्रयत्वस्यैव संसर्गत्वान्न तस्यापि संबंधो निवेश्यः न च ज्ञाधातु
समभिव्याहृताख्यातस्य यत्र ज्ञानाश्रयत्वे लक्षणा तत्र भवतापि ज्ञानाश्रयत्वप्रकारकशा
योग्यताज्ञानस्य हेतुत्वं कल्पनीयमिति वाच्यं आश्रयतायाः संसर्गतावादिना ज्ञानाश्र
यत्वप्रकारकबोधानुपगमात् एतेन [illegible] यत्र ज्ञाधातुसमभिव्याहृताख्यातस्य ज्ञाना
श्रयत्वे लक्षणा तत्र ज्ञानाश्रयत्वप्रकारकशाब्दबोधे ज्ञाधातुसमभिव्याहृताख्यातपदनि
रूपितवृत्तिज्ञानजन्याश्रयत्वोपस्थितिहेतुत्वस्य क्लृप्ततयास्मन्मतेनैव निर्वाहात् आश्र
यत्वे लक्षणा सर्वत्रावश्यकीति चेदास्ताम् तथा सति यत्र चैत्रपदे एवाश्रयता संबंधेन ज्ञा २१२

213A

नविशिष्टचैत्रे लक्षणा तत्र चैत्रपदजन्यज्ञानविशिष्टचैत्रोपस्थितिः स्फुटन्नया चैत्रो जानाति
तीत्यत्र चैत्रपदादेवाश्रयतासंबंधेन ज्ञानवांश्चैत्र इति बोधस्यापि स्फुटमेवैनेवोपपादयि
तुमशक्यत्वात् न चैवं जानातीत्यस्य वैयर्थ्यमिति वाच्यं आख्यातत्वेनाख्यातस्येव ज्ञा
नातीत्यस्य सर्वस्यैव तात्पर्यग्राहकतयोपगमस्य सुवचत्वात् किंच जानातीत्यत्र ज्ञाना
श्रयत्वप्रकारकबोधस्यैवानुपगमे न स्फुटमेनोपपत्त्यभावात्तस्मादाश्रयतासंबंधेन ज्ञानस्य
स्य चैत्रेऽन्वये बाधकाभावेनाश्रयत्वे लक्षणा वैयर्थ्यमिति आह वस्तुत इति केचित्तु यत्र ख्याधा
तो ज्ञानाश्रयत्वे लक्षणा तत्र ज्ञानाश्रयधात्वर्थैकदेशतया चैत्रेऽन्वयासंभवेन ज्ञानाश्रयत्व
प्रकारकएवबोध उपसंगंतव्य इति तत्र ज्ञानाश्रयत्वप्रकारकशाब्दबोधे तत्प्रकारकमोग्य
ता ज्ञानहेतुत्वमुभयसिद्धं आश्रयतासंसर्गकशाब्दबोधांगीकर्तृमते त्वाश्रयतासंसर्ग
कयोग्यताज्ञानकारणत्वकल्पनमधिकं न च तच्छेदेन यत्राश्रयतासंबंधेन ज्ञानविशि

न्या॰प्र॰ ष्टचैत्रः शाब्दबोधस्तत्राश्रयतासंसर्गकयोग्यताज्ञानकारणत्वकल्पनमधिकमप्युभयसिद्धमिति वा
२१४ च्यं तत्र शाब्दबोधे पदार्थान्तरभाननियमेन ज्ञानविशिष्टचैत्रमात्रविशेष्यकशाब्दबोधहेतुतायाः क्लृप्त
214 प्तत्वादिति न च तथापि भिन्नविषयकप्रत्यक्षादिकं प्रतिजानातीत्यानुपूर्वीघटितज्ञानघटितज्ञा
धातुजन्यज्ञानोपस्थितिघटितशाब्दसामग्र्याः प्रतिबंधकतायामाख्यातजन्याश्रयत्वोपस्थितिनिवे
शेन गौरवमिति वाच्यं ज्ञानाश्रयत्वाभाववांश्चैत्रः सुन्दर इति विशिष्टवैशिष्ट्यावगाहिप्रत्यक्षे जानातिचै
त्र इत्यानुपूर्वीज्ञानज्ञाधातुजन्योपस्थितिघटितशाब्दसामग्र्याः प्रतिबंधकत्वाधिकत्वात् मन्मते आ
श्रयत्वप्रकारकोपस्थितिकाले बाधबुद्धिसंभवेन तादृशसामग्र्या युगपदसंभवेन लाघवेनैवोपपत्तेरि
त्याहुः तच्चिन्त्यं एवं सति विशेषणविभक्तेरप्यभेदार्थकत्वापत्तेः तत्रापि नीलाभेदाभाववान्
घट इति प्रत्यक्षादौ नीलो घट इति शाब्दसामग्र्या बाधमुद्रयैव प्रतिबंधकतयैवोपपत्तेरतिरिक्तप्र
तिबंधकत्वाकल्पने लाघवसंभवात् इष्टापत्तौ च विशेषणविभक्तेः साधुत्वमिति सिद्धान्तव्याको २१४

पङ्ख्यास्तांविस्तरः आख्यातार्थेति आख्यातार्थं विनाख्यातार्थाबोध इत्यर्थः तस्याः आख्यातार्थ
संख्यायाः आख्यातार्थेति संख्याकालातिरिक्ताख्यातार्थस्य भावनायाय द्विशेष्यं तत्त्वामित्वनियमादि
त्यर्थः भावनान्वयिन्येव संख्यान्वय इति नियमात् संख्याकालातिरिक्ताख्यातार्थो हि भावनेत्यभिधीय
त इति भावः नन्वाख्यातार्थविशेष्यः क इत्याकांक्षायामाह विभक्त्यर्थाविशेषणीभूत इति नामार्थ
इत्यनेन विभक्त्यर्थनिरासः न च पचतीत्यत्र वर्तमानत्वरूपाख्यातार्थस्य कृतिरेव विशेष्येति कथमीदृ
शानियम इति वाच्यं आख्यातार्थविशेष्य एव संख्यान्वय इति नियम प्रविष्टाख्यातार्थविशेष्यस्यात्रा
भिधानादिति भावः उपपादनपुरस्सरं विभक्त्यर्थाविशेषणीभूत इत्यस्य व्यावृत्तिमाह तेनेति विभ
क्त्यर्थाविशेषणीभूतस्यैव नामार्थस्याख्यातार्थविशेष्यत्वादेवेत्यर्थः तथाविधः विभक्त्यर्थाविशेष
णीभूतः प्रथमायाः साधुत्वादिति भावः द्वितीयार्थेति द्वितीयार्थे कर्मत्वे विशेषणत्वादित्यर्थः क
र्माख्यातस्थलेप्याह पच्यत इत्यत्रेति चैत्रेण पच्यते तण्डुल इत्यत्र कर्म तण्डुल आख्यातार्थविशेष्यः
न कर्त्ता न चैत्रः तृतीयार्थेति तृतीयार्थे न कर्तृत्वेनावरुद्धत्वात्कर्तृत्वे विशेषणत्वादित्यर्थः न

नुचन्द्र इव मुखमस्तीत्यादौ चन्द्रपदार्थे इवार्थेवाभावनान्वयापत्तिः तस्य विभक्त्यर्थाविशेषणीभूततनामार्थ-
त्वात् नच विभक्त्यर्थाविशेषणीभूतत्वस्येतराविशेषणत्वमर्थ इति वाच्यं चंद्र इव मुखं चंद्रो राजत इत्यत्र
चन्द्रे तदन्वयापत्तेरिति चेन्न प्रकृतपदजन्यशाब्दबोधे विशेष्यत्वाभावत्वे सति यदितरविशेषणत्वं तदभावस-
त्वीत्यस्य तदर्थत्वात् वस्तुतस्तु चन्द्र इव मुखमस्तीत्यादौ नामार्थयोरिति व्युत्पत्ताव्ययनिपातातिरिक्तत्ववि-
शेषणाभावात् चन्द्रपदे चंद्रसदृशलाक्षणिकमिवपदं च तात्पर्यग्राहकमिति मते चंद्रसादृश्यविशिष्टे मुखे
भावनान्वये विशेषणांशेपि भावनान्वयेन चंद्रपदार्थे तदन्वये इष्टापत्तिः इवपदस्य च निरर्थकतया त-
दर्थाभावादिव नातिप्रसंगः इवपदस्य सार्थकत्वेपि चंद्रपदोत्तरप्रथमायाः प्रतियोगित्वार्थकतया इवपदस्य
च सदृशार्थकतया चंद्रस्य विभक्त्यर्थाविशेषणीभूतत्वाभावादिवपदार्थे सदृशे च विशिष्टे तदन्वये विशेष-
णांशे तदन्वये इष्टापादनमेवेति प्रतिभाति ननु चैत्रेणस्थीयत इत्यत्र संख्यानन्वयापत्तिस्तत्र विभक्त्यर्थाविशे-
षणीभूतनामार्थाभावेन विशेषभावनाविशेष्याभावादत इष्टापत्त्या परिहरति स्थीयत इत्यत्रेति संख्येति
भावनान्वयिन्येव संख्यान्वयनियमादत्र भावनायाः कर्त्रन्वयेन संख्यायाश्चाप्यनन्वय इत्यर्थः अत एव ।

215A

भावाख्यातस्थले संख्यानन्वयादेव औत्सर्गिकमिति स्वाश्रयस्य द्वित्वबहुत्वेपि संख्याया अनन्वयात्प्रथमोप
स्थितत्वा[illegible]त्साधुत्वार्थकमेकवचनमेवेत्यर्थः भावाख्यातस्थले प्रकारान्तरेणाबोधकस्य चिन्मतेनाह धात्वर्थे
ति चैत्रेण स्थीयत इत्यत्र चैत्रकर्तृका वर्त्तमाना स्थितिरित्यर्थः नन्वेवं भावनाविशेष्य एव संख्यान्वयात् धात्वर्थ
स्य च भावनाविशेष्यत्वाद्द्विवचनापत्तिरित्याशंकते नचैवमिति एवं धात्वर्थविशेष्यकान्वयस्वीकारे धात्व
र्थस्य स्थित्यादेर्द्विवचनापत्तिर्द्वित्वस्य तत्राबाधादिति भावः असाधुत्वादिति देवदत्तेन स्थीयते देवदत्ताभ्यां स्थी
यते देवदत्तैः स्थीयते इत्येकवचनमेवात्र साधु इति भावः चैत्रः पचतीत्यादौ प्रथमान्तार्थ एव भावनाया अ
न्वयात् भावनायां धात्वर्थस्य विशेषणत्वेनैवान्वयस्य व्युत्पन्नत्वात् भावनाविशेष्यकधात्वर्थविशेष्यका
न्वयस्वीकारे व्युत्पत्त्यन्तरस्वीकारे गौरवमेवात्रास्वरसः कश्चिदित्यनेन सूचितः आख्यातार्थकालः वर्त्तमा
नत्वादिः एकपदेति एकेन पदेनाख्यातेनोपात्तत्वात् भावनायां वर्त्तमानत्वान्वय इत्यर्थः नच संख्याया
मेव कुतो न कालान्वयः समानपदोपात्तत्वाविशेषादिति वाच्यं तर्हि पक्वेपि पचतीति स्यात् संख्यायां वर्त्त
मानत्वस्य सत्त्वादिति भावः धात्वर्थ इति चैत्रः पचतीत्यादौ वर्त्तमानो यः पाकस्तदनुकूलकृतिमानिति बो
धः इदमेवमतमुपपादयति कथमन्यथेति वर्त्तमानत्वादेर्धात्वर्थे ऽनन्वये जानातीत्यादौ कृतेर्बाधादाश्र

न०प्र० पर्वेनलक्षणा आश्रयत्वे च वर्त्तमानत्वादेरन्वयासंभवाद्धात्वर्थ एवान्वयो वाच्यः एवं चाख्यातार्थवर्त्तमान२
२१६ त्वादिनिष्ठप्रकारतानिरूपितविशेष्यतावच्छेदकतासंबंधेन शाब्दबोधप्रतिप्रकारतासंबंधेन धात्वर्थजन्योप२
स्थितेः कारणत्वात्तन्नैव निर्वाहे आख्यातार्थकृतो कालान्वयस्वीकारे कार्यकारणभावान्तरकल्पने गौरवमेव
216 पूर्वकल्पेऽस्वरस इति द्रष्टव्यं भविष्यत्वेति स्यतासी लृलुटोरित्यनुशासनाद्भविष्यत्वं लृडर्थः अतीते लु
ङित्यनुशासनाच्चातीतत्वं लुङर्थ इत्यर्थः ननु भविष्यत्वं वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वं अतीतत्वं
च वर्त्तमानध्वंसप्रतियोग्युत्पत्तिकत्वं एवं च घटो भविष्यतीत्यत्र भूसत्तायामिति भूधातोरुत्पत्तिरेवार्थः आ
ख्यातस्य चाश्रयत्वमर्थः तत्राख्यातार्थाश्रयत्वे भविष्यत्त्वादेरन्वयासम्भवाद्धात्वर्थोत्पत्तावेवान्वयो वाच्यः त
था च वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकायाउत्पत्तेराश्रयो घट इत्यन्वयबोधस्वीकारे उत्पत्तेरप्युत्पत्त्य२
भ्युपगमेऽप्रसिद्ध्यात्ताभावेऽप्यनुभव इत्यत आह भविष्यत्त्वेचेति तथा च वर्त्तमानप्रागभावप्रतियोगित्वमे
व भविष्यत्वं तच्च भविष्यतीत्यादौ धात्वर्थोत्पत्तौ पक्ष्यतीत्यादावाख्यातार्थकृतावन्वेतीति भावः पचतीति
सप्तम्यंतं आख्यातार्थकालस्य समानपदोपात्तत्वप्रत्यासत्त्या कृतावन्वय इत्युक्तं तथा च पक्ष्यतीत्यत्र वर्त्त
मानप्रागभावप्रतियोगिनी यापाकानुकूला कृतिस्तद्वाश्चैत्र इति बोधस्वीकारे यदा चैत्रेण पाकः क्रियते २१६

216A

तदा एकस्याः कृतेर्जीनत्वेऽपि ध्वंसप्रागभावयोः सामान्यधर्मावच्छिन्नप्रतियोगिताकाभावेन भाविनीयाऽन्यकृ
तिस्तत्प्रागभावस्य सत्वात् पक्ष्यतीतिप्रयोगापत्तिः एवमपाक्षीदित्यत्र लुङर्थातीतत्वस्य वर्त्तमानध्वंसप्रतिर
योगित्वरूपस्य कृतावेवान्वये वर्त्तमानध्वंसप्रतियोगिनीं यां पाकानुकूलां कृतिं तद्वांश्चैत्र इत्यन्वयो वाच्यः
एवं चाद्यकृतेर्नष्टत्वेन पाकदशायामप्यपाक्षीदिति प्रयोगापत्तिरित्यर्थः समाधत्ते नस्यादिति आद्ये
ति तथा च पक्ष्यतीत्यत्र प्रागभावत्वेन रूपेणापि कृतिप्रागभावस्य अपाक्षीदित्यादावंत्यकृतिध्वंसस्यैव वा
च्यतात्पर्यविषयत्वात् न भाविकृतिप्रागभावमादाय पक्ष्यतीति आद्यकृतिध्वंसमादाय च पाकदशा
यामपाक्षीदिति प्रयोगापत्तिरिति भावः ननु भविष्यत्त्वं यदि वर्त्तमानप्रागभावप्रतियोगित्वं तदा नंक्ष्यती
त्यादौ प्रतियोगित्वस्याख्यातार्थतया तत्र भविष्यत्त्वस्यान्वयासंभवाद्धात्वर्थे नाशे तदन्वयो वाच्यः तथा च
श्वोभाविनाशके परश्वो नंक्ष्यतीति प्रयोगापत्तिः तथाहि परश्वस्तनकालस्य नाशेऽन्वयस्वीकारे नाश
स्य परश्वस्तनकालवृत्तित्वात् परश्वो नंक्ष्यतीति स्यात् न च परश्वस्तनकालस्य भविष्यत्वघटकीभूतप्रा
गभावेऽन्वयः एवं च परश्वस्तनकालवृत्तिप्रागभाववर्त्तमानप्रागभावप्रतियोगित्वस्य नाशेऽभावान्न तथा प्रयो
गापत्तिरिति वाच्यं तथा सति श्वोभाविनाशके श्वो नंक्ष्यतीति न स्यात् नाशप्रागभावस्य श्वस्तनकालवृत्ति

न॰प्र॰
२१७
217

त्वाभावात् इहाद्य घटो भविष्यतीत्यादौ देशविशेषस्य कालविशेषस्य चाधिकरणत्वेनोत्पत्तिरूपधात्वर्थ
एवान्वयस्योपेयत्वात् अन्यथा कपालनाशजन्यघटनाशस्थले इह कपाले घटध्वंसो भविष्यतीति प्रत्ययाप
त्तिः घटरूपप्रतियोग्यात्मकघटध्वंसप्रागभावस्य कपाले सत्वात् एवं श्वो भाविन्यद्य भविष्यतीति प्रत्ययाप
त्तिः अद्यतनकालवृत्तित्वस्य प्रागभावे सत्वात् एवमुत्पत्तिमति तदन्वयस्वीकारे भवते श्वः समुत्पद्य प्रांगणे प
रश्वो भविष्यति मैत्रे प्रांगणे परश्वो भविष्यतीति बुद्धिप्रसंगात् उत्पत्तिमतो मैत्रस्य प्रांगणवृत्तित्वात् घटस्त
नकालवृत्तित्वाच्चेति देशविशेषस्य कालविशेषस्योत्पत्तिरूपधात्वर्थ एवान्वयो वाच्यः तथा च श्वो भाविना
शके परश्वो नंक्ष्यतीत्यापत्तिः एवं नश्यति नष्टः इत्यत्र वर्त्तमानत्वं अतीतत्वं च धात्वर्थेन नाशेनान्वेष्यतीति
नष्टो नश्यतीति स्यात् नाशस्य वर्त्तमानत्वात् नष्टे च नष्ट इति न स्यात् नाशेऽतीतत्वाभावादिति चेन्नैवम् अत्र
वर्त्तमानप्रागभावप्रतियोग्युत्पत्तिकत्वरूपभविष्यत्वस्य वर्त्तमानध्वंसप्रतियोग्युत्पत्तिकत्वरूपातीतत्वस्य च
प्रत्ययार्थत्वात् प्रत्ययार्थोत्पत्तावेव च कालविशेषादेरन्वयात् भविष्यत्वं च वर्त्तमानप्रागभावप्रतियोगि
त्वं वर्त्तमानध्वंसप्रतियोगित्वमतीतत्वमित्युक्तिस्तु भविष्यति पक्ष्यतीतिस्थलाभिप्रायेण तत्र धात्वर्थोत्पत्ते
राख्यातार्थीकृतेऽत्यसंभवितयाऽनुपपत्त्यभावात् एवं च वर्त्तमानप्रागभावप्रतियोगित्वलाघवान्नष्टक्रिः ने २१७

स्यतीत्यादौ वर्त्तमानप्रागभावप्रतियोगयुत्पत्तिकत्वबोधस्तुल्यतयायेविग्रहःस्यं अपेति ओदनपदं तंडु
लपरं विक्लित्यवच्छिन्नतण्डुलस्यैवोदनतया तस्य पाकासंभवेन यथाश्रुतासंगतेः ओदननिष्ठाया विर
क्लित्तिरुत्पादको यो व्यापारविशेषस्तत्कर्तृत्वं तदनुकूलकृतिमत्त्वं प्रतीयत इत्यर्थः तत्रेति कर्तृत्वस्या
ख्यातलभ्यत्वादिति भावः ननु फले द्वितीयायाइति ओदनमित्यत्र द्वितीयाया इत्यर्थः फलस्यैव द्विती
यार्थत्वादिति भावः तदनुकूलइति फलानुकूलइत्यर्थः विलक्षणेति अधःसंतापनादिरूपो व्यापारो
धात्वर्थ इत्यर्थः अनुकूलता चेति व्यापारानुकूलकृतिमानित्यत्रानुकूलता चेत्यर्थः संसर्ग इति २
व्यापारकृत्योः संसर्ग इत्यर्थः ननु कर्मत्वमिति कर्मणि द्वितीयेति कर्मत्वस्य द्वितीयार्थबोधनादिति भावः
तच्च कर्मत्वंच ननु फलमात्रं कर्मत्वमित्यर्थः क्रियाया इति जन्यत्वेति क्रियाजन्यत्वेत्यत्र जन्यत्वं फ
लशालित्वमित्यत्र च शालित्वमाश्रयत्वमित्यर्थः तयोः संसर्गमर्यादया लाभात् फलमात्र एव शक्तेः द्वि
तीया शक्तेः कल्पनादित्यर्थः ननु क्रियादीनां धात्वादिना लाभे पि द्वितीयायाः अपि तत्र शक्तिरस्तामत आह
अनन्येति हि यस्मात् अनन्यलभ्य एव शब्दार्थ इत्यर्थः धातुलभ्यमेवेति तथा च कथं तत्रापि द्वितीयायाः
शक्तिरन्यलभ्यत्वादिति भावः वस्तुगत्या फलावच्छिन्नो यो व्यापारस्तद्बोधकत्वादेव धातूनां सकर्मक

तत्त्व॰ त्वव्यवहारः ज्ञानात्त्वादिस्थले तु भाक्त इति सूचनार्थं फलानुकूलत्वोपलक्षित इत्युक्तं न तु फलानुकूलत्व
२१८ मपि धात्वर्थत्वमित्यनुव्याज्यते गौरवादिति अनुकूलत्वस्य संसर्गमर्यादया लाभादिति भावः नन्वेवमिति
व्यापारमात्रस्य धात्वर्थत्व इत्यर्थः त्यजिगम्योः त्यजगमधात्वोरित्यर्थः उत्तरदेशसंयोगावच्छिन्नक्रि
418 या गमधातोरर्थः पूर्वदेशविभागावच्छिन्नक्रिया त्यजधातोरर्थः तत्र फलावच्छिन्नत्वं यदि न धात्व
र्थस्तदा क्रियामात्रस्यैव धात्वर्थत्वात् क्रियारूपैकार्थप्रतिपादकत्वात् पर्य्यायता स्यात् शक्यतावच्छेद
कैक्ये सति विभिन्नशक्यतावच्छेदकत्वस्य पर्य्यायत्वरूपत्वादिति भावः ढौकते आस्तामिति त्यजतीति
गमधातुनेव त्यजधातुनापि व्यापारबोधनादिति भावः नन्वेवमिति पूर्वपक्षे समाधत्ते मैवमिति द्वि
तीयायाः फलमर्थः तत्र गमधातुसमभिव्याहारे द्वितीयया संयोगरूपं फलं बोध्यत इत्यर्थः त्यजधा
तुसमभिव्याहारे च विभागरूपं फलं बोध्यत इत्यर्थः यथोक्तेति ग्रामं गच्छतीत्यत्रेव ग्रामं त्यजतीति
प्रयोगापत्तिप्रसंगनिराकरणादित्यर्थः नच व्यापारमात्रस्य धात्वर्थत्वे त्यजिगम्योः पर्य्यायत्वे इष्टाप
त्तिः ग्रामं गच्छतीत्यत्रेव ग्रामवृत्तिसंयोगानुकूलक्रियानुकूलकृतिमानिति बोधस्य गमधातुसमभि
व्याहाराभावात् ग्रामं त्यजतीत्यतोऽसंभवेन ग्रामं गच्छतीति वक्तव्ये ग्रामं त्यजतीति प्रयोगापत्तेर्वारयितु २१८

218A

शक्यत्वादितिभावः अवच्छेदकमेव धात्वर्थतावच्छेदकमेवफलावच्छिन्नव्यापारस्य धात्वर्थत्वादिति
भावः नन्वेवं द्वितीयायानैरर्थक्यापत्तिः फलस्यधातुतएवलाभादित्यतआह द्वितीयार्थत्वमिति ग्रा
मं गच्छतीत्यादौ ग्रामवृत्तिसंयोगावच्छिन्नक्रियानुकूलकृतिमानिति बोधस्य तत्रपूर्वकल्पेफलस्यद्वि
तीयार्थत्वात् ~~द्वितीयार्थएवाश्रयत्वेतिभावः नचैवमिति एवंद्वितीया~~ आधेयत्वसंसर्गमर्यादयाभास
ते अस्मिन्मतेतुफलस्यधात्वर्थत्वाद्द्वितीयार्थएवाश्रयत्वेतिभावः नचैवमिति एवं द्वितीयायाआ
धेयत्वार्थकत्वे भूमाविति भूमौ पततीत्यत्र भूम्यावाश्रयत्वस्याबोधात् भूमिपदोत्तरं द्वितीयापत्तिः
मन्मतेतुतत्रफलस्याबोधान्नतद्बोधकद्वितीयापत्तिरितिभावः समभिव्याहृतेति समभिव्याहृतोयोधातु
स्तदर्थतावच्छेदकंयत्फलंतदाश्रयताबोधकत्वंद्वितीयाया इत्यर्थः तथाचयत्रसमभिव्याहृतधात्वर्थता
वच्छेदकफलाश्रयत्वबोधस्तत्रद्वितीया भूमौपततीत्यादौतुपतधातोरकर्मकतया धात्वर्थतावच्छेदक
फलाभावेनतदाश्रयत्वाबोधात् आश्रयत्वबोधेपिनद्वितीयेतिभावः नचतथापिफलावच्छिन्नव्यापार
स्यधात्वर्थत्वेफलस्यैकदेशतयाकथंतत्रद्वितीयार्थाश्रयत्वादेरन्वयइतिवाच्यं आकांक्षावैचित्र्या
देकदेशेप्यन्वयस्वीकारात् अतएवपदार्थान्विताधेयत्वबोधकसप्तमीतोद्वितीयायाभेदापत्तिरि

न॰प्र॰ २१८ इयम् अत एवेति फलावच्छिन्नव्यापारस्य धात्वर्थत्वादेवेत्यर्थः ध्रुवमिति अन्यथा व्यापारमात्रस्य धा
त्वर्थत्वे फलस्य धात्वर्थतानवच्छेदकतया कर्मत्वं दुर्वचमिति भावः ननु मास्तु धात्वर्थतावच्छेदकफलश
२१९ शालित्वं कर्मत्वं किं तु क्रियाजन्यफलशालित्वमत आह नहीति तदिति कर्मत्वमित्यर्थः चैत्रो ग्रामं
गच्छतीत्यत्रोत्तरदेशसंयोगावच्छिन्नक्रिया गमधातोरर्थः तज्जन्योत्तरदेशसंयोगरूपफलशालित्वात्
ग्रामस्य कर्मत्वं न च संयोगस्य द्विष्ठत्वाच्चैत्रस्यापि कर्मत्वापत्त्या चैत्रः स्वात्मानं गच्छतीति प्रयोगापत्ति
रिति वाच्यं परसमवेतत्वस्य क्रियाविशेषणत्वात् तथा च परसमवेतायाः क्रियायास्तज्जन्यफलशालित्वं
कर्मत्वं न चोभयकर्मजस्थले मल्लो मल्लं गच्छतीतिवत् मल्लः स्वात्मानं गच्छतीति स्यादिति वाच्यं
प्रकृत्यर्थापेक्षया हि परत्वं द्वितीयादिना बोध्यते ग्रामं गच्छतीत्यत्र ग्रामभिन्नसमवेतग्रामवृत्तिसं
योगजनकक्रियानुकूलकृतिमानित्यन्वयः स्वात्मानं गच्छतीत्यत्र स्वात्मभिन्नसमवेतास्वात्मवृ
त्तिसंयोगजनिकाया मल्लान्तरवृत्तिक्रियातदनुकूलकृतिमत्त्वस्य स्वस्मिन्नसम्भवेन तादृशप्रयोगा
पत्तिवारणात् अथ प्रकृत्यर्थस्यान्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्वसंबंधेन परत्वेऽन्व
ये पृथिवीं त्रयाति विहग इत्यत्र पृथिवीत्वस्यान्वयितावच्छेदकतया तदवच्छिन्नभिन्नत्वस्य विहगेऽ २१८

219A

भावादनन्वयापत्तिः प्रतियोगितामात्रेणैवान्वये च द्वित्वावच्छिन्नभेदमादाय स्वात्मानं प्रयातीति प्रयो
गापत्तिरिति चेन्न द्वितीयार्थफले यच्छक्तेरन्वयस्तच्छक्तित्वावच्छिन्नप्रतियोगितासंबंधेन प्रकृत्यर्थस्य पर
त्वेऽन्वयात् पृथिवीं प्रयाति विहग इत्यादौ यत्पृथिवीवृत्तिसंयोगजनकं प्रयाणं शाब्दबोधविषयस्तच्छ
क्तिभिन्नत्वस्य विहगेऽबाधादिति केचित्तु सामान्यपदस्य विशेषपरतया पृथिवीपदेन भूखण्डमेव बुध्
ध्यते ननु वृक्षविहगसाधारणपृथिवीत्वजात्यवच्छिन्नमित्यन्वयितावच्छेदकावच्छिन्नप्रतियोगिताकत्व
संबंधेन प्रकृत्यर्थस्य परत्वेऽन्वयेऽपि न दोष इत्याहुः वृक्षभूम्योरिति वृक्षस्य कर्मजन्यविभागाश्रयतया
भूमेश्च कर्मजन्यसंयोगाश्रयतयेत्यर्थः पतनरूपक्रियाजन्यं फलं पूर्वदेशेन वृक्षेण सह विभागः भूमिरूपो
त्तरदेशसंयोगश्चेति वृक्षभूम्योरुभयोरपि कर्मत्वापत्तिः पतधातोरकर्मकतया त्यापत्तेरयोगादिति भावः इ
दमुपलक्षणं गमनजन्यविभागरूपफलशालित्वस्य पूर्वदेशे सत्वाद्गमेः पूर्वदेशकर्मत्वापत्तिः त्यजेश्चोत्तरे
स्मिन्देशे संयोगे च पूर्वापरयोः कर्मत्वापत्तिरिति द्रष्टव्यं पततीत्यर्थतया पतधात्वर्थतया दुस्त्यजमिति ।
धात्वर्थतावच्छेदकाधःसंयोगादिरूपफलशालित्वादिति भावः पततीत्यर्थ इति अधःसंयोगावच्छिन्नक्रि
यानपततीत्यर्थः किंतु गुरुत्वासमवायिकारणीक विजातीयक्रियामात्रमिति धात्वर्थतावच्छेदकफलाभा

त०प्र० वेनन कर्मत्वापत्तिः ननु धात्वर्थतावच्छेदकफलशालित्वस्य कर्मत्वरूपत्वे चैत्रो ग्रामं गच्छतीत्यत्रो-
२२० त्तरदेशसंयोगावच्छिन्नक्रियायां गमधात्वर्थे हि तद्धात्वर्थतावच्छेदकसंयोगरूपफलशालित्वस्य ग्रा-
मस्येव चैत्रेऽपि सत्वात्तत्रापि कर्मत्वापत्तिः न च चैत्रः स्वात्मानं गच्छतीति प्रयोगापत्तिरत आह तद्धात्व-
२२० र्थेति यद्धात्वर्थतावच्छेदकफलशालित्वं तद्धात्वर्थानधिकरणत्वे सतीत्यर्थः तेन कर्मणो धात्वर्थान-
धिकरणत्वेऽपि नासंभवः नचैत्रस्येति गमधात्वर्थतावच्छेदकं यत्फलं ग्रामवृत्तिसंयोगस्तदाश्रय-
त्वेऽपि चैत्रस्य न कर्मत्वमित्यर्थः गमनरूपधात्वर्थानधिकरणत्वाभावादिति भावः स्वी कुर्वतीत्यने-
नास्वरसः सूचितः सच फलावच्छिन्नव्यापारस्य धात्वर्थत्वे द्वितीयार्थाश्रयत्वस्य तदेकदेशे फलेऽन्व-
यस्वीकारे एकदेशान्वयापत्तिः एवं यल्लक्षणे सन्नार्थकाकर्मकधातूनां व्यापारमात्राधिकतया तत्र
पर्य्याप्त्यापत्तिवारणेऽपि नैव सकर्मकधातूनामपि पर्य्याप्तवारणे किमिति गुरुफलावच्छिन्न-
व्यापारत्वे शक्यतावच्छेदकं नचैवं कर्मत्वस्य दुर्वचत्वापत्तिरिति वाच्यं परसमवेततत्तद्धात्वर्थान्वयि
फलविशेषशालित्वं तत्तद्धात्वर्थकर्मत्वमिति तन्निर्वचनात् संयोगरूपफलविशेषस्य गमधात्वर्था-
न्वयितात्तदुत्तरदेशे कर्मत्वं विभागरूपस्य फलस्य च गमधात्वर्थानन्वयेन पूर्वदेशे कर्मत्वापत्त्या २२०

भावात् पचतीत्यत्र फलविशेषावबोधनाद्धात्वर्थान्वयिफलविशेषशालित्वरूपकर्मत्वस्य नरत्वभ्रमोप
रापत्तिरिति अत्रेदमवधेयं कर्त्राख्यातस्थले चैत्रः पचतीत्यादौ पाकानुकूलकृतिमांश्चैत्र इति शाब्दबो
धः कर्माख्यातस्थले च चैत्रेण पच्यते तण्डुल इत्यादौ तृतीयाया आधेयत्वमर्थः फलावच्छिन्नव्यापारो
धात्वर्थः आख्यातस्य कृतेर्लाभः तथा च चैत्रनिष्ठकृतिजन्यपाकजन्यफलशालीं तण्डुल इत्य
न्वयबोधः आख्यातार्थकृतेर्धात्वर्थविशेष्यत्वविशेषणत्वाभ्यामेव कर्त्राख्यातकर्माख्यातव्यवहार
इति प्राञ्चः नव्यास्तु क्रियाजन्यफलशालित्वरूपकर्मत्वबोधस्य कर्माख्यातस्थले आख्यातस्य फल
बोधकत्वं विनानुपपत्तिः तथाहि फलस्य प्रकारतया भानात् संसर्गमर्यादया भानासंभवः फलाव
च्छिन्नव्यापारस्य धात्वर्थत्वेपि विशेषणविशेष्यभावव्यत्यासस्यासंभवात् क्रियाजन्यफलशालित्वं
कथं बुध्येत इत्थं च फलस्यात्मनेपदार्थत्वे व्यापारमात्रं धात्वर्थः चैत्रेण गतमित्यादौ तृतीयायाः कर्तृ
त्वार्थकत्वावश्यकतया तृतीयाया एव कृतिरर्थः आख्यातार्थकृतेर्धात्वर्थविशेष्यतयैव भानस्य क
र्त्राख्यातस्थले त्वस्मन्मते इष्टापत्तेः सुबर्थकृतेस्तु धात्वर्थविशेषणत्वेनैव भानत्वात् कर्तृत्वकर्मत्वबो
धकत्वादेव च कर्तृकर्माख्यातव्यवहार इत्याहुः वैयाकरणास्तु आख्यातस्य कर्तरि शक्तिः कर्तृकर्म

त॰प्र॰ भिधानानभिधानाभ्यां तृतीयाद्वितीयानियमस्य कर्तृकर्मसंख्याभिधानानभिधानाभ्यामुपपन्नत्वेऽपि ला
२२१ घवादेव तत्र शक्तिः तथाहि चैत्रः पचतीति शाब्दसामग्रीकाले कर्तृप्रकारकज्ञानाभावप्रत्यक्षवारणा
221 यत्नाश्रयप्रत्यक्षे शाब्दसामग्र्याः प्रतिबंधकत्वं कल्पनीयं वैयाकरणमते तु विषयासत्त्वेनैव तादृशप्रत्य
नि ४ क्षवारणान्न तत्कल्पनं न च मन्मतेऽपि प्रकारकज्ञानाभावप्रत्यक्षे ममापि न तत्कल्पनमिति वाच्यं कर्तृप्रकारक
ज्ञानकाले कृतिप्रकारकज्ञानस्यावश्यकतया ममापि विषयासत्त्वेनैव तद्वारणात् कृतिप्रकारकज्ञान
काले च कर्तृप्रकारकज्ञानस्याभावेन साम्याभावात् एवं शाब्दसामग्र्यभावे तादृशप्रत्यक्षे हेतुत्वं प्रतिबं
धकल्पने गौरवमित्याहुः तदसत् गुरुशरीरकर्तृप्रकारकयोग्यताज्ञानकर्तृभेदज्ञानाभावादिरू
पबाधाभावादिघटिततथाविधशाब्दसामग्र्यभावे घटपटादिप्रत्यक्षकारणत्वकल्पने गौरवात् लाघवे
न कृतित्वज्ञानेऽरेवाख्यातशक्यत्वादिति दिक् तस्य शाब्दस्येति वृत्तिमच्छब्दस्येत्यर्थः निराकांक्षत्वादावि
ति आदिना योग्यतासत्तिपरिग्रहः सहकारीति ज्ञायमानं सत्सहकारीत्यर्थः तत्राकांक्षां निरू
पयति तत्रेति बाधशान्वयेति यद्विशेष्यकयत्प्रकारकयत्संसर्गकान्वयबोधाजनकमित्यर्थः प्र
ह्रदमेवोपपादयति भवतिहीति नामपदमिति घटमानयेत्यत्र नामपदं घटपदं उत्तरवर्त्ति विभ २२१

क्तिपदेन स्वोत्तरवर्त्तिअम्रूपविभक्तिपदेनसहैव अन्वयेति घटीयकर्मतेति आधेयतासंसर्गक
घटप्रकारककर्मत्वविशेष्यकान्वयबोधजनकमित्यर्थः अतस्तस्येति घटपदस्यविभक्तिसमभि
व्याहार इत्यर्थः नाद्यान्वयेति घटीयाकर्मतेत्यन्वये आकांक्षेत्यर्थः अतएवेति याद्दशान्वयेर
ति प्रवेशादेवेत्यर्थः घटः कर्मत्वमिति घटः कर्मत्वमानयनेकृतिरितिनिराकांक्षत्वात्समानवि
भक्तिकनामपदयोरभेदान्वयसाकांक्षत्वेनघटः कर्मत्वमित्यादावभेदान्वयसाकांक्षत्वेप्याधेयता
संबंधेनसाकांक्षत्वाभावात्ताद्दशान्वयमितिविवक्षणीयमितिभावः योग्यताभ्रमेणान्वयबोधस्येष्टत्वा
दुष्टमितिवदित्युक्तं घटीयाकर्मतेतिनान्वयबोधइत्यर्थः आकांक्षेति घटपदाम्पदसमभिव्याहाररू
पाकांक्षाविरहादित्यर्थः धातुपदंचेति आनयेत्यत्रधातुपदं चाख्यातपदेनैवसहानुकूलतासंसर्गकान
यनप्रकारककृतिविशेष्यकान्वयबोधजनकमिति भवतितत्र धातुपदे आख्यातपदसमभिव्याहार
आकांक्षेत्यर्थः अतएव धातुपदे आख्यातपदसमभिव्याहारस्याकांक्षात्वादेव आनयनेकृतिरि
त्यभेदान्वयसाकांक्षत्वेपिआनयतीत्यत्रानुकूलतासंसर्गकानयनप्रकारककृतिविशेष्यकोना

त॰प्र॰ न्वयबोध इत्यर्थः कृतीति कृतिवाचकाख्यातसमभिव्याहाराभावेनैवेत्यर्थः निराकांक्षत्वादिति
२२२ मानयनानुकूला कृतिरित्यन्वयबोधे निराकांक्षत्वादित्यर्थः नन्विति कर्मत्वबोधे कर्मत्वोपस्थापकप
दत्वेन कारणतया घटः कर्मत्वमित्यत्रापि कर्मत्वोपस्थापकपदसत्त्वेन घटमितिवत्कुतो नान्वयबोधः का
222 र्यस्य सामग्र्याः अत्रापि सत्वादिति भावः कर्मत्वादीनामिति घटादिनामसहेति शेषः स्यार्थेति ना
मार्थेत्यर्थः तदिति कर्मत्वोपस्थापकेत्यर्थः तथा चाश्रयाश्रयिभावसंबंधेन नामार्थनिष्ठकर्म
त्वविषयकशाब्दबोधत्वावच्छिन्नं प्रति नामपदसमभिव्याहृतद्वितीयापदज्ञानत्वेन कारणत्वात् घटः क
र्मत्वमित्यादौ तदभावान्न घटमितिवदन्वयबोध इति भावः हन्तैवमिति एवमाधेयतासंसर्गकना
मार्थनिष्ठकर्मत्वान्वयबोधे कर्मत्वोपस्थापकविभक्तेरेव सहकारित्वे घटः कर्मत्वमित्यादेर्निराकांक्ष
त्वमिति यावत् व्युत्पत्तिरिति आधेयतासंबंधेन घटीयाकर्मेत्यन्वयबोधे घटः कर्मत्वमिति स
मभिव्याहारः कारणमिति कारणत्वमतः अभूदित्यर्थः तत इति घटः कर्मत्वमित्यादिवाक्या
दित्यर्थः कर्मत्वोपस्थापकविभक्तिसमभिव्याहाराभावादिति भावः तस्मिन्पुरुषे घटः कर्मत्व

222A

मित्यादिनिराकांक्षवाक्ये विपरीतव्युत्पन्न इत्यर्थः काकयेति तथाच तादृशपुरुषस्यालीकतया तस्यान्वयबो
धस्याप्यलीकतया घटीयाकर्मतेत्यन्वयबोधे कर्मत्वोपस्थापकविभक्तित्वेन कारणतायां न व्यभिचार इति भा
वः तादृशः स्यात् घटः कर्मत्वमिति वाक्ये विपरीतव्युत्पन्नः स्यात् तस्य किमिति तस्यान्वयबोधः कथं भ
विष्यतीत्यर्थः कर्मत्वोपस्थापकविभक्तिसमभिव्याहाराभावादिति भावः शाब्देति घटीयाकर्मते
ति शाब्दबोधाभाव इत्यर्थः ननु कथं न तत्र कार्यमत आह अन्वयेति प्रायशो घटमिति वाक्याद्व्यु
त्पन्नानां घटः कर्मत्वमिति वाक्यात् घटीयाकर्मतेत्यनुभवाभावेन तादृशान्वयबोधे घटमिति समभि
व्याहारस्य कारणत्वावश्यकतया पुरुषभेदेन कारणताकल्पने गौरवात् घटः कर्मत्वमिति वाक्यात्तस्या
प्यन्वयबोध इति आधेयतासंसर्गकघटप्रकारककर्मत्वविशेष्यकशाब्दबोधे घटपदसमभिव्याहृतक
र्मत्वोपस्थापकद्वितीयाविभक्तित्वेन कारणत्वे न व्यभिचार इति दिक् तस्यापीति समभिव्याहाररूपाया
आकांक्षाया ज्ञानं कारणमित्यर्थः तद्भ्रमेणेति समभिव्याहारभ्रमेणेत्यर्थः अन्वयेति स्वरूपसत्या
स्तस्या हेतुत्वे स्वरूपसत्यास्तत्राभावेन शाब्दानुदयप्रसंगात् तज्ज्ञानं कारणं तच्च भ्रमात्मकं तत्र संभवत्येवे
ति भावः प्रकृतेति यद्विशेष्यकयत्प्रकारकयत्संसर्गकोन्वयबोधस्तत्समानाकारकस्तद्विशेष्यकत

प्रकारकसंसर्गकोयः स्वजन्यान्वयबोधः पदजन्यान्वयबोधस्तद्विरहः प्रकृतान्वये तद्विशेष्यकतत्प्रका
रकतत्संसर्गकान्वयबोधे स्वरूपसती अपरामाकांक्षाहेतुरित्यर्थः अतइति अपराकांक्षायाः स्वरूपस
त्याहेतुत्वादित्यर्थः एकदेति घटकर्मकमानयनमिति बोधे जनिते अन्वयबोधांतरं न जनयतीत्यर्थः
तत्र हेतुमाह स्वजन्येति वाक्यजन्यानुभवविरहरूपकारणाभावादित्यर्थः घटमानयेत्यत्र घटकर्म
कानयनानुकूलाकृतिरिति शाब्दबोधे जाते पुनस्तादृगन्वयबोधापत्तिवारणाय प्रकृतशाब्दबोधाभा
वरूपाकांक्षाया अपि कारणत्वमावश्यकमिति भावः एवं चेति स्वजन्यान्वयबोधविरहरूपाकांक्षा
याअवश्यहेतुत्वे चेत्यर्थः गामिति दंडेन गामानयेत्यत्रावांतरवाक्यार्थबोधपूर्वकस्यैव महावाक्यार्थ
बोधस्यानुभवसिद्धत्वात् गोकर्मकानयनमित्यन्वयबोधे जाते दण्डेनेत्यन्वयबोधे दण्डकरणकगोक
र्मकमानयनमिति महावाक्यार्थबोधे निराकांक्षता स्यादित्यर्थः नचेति नहीत्यर्थः गामिति गोकर्म
कमानयनमित्यन्वयबोध इत्यर्थः प्रकृतः दण्डेन गामानयेति वाक्यतात्पर्यविषयः तेन गामानयेत्य
न्वयबोध इत्यन्वयबोधेन समानाकार इति समानविषयक इत्यर्थः तथा च प्रकृतान्वयबोधसमा
नाकारत्वे स्वजन्यानुभवे विशेषणमिति भावः नन्वेवमन्वयबोधद्वयं जायतामिति तात्पर्ये घटमानये

२२३A

तिवाक्यादेकबोधे जातेऽपरान्वयबोधो न स्यादित्यत आह दिगिति एवं तात्पर्यविषयत्वमप्यन्वयबोधे
विशेषणमित्यर्थः तथा च तात्पर्यविषयीभूतबोधद्वयस्य तत्राजातत्वान्नाकांक्षा तत्तिरिति योग्यता ल
क्षयति योग्यता चेति एकपदार्थेऽपरपदार्थस्य याधशसंसर्गवत्त्वं तादृशसंसर्गवत्त्वं योग्यतेत्यर्थः
लक्षेलक्षणं योजयति पयसीति नन्वेवं करकाभिप्रायप्रयुक्तेपयसा सिंचतीतिवाक्यमपि योग्यं स्या
दित्यत आह यस्मिंश्चेति करका समुद्रमध्यस्थितजलादावित्यर्थः तस्मिन् करकादिरूपेपयसि ऽयो
ग्यमिति एकाकारवाक्यस्यापि विषयवाधावाधाभ्यां योग्यायोग्यत्वादिति भावः आकाशमिति आका
शशब्दसमवायसत्त्वात् अभेदान्वयमादायापि योग्यत्वापत्तिरिति प्रकृतेति विशेषणोपादानं तथा
चैकपदार्थेऽपरपदार्थस्य याद्दशसंसर्गवत्त्वं तत्संसर्गमादाय योग्यता प्रकृते चाभेदसंसर्गस्याकाश
शब्दयोर्वोधात्तदभेदसंसर्गमादायायोग्यतेति अस्याश्चेति एकपदार्थेपरपदार्थसंसर्गवत्त्वरूपयोर
ग्यतायाश्चेत्यर्थः तद्भ्रमेणापि योग्यताभ्रमेणापि अन्वयेति करकाभिप्रायप्रयुक्तेपयसा सिञ्चती
त्यत्रान्वयबोधादित्यर्थः स्वरूपसत्यास्तस्याः कारणत्वे करकायां सेकसंसर्गस्यासत्त्वेन शाब्दबोधानु

त॰प्र॰
२२४
224

रयप्रसंगात्तज्ज्ञानं कारणमिति भावः एतन्मतेपि वह्निनास्सिंचतीतिवाक्यं स्वरूपायोग्यं बोध्यं तदुक्तं नहि
आरोपितसामर्थ्यं इह तिष्ठतीति चेति संसर्गस्य पयसि सेकसंसर्गस्य अपूर्वत्वात् शाब्दबोधात्पूर्वम
प्रतीतत्वात् कथमिति तथा च कथं योग्यताज्ञानं शाब्दबोधकारणमिति भावः ज्ञानमात्रमिति संश
यनिश्चयसाधारणं ज्ञानमात्रमित्यर्थः अत्र पयसा सिंचतीत्यत्र संशयरूपं ज्ञानमिति तथा च निश्च
यरूपज्ञानस्य पूर्वमसत्त्वेपि संशयसत्त्वात्तज्ज्ञानकारणत्वे बाधकाभाव इति भावः ननु निश्चयस्य क्व
चित्पूर्वं सत्त्वे तत्साधारणं ज्ञानं स्यात्तदेव तु कुत इत्यत आह क्वचिदिति तत्तन्निश्चयोपि योग्यतानिश्चयोपि
संभवतीत्यनुषज्यते निश्चयस्थलमाह प्रत्यक्षेणेति दृष्टे घटे दृष्टे घटोस्तीति भूतले घटनि
श्चयो जाते भूतले घटोस्तीति वाक्याच्छाब्दबोध इत्यर्थः शाब्दसिद्धेरेव शाब्दबोधप्रतिबंधकतया प्रत्यक्ष
निर्णयेपि शाब्दबोधे कदयादिति भावः अत एव स्वजन्यान्वयबोधविरहं आकांक्षेत्युक्तं न त्वन्वयबोधविर
ह इति असंसर्गाग्रह इति तेन संबंधेन तदभावग्रह इत्यर्थः प्रतिबंधकः शाब्दबोधे प्रतिबंधकः तद
भावः तेन संबंधेन तदभावाग्रहः [illegible] योग्यतेत्यर्थः सा असंसर्गाग्रहरूपा योग्यता स्वरूपसती शाब्द २२४